PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 24.3

अजितागमः

AJITĀGAMA

III

édition critique

N. R. Bhatt



INSTITUT FRANÇAIS DE PONDICHÉRY

SV.. Library
S.No.- 370.
Subject- Shaiva Philosophy
Sub. Code- SP

No. 24.3
N. R. Bhatt

अजितागमः AJITĀGAMA

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 24.3

अजितागमः

AJITĀGAMA

III

édition critique

N. R. Bhatt

INSTITUT FRANÇAIS DE PONDICHÉRY

© Institut Français, Pondichéry, 1991
(ISSN 0073-8352)
Composition et
Impression – Imprimerie de Sri Aurobindo Ashram, Pondichéry
Couverture – Conception: Françoise Boudignon
Photo:
Les cinq plateaux de lumière, représentant les cinq formes principales de Śiva, offerts pendant la pūjā. *(Cliché EFEO)*

À ce dernier volume de l'édition de l'Ajitāgama, œuvre de Śrī N. R. Bhatt, ont collaboré Śrī Rāmānuja Aiyangār, Śrī R. Subrahmaṇya et Śrī S. Sambandan Śivācārya du Département d'Indologie de l'Institut Français de Pondichéry.

J.-P. Pascal

उपोद्घातः

अजित ! त्वदुपासनाय पूर्वं
प्रयतैरंशत एव रक्षितः ।
अजितागम एष पावनानां
सुधियां पाणितलेषु शोभताम् ।।

पूर्वं प्रकाशितयोर्भागयोरजितागममातृकास्थाश्चतुःपञ्चाशत्पटलाः प्रकाशिताः। तासु मातृकासु ये पटला अवशिष्टास्तथा चान्यत्र तालपत्रेषु 'अजिते' इति शीर्षकं दत्वोद्धृता ये पटलास्तत्रोपलब्धाः, पद्धतिरूपासु मातृकासु मुद्रितेषु पुस्तकेषु चोद्धृता ये पटलास्तेषां संग्रहं कृत्वा तृतीयभागात्मना प्रकाश्यते। तृतीये चास्मिन्भागे पञ्चपञ्चाशपटलादारभ्य त्र्यधिकशततमपटलपर्यन्तम् एकोनपञ्चाशत्पटलाः, अनुबन्धरूपेण पञ्चपटलाः, आहत्य चतुःपञ्चाशत्पटला अन्तर्भवन्ति। पूर्वं प्रकाशितयोर्भागयोरस्मिन्भागे च मुद्रितानां श्लोकानामर्धानुक्रमणिका, अन्यत्रोदाहतानामजितागमश्लोकानां सूची, अजितागमत्वेनान्यत्रोदाहता एतावत्पर्यन्तं मुद्रितेऽजितागमेऽनुपलब्धाश्च श्लोकाः, उपयुक्तग्रन्थसूची, विषयानुक्रमणिका च यथाक्रममन्ते प्रदर्श्यन्ते।

अत्रोपोद्घाते पठितॄणां सुलभावगमाय यथापूर्वं पटलार्थसंग्रहो दीयते। तदनु एतद्ग्रन्थसंपादनोपयुक्तमातृकासूची, टिप्पण्यां तत्रतत्रोपयुक्तसंकेतानां सूची च दीयते।।

पटलार्थसङ्ग्रहः

पञ्चपञ्चाशे पटले बालगणपतिः, भक्तगणपतिः, वीरगणपतिः, शक्तिगणपतिः, विधिगणपतिः, पिङ्गलगणपतिः, उच्छिष्टगणपतिः, रक्तगणपतिरथवा विघ्नराजगणपतिः, क्षिप्रगणपतिः, हेरम्बगणपतिः, लक्ष्मीगणपतिः, स्वर्णगणपतिः, नृत्तगणपतिः, महागणपतिः, ऊर्ध्वगणपतिः, हरिद्रागणपतिरित्याख्यानां षोडशगणपतीनां ध्यानानि केवलमभिधीयन्ते। परं त्वेतत्पटलपुष्पिकायां षोडशगणपतिस्थापनविधिरिति दृश्यते। पूर्वं प्रकाशितस्यास्यैवागमस्य द्वितीयभागे एकोनपञ्चाशे पटले सामान्यतया विनायकस्थापनविधिरभिहितः। तत्र सर्वाः स्थापनक्रिया निरूपिताः। तथापि षोडशगणपतीनां नामानि तत्र न निर्दिष्टानि। अतोऽत्रानुक्ताः स्थापनक्रियाः पूर्वं विनायकस्थापनपटलोक्तवदनुष्ठेया इति भावनयात्र षोडशगणपतिस्थापनविधिरिति नाम निर्दिष्टमिति भाति। एवं **पञ्चपञ्चाशपटलार्थसंग्रहः ।**

षट्पञ्चाशे पटले क्षेत्रपालस्थापनविधिर्निरूप्यते। तत्र प्रथमं भवस्य क्षेत्रपालकस्वरूपस्वीकरणे हेतुः क्षेत्रपालोत्पत्तिश्च कथ्यते। तदनु क्षेत्रपालमन्त्राः, क्षेत्रपालस्थानोचितस्थानं, स्थापनार्थं मण्डपकल्पनं, कुण्डकल्पनं, क्षेत्रपालप्रतिमायाः नेत्रोन्मीलनं, तदनन्तरं जलाधिवासः, शयनाधिवासः, कुम्भस्थापनं, कुम्भपूजाप्रकारः, कुण्डेषु होमः, अधिवासानन्तरं परेऽहनि कर्तव्यः पुनर्होमः, पूर्णाहुतिः पुनः पूजेत्यादिकाः क्रिया वर्ण्यन्ते। ततो गर्भगेहे आधारशिलायां रत्नन्यासं कृत्वा पीठसन्धानपूर्वकं प्रतिमास्थापनं, सत्कारपूर्वकं शिल्पिविसर्जनं च विधीयते। पञ्चमृद्भिः पञ्चामृतैर्गन्धतोयैश्च बिम्बशुद्धिं कृत्वा यागमण्डपात्कुम्भानानीय तत्कुम्भतोयैर्बिम्बमभिषेचयेत्। ततो देवमर्चयित्वा ब्राह्मणान् भोजयेत्। यजमानः दक्षिणादानपूर्वकमाचार्यं पूजयेत्। एवं कृते राजा सर्वत्र विजयी भवेदिति **षट्पञ्चाशपटलार्थसंग्रहः ।**

सप्तपञ्चाशे पटले परिवारस्थापनविधिरभिधीयते। परिवारालयस्याग्रे पार्श्वयोरुभयोर्वा यागमण्डपं निर्माय तत्र मध्ये वेदिकां संप्रकल्प्य मण्डपं वितानाद्यैरलङ्कृत्य पुण्याहवाचनकर्म निर्वर्तयेत्। परिवारप्रतिमाया नेत्रोन्मीलनं कृत्वा बिम्बशुद्धिपूर्वकं जलाधिवासं शयनाधिवासं च कुर्यात्। ततः प्रतिमायाः शिरोभागे प्रधानकुम्भं दिग्विदिक्षु चाष्टकलशान् विन्यस्यार्चयेत्। होमविधौ नवकुण्डकल्पने दिक्षु चतुरश्रकुण्डानि, विदिक्षु वृत्तकुण्डानि, ऐशान्ये

प्रधानं पद्मकुण्डम्, एवं पञ्चकुण्डकल्पने चतुर्दिक्षु चतुरश्राणि कुण्डानि प्रधानं पद्मकुण्डं प्रकल्प्य होमः कार्यः। कुण्डाभावे सर्वत्र सैकतस्थण्डिलं कृत्वा होमं साधयेत्। अधिवासानन्तरं परेद्युः मण्डपे प्रतिमां कुम्भांश्च पूजयित्वा होमं कृत्वा पूर्णां विधाय प्रतिमामुद्धृत्य रथादिषु समारोप्यालयप्रदक्षिणपूर्वकं गर्भगृहं प्रवेश्य रत्नहेमादिसंयुतेऽवटे प्रतिमां स्थापयेत्।

ततश्च शिल्पिनं विसृज्य पञ्चगव्यैर्गन्धतोयेन च प्रतिमाशुद्धिं कृत्वा पुण्याहजलेन संप्रोक्ष्य ततो यागमण्टपात्कुम्भानुद्धृत्य धामप्रदक्षिणं कृत्वा गर्भगेहे प्रवेश्य कुम्भस्थान् मन्त्रान् प्रतिमायां यथाविधि संयोजयेत्। प्रधानकुम्भतोयेन प्रतिमामभिषिच्य परितोऽष्टौ कुम्भानभिषेचयेत्। पश्चात्प्रतिमायां मातृकान्यासं कृत्वा पुनरभिषिच्य गन्धाद्यैरभ्यर्च्य नैवेद्याद्युपचारान् समर्पयेत्। परिवारप्रतिमाभावे पीठानि प्रकल्पयेदिति **परिवाराणां पीठप्रतिष्ठाप्रकारो निरूप्यते। तदनु महापीठप्रतिष्ठाविधिरुच्यते। उक्तस्थाने प्रपां कृत्वा होमकर्मणि सर्वत्र चतुरश्राणि कुण्डान्यैशान्ये प्रधानं वृत्तकुण्डं प्रकल्प्य, एककुण्डविधाने प्राच्यामेव कुण्डं प्रकल्प्य गोमयेन शुद्धिं कृत्वा पुण्याहं वाचयेत्।**

ततोऽधिवासकर्म निर्वृत्य कलशस्थापनं कृत्वा संपूज्य कुम्भतोयैरभिषिच्य संपूज्य गुलान्नं परमान्नं शुद्धान्नं च निवेद्य मुखवाससहितं ताम्बूलं समर्प्य पूजयेदिति **सप्तपञ्चाशपटलार्थसंग्रहः।**

अष्टपञ्चाशे पटले विष्णुस्थापनं विधीयते। तत्रादौ ग्रन्थपातो वर्तते। ततो नेत्रोन्मीलनपूर्वकं श्रीभूमिसहितस्य विष्णोर्नेत्रोन्मीलनपूर्वकं प्रतिमास्थापनोक्तवत्सर्वाः क्रियाः कृत्वा स्थापनं कुर्यात्। तथैव नृसिंहरूपस्यापि स्थापनं कर्तव्यम्। एवं विष्णुस्थापनं यः कुर्यात्स इह लोके सुखं प्राप्य परां गतिमाप्नुयादिति फलश्रुतिर्दृश्यते। **एवमष्टपञ्चाशपटलार्थसंग्रहः।**

एकोनषष्टितमे पटले सरस्वतीस्थापनविधिः कथ्यते। प्रथमतः सरस्वतीस्थापनयोग्यस्थानानि कथितानि। तदनन्तरं श्वेतवर्णा श्वेताम्बुजासीना एकवक्त्रा त्रिनयना चतुर्भुजा संदंशमक्षमालां च दक्षिणोर्ध्वाधःकरयोः पुस्तकं कमण्डलुं च वामोर्ध्वाधःकरयोः धारयन्ती चारुवदना सरस्वती कार्येति मूर्तिलक्षणमभिहितम्।

ततस्तस्याः संस्थापनार्थं मण्डपं प्रकल्प्य तत्र चतुर्दिक्षु योन्याकाराणि कुण्डानि ऐशान्ये प्रधानं वृत्तकुण्डं च परिकल्प्य मध्ये वेदिं कुर्यात्। ततो गोमयेन मण्डपशुद्धिं कुर्यात्। परिकल्पितस्नानमण्डपे प्रतिमामानीय नेत्रोन्मीलनकर्मनिर्वृत्यानन्तरं प्रतिमाशुद्धिं कृत्वा जलाधिवासं शयनाधिवासं च समाप्य पुनः प्रतिमां स्नानमण्डपे वेदिकायां संस्थाप्य गन्धतोयैरभिषिञ्चेत्। ततः प्रतिमायाः शिरःस्थाने प्रधानकुम्भं परितोऽष्टकलशांश्च संस्थाप्य तत्र दिक्षु श्रियं शशीमुषेन्द्राण्यौ विदिक्षु निवृत्तिं प्रतिष्ठां विद्यां शान्तिं च संपूज्य कुण्डेषु होमकर्म कुर्यात्। परेऽहनि पुनः पूजां कृत्वा होमं परिसमाप्य गर्भगेहे दैविके मानुषे वा पदे रत्नहेमादियुक्तेऽवटे स्थापयेत्। ततः पीठं संधाय शिल्पिनमुद्वासयेत्। देशिकः स्नात्वाचम्य प्रतिमाशुद्धिं कृत्वा पुण्याहं वाचयित्वा होतृभिः सह यागमण्डपात्कुम्भानादाय देव्यग्रे स्थण्डिले स्थापयित्वा मन्त्रन्यासं कृत्वा कुम्भतोयैरभिषेचयेत्। तदनु प्रतिमामलंकृत्य संपूज्य नैवेद्यं दापयेत्। देव्याः पुरतो विद्यापीठे आगमादिपुस्तकं विन्यस्य देवीं पुस्तकं च प्रत्यहं पूजयेत्।

सरस्वती परिवारालये स्थापिता चेत् तदा पूर्वोक्तविधिर्विहितः। यदि सरस्वती प्रधानालये स्थापिता तदा हंसवाहनं पूर्वादिषु दिक्षु कमलादयः शक्तयश्च पूर्वोक्तक्रमेणाधिवासादि कर्मकलापं कृत्वा स्थापनीयाः। प्रधानालये पश्यन्ती मध्यमेति द्वे प्रतीहारदेवते स्थापयेत्। एवं कृते यजमानः वाञ्छितं फलं लभते। **एवमेकोनषष्टितमपटलार्थसंग्रहः।**

षष्टितमे पटले त्रिशूलादिस्थापनविधिर्निरूप्यते। पटलारम्भे ग्रन्थपातवशात्पूर्णतया त्रिशूललक्षणं नोपलभ्यते। सलक्षणं त्रिशूलं प्रकल्प्य मण्डपं निर्माय प्रागादिचतुर्दिक्षु चतुरश्र-धनु-वृत्त-त्रिकोणकुण्डानि ऐशान्ये पद्मकुण्डं च कृत्वा वेदिं स्थण्डिलमधिवासमण्डपं च प्रकल्प्य तत्र शूलस्थप्रतिमाया नेत्रोन्मीलनकर्म निर्वृत्य ग्रामप्रदक्षिणं कृत्वा तदनु जलाधिवासं स्नपनं च समाप्य मण्डपे वेदिकायां शयनेऽधिवासयेदिति प्रोच्यते। ततः कुम्भान् संस्थाप्य परितोऽष्टकलशान् विन्यस्य तोयेनापूर्य प्रधानकुम्भे महेश्वरं तत्पार्श्वे ब्रह्मविष्णू परितोऽष्टकलशेषु

लोकपालांश्च प्रपूजयेत्। ततः प्रधानकुण्डे ब्रह्मविष्णुमहेश्वरान् प्राक्कुण्डे भवानीं दक्षिणे विनायकं पश्चिमे षण्मुखं उत्तरे भानुं च पूजयेत्। होमानन्तरं त्रिशूलस्य सर्वानवयवान् संस्पृश्य कुण्डेषु त्रिशूलस्थितां मूर्तिमर्चयित्वा होमं समाप्य नैवेद्यं समर्पयेत्। परेऽहनि प्रभाते त्रिशूलं पुनरभ्यर्च्य होमं कृत्वा पूर्णाहुतिं दद्यात्। ततस्त्रिशूलमुद्धृत्य स्नानवेद्यां विन्यस्य पञ्चगव्यगन्धतोयादिभिरभिषेचयेत्। ततः कुम्भानुद्धृत्य शूलाग्रे स्थण्डिले विन्यस्य कुम्भजलेनाभिषेचयेत्। त्रिशूले न्यासं कृत्वा पुनर्गन्धोदकेनाभिषिच्य सर्वोपचारैः संपूज्य हविर्निवेदयेत्। ततश्चोत्सवं कुर्यात्। यद्यचलस्य शूलस्य प्रतिष्ठा क्रियते तर्हि रत्नन्याससहितेऽवटे शूलं स्थापयेत्। एवमन्येषां वज्राद्यायुधानां स्थापनं यः करोति स विरोधिनः सर्वान् जित्वान्ते गणपो भवेदिति **षष्टितमपटलार्थसंग्रहः।**

एकषष्टितमे पटले विमानप्रतिष्ठाविधिः प्रतिपाद्यते। ये देवा विमाने स्थितास्तेषां प्रतिष्ठा विमानप्रतिष्ठेत्युच्यते। तत्प्रतिष्ठायां विमानस्य चतुर्दिक्षु चतुरो मण्डपान् निर्माय तेषु मध्ये वेदीं प्रकल्पयेत्। पूर्वमण्डपे वेदीं परितश्चतुर्दिक्षु चतुरश्रकुण्डानि, दक्षिणमण्डपे धनुराकाराणि कुण्डानि, पश्चिमे वृत्तकुण्डानि, उत्तरे मण्डपे षडश्रकुण्डानि, सर्वत्र प्रधानं पद्मकुण्डमिति कुण्डकल्पनप्रकारोऽभिहितः। ततो मण्डपालङ्कारं कुर्यात्। वेदिकासु स्थण्डिलं प्रकल्प्य तत्र पद्ममालिख्य तेषु शक्तिसमूहमभ्यर्च्य देवान् सर्वान् संपूज्य पञ्च कुम्भान् समाहरेत्। वेदिमध्ये कुम्भं संस्थाप्य परितोऽष्टकलशान् स्थापयेत्।

ततः प्रासादोपरि पञ्चगव्यप्रोक्षणं कृत्वा पुण्याहं वाचयित्वा विमानस्य तत्रस्थमूर्तिनां च कौतुकं बन्धयेत्। ततः प्रासादं तत्रस्थमूर्तीश्च वस्त्रमाल्याद्यैरलङ्कृत्यान्तः प्रविश्य पञ्चगव्येन प्रोक्षयेत्।

ततो बहिर्विनिष्क्रम्य पूर्वदिक्स्थमण्डपं शिवास्त्रेण संप्रोक्ष्य वेद्यां शिवकुम्भं वर्धनीं च निक्षिप्य ईश्वरं मनोन्मनीं च पूजयेत्। तत्रैव शिवकुम्भस्य दक्षिणे स्कन्दकुम्भं संस्थाप्य संपूज्य तत्परितोऽष्टकुम्भेषु स्कन्दपरिवारान् पूजयेत्।

ततो दक्षिणदिक्स्थे ईशमण्डपे वेद्यां दक्षिणामूर्तिरूपकं प्रधानकुम्भं संस्थाप्य तत्परितोऽष्टघटेषु पूर्वादितो भवाद्यष्टमूर्तीर्यजेत्। तदनन्तरं पश्चिमदिक्स्थविष्णुमण्डपे वेद्यां विष्णुरूपकं प्रधानकुम्भं संस्थाप्य विष्णुबीजं विन्यस्य पूजयेत्। तत्परितोऽष्टकुम्भेषु संकर्षणाद्यष्टमूर्तीर्यजेत्। तत उत्तरदिक्स्थब्रह्ममण्डपे ब्रह्मरूपकं प्रधानकुम्भं संपूज्य तत्परितोऽष्टकुम्भेषु ब्रह्मपरिवारान् पूजयेत्। एवं पूजां समाप्य तत्तत्कुण्डेषु होमकर्म समाचरेत्। एतावत्पर्यन्तमेव मूलश्लोका उपलभ्यन्ते। होमानन्तरं क्रियामाणकुम्भतोयाभिषेचनप्रतिपादकग्रन्थो लुप्तः। **एवमेकषष्टितमपटलार्थसंग्रहः।**

द्विषष्टितमपटलस्यान्ते पुष्पिकायां 'गोलकादिस्थापनम्' इति विद्यमानत्वादत्र पटलशीर्षके गोलकादिस्थापनविधिरिति नामोल्लिखितम्। एतत्पटलारम्भे ग्रन्थपातो दृश्यते। उपलभ्यमानभागे पादुकास्थापनम्, मकुटादीनां प्रोक्षणं, देवाय तेषां समर्पणं च प्रतिपाद्यते। मण्डपे कुम्भान् संस्थाप्य पूजयित्वा तत्तोयैः पादुकेऽभिषिच्य स्थण्डिलोपरि स्थापयेत्। ततः पादुके मूर्घ्नि निक्षिप्य धामप्रदक्षिणं कृत्वा गर्भगेहं प्रविश्य देवाग्रे स्थापयेत् इति पादुकास्थापनमभिधाय तदनु देवाग्रे गोमयालिप्तमण्डपे स्थण्डिलं प्रकल्प्य तत्र मकुटादिभूषणानि निक्षिप्य मन्त्रवर्यैः प्रदक्षिणादीन् निर्वृत्य होमं विधायान्ते शिवाय मकुटादिभूषणानि देयानीति **द्विषष्टितमपटलार्थसंग्रहः।**

त्रिषष्टितमे पटले भक्तप्रतिष्ठाविधिर्निरूप्यते। भक्तानां प्रतिष्ठा कथं कर्तव्येति विष्णुकृतप्रश्नस्योत्तरदानरूपेण ईश्वरप्रोक्ता भक्तप्रतिष्ठात्र विशदतया दृश्यते।

प्रथमतः अनादिशैव-आदिशैव-महाशैव-अनुशैव-अवान्तरशैव-प्रवरशैव-आन्तरालिकशैवा इति सप्तविधशैवभेदाः प्रतिपादिताः। अनन्तरं तेषां लक्षणं प्रतिपाद्यते।

आद्यन्तरहितत्वादनादिशब्देन शिव एवोच्यते। स एवानादिशैव इत्यनादिशैवलक्षणं प्रोक्तम्। तदनु शिवसृष्टिसंभूतत्वादादिशैवाः शिवद्विजा इत्यादिलक्षणं संग्रहेण न्यरूपि। ब्रह्मसृष्टिजातत्वान्महाशैवा ब्राह्मणा इति महाशैवलक्षणं प्रोक्तम्। भूसुराचारकल्पत्वात्क्षत्रियवैश्यावनुशैवाविति अनुशैवलक्षणं चाभिहितम्। दीक्षाभिषेकयोग्यत्वाच्छूद्रा अवान्तरशैवा इति विजातियोनिसंभूताः पारशैवा इति विजातीयानुयोनिसंभूतत्वादान्तरालिका इति तेषां लक्षणं च निरूपितम्।

शिवभक्तियुक्ता ब्रह्मक्षत्रियवैश्यसच्छूद्रा वैदिकैस्तान्त्रिकैश्च पूजनीया इति प्रतिपादितम्।

आदिशैवमहाशैवानां ब्रह्मचर्यादिचतुर्ष्वाश्रमेषु अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहाख्येषु षट्कर्मसु चाधिकारः समान इति प्रतिपाद्यते। आदिशैवानां तु दीक्षाभिषेकपूजासु परार्थयजने च विशेषतोऽधिकारः प्रतिपाद्यते। अनुशैवानामाश्रमत्रयेऽधिकारः, सच्छूद्राणामाश्रमद्वयेऽधिकारः इति प्रतिपाद्यते। अवान्तरशैवाः सच्छूद्राः इति प्रतिपाद्य पारशैवान्तरालिकशैवानां सच्छूद्रत्वं नास्तीति प्रतिपादितम्।

अनुशैवावान्तरशैवानां विशिष्टानुष्ठानसंभवे भिक्षुत्वेऽधिकारो विधीयते। ब्राह्मणादिसर्ववर्णेषु जनितानां धर्मनिष्ठानां शिवभक्तानां प्रतिकृतिं निर्माय पूजा कर्तव्येति पूजनीयानां स्वरूपं कथितम्। शिला-ताम्र-सुवर्ण-रजत-चन्दनदारूणि प्रतिकृतिकरणयोग्यानि द्रव्याणीति प्रतिपाद्यते। तेषां प्रतिष्ठां अरण्ये नदीतीरे-पुण्यक्षेत्रे च आगमोक्तविधानेन कुर्यादिति प्रतिष्ठायोग्यस्थानानि निर्दिष्टानि।

ततः प्रतिष्ठितानां भक्तमूर्तीनां नित्यपूजाद्यकरणे प्रत्यवायोऽपि प्रदर्शितः। अनन्तरं समाधौ लिङ्गं प्रतिष्ठाप्य पूजा कर्तव्येति चाभिहितम्।

पारशैवान्तरालिकशैवानां जातिसांकर्यदोषस्य विद्यमानत्वात्र ते पूजार्हा इति तेषां निषेधः प्रोक्तः। पटलस्यान्ते शिवभक्तानां प्रतिष्ठापूर्वकपूजनस्य फलं वर्ण्यते। एवं **त्रिषष्टितमपटलार्थसंग्रहः ।**

पूर्वस्मिन् त्रिषष्टितमे पटले भक्तानां स्वरूपं तत्प्रसङ्गाच्छैवानां भेदाः केवलं निरूपिताः। तेषामेव भक्तानां स्थापनविधिरस्मिन् **चतुष्षष्टितमे नरप्रतिष्ठाविधिपटले** प्रतिपाद्यते।

पटलादौ भक्तानां शरीरनाशानन्तरं तेषां प्रतिकृतिं कृत्वा प्रतिष्ठा कर्तव्येति निर्दिश्यते। ततः श्रेष्ठमध्यकनिष्ठभेदेनाधिवासमण्डपकल्पनं तत्र वेदिकाकुण्डकल्पनं च प्रोच्यते। ततो नेत्रोन्मीलनं शयनाधिवसश्च संग्रहेण निरूप्यते।

वेदिकोपरिस्थपञ्चघटेषु मध्ये चेतनं प्रागादिचतुर्दिक्षु मनोबुद्ध्यहङ्कारचित्तानि संपूजयेत्। ततः कुण्डेषु वह्निमाधायाचार्यो मूर्तिपैः सह वह्निं प्रतिष्ठाप्य समिदाज्यचरुलाजैर्होमं कृत्वाऽग्निं संरक्षयेदिति होमो विधीयते।

परेद्युः प्रभाते देशिकः होतृभिः सह मण्डपं प्रविश्य घटानर्चां च संपूज्य होमं विधाय प्रतिमामभिषिच्य मन्त्रन्यासं कृत्वा प्रतिमामलङ्कृत्य धामप्रदक्षिणं कृत्वा शिवाग्रे संस्थाप्य तन्मूर्ध्नि भस्म मूलेन दापयेत्। देवपार्श्वस्थभक्तप्रतिकृतेः स्थापने नयनोन्मीलनादिकं सहैव कर्तव्यम्। होमे तु प्रथमतः देवस्य होमं कृत्वा तदनन्तरं भक्तप्रतिकृतेर्होमो विधातव्यः।

एवं यः करोति स सर्वान् कामानवाप्यान्ते रुद्रसद्मनि मोदते। एवं **चतुष्षष्टितमपटलार्थसंग्रहः ।**

पञ्चषष्टितमे पटले हर्म्यसंप्रोक्षणं विधीयते। आवर्तानावर्तपुनरावर्तान्तरितमिति संप्रोक्षणभेदो वर्ण्यते। सर्वेषां प्राणिनां पापं विनाश्य सुखं ददातीति संप्रोक्षणफलं प्रतिपाद्यते। चतुर्मूर्तीनां तथाष्टमूर्तीनां नासिकाद्यवयवानां च वर्णभेदादिसंभवे कालापेक्षां विना तत्र योग्यानि कर्माणि कारयेदिति प्रतिपाद्यते।

भिन्नमूर्तीनां सन्धानकर्मणि शिल्पिस्पर्शे संजाते षण्मासाभ्यन्तरे प्रोक्षणं कर्तव्यमित्युच्यते। मूर्तिः सन्धानयोग्या चेत्तरुणालये आवाहनादिक्रमेण विना नित्याग्निकार्यं संपूज्य निवेदयेत्। पूर्वादिषु दिक्षु विमानपालान् विन्यस्य ततः उमया सहितं पूर्वे, दक्षिणे लकुलीश्वरं, पश्चिमे गजारूढं, उत्तरे कङ्कालं चार्चयेत्। एतासां मूर्तीनां जलाधिवासः शयनाधिवासः रक्षाबन्धश्च न कर्तव्य इति सूचितम्।

विमानसंप्रोक्षणविषये सौरमासाः श्रेष्ठाः, चान्द्रमासा मध्यमा इति विशेषतया मासनिर्णयः क्रियते। ततः प्रासादस्य चतुर्दिक्षु प्रासादाग्रे वा मण्डपं कल्पयित्वा तत्र पञ्च कुण्डान्यथवा कुण्डमेकं प्रकल्प्य पर्यग्निकरणादि-मण्डपशुद्धिः कार्येति प्रोच्यते। दिगीशानां वेदिकासु प्रत्येकं प्रधानकुम्भमेकं तथाष्टविद्येशकुम्भांश्च संस्थाप्य स्वस्वनाम्ना पूजयेत्। दिक्षु वेदपारायणपूर्वं समन्त्रकं होमः कर्तव्य इति च विधीयते। प्रभाते कुम्भान् समादाय तत्तत्कुम्भोदकेन तत्तन्मूर्तीः संप्रोक्ष्य प्रधानकुम्भजलेन दर्पणे चाभिषेचनं कर्तव्यमिति प्रतिपाद्यते। हर्म्ये मूललिङ्गे च हविर्निवेदनादिसर्वोपचारैः संपूज्य दक्षिणादानादिना आचार्यादीन् तोषयेदिति **पञ्चषष्टितमपटलार्थसंग्रहः ।**

षट्षष्टितमे पटले वृषदानविधिर्वर्ण्यते। तत्र वृषदानफलं, ब्राह्मणादिवर्णक्रमेण दानयोग्यवृषलक्षणं च विधीयते। उत्तरायणकाले विना माघमासमन्यमासेषु शुक्लपक्षे शुभे काले दानं करणीयमिति दानकालो

निर्दिष्टः। शिवक्षेत्रे वान्यपुण्यस्थले वा वृषं संस्नाप्य याज्ञिकवृक्षस्तम्भे बध्नीयात्। तत्र तस्यामितादूर्वा दद्यात्। ततो वस्त्राद्यैरलङ्कृत्यार्घ्यं तन्मूर्ध्नि दद्यात्। तदनु समिदाज्यचरुमाषमुद्गकुलुत्थैः समूलाभिर्दूर्वाभिश्च षडङ्गमन्त्रैर्होमः कार्य इत्युच्यते। ततस्तस्य खुरौ शृङ्गे च स्वर्णवेष्टितौ कुर्यात्। वृषकण्ठे घण्टां चामरं च बध्नीयात्। तदनु देवाग्रेऽग्निं समाधाय समिदाज्यचरुभिः समूलदूर्वाभिश्च हुत्वा वृषगायत्र्या तं स्पृष्ट्वा दशाहुतीर्हुत्वान्ते पूर्णां दत्वा देवं सहस्रादिकलशैः संस्नाप्य शिवमर्चयेत्। तदनु वृषेण सह यजमानं प्रदक्षिणं कारयित्वा तौ देवस्य पुरतः संस्थाप्य मन्त्रं जपन् वृषं दापयेत्। तदनन्तरं देशिकं वृषदोऽर्चयेत्। एवम् **षट्षष्टितमपटलार्थसंग्रहः।**

सप्तषष्टितमे पटले प्रदक्षिणनमस्कारविधिः प्रोच्यते। तत्र सव्यप्रदक्षिणम्, सव्यापसव्यप्रदक्षिणम्, अङ्गप्रदक्षिणम् इति प्रदक्षिणं त्रिविधं भवति। तेषु प्रादक्षिण्येन गमनं सव्यम्, सोमसूत्रालङ्घनेन सव्यापसव्यमार्गेण गमनं सव्यापसव्यम्, सर्वाङ्गैः प्रादक्षिण्येन गमनम् अङ्गप्रदक्षिणम् इति त्रयाणां प्रदक्षिणानां लक्षणं प्रतिपाद्यते। सव्यापसव्यप्रदक्षिणे दीक्षितानामेवाधिकारः प्रोक्तः।

तत्र एकविंशतिप्रदक्षिणानि उत्तमानि, पञ्चदशप्रदक्षिणानि मध्यमानि, सप्तप्रदक्षिणान्यधमानि, पञ्चप्रदक्षिणान्यधमे मध्यमानि, अधमाधमं प्रदक्षिणत्रयम्, एकसंख्याप्रदक्षिणं सर्वस्मादप्यवरमिति प्रदक्षिणविधौ संख्यानुसोरणोत्तमादिलक्षणं वर्णितम्। प्रदक्षिणं कथं कर्तव्यमिति प्रदक्षिणकरणप्रकारोऽभिहितः। प्रदक्षिणविषयेऽधिकारिभेदेन स्थानभेदः प्रोच्यते। तदनु अङ्गप्रदक्षिणविधिर्निरूप्यते। ततः स्थानभेदेन प्रदक्षिणपलं वर्ण्यते। अनन्तरम् अष्टाङ्गपञ्चाङ्ग-एकाङ्गेति नमस्कारभेदाः तत्फलं च प्रतिपाद्यते। ततो मानुषादिलिङ्गविषये विशेषकालकृतप्रदक्षिणनमस्कारयोः फलं, पुण्यक्षेत्रकृतयोः प्रदक्षिणनमस्कारयोः फलं चातिविशदेन प्रतिपाद्यते। एवं **सप्तषष्टितमपटलार्थसंग्रहः।**

अष्टषष्टितमे पटले वसन्तोत्सवविधिः प्रोच्यते। तत्रादौ चैत्रवैशाखमासयोः पूर्णिमायां शुभलग्ने वसन्तोत्सवोऽनुष्ठेय इति कालो निर्दिश्यते। तदनन्तरं दमनाधिवासप्रकारो वर्ण्यते। तत्र प्रासादस्यैशान्ये उत्तरे वा मण्डपं प्रकल्प्य तत्र वेदिमध्ये स्थण्डिलं कृत्वा तदुपर्यष्टदलपद्मं विलिख्य तन्मध्ये दमनं विन्यसेदित्युच्यते। ततः कुम्भस्थापनं तत्पूजा च कथ्यते। दमनमपि मन्त्रसंहितया यजेदित्युच्यते। ततः कुण्डे वा स्थण्डिले वाग्निं संस्थाप्य समिदाज्यचरुतिलान् हुत्वा पूर्णाहुतिं कुर्यादिति होमप्रकारो वर्ण्यते।

ततः कामपूजा तमुद्दिश्य कर्तव्यो होमश्च विधीयते। तत्र दान्तेन शताहुतयो देया इत्युच्यते। ततो होमं समाप्यान्तेऽग्निमुद्वास्य काममप्युद्वासयेदित्युच्यते। एवं रात्रिकर्म कृत्वा परेद्युः प्रभाते उत्थाय कृतनित्यो मण्डपं प्रविश्य देवं देवीं च संपूज्य दमनं चापि यथापूर्वं ब्रह्मपञ्चकैः संस्पृश्य नित्यावसाने लिङ्गमूर्ध्नि सर्वात्मानं समुच्चरन् विन्यसेत्। अनन्तरं व्यक्तलिङ्गेषु तद्दान्तं दापयेदित्युच्यते। ततः सायंकाले देवप्रतिमामलङ्कृत्य वाद्यघोषपुरस्सरमुत्सवं कुर्यादित्युच्यते। अन्ते प्रतिवर्षमिदं यः करोति सोऽश्वमेधफलं भुक्त्वा शिवलोकं गच्छतीति फलमपि निरूप्यते। एवम् **अष्टषष्टितमपटलार्थसंग्रहः।**

एकोनसप्ततितमे पटले नवनैवेद्यविधिरभिधीयते। भुवि प्रथमं संजातं धान्यं फलपुष्पादिकं च शिवाय समर्पणीयम्। शिवाय निवेदितमेकैकं शताधिकं फलं ददातीति नवनैवेद्यफलं प्रतिपाद्यते। ततो नवनैवेद्यकालो निरूप्यते। तदनु देवक्षेत्रं प्रविश्य धान्यं संगृह्य शिवालयानयनप्रकारो वर्ण्यते। क्षेत्रे धान्यसंग्रहणप्रकारः समन्त्रकं विशिष्य प्रतिपाद्यते। तदनन्तरं तण्डुलैर्नैवेद्यसंपादनक्रमः शिवाय तन्निवेदनविधिश्च समन्त्रकं निरूप्यते। अन्ते प्रतिवत्सरमेवं सस्याभिवृद्धये शिवाय निवेदयेदित्युच्यते। एवम् **एकोनसप्ततितमपटलार्थसंग्रहः।**

सप्ततितमे पटले कृत्तिकादीपविधिः कथ्यते। प्रथमतः दीपारोपणकालोऽभिधीयते। ततोऽङ्कुरार्पणविधिः संग्रहेण प्रोच्यते। ततः पूर्वरात्रौ कर्तव्योऽधिवासविधिरुच्यते। प्रासादाग्रे वैश्यान्यामाग्नेय्यां वा मण्डपं प्रकल्प्य गोमयेनानुलिप्य तत्र शालिभिः स्थण्डिलं कृत्वा तस्मिन्नष्टदलपद्ममालिख्य तिलतण्डुललाजान् विकीर्य पुण्याहं वाचयित्वा शिवाम्भसा दीपाधारान् संप्रोक्ष्य चतुर्दिक्षु मध्ये च विन्यसेत्। विन्यासकाले बहुरूपमन्त्रोच्चारणं

कर्तव्यमित्युच्यते। तदनु होमविधिः समन्त्रकं प्रतिपाद्यते। वर्त्या होमाग्नेर्दीपाधारेषु दीपप्रवर्तनप्रकारो वर्ण्यते। प्रासादस्य चतुर्दिक्षु दीपारोपणाय दीपस्तम्भकल्पनप्रकारोऽभिधीयते। तत्र दीपस्तम्भयोग्या वृक्षाः, दीपस्तम्भपरिमाणं, दीपस्तम्भेषु चक्रविन्यासप्रकारः तत्र पुत्तलिकाविन्यासप्रकारश्च विशिष्याभिधीयते। तदनन्तरं दीपस्तम्भे अग्नेः अर्चनं तमुद्दिश्य कर्तव्यहोमप्रकारश्चाभिधीयते।

तदनु पूर्वमधिवासितदीपानां देवाग्रे निक्षेपणं, देवाय समन्त्रकं तत्समर्पणं चाभिधीयते। तत्रस्थदीपाद् धाम्नोऽन्तर्बहिश्च दीपमालां सर्वप्राकारेषु च दीपयेदित्युच्यते। उज्ज्वलितदीपैः सह वाद्यघोषपुरःसरमुत्सवं कुर्यात्। तदा परिचारकः दीपस्तम्भमारूह्य दीपं प्रज्वालयेत्। दीपारोपणानन्तरं विशेषेण शिवं समभ्यर्च्य होममाचरेत्, उत्सवप्रतिमां चापि विशेषेण समर्चयेदित्युच्यते। अन्ते दीपारोपणफलं च कथ्यते। एवं **सप्ततितमपटलार्थसंग्रहः।**

एकसप्ततितमे पटले तुलादिप्रत्ययविधिर्निगद्यते। एकस्मिन् कर्मणि विवादे जाते अस्य कर्मणोऽयं कर्ता वा अकर्ता वा, अयं शुद्धो वा पापी वा इति संशये संजाते सत्यजिज्ञासूनां राज्ञां निश्चयार्थं 'तुलाग्न्यापो विषं कोशस्तप्तमाषस्तण्डुलाः शपथश्चेति' दिव्याष्टकमुच्यत इति प्रतिज्ञा क्रियते। ततो दिव्यकर्मकरणयोग्यस्थान-मुच्यते। तत्र सर्वेषु शिवालयेषु तथा दुर्गासूर्यविनायकगुहालयेषु नदीतीरे तटाकतीरे, ब्राह्मणनृपसन्निधौ च दिव्याष्टककर्म कर्तव्यमिति कथ्यते। तदनु दिव्यकर्मकरणयोग्यकालोऽभिधीयते। तत्र सर्वेषां दिव्यकर्मणां सूर्यकुजयोर्वारः प्रशस्त इति सामान्येनाभिहितम्।

ततस्तुलाविधिः सर्वकालेषु कर्तव्यः। प्रवाते तुला वर्ज्या। शरद्वसन्तयोरग्निविधिः कर्तव्यः। निदाघेऽग्निं वर्जयेत्। सलिलविधिर्निदाघे कर्तव्यः। शिशिरे हेमन्ते च विषविधिरनुष्ठेयः। अन्येषु कालेषु विषविधिं वर्जयेत्। अन्ये कोशतप्तमाषतण्डुलशपथविधयः सर्वकालेषु करणीया इत्यष्टानां दिव्यविधीनां कालो विहितः।

ततस्तुलानिर्माणविधिस्तथा तोरणविधिश्च सम्यगभिधीयते। तत्रान्ते तोरणे तुलां लम्बयेदिति निर्दिश्यते। तदनु तुलया परीक्षाक्रमो निरूप्यते। तत्रादौ देशिकस्तोरणं तुलां चास्त्रमन्त्रेण संप्रोक्ष्य स्नातं शुद्धाम्बरधरं कृतोपवासं कृताञ्जलिपुटं परीक्ष्यं पुरुषं प्राङ्मुखमुपवेश्य तस्य मूर्ध्नि स्वप्रतिज्ञया लिखितं

'चन्द्रादित्यौ दहनपवनौ भूमिरापोऽम्बरं च
क्षेत्रज्ञोऽयं यदिह सकलं कर्म जानन्त्यमुष्य।
कालः कर्ता स च सकलविद्देवनाथो यमश्च
देवास्सर्वे सततमपि नु संस्थिताश्चात्र देहे॥'

इत्येतच्छ्लोकसहितं शिरःपत्रं अस्त्रमन्त्रमुच्चरन् बध्नीयादिति प्रोच्यते।

ततस्तोरणे तुलायां च देवतायजनप्रकारोऽभिधीयते। ततः परीक्षकैः परीक्ष्यं तं पुरुषं मृत्तिकया सह तुलामारोपयेत्। तुलितं मर्त्यमवतार्य होमः कर्तव्य इत्युक्त्वा होमविधिरुच्यते। होमानन्तरं शुद्ध्यशुद्धिनिर्णयार्थं गुरुः तं पुरुषं घटमारोप्य देवं प्रार्थयित्वा परीक्षयेत्। पूर्ववत्तुलितः पुरुषः पूर्वापेक्षया वर्धितश्चेच्छुद्धो भवति। एवं तुलाविधिर्निरूपितः।

ततोऽग्निविधिरुच्यते। तत्रादौ नवमण्डलकल्पनप्रकारोऽभिधीयते। तानि च मण्डलानि आग्नेय-वारुण-याम्यैन्द्र-कौबेर-सौम्य-सौर-वैश्वदेवाख्यानि। तुलाविध्युक्तवद्देवतायजनं होमं च कुर्यादित्युच्यते। पश्चादयः-पिण्डकल्पनं तत्सन्तापनप्रकारश्चाभिधीयते। ततोऽग्निना परीक्षाक्रमोऽभिधीयते। तत्राद्ये मण्डले शिरसि पत्रं बध्वा तस्याञ्जलौ सप्तपिप्पलपत्राणि तदूर्ध्वेऽक्षतान् शमीपत्रं च विन्यसेत्। तस्याग्रे मन्त्री सुस्थितस्सन् मन्त्रं पठेदित्युक्त्वा तन्मन्त्रोऽभिधीयते। पश्चादयस्कारगर्तादयःपिण्डं दग्धमानीय परीक्ष्यास्याञ्जलौ दद्यात्। सोऽपि मण्डलान्मण्डलं सप्तपदं गच्छेत्। षट्पञ्च वा नाडिकानन्तरं तस्य करद्वयं दग्धं वा अदग्धं वेत्याचार्यः परीक्षयेत्। यदि दग्धं स्यात्तदा स नरः पापी यद्यदग्धं तदा स नरः शुद्ध इति परीक्षाक्रमोऽभिहितः।

ततस्तोयविधिः प्रतिपाद्यते। तोयपरीक्षाविधिं जलूका-झष-कीटवर्जितेषु शैवालविहीनेषु उच्चतरङ्गविहीनेषु मनोज्ञेषु स्वच्छतोयेषु ह्रदेषु तटाकेषु वा कुर्यादित्युच्यते। पूर्ववद्देवतार्चां होमं चापि प्रकल्पयेत्। मण्डले धर्मदेवं

समभ्यर्च्य परीक्ष्यं नरं समाहूय तस्य शिरःपत्रं बन्धयित्वा जले तं प्राङ्मुखं संस्थाप्य तस्याग्रतोऽन्यं मर्त्यं स्थापयेत्। चापविद्याविशारदः त्रीन् शरान् प्रक्षिपेत्। तत्समये परीक्ष्यः अग्रस्थजानुनी गृहीत्वा तीरस्था जना देहं यथा न पश्यन्ति तथा उरोदघ्नजले स्नानवत् त्रिधा निमज्जेत्। मध्यस्थः त्रीनपि शरान् गृहीत्वा यावदागच्छति तावन्निमज्जतः शुद्धिः नान्यस्येति तोयविधिः कथितः।

तदनु विषविधिरुच्यते। तत्रादौ देशिकः पूर्ववद्देवतार्चनं होमं च कृत्वा विधिवत्पूजिते मण्डले घृतप्लुतं विषमस्त्रमन्त्रेण संप्रोक्ष्य निक्षिपेदित्युक्त्वा दातव्यानि विषाणि प्रोच्यन्ते। तत्र लाङ्गल-हयमार-कारस्कर-धुत्तूरबीजानि विषत्वेन परिगणितानि। एतेषु विषेष्वेकतमं संगृह्य सूर्याभिमुखं स्थितस्य परीक्ष्यस्य नरस्य हस्ते दद्यात्। सोऽपि सद्यस्तद्विषं भक्षयेत्। ततस्तं याममात्रं परीक्षयेत्। यदि स नरो निर्विकारो लक्ष्यते तदा स शुद्धो भवति। अन्यथा अशुद्ध इति निर्णयः कर्तव्य इति विषपरीक्षायां शुद्ध्यशुद्धिनिर्णयप्रकारो निरूपितः। ततः पूर्वोक्तविषाणां प्रशमनाय प्रत्यौषधद्रव्याणि प्रतिपादितानि। तैः प्रत्यौषधैर्विषपीडितं नरं रक्षयेदित्युच्यते। एवं विषपरीक्षाविधिः।

ततः कोशपरीक्षाविधिर्निगद्यते। तत्रादौ देशिकः पूर्ववद्देवतार्चनं होमं च कृत्वा परीक्ष्यस्य कोशं प्रदापयेदित्युक्त्वा तद्दानप्रकारश्च निरूप्यते। तत्र व्यक्ताव्यक्तोभयात्मकस्य लिङ्गत्रयस्य ब्रह्म-विष्णु-गुह-इन्द्र-विनायक-दुर्गा-सूर्याणां तथा तेषामायुधानां सप्तमातृणां रूपाणि सर्पिषा, पयसा, जलेन वाभिषिच्य तद्द्रव्यं प्रसृतित्रयमात्रं परीक्ष्यस्य नरस्य दापयेत् इति कोशस्वरूपवर्णनं तद्दानप्रकारश्चाभिधीयते। ततः शुद्ध्यशुद्धिनिर्णयप्रकारः कथ्यते। ततः परीक्ष्यो नरः प्राङ्मुखः पूर्वोक्तकोशं त्रिवारं पिबेत्। पीतस्य तस्य नरस्य चतुर्दशाहादर्वाक् यदि विकृतिर्न जायते तदा स शुद्धो भवति। अन्योऽशुद्धो भवति। एवं कोशपरीक्षाविधिः प्रतिपादितः।

ततस्तप्तमाषविधिः कथ्यते। तत्र देशिकः माषं चक्रिकामूर्मिकां वा सुवर्णेन कारयित्वा पञ्चगव्येन प्रक्षाल्य ताम्रमये चषके विन्यसेत्। ततः पूर्ववत्पूजाहोमं च कृत्वा परीक्ष्यं नरमाहूय तस्याग्रे चषके विंशतिपलं तैलं घृतं वा क्षिपेत्। तच्चषकं त्रिपाद्यां निक्षिप्य तस्याधो वह्निं प्रज्वालयेत्। तत्रस्थं घृतमथवा तैलं सम्यक् पाचयित्वा तत्र वह्निबीजमनुस्मरन् स्वर्णमाषं क्षिपेत्। [अनन्तरं ग्रन्थपातः] तण्डुलविधिः संपूर्णतया लुप्तः। शपथविधौ अन्तिमभागः केवलमुपलभ्यते। तत्र परीक्ष्यः स्वभार्यासुतानां शिरसि शपथं कुर्यात्। तथा कृतस्य चतुर्दशाहादर्वाक् देवेन वा नृपेण वा यदि पीडा नोत्पद्यते तदा स नरः शुद्धः। अन्यथा स पाप भाग्भवति इति निर्णयप्रकारः प्रतिपादितः।

ततो बालवृद्धातुरान् मर्त्यान् परीक्षार्थं तुलायां न योजयेत्। तेषामन्यः परीक्षाप्रकारः कर्तव्य इत्युच्यते। ततः यत्र देशे प्रत्ययविधिः क्रियते तत्र देवपूजार्थं यथाशक्ति द्रव्यं दातव्यम्। देशिकादीनां च यथोक्तदक्षिणा देया इत्युच्यते। **एवम् एकसप्ततितमपटलार्थससंग्रहः।**

द्विसप्ततितमे पटले अद्भुतशान्तिर्विधीयते। दिव्यान्तरिक्षभौमा इति त्रिविधा अद्भुता भवन्तीत्युक्त्वा तेषां स्वरूपं प्रतिपाद्यते। तेषां दोषशान्त्यर्थं श्रेष्ठमध्यकनिष्ठभेदेन शान्तयः कर्तव्या इति प्रोच्यते। लिङ्गे वा शैवप्रतिमासु वा अकस्माच्चलनादिसंभवे करणीया शान्तिर्निरूप्यते। एवं शाक्तबेरेषु तथान्यदेवताप्रतिमासु वा अकस्माच्चलनादिसंभवे करणीया शान्तिर्विधीयते। तथा करकावृष्टिसंभवे ज्योतिषां वैवर्ण्ये प्राप्ते करणीया शान्तिः प्रोच्यते। ततः [ग्रन्थपातः] इति **द्विसप्ततितमपटलार्थसंग्रहः।**

त्रिसप्ततितमे पटले जीर्णोद्धारविधिर्निरूप्यते। तत्र प्रथमं विमानजीर्णोद्धारविधिः प्रोच्यते। तदनन्तरं लिङ्गजीर्णोद्धारप्रकारो वर्ण्यते। तत्र बालालयनिर्माणविधिः बालालये मण्डपकल्पनप्रकारः कुण्डवेदिकादि-कल्पनविधिश्च विस्तरेणाभिधीयते। ततः जीर्णलिङ्गान्तिके तदग्रे वा शिवशक्तिकुम्भयोः स्थापनं, यात्राहोमः ब्राह्मणभोजनं, बालस्थानस्थिते लिङ्गे देवमावाह्य पूजाप्रकार इत्येते विषया निरूपिताः। ततो जीर्णानां मृण्मयशैलजदारुजलिङ्गानां जीर्णोद्धारप्रकारो नूतनानां तेषां पुनः पूर्ववत्स्थापनं च प्रोच्यते।

ततः पीठलिङ्गयोः खण्डस्फोटादिसंभवे कर्तव्यो जीर्णोद्धारप्रकारोऽभिहितः। बाललिङ्गे जीर्णे बालस्थापनं विना तादृशमेव लिङ्गान्तरं स्थापयेदिति बाललिङ्गविषया निरूपिताः।

स्वायम्भुवलिङ्गे जायमानाः खण्डनस्फोटनादयः न दोषदा इति प्रतिपाद्यते। ततः रत्नलोहजलिङ्गेषु खण्डादौ संभूते कर्तव्यो जीर्णोद्धारप्रकारोऽभिधीयते।

रत्नलोहजलिङ्गानामुद्धारः पूर्ववत्कर्तुं यदि न शक्यः तादृशस्थले बाणलिङ्गस्थापनं कर्तव्यमित्युच्यते। जीर्णोद्धारानन्तरं बाणलिङ्गस्थापने करणीयो विशेषस्तथा प्रासादाभ्यन्तरस्थले भित्तौ वा शिल्पिकर्मणि संजाते करणीयः क्रियाकलापश्च वर्ण्यते। अनन्तरं नित्याग्निकुण्डजीर्णे बलिपीठजीर्णे च जीर्णोद्धारक्रमो निरूप्यते। तदनु यात्राहोमक्रमो निरूप्यते। अन्ते जीर्णलिङ्गानां बेराणां वा पूजनेन लोके अनावृष्टिर्भवेत् अतो जीर्णोद्धारोऽवश्यं करणीय इति विधीयते। एवं **त्रिसप्ततितमपटलार्थसंग्रहः।**

चतुस्सप्ततितमे पटले संप्रोक्षणविधिः प्रतिपाद्यते। तत्र प्रथमं संप्रोक्षणनिमित्तानि कथितानि। माघभाद्रपदमासौ विनान्येषु सर्वकालेषु संप्रोक्षणं समाचरेदिति संप्रोक्षणकालोऽभिधीयते। षण्मासादूर्ध्वं लिङ्गपूजाहीने चण्डालपुलिन्दधीवरचोरब्रह्मघ्नमद्यपगुरुदारगाम्यादिपातकिनां स्पर्शे जाते जीर्णोद्धारप्रायश्चित्तविधि-प्रोक्तेषु निमित्तेषु च संप्रोक्षणं विधिवत् कर्तव्यमिति प्रोच्यते।

तदनु संप्रोक्षणकर्मनिर्वर्तनाय प्रासादाग्रे पार्श्वयोरुभयोर्वाप्यैशान्ये वा मण्डपकल्पनप्रकारोऽभिहितः। तत्र नवकुण्डपञ्चकुण्डकल्पनप्रकारोऽभिधीयते। ततो मण्डपसंस्कारविधिर्वास्तुहोमश्च निरूप्यते। तदनन्तरं प्रासादान्तः प्रविश्य पञ्चमृत्पञ्चगव्यादिभिः लिङ्गपीठशुद्धिकरणविधिर्गर्भगेहप्रोक्षणविधिश्च कथ्यते। ततो मण्डपे वेद्यां स्थण्डिलं कृत्वा तत्र कुम्भस्थापनविधिः पूजाविधिश्च प्रतिपाद्यते। तत्र मध्यकुम्भे शिवं वर्धन्यां शक्तिं परितोऽष्टकुम्भेषु विद्येश्वरांश्च गन्धपुष्पादिभिर्विधिवत्पूजयेदित्युच्यते। ततो होमविधिः प्रतिपाद्यते। तत्र कुण्डेषु **सर्वेष्वष्टविद्येशान्** प्रधाने शिवं च यजेत्। समिदाज्यचरुयवसर्षपलाजतिलान् प्रत्येकं मूलमन्त्रेण षडङ्गैश्च यथाक्रमं जुहुयादिति नवकुण्डपक्षे होमः प्रतिपाद्यते। ततः पञ्चकुण्डपक्षे होमो विधीयते। अन्ते विद्येशगणेशदिक्पालानां तदस्त्राणां सर्वेषां प्रत्येकं पञ्चदशाहुतीर्हुत्वा पीठं लिङ्गं च स्पृष्ट्वा मन्त्रसंहितया स्विष्टकृदाहुतिं हुत्वा परिषिच्य होमकर्म समापयेदिति होमविधिर्निर्दिश्यते। ततः प्रातः करणीयविधिरभिधीयते। तत्र देशिकः प्रभाते कृतनित्यक्रियो मण्डपं गत्वा देवान्संपूज्य वह्निं प्रज्वाल्य सर्वात्ममन्त्रेण पूर्णाहुतिं कृत्वाग्निमुद्वासयेत्। ततः कुम्भाभिषेकविधिः कथ्यते। तत्र गर्भगेहं प्रविश्यास्त्रमन्त्रेण वस्त्रमाल्यादिकं विसृज्य सपीठं लिङ्गं सर्वात्ममन्त्रमुच्चरन् गन्धाम्बुनाभिषिच्य प्रणवेनार्घ्यं दद्यात्। ततः कुम्भानुद्धृत्य प्रदक्षिणक्रमेणान्तः प्रविश्य तान् कुम्भान् शिवाग्रे संस्थाप्य शिवकुम्भाम्भसा लिङ्गं वर्धन्या पिण्डिकां शेषैश्च लिङ्गस्य परितोऽभिषेचयेत्। ततोऽर्चनोक्तप्रकारेण देवं संपूज्य पञ्चहवींषि शुद्धान्नं च निवेद्य मुखवाससहितं ताम्बूलं च निवेदयेत्। तदनु देशिकानां यथोक्तदक्षिणां दत्वा दिनत्रयपर्यन्तं ब्राह्मणानां मृष्टान्नभोजनं दद्यादित्युच्यते।

अनन्तरं व्यक्तलिङ्गसंप्रोक्षणविधिरतिसंग्रहेण प्रोच्यते। तत्र व्यक्तानामचलानां लिङ्गानां पञ्चहोमविधानेन संप्रोक्षणं कर्तव्यम्। व्यक्तानां चलानां विशुद्ध्ये पञ्चहोमविधानेन संप्रोक्षणं वा शान्तिहोमसमन्वितं स्नपनं वा यथाशक्त्या विधेयमिति कथ्यते। ततः प्रसङ्गात् प्रासादसंप्रोक्षणविधिः संग्रहेणाभिधीयते। तत्र पूर्वादिदिक्षु ऐशान्ये च कुट्टिमं विधिवत्कृत्वा तत्र स्थण्डिलं कल्पयेत्। तत्र पञ्चघटान् संस्थाप्य तेषु दिक्स्थितेषु कुम्भेषु दिक्स्थितान् देवान् ऐशान्ये कुम्भे शिवं पूजयेत्। तेषामग्रे होमं च कुर्यात्। ततो देशिकः प्रोक्षणीये धाम्नि ईशानादिक्रमेण कुम्भस्थजलेन प्रोक्षयेत्। इति प्रासादप्रोक्षणविधिः कथितः। ततोऽग्निकार्ये अस्पृश्यस्पर्शने संजाते वह्निमुद्वास्य पञ्चगव्येन संप्रोक्ष्य कुण्डे वा स्थण्डिले वाग्निं विधिवत्समाधाय शान्तिहोमं कुर्यादित्युच्यते।

ततो मण्टपादिसंप्रोक्षणविधिर्निगद्यते। तत्र मण्डपं गोपुरं प्राकारं सभां मठं गृहं वा विधिवत्कृत्वा तेषां शुद्धये संप्रोक्षणं कुर्यादिति प्रतिज्ञां कृत्वा तत्संप्रोक्षणविधिरतिसंग्रहेणाभिधीयते। तत्र मण्टपस्य पूर्वे वा दक्षिणे वा मध्ये वा कुट्टिमं कृत्वा गोमयेनोपलिप्य स्थण्डिलं कृत्वा तन्मध्ये कुम्भं संस्थाप्य वास्तोष्पतिं ब्रह्माणं पूजयेत्। ततो होमं विधायानन्तरं एकाशीतिपदैर्वास्तुमण्डलं प्रकल्प्य तत्र वास्तुदेवताः संपूज्य सर्वातोद्यसमायुक्तं कुम्भमुद्धृत्य तदीयाम्भसा समन्ततः प्रोक्षयेत्। ततः शिवव्रतधरान् ब्राह्मणान् भोजयेदिति **चतुःसप्ततितम-पटलार्थसंग्रहः।**

पञ्चसप्ततितमे पटले पिण्डिकास्थापनविधिरुच्यते। तत्र प्रथमं जीर्णपिण्डिकायाः पुनर्निर्माणप्रकारः कथ्यते। जीर्णां पिण्डिकामुद्धृत्य तत्तदाकारां पिण्डिकां कुर्यादिति प्रोच्यते। यद्यन्यथाक्रियते तदा चतुरश्रां वर्तुलाकारां कुर्यात्। वर्तुलां तु पिण्डिकां चतुरश्रां न कुर्यात्। पूर्वस्थिता पिण्डिका यद्यैष्टिका तां शिलामयीं कुर्यात्। इति पिण्डिकायाः पुनर्निर्माणप्रकारः कथितः। जीर्णपिण्डिकाया उद्धारसमये प्रथमतः शिवयोगिनां भोजनं कारयेत्। ततो लिङ्गाग्रे शालिभिः स्थण्डिलं प्रकल्प्य तत्र पद्ममष्टदलं सकर्णिकं समालिख्य तन्मध्ये शिवकुम्भं वर्धनीं च विन्यस्य शिवकुम्भे लिङ्गाच्छिवं तथा वर्धन्यां पीठाच्छक्तिं चावाह्य गन्धपुष्पादिभिः संपूज्य तयोरग्रे सैकतस्थण्डिले विधिवद्यात्राहोमं कुर्यात्। ततः प्रासादस्यैशदिग्भागे सौम्ये वा स्थण्डिले कुम्भौ संस्थाप्य नैवेद्यान्तं कृत्वा समर्चयेदित्युच्यते। तदनु जीर्णपिण्डिकोद्धारविषयः संग्रहेणाभिधीयते। तत्र जीर्णपीठावयवानुद्धृत्य तानम्भसि निक्षिपेत्। ततो नूतनपिण्डिकां विधिवन्निष्पाद्य तस्याः प्रतिष्ठां कारयेदित्यभिधीयते। तदनु प्रतिष्ठार्थं मण्डपकल्पनं तत्र कुण्डवेदीकल्पनप्रकारश्च निरूप्यते। तत्र दिक्षु योन्याकारकुण्डानि कोणेषु चतुरश्रकुण्डानि प्रधानकुण्डं वृत्तं च कुर्यादिति नवकुण्डकल्पनप्रकारो निरूप्यते। ततः पञ्चकुण्डविधानप्रकारः सूच्यते। मण्डपस्येशदिग्भागे स्नानमण्डपं कुर्यादित्युक्त्वा मण्डपालङ्कारः मण्डपसंस्कारश्च विशिष्याभिधीयते। ततो वास्तुदेवानां पूजा वास्तुहोमश्च कर्तव्य इति कथ्यते। ततो नूतनशैलपिण्डिकामानीय तस्याः पञ्चमृत्पञ्चगव्यैः शुद्धिं कृत्वा गन्धोदेनाभिषिच्य कूर्चेन वस्त्रेण च संवेष्ट्य वेदिकायां स्थण्डिले शयनं प्रकल्प्य तत्र पिण्डकाधिवासप्रकारः कथ्यते। ततो वेदिकायां कुम्भपूजाप्रकारो निरूप्यते। तत्र पूर्वं प्रासादाग्रे स्थापितौ शिवशक्त्यात्मकौ कुम्भावुद्धृत्य पिण्डिकायाः पूर्वतो विन्यस्य वस्त्रकूर्चादिकं वध्वा विधिवदभ्यर्चयेत्। ततस्तयोः कुम्भयोः परितोऽष्टौ घटान् गन्धोदपूरितान् प्रागादिषु विन्यस्य तत्र विद्येशान् संपूज्य होमं कुर्यादिति प्रोच्यते।

ततः प्रातः करणीयविधिः पिण्डिकास्थापनं च विशिष्य प्रतिपाद्यते। तत्र गर्ते रत्नन्यासाष्टबन्धनविधिश्च वर्ण्यते। तदनु लिङ्गपीठशुद्धिप्रकारः कुम्भाभिषेकविधिश्च समन्तकं विस्तरेण प्रतिपाद्यते। यो मर्त्यः पिण्डिकास्थापनं करोति स इह लोके सुखं प्राप्यान्ते परां गतिं प्राप्नोतीति पिण्डिकास्थापनफलमभिहितम्। एवं **पञ्चसप्ततितमपटलार्थसंग्रहः।**

षट्सप्ततितमे पटले प्रायश्चित्तविधिर्निरूप्यते। तत्र प्रथमतः प्रायश्चित्तशब्दार्थविवरणमभिहितम्। ततो मन्त्रप्रमादक्रियाप्रमादयोः स्वरूपं निरूप्य तद्दोषनिवृत्तये कर्तव्यः प्रायश्चित्तविधिः कथ्यते।

मन्त्राणामुच्चारणे यद्यपशब्दः, मन्त्राणामन्यथोच्चारणं, स्वरहानिः, वर्णानां वृद्धिः, ह्रास इत्यादयः मन्त्रोच्चारणदोषाः तत्र प्रायश्चित्तार्थं तान् मन्त्रान् पुनः सम्यगुच्चार्य पुनः कर्म कृत्वा हृदयमन्त्रं शतं जपित्वा तद्दोषनिवृत्तिः कार्या।

क्रियाविषये व्यत्यासः, पौनःपुन्यं विनाश इत्यादि प्रमादा यदि भवेयुः तत्कर्म पुनर्यथाविधि कृत्वा तद्दोषशमनाय पिङ्गलाख्यमन्त्रं शतं जपेत्। यदि बुद्धिपूर्वं प्रमादस्तदा द्विशतवारं जपेदिति मन्त्रप्रमादक्रियाप्रमादयोर्विषये प्रायश्चित्तमभिधीयते।

तदनु यदि द्रव्याणां विषये प्रमादस्तदा प्रत्येकं प्रायश्चित्तविधिरुच्यते।

तत्राङ्कुरार्पणे पालिकाघटिकादीनां सोमकुम्भस्य वा पतने यथापूर्वं तत्संस्थाप्य धेनुमुद्रां प्रदर्श्य प्रणवमुच्चार्य गन्धपुष्पाद्यैरभ्यर्च्य अघोरमन्त्रशतं जपेत्। तेषां भेदने तांस्त्यक्त्वा नूतनान् संस्थाप्य संपूज्य शान्तिहोमं कारयेत्। अङ्कुराणां विनाशेऽपि शान्तिहोमं कारयेत्।

वृषयागे घटादीनां पतने भेदने वा पूर्वोक्तवज्जपयागौ कर्तव्यौ। तथा देवाग्रे वृषं गन्धपुष्पाद्यैर्विशेषतोऽभ्यर्च्य मुद्गान्नं निवेदयेत्।

ध्वजोत्सवे ध्वजादीनां पतने यदि ध्वजस्य न क्षतिः तदा देवालयं प्रविश्य अष्टोत्तरशतं जपित्वा कर्म निर्वर्तयेत्। यदि च्छेदस्तदान्यदापाद्य सद्योऽधिवासनं कृत्वा ध्वजमारोपयेत्। धामप्रदक्षिणं कृत्वा वृषाग्रे शान्तिहोमं समाचरेत्।

उत्सवे प्रतिमादीनां पतने यदि न भेदनं तदा स्नपनं कृत्वा तस्याग्रे शान्तिहोमं कारयेत्। प्रतिमाया भेदेन तत्र यदि किञ्चिदङ्गवैकल्यं तदङ्गं संधाय जीर्णोद्धारोक्तक्रियाकलापं निर्वर्तयेत्।

ध्वजारोहणकाले ध्वजदण्डयोः पतने तथा तयोर्भेदादिसंभवे च कर्तव्यः प्रायश्चित्तविधिस्तथा रज्जुयन्त्रादिभेदेन ध्वजपतने कर्तव्यः प्रायश्चित्तविधिश्च विस्तरेण प्रतिपाद्यते।

ध्वजारोहणकाले ध्वजस्य दण्डस्य वा पतने यदि तत्र न भेदनं तदा हृदयमन्त्रं जपित्वा ध्वजमारोपयेत्। आरोपणकाले तस्य च्छेदे दण्डमन्यं कृत्वा तस्य ध्वजस्य चाधिवासादि कृत्वा धामप्रदक्षिणं कृत्वा पुनर्ध्वजारोहणं कुर्यात्। वृषं च पूजयित्वा शान्तिहोमं कारयेत्। रज्जुयन्त्रादिभेदेन ध्वजस्य पतने पुनः पीठं कृत्वा पुण्याहं वाचयित्वा शान्तिहोमं चण्डपूजां च कारयेत्। एवमेव मण्डपद्वारादिष्वारोपितेषु ध्वजेषु हृतेषु अन्यध्वजं सद्योऽधिवासनं कृत्वा धामप्रदक्षिणं कृत्वा हृदयमन्त्रं जपित्वा तद्दिने परदिनेवाऽऽरोपयेत्। देवस्य स्नपनं कृत्वा शान्तिहोमं कुर्यात्। आरोपितस्य ध्वजस्य भेदे तमुत्सृज्य ध्वजमन्यमारोप्य शान्तिहोमादि कुर्यात्।

भेरीताडनकाले शूलस्यास्त्रस्य वा पतनेऽघोरमन्त्रजपं कृत्वा शूलादिकं विधिवदभ्यर्च्य शान्तिहोमं कृत्वा शूलादेः स्नपनं कुर्यात्।

अष्टबन्धनहीने पृथिवी जलवर्जिता भवेत्। तद्दोषनिवारणायाष्टबन्धनं सुदृढं कारयेत्।

ततः प्रसङ्गात् पक्वापक्वाष्टबन्धनकरणप्रकारस्तदीयद्रव्याणि च कथ्यन्ते।

सुधाकर्मविहीने स्थलकर्मविहीने च महामारी प्रवर्तते। अतः तादृशस्थलेषु पुनः संधानं कृत्वा पुण्याहं वाचयित्वा गव्यैरभिषेचयेत्।

शूले पतिते चलिते अङ्गहीनादिसंभवे दग्धे वर्णविहीने पीठबन्धविहीने च ग्रामनाशः स्यात्। तत्र बालस्थानं कृत्वा शूलं बेरं च विधिवत्कृत्वा पुनः संस्थाप्य संप्रोक्षणं कुर्यात्। इत्येवं प्रायश्चित्तान्यभिधाय ततो वह्निना प्रासादे दग्धे लिङ्गप्रतिमयोरग्निना दाहादिसंभवे च विधेयः प्रायश्चित्तप्रकारोऽभिधीयते। ततश्चोरादिभिर्नदीस्रोतसा च लिङ्गे चलिते देवशक्तौ चोरैर्गृहीतायां चानुष्ठेयं प्रायश्चित्तकर्माभिधीयते। ततः परिवारविहीने, परिवाराङ्गवैकल्ये बलिपीठविहीने च कर्तव्यं प्रायश्चित्तकर्म निरूप्यते।

तदनु लिङ्गप्रतिमयोः कुक्कुरादिस्पर्शे, तेषां गर्भगेहप्रवेशे, रजस्वलास्पर्शे रजस्वलागर्भगेहप्रवेशे अन्तर्मण्डलसालादौ रजस्वलास्पर्शे सूतिकया बिम्बे स्पृष्टे सूतिकया गर्भगेहप्रवेशे च तथान्तर्मण्डलसालादौ प्रेतस्पर्शे च संभाव्यमानदोषप्रदर्शनपूर्वकं तद्दोषपरिहाराय विधेयं प्रायश्चित्तकर्माभिधीयते। ततः नित्याग्निकार्यहीने सायरक्षाहीने नीराजनविहीने द्वारपूजाहीने सौख्यहीने च संभाव्यमानदोषप्रदर्शनपूर्वकं तद्दोषपरिहाराय विधेयानि प्रायश्चित्तकर्माणि कथ्यन्ते। एवं **षट्सप्ततितमपटलार्थसंग्रहः।**

सप्तसप्ततितमे पटले सकलार्चनविधिर्निरूप्यते। आचार्यः स्नानादिनित्यक्रियां निर्वृत्य आलयं प्रविश्य भूतशुद्ध्यादिकं विधाय पाद्याचमनीयादिकं कुर्यात्। स्नानार्थमुदकं संगृह्य बीजमुख्यमन्त्रेण प्रोक्षयेत्। तदनु देवेशमावाहनाद्युपचारैः संपूज्य शिरस्यर्घ्यादिकं दत्त्वा पूर्वसंध्यार्चितं पुष्पं विसर्जयेत्। तदन्वात्मानं समभ्यर्च्य मन्त्रशुद्धिं विधाय द्वारमस्त्रेण संप्रोक्ष्य अग्रे वृषभमर्चयेत्। ततो द्वारपूजां विधाय पञ्चासनं प्रकल्प्य शिवासने कलान्यासादिमन्त्रैर्विद्यादेहं प्रकल्प्य सदाशिवमूर्तिं तत्समवायिनीं शक्तिं चावाहयेत्। ब्रह्मविष्णुरुद्रमहेश्वरसदा-शिवाः कारणेश्वराः। मायाशक्तिः ब्रह्मविष्णुमूर्त्योः कारणम्। क्रियाशक्तिः रुद्रमहेश्वरसदाशिवानां कारणम्। मूर्तिकल्पनेऽष्टत्रिंशत्कलान्यासः कर्तव्यः। सदाशिवमूर्तिः महेशमूर्तिः रुद्रमूर्तिरिति मूर्तीनां त्रैविध्यम्। तत्र महेशमूर्तयः सौम्याः रुद्रमूर्तयः उग्ररूपिण्य इत्युच्यते। एता मूर्तयः प्रतिमालक्षणोक्तप्रकारेण कर्तव्या इत्युच्यते। तदनु आवाहनादिसर्वोपचारान् समर्प्य पञ्चावरणपूजां निर्वृत्य परिवारपूजाबलिहोमनित्योत्सवशुद्धनृत्तद्वार-पालार्चनादि च पूजाप्रकारणोक्तवन्निर्वर्तयेत्। नृत्तमूर्तेः प्रदोषकाले नीराजनं समर्पयेत्। उत्सवादीन् देववद्देव्याश्चापि कुर्यात्। आषाढे चाश्विने मासे च देव्याः पूरकर्मादि विशेषतया कर्तव्यम्। विशेषपूजादिकं नैमित्तिकं नित्यपूजानन्तरं कर्तव्यम्। एतदनन्तरं नित्यपूजाकाले नैमित्तिकपूजायाः संभवे यद्वक्तव्यं स भागो नष्टः। एवं **सप्तसप्ततितमपटलार्थसंग्रहः।**

अष्टसप्ततितमे पटले विशेषोत्सवविधिरुच्यते। ध्वजारोहणं कृत्वा ध्वजारोहणदिने सायंकाले गजाद्यारोहितेन सदारेण चण्डालेन तीर्थोत्सवदिनं ग्रामं सर्वत्र घोषयेत्। तत्रादौ भेरीताडनपूर्वकमस्त्रदेवसहितस्योत्सवबेरस्याग्रे सर्वान्देवानाहूय पुनस्तीर्थदिवसमाश्रावयेत्। ततो जलाशयं गत्वा तत्र तीरे स्थण्डिलद्वितयं कृत्वा एकस्मिन् स्थण्डिले शूलमन्यस्मिन्स्थण्डिले नवकलशांश्च स्थापयेत्। कलशाम्भसा शूलमभिषिच्य जलाशयेऽवगाहयेत्। ततो देवालयमागत्य तद्दिनाद्द्वादशाहेऽङ्कुरार्पणपूर्वकं यागारम्भं कुर्यात्। होमानन्तरं ग्रामादिबलिमाहरेत्। ततः प्रतिदिनमहार्निशं नवदिनं ग्रामे बेरयात्रां कुर्यात्। विशेषतः पञ्चमदिवसे देवालयं सर्वत्रास्त्रमन्त्रेणाभिमन्त्रिताः सिकताः विकिरेत्। दशमदिने तीर्थोत्सवं कृत्वा तद्रात्रावष्टध्वजानामवरोहणं कुर्यात्। तद्दिनमारभ्य सप्ताहान्तं नानावाद्यनृत्तसमन्वितं ग्रामप्रदक्षिणं कृत्वा परिवेषं यथाक्रमं कुर्यात्। बेरयात्रासमये चण्डेश्वरः पुरतो नेयः। तदनन्तरं सप्ताहं मौनमास्थाय बेरं स्नापयेत्। एषु सप्तसु दिनेषु बलिहोमादिकं न कुर्यात्। अथवा देवदेव्योः चण्डस्य च पूजां स्नपनं च कृत्वा होमं विधाय उत्सवान्ते त्रिशूलेन सह तीर्थोत्सवं कृत्वा विशेषपूजादिकं कुर्यात्। **एवमष्टसप्ततितमपटलार्थसंग्रहः।**

एकोनाशीतितमे पटले दमनपूजाविधिः प्रोच्यते। चैत्रमासे दमनपूजा कार्येति दमनपूजाकालो निरूप्यते। तदनु दमनमामंत्र्य गृहानयनप्रकारो वर्ण्यते। पूर्वेद्युः सायाह्नेऽधिवासारम्भः कार्य इत्युच्यते। तत्र मृदायुतं दमनस्य मूलं धात्रीफलचूर्णं भस्मपात्रं दमनपुष्पं दन्तधावनकाष्ठं फलम् इत्यादियागद्रव्याणां न्यासप्रकारः समन्त्रकं कथ्यते। ततः मातृकायां ग्रन्थपातो दृश्यते। **एवम् एकोनाशीतितमपटलार्थसंग्रहः।**

अशीतितमे पटले दीक्षाविधिर्निरूप्यते। ज्ञानाग्निना पशूनां शुभाशुभकर्मदग्धवत् कुर्यात्। दीक्षा चाक्षुषी स्पर्शदीक्षा वाचिकी मानसी शास्त्री यौगिकी हौत्रीत्यनेकविधा। गुरुः चक्षुरुन्मील्य शिवं ध्यात्वा पाशबन्धविमोक्षाय शिष्यं समीक्षणं कुर्यात्। सैव चाक्षुषी दीक्षा। शिवं ब्रह्माङ्गसंयुतं दक्षिणे हस्ते निधाय शिष्यस्य मूर्धादि यदि स्पृशत्याचार्यः सा स्पर्शदीक्षा। तत्त्वे चित्तं समाधाय उद्बलितान्तस्तेजसा संहितामन्त्रान् शिष्यपुरतो यदुच्चरेत् सा वाचिकी दीक्षा। मानसं विधिमाश्रित्य यत्क्रियते सा मानसी दीक्षा शास्त्रशिक्षणेन शास्त्री दीक्षा भवति। योगक्रमेण शिवतत्त्वे शिष्यं नियोजयति सा योगदीक्षा भवति। अग्निकार्योक्तक्रिया-कलापपूर्वकं विधिना यदि क्रियते दीक्षा सा हौत्रीत्युच्यते। इयं च अग्निकार्यादि बहिःकार्यकलापं विना मनोव्यापारमात्रेण यदि दीक्षा क्रियते सा ज्ञानवती दीक्षा भवति। एवं हौत्री दीक्षा ज्ञानवती क्रियावतीति द्विधा भवति। पुनः क्रियावती दीक्षा सबीजा निर्बीजा चेति द्विधा भवति। समयिपुत्रकयोर्निर्बीजदीक्षा करणीया। साधकाचार्ययोः सबीजदीक्षा कर्तव्या। निर्बीजदीक्षा च सद्योनिर्वाणदा देहपातान्ते निर्वाणदेति द्विधा। समयाचारानुष्ठानासमर्थानां बालवृद्धस्त्रीव्याधितात्मनां निर्बीजदीक्षा दातव्या। समयाचारसमर्थानां विदुषां सबीजदीक्षा करणीया इति प्रोच्यते।

सबीजदीक्षा पुनर्द्विविधा-लोकधर्मिणी शिवधर्मिणी चेति। साधकाचार्ययोः देहपातान्ते निर्वाणदीक्षा शिवधर्मिणीत्युच्यते। समयिपुत्रकाणां क्रियमाणा दीक्षा लोकधर्मिणी।

सा दीक्षा पुनर्द्विविधा निरधिकारा साधिकारा चेति। समयिपुत्रकयोः नित्यकर्ममात्रकरणेऽधिकारप्रदा निरधिकारा नित्यनैमित्तिककाम्यादिसर्वकर्मसु अधिकारदा साधिकारा। यत्र रुद्रपदे ईश्वरपदे वा दीक्षितस्य योगः तत्र शिवाच्छेदो नास्ति। सा समयदीक्षा। पुत्रकस्य यत्र पाशशिखाच्छेदादि कृत्वा शिवपदे योगः क्रियते सा निर्वाणदीक्षा। परं तस्याभिषेको नास्ति। साध्यमन्त्राभिषेकपूर्वकं क्रियमाणया दीक्षया साधको भविष्यति। सर्वमन्त्रैरभिषेकश्चेदाचार्यो भवति। कुण्डमण्डलादिसंयुक्ता क्रियाकलापैः सहिता क्रियादीक्षा। इतः परं मातृकायां ग्रन्थपातः। **एवमशीतितमपटलार्थसंग्रहः।**

एकाशीतितमे पटले भोगाङ्गार्चनविधिः प्रतिपाद्यते। तत्र मण्डपं वितानाद्यैरलङ्कृत्य मध्ये शय्यां प्रकल्पयेत्। तत्र डोलां संस्थाप्य तदवयवेषु तत्तद्देवानभ्यर्च्य शय्यायां गन्धद्रव्याणि निक्षिप्य सर्वाभरणमाल्यादि तत्पुरतो विन्यसेत्। तदनु देवेशं पूजयित्वा देव्या सह धामप्रदक्षिणं कृत्वा भोगमन्दिरं प्रविश्य, शय्यामध्ये देवदेव्यौ समारोप्य पूजां कृत्वा नैवेद्यं समर्प्य नीराजनं कृत्वा भस्मादितालवृन्तान्तमुपचारान् दापयेत्। तदनु

वेदस्तोत्रवाद्यशंखकाहलादिध्वनिभिः दीपं संकलयेत्। ततो मध्यरात्रे यवनिकां निक्षिप्य शयने शक्तिं देवेन योजयेत्। अन्ते क्षेत्रपालं शास्तारं चार्चयित्वा रात्रिपूजां समापयेत्। रात्र्यन्ते भोगाङ्गोद्वासनं कृत्वा देवं पुनर्गर्भगृहमानयेत्। ततः उषःकालपूजासूचनं दृश्यते। इतः परं ग्रन्थपातः। एवं **एकाशीतितमपटलार्थसंग्रहः।**

द्व्यशीतितमे पटले अर्चकस्याशौचविधिः प्रोच्यते। यज्ञे श्राद्धे पाकक्रियायामुत्सवे होमकाले प्रतिष्ठार्चनयोः काले च सूतकदोषो न भवतीत्युच्यते। उत्सवे रक्षाबन्धवानाचार्यः स्वस्य रोगसंभवे स्वपुत्रमन्यं शिष्यं वा तद्यागकर्मणि नियोजयेदिति प्रोच्यते। ततः पञ्चाशद्धनुःसीमान्ते मृतं शवं शीघ्रमुद्धृत्य पूजनं कर्तव्यमित्युच्यते। ध्वजारोहणे आचार्यमरणसंभवेऽन्येनाचार्येण ध्वजारोहणं कार्यमिति विधीयते। ततो मध्ये आशौचसंभवे कर्तव्यो विधिः प्रोच्यते। एकपुत्रविषये पित्रोर्मरणे आचार्येण पित्रोर्दहनं कार्यम्। ततो ध्वजावरोहणानन्तरमन्यानि प्रेतकर्माणि करणीयानीत्युच्यते। एवं **द्व्यशीतितमपटलार्थसंग्रहः।**

अथ **त्र्यशीतितमे पटले** शास्तृप्रतिष्ठोत्सवविधिः प्रोच्यते। अत्र पटलस्यारम्भे ग्रन्थपातो दृश्यते। अङ्कुरार्पणविधिः, रत्नन्यासः, नयनोन्मीलनं, जलाधिवासश्चातीवसंग्रहेण प्रतिपाद्यते। ततो मण्डपकल्पनं कुण्डकल्पनं च वर्ण्यते। तत्र दिक्षु चतुश्रकुण्डानि ऐशान्ये वृत्तकुण्डं च कल्पयेदिति पञ्चकुण्डनिर्माणप्रकारो वर्ण्यते। ततः शयनाधिवासः कुम्भस्थापनं तत्पूजा च वर्ण्यते। ततो होमविधौ प्रारम्भभाग एव दृश्यते। असंपूर्णोऽयं विषयः।

ततः शास्तुरुत्सवविधिः प्रतिपाद्यते। तत्रादौ उत्सवफलम् उत्सवकालविधिश्च प्रोच्यते। ततो माघमासे सोमवारदिने शास्तुरुत्सवः कर्तव्य इत्युत्सवकालो निरूप्यते। अत्र सर्वमासेष्वपि शास्तुः प्रार्थनपूर्वकमुत्सवः कर्तव्य इत्यपि सूचितम्। ततः स्वतन्त्रालये नूतनकार्ये एकाहनवाहपक्षाहोत्सवाः करणीया इति कथ्यते। स्वतन्त्रालये आदिशैवेनैव नित्यनैमित्तिककाम्यकर्मादिकं करणीयमित्युच्यते।

ततः एकाहाद्युत्सवभेदाः प्रदर्श्यन्ते। उत्सवेषु ध्वजारोहणपूर्वकं, भेरीताडनपूर्वकं, अङ्कुरार्पणपूर्वकमिति प्रकारत्रितयमस्तीति सूच्यते। उत्सवकरणेऽनुज्ञाप्रार्थनं मृत्संग्रहणप्रकारश्च वर्ण्यते। ततः अङ्कुरार्पणविधिः, ततो ध्वजाधिवासनविधिः प्रतिपाद्यते। तत्रादौ ध्वजपटसंपादनप्रकारोऽभिधीयते। भेरीपूजा भेरीताडनविधिश्च निरूप्यते। तदनु होमविधिः समन्त्रकं प्रतिपाद्यते। ध्वजदण्डार्चनं ध्वजारोहणविधिश्च कथ्यते। यागार्थं मण्डपकल्पनं तत्र कुण्डकल्पनं च वर्ण्यते। तत्र वेदिबाह्ये पञ्चकुण्डानि वा एककुण्डं वा कर्तव्यम्। तत्र प्रधानकुण्डं वृत्तं भवेदित्युच्यते। ततो वेदिमध्ये तण्डुलादिभिः दर्भैः पुष्पैश्च परिस्तरेत्। तन्मध्ये नलिनं साष्टपत्रं सकर्णिकं कृत्वा गन्धपुष्पाद्यैश्च यागेशाराधनं कर्तव्यमिति प्रोच्यते।

ततो होमविधिः समन्त्रकं प्रतिपाद्यते। पश्चात् प्रतिसरबन्धनविधिर्वर्ण्यते। उत्सवबलिदानविधिः प्रोच्यते। अत्र ग्रन्थपातो वर्तते। अवभृथस्नानप्रकारः संग्रहतया प्रतिपादितः। ततः प्रायश्चित्तहोमविधिः संग्रहेणाभिधीयते। तत्र पूर्णाहुतिः विशिष्य प्रतिपाद्यते। आचार्यादीनां दक्षिणादानप्रकारो वर्ण्यते। ततो यागकुम्भाभिषेकविधिरुच्यते। ततः एकोनपञ्चाशत्स्नपनं पञ्चविंशतिस्नपनं षोडशस्नपनं वा नवकलशस्नपनं पञ्चकलशस्नपनं वा कर्तव्यमित्युच्यते। ततो ध्वजावरोहणं चण्डयागः लोकेशानां बलिविधिश्च कर्तव्या इति सूच्यते। प्रत्यब्दं शास्तुरुत्सवकरणे सर्वपापानि प्रणश्यन्तीति फलमभिधीयते। एवं **त्र्यशीतितमपटलार्थसंग्रहः।**

चतुरशीतितमे पटले आचार्यलक्षणविधिः प्रोच्यते। तत्र स्थूलं, सूक्ष्ममिति द्विविधमाचार्यलक्षणमुच्यत इति प्रतिज्ञा क्रियते। ज्ञानं, ध्यानं, स्वाध्यायः, तपः, कर्मेति पञ्च महायज्ञा भवन्ति। एतेषां पञ्चमहायज्ञानां मध्ये प्रथमतः प्रोक्तौ ज्ञानध्यानरूपौ द्वौ यज्ञौ मुख्यौ भवतः। तौ चात्मगुणत्वेन परिगणितौ। शेषा अन्ये स्वाध्यायतपःकर्माणि कर्तव्यानीत्युच्यते। तदनन्तरमाचार्यविषये स्थूललक्षणं नैवापेक्षणीयम्। आत्मगुणत्वेन परिगणितं सूक्ष्मलक्षणमेव मुख्यमिति लक्षणद्वयविवरणं सम्यक् प्रतिपाद्यते।

ततः काश्मीरादिदेशजदोषयुक्ताः, कुनख्याद्यङ्गदोषयुक्ताश्च यद्यात्मगुणसंपन्ना भवेयुस्ते ग्राह्याः। अहंकाराद्यात्मदोषयुक्ता एव त्याज्या इति प्रोच्यते। तत आत्मगुणसंपन्नाः श्रेष्ठा इति निरूप्यते। आचार्यपुत्रो ज्ञानयुक्तश्चेत्तस्मिन्विषयेऽङ्गदोषो नैवावेक्षणीय इत्युच्यते। तत अङ्गदोषो नैव दोषो भवति। अहंकाराद्यात्मदोषा

एव दोषा इति स्पष्टमुच्यते। ततो देवादिविषयेऽङ्गवैकल्यं न दोषाय भवेदित्ययं विषयो विस्तरेण सदृष्टान्तं प्रतिपाद्यते। एवं **चतुरशीतितमपटलार्थसंग्रहः ।**

पञ्चाशीतितमे पटले श्रद्धोत्सवविधिः प्रोच्यते। तत्र सायुज्यं सौभाग्यं सौख्यं मङ्गलमिति चत्वार उत्सव-भेदाः सन्तीत्युच्यते। तेषां लक्षणं प्रतिपाद्यते। ततस्तीर्थनक्षत्राणि कथ्यन्ते। तत उत्तममध्यमाधमा इति उत्सवे भेदत्रयमुच्यते। तत सायुज्योत्सवे विशेषपूजनं, बेरयानं, यात्रार्थस्नपनं, शान्तिहोमः, प्रभूतान्ननिवेदनमिति पञ्चाङ्गानि प्रोच्यन्ते।

ततः अङ्कुरार्पणं, रक्षाबन्धनं, वास्तुशुद्धिः, बेरयानं, परिवेषः, नृत्तावलोकनं, यात्रार्थस्नपनं, विशेषयजनं, शान्तिहोमः, तीर्थाधिवासः, चूर्णोत्सवः, तीर्थकर्म, आचार्यपूजनं, दक्षिणादानं, प्रायश्चित्ताभिषेकः, प्रभूतान्ननिवेदनमिति षोडशाङ्गानि सौभाग्योत्सवे भवन्तीत्युच्यते।

ततः सौख्योत्सवे बीजावापः, रक्षाबन्धनं, भेरीताडनम्, वास्तुशुद्धिः, अस्त्रयागः, बलिदानं, बेरयानं, परिवेषः, नृत्तावलोकनं, स्नपनं, विशेषपूजनं, मृगयानं, तीर्थाधिवासः, चूर्णोत्सवः, तीर्थकर्म, मौनयानं, यागकुम्भाभिषेकः, दक्षिणादानमाचार्यपूजनमन्त्रदानमिति। विंशत्यङ्गानि वर्तन्त इत्युच्यते।

ततो ध्वजारोहणपूर्वकम् भेरीताडनपूर्वकमङ्कुरार्पणपूर्वकमिति भेदत्रयं मङ्गलोत्सवे वर्तत इत्युच्यते। एवं चतुर्षूत्सवेषु क्रियाकलापः संग्रहेण कर्तव्यत्वेन सूचितः। ततः प्रकारान्तरेण सौभाग्योत्सवे क्रियाकलापः प्रतिपाद्यते। ततः प्रतिसरबन्धनप्रकारो विशिष्य प्रतिपाद्यते। तत उत्सवेश्वरस्यास्थानमण्टपप्रवेशः, तत्र नीराजनादिकरणम्, अपरे दिवसे करणीयविधिरित्येते विषया वर्ण्यन्ते। तत्र वास्तुहोमः कार्य इत्युच्यते। तत उत्सवकाले रात्रौ कर्तव्यो यानक्रमो वर्ण्यते। प्रथमदिने 'सोमधारी द्वितीये उमार्धमूर्तिः तृतीये वृषभारूढः, चतुर्थे संवादमूर्तिः, पञ्चमे गजारिमूर्तिः, षष्ठे शाम्भवमूर्तिः, सप्तमे वैवाह्यमूर्तिः, अष्टमे त्रिपुरघ्नमूर्तिः, नवमे कालारिमूर्तिः' एवं प्रथमदिनमारभ्य नवमदिनपर्यन्तमुत्सवमूर्तयो निरूप्यन्ते। एषां विग्रहाणामभावे सोमास्कन्दमूर्तिराहर्तव्येत्युच्यते। अथ उत्सवकाले प्रयोक्तव्यानि वाहनानि निर्दिश्यन्ते। यथा—कल्पवृक्ष-कुण्डोदर-वृषभ-मौक्तिकप्रभा-गज-पुष्पविमान-स्यन्दन-तुरग-शिबिकेति तत्तन्मूर्तिवाहनतया कल्पनीयानी-त्युच्यते। वाहनानामभावे शिबिका कल्पनीयेत्युच्यते। एवमुत्सवकाले प्रयोक्तव्यानि पुष्पाभरणवस्त्रादीनि प्रोच्यन्ते। पूर्वोक्तद्रव्याणामभावे कर्तव्यविधिश्च सूच्यते। प्रतिदिनं कर्तव्य उत्सवक्रमो विशिष्य प्रतिपाद्यते। तत उत्सवान्ते कर्तव्यश्चूर्णोत्सवविधिर्वर्ण्यते। एवं **पञ्चाशीतितमपटलार्थसंग्रहः ।**

षडशीतितमे पटले पञ्चगव्यविधिरभिधीयते। तत्रादौ पञ्चगव्यशब्दार्थविवरणं प्रतिपाद्यते। ततः शिवाग्रे मण्डपे गोमयेन शुद्धिं कृत्वा शालिभिः स्थण्डिलं कृत्वा प्रागग्रोदगग्रतया सूत्रचतुष्टयलेखनेन नवकोष्ठमण्डलं कृत्वा तद्बहिश्चतुरश्रं साष्टपत्रं पद्मं विलिख्य कोष्ठेषु पात्राणि स्थापयित्वा दिक्पात्रेषु चतुर्वेदान् विदिक्पात्रेषु कृतादियुगांश्च विन्यस्य पुण्याहं वाचयित्वा तेषां पूजां कुर्यादिति प्रोच्यते। कुम्भेषु द्रव्यन्यासो विधीयते। ततः पञ्चगव्यानामृषयोऽधिदेवताश्च प्रतिपाद्यन्ते। तदनु द्रव्याभिमन्त्रणं पञ्चगव्ययोजनं च प्रोच्यते। उत्तममध्यमाधम-भेदेन पञ्चगव्यमानविधिरभिधीयते। ततः पञ्चगव्यग्रहणे गवां वर्णः पञ्चगव्याभिषेकफलं चोच्यते। पञ्चगव्याभिषेकानन्तरं पञ्चामृताभिषेकः कर्तव्य इत्युच्यते। प्रसङ्गात् पञ्चगव्यपात्रलक्षणं निरूप्यते। एवं **षडशीतितमपटलार्थसंग्रहः ।**

सप्ताशीतितमे पटले पञ्चामृतविधिरभिधीयते। शिवाग्रे स्थण्डिलं कृत्वा तत्र पञ्चकोष्ठानि कृत्वा पात्राणि प्रक्षिप्य दिक्षु क्षीर-दधि-घृत-मधु शर्कराश्च विन्यस्य पुनर्विदिक्षु कदलीपनसाम्रनालिकेरं च स्थापयेत्। मध्यपात्रे इतरपात्रस्थद्रव्याणि मूलमन्त्रेण संयोज्य पञ्चामृतं कुर्यात्। पञ्चामृते उत्तममध्यमाधमभेदेन त्रैविध्यं प्रतिपाद्यते। एवं फलपञ्चामृतविधिः प्रोच्यते। तदनन्तरमभिषेकद्रव्याणि षड्गन्धद्रव्याणि च निरूप्यन्ते। ततोऽन्नाभिषेक-प्रकारः, सहस्रधाराभिषेकप्रकारश्च प्रोच्यते। अभिषेकानन्तरं नैवेद्यताम्बूलमुखवासपाद्यादिसमर्पणं चुलुकोदक-जपसमर्पणादिकं च प्रतिपाद्यते। एवं **सप्ताशीतितमपटलार्थसंग्रहः ।**

अष्टाशीतितमे पटले स्नपनविधिरभिधीयते। तत्रादौ स्नपनकालाः अथवा स्नपननिमित्तानि निरूप्यन्ते।

ततः अष्टोत्तरशतैरेकाशीतिपञ्चाशत्पञ्चविंशैर्वा षोडशैर्नवभिरेकेन वा वर्धनीसहितैः कुम्भैः प्रतिसन्धिषु अभिषेकः कार्य इत्युच्यते। स्नपनविषयेऽस्मिन्नागमे २९तमपटलोक्तमार्गाद्विशेषोऽभिधीयते। भेदसुषिरादिदोषयुक्ताः कुम्भा वर्ज्याः। कुम्भानां सूत्रवेष्टनमधिवासश्च प्रोच्यते। तदनु भूमिशोधन-सूत्रविन्यास-स्थण्डिलकल्पन-कलशन्यास-द्रव्यविन्यासादि षोडशक्रियाकलापः समन्त्रकं कर्तव्य इत्युच्यते। ततो नवकलशस्नपनविषये सूत्रपातः स्थण्डिलकल्पनं च कर्तव्यत्वेनाभिधीयते। ततः शिवतोयकल्पन-कुम्भस्थापन-शिवध्यान-वर्धनीपूजाश्च कर्तव्यत्वेनाभिधीयन्ते। **एवमष्टाशीतितमपटलार्थसंग्रहः ।**

एकोननवतितमे पटले कलासूत्रयागशालाकुण्डविधिरभिधीयते। तत्र सूत्रपातः, पदसंख्या, शिवशक्तिनाद-बिन्दुसदाशिवमहेश्वरविष्णुपदविभागः सम्यग्विधीयते। ततः कुम्भस्थापनपूजाद्रव्यस्थापनकुण्डकल्पनवीथी-कल्पनभित्तिनिर्माणप्रकाराः सम्यक् प्रतिपाद्यन्ते। नन्द्यादिद्वारकुम्भदेवतानामानि प्रधानवेदिकार्चनं च सम्यक् प्रतिपाद्यन्ते। ततः कुण्डलक्षणं कुण्डप्रमाणं मेखला प्रमाणमित्यादयः प्रतिपाद्यन्ते। ततश्चतुरश्रकुण्डं योनिकुण्डमर्धचन्द्रकुण्डं त्रिकोणकुण्डं वृत्तकुण्डं षडश्रकुण्डं पद्मकुण्डमष्टाश्रकुण्डमष्टकोणकुण्डं च सलक्षणं प्रतिपादितम्। अन्ते प्रधानकुण्डविषयः सूच्यते। **एवमेकोननवतितमपटलार्थसंग्रहः ।**

नवतितमे पटले स्थानशुद्धिरभिधीयते। अयं विषयो नित्यपूजाङ्गस्थानशुद्धेर्व्यतिरिक्तः। अत्र प्रथमं स्थानशुद्धेर्निमित्तानि कथ्यन्ते। ततः खननोद्धारदहनपूरणगोवासविप्रोच्छिष्टपञ्चगव्यप्रोक्षणवेदशुद्ध्याख्या अष्टौ शुद्धयः नाम्ना निर्दिष्टाः। एता अष्टशुद्धयः समन्त्रकं प्रतिपाद्यन्ते। अत्र प्रसङ्गात् गोपूजा सम्यक् प्रतिपाद्यते। एवं **नवतितमपटलार्थसंग्रहः ।**

एकनवतितमे पटले तीर्थोत्सवविधिरभिधीयते। तत अयन-विषु-संक्रान्ति-सोमसूर्योपराग-अमापौर्णमासी-षष्ठ्यष्टमीचतुर्दश्याख्यतिथिषु, आर्द्रापुष्यंनक्षत्रयोर्वा शिवोत्सवः कर्तव्य इति तीर्थोत्सवकालो निरूप्यते। नवाहे सप्ताहे पञ्चाहे त्रिदिने एकाहे वा तीर्थोत्सवः कार्य इत्युत्सवदिनानि कथ्यन्ते। आरोहाद्यवरोहान्तमुत्सवकरण-मुत्तमम्। आरोहणं विनोत्सवकरणं मध्यमम्। केवलतीर्थोत्सवमात्रकरणमधममिति प्रकारत्रयं तीर्थोत्सवे ऽभिधीयते। तत उत्सवकरणप्रकारः प्रतिपाद्यते। **एवमेकनवतितमपटलार्थसंग्रहः ।**

द्विनवतितमे पटले सप्तकन्यास्थापनमभिधीयते। तत्रादौ देवकन्या नागकन्या गन्धर्वकन्या ब्राह्मणकन्या राजकन्या वैश्यकन्या शूद्रकन्येति सप्तकन्यानां नाम कथ्यते। ततस्तासां वनमध्ये जलतीरे आरामे वृक्षमूले च प्रतिष्ठायोग्यस्थानं कल्पनीयमित्युच्यते। ततस्तासां स्थापनप्रकारः संक्षेपतोऽभिधीयते। तत्र वेदिकुण्डसमन्वितं मण्डपं प्रकल्प्य अङ्कुरार्पणपूर्वकमभिषेकान्तं कर्म यथाक्रमं कुर्यादित्युच्यते। ततस्तत्र विशेषः प्रतिपाद्यते। तत्र वेदिमध्ये देवकन्यां पूर्वे नागकन्यां पश्चिमे गन्धर्वकन्यां दक्षिणे ब्राह्मणकन्यामुत्तरे राजकन्यां नैर्ऋत्यां वैश्यकन्यां वायव्यां शूद्रकन्यां च विधिवत्स्थापयेत्। ऐशान्यां गणेश्वरमाग्नेय्यां शास्तारं च प्रतिष्ठाप्य पूर्वोक्तमार्गतः सम्यक् पूजयेदित्युच्यते। ततस्तत्त्वतत्त्वेश्वरमूर्तिमूर्तीश्वरन्यासोऽभिधीयते। ततः पूर्वोक्तानां सप्तकन्यानां विशिष्य ध्यानप्रकारोऽभिधीयते। एवं **द्विनवतितमपटलार्थसंग्रहः ।**

त्रिनवतितमे पटले कन्यकापरमेश्वरीस्थापनं प्रोच्यते। तत्र प्रथमं कन्यकापरमेश्वर्या लक्षणमभिधीयते। कन्यकापरमेश्वरी रक्तवर्णा पद्मधरा वामे लम्बकरा जटामकुटधारिणी समपदा पद्मासने संस्थिता भवेदिति कथ्यते। ततः प्रकारान्तरेण लक्षणमभिधीयते। द्विनेत्रा द्विभुजा पद्मपीठे स्थिता शिरश्चक्रजटाचूडा-पादुकालक्तसंयुक्ता सर्वलक्षणसंयुता दिव्याभरणभूषिता सव्यहस्ते पद्मधरा वामहस्ते लम्बनवती भवेत्। कन्यकापरमेश्वरी भक्तानां वाञ्छितार्थप्रदायिनी वैश्यानां कुलदेवता त्रिमूर्तिभिर्दत्तवरा सर्वसिद्धिप्रदात्रीति तस्याः प्रभावो वर्ण्यते। ततः साष्टकन्यासमायुक्तेत्युक्त्वा तासां नामानि लक्षणं च प्रोच्यते। तत्राष्टकन्या द्विभुजा द्विनेत्रा विचित्रवर्णशोभाढ्याः सर्वाभरणभूषिता भवेयुरिति वर्ण्यते। ततस्तस्याः स्थापनप्रकारः संग्रहेण प्रतिपाद्यते। तत्र सर्वमासेषु शुक्लपक्षे शुभे दिने स्थापनं कर्तव्यमिति प्रतिष्ठाकालः सूच्यते।

ततोऽङ्कुरार्पणं रत्नन्यासः आवाहनाद्युपचारः पायसादिबलिदानमित्यादिक्रियाकलापः कर्तव्यत्वेनोच्यते। ततो नयनोन्मीलनं प्रतिमाशुद्धिः ग्रामप्रदक्षिणं जलाधिवासः प्रतिमाया यागशालानयनमित्येते विषयाः कर्तव्यत्वेन

सूच्यन्ते। ततो मण्डपकल्पनं तत्र कुण्डकल्पनं मण्डपे सौरपूजादिकं कर्म विधिवत्करणीयमित्युच्यते। तदनु द्वारशक्त्यादिपूजा दशायुधपूजा च करणीयेत्युच्यते। ततः प्रतिमायाः शयनाधिवासः कुम्भस्थापनप्रकारश्च कथ्यते। ततोऽष्टमङ्गलपूजा, प्रतिसरबन्धः, तत्त्वतत्त्वेश्वरीमूर्तिमूर्तीश्वरीन्यासः इत्येतत्क्रियाकलापः करणीय इत्युच्यते। ततो होमविधिः परेऽहनिकर्तव्यविधिश्चातीव संग्रहेण प्रतिपाद्यते। ततः प्रतिमास्थापनं कुम्भाभिषेकश्च कर्तव्य इत्युच्यते। ततो विशिष्याचार्यादिपूजा दीनान्धकृपणानां भूरिदानं च विधेयत्वेन सूच्यते। ततो यजमानस्याभीष्टसिद्धिः संभवेदित्युच्यते। एवं **त्रिनवतितमपटलार्थसंग्रहः ।**

चतुर्नवतितमे पटले जीर्णोद्धारविधिः प्रतिपाद्यते। तत्र प्रथमं प्रासादलिङ्गपीठेषु जीर्णतादिसंभवे, तथा गोपुरशिखरचित्रकूटनृत्तमण्डपचित्रशालासभास्थानमण्टपादिप्रासादावयवेषु जीर्णतादिसंभवे च तेषां पुनः कल्पनं कर्तव्यम्। पुनः कल्पने तेषां शिल्पशास्त्रोक्तमार्गेण पूर्ववद्रूपं कल्पयेदित्युच्यते। जीर्णोद्धारे नूतनप्रासादादि-करणानन्तरविधिः। मुखलिङ्गे तथा बिम्बे चावयवभेदादिसंभवे, उत्सवकाले बिम्बे वाहने च भेदादिसंभवे, रत्नजादिबिम्बेषु भेदच्छेदादिसंभवे प्रायश्चित्तोक्तमार्गेण यथापूर्वं तथा नयेत्। ततः सभास्थानवर्णनं सभापतिवर्णनं दृश्यते। सभाकूटादिषु जीर्णता भेदयोः संभवे पुनः कल्पनमाचरेत्। ततो जीर्णोद्धारविधिक्रमो निरूप्यते। ततो बालालये कर्तव्यो नित्यपूजाविधिः कथ्यते। ततः संप्रोक्षणविधिः प्रतिपाद्यते। तत्र षोडशाङ्गानि निरूप्यन्ते। ततश्चित्रकूटप्रतिष्ठाफलं सभापतिप्रतिष्ठाफलं च प्रतिपाद्यते। एवं **चतुर्नवतितमपटलार्थसंग्रहः ।**

पञ्चनवतितमपटले कलाकर्षणविधिरभिधीयते। तत्रादौ शाक्तं शैवमिति कलाकर्षणे भेदद्वयं निरूप्यते। ततः शाक्तं शाक्तेन कर्तव्यम्। शैवं शैवेन कारयेत्। यद्यन्यथा मोहात् तत्कर्म क्रियते निष्फलम् भवेदित्युच्यते। ततः शिवस्य ब्रह्मा विष्णुः रुद्रः ईश्वरः सदाशिवः, बिन्दुर्नादः शक्तिः शिवश्चेति नवधा मूर्तिभेदो निरूप्यते। ब्रह्मा विष्णुश्च रुद्रश्च भोगाङ्गत्वेन कीर्तिताः। महेश्वरसदाशिवौ अधिकाराङ्गत्वेन प्रकीर्तितौ। बिन्दुर्नादः शक्तिशिवौ लयाङ्गत्वेन कीर्तिताः। ततः कलाकर्षणप्रकारः कलाकर्षणकालश्च वर्णितौ। एवं **पञ्चनवतितम-पटलार्थसंग्रहः ।**

षण्णवतितमे पटले शक्तिकलाकर्षणमभिधीयते। तत्र प्रथमतः समान्यतः स्वतन्त्रा, केवला, सहजा, मिश्रा चेति चतस्रः शक्तयो वर्तन्त इत्युक्त्वा तासां नामानि निर्दिश्यन्ते। ईश्वरशक्तिविषये स्वशक्तिः परिग्रहशक्तिरिति भेदद्वयं वर्तते। तत्र शिवाभिन्ना शक्तिः स्वशक्तिः। कार्यसामान्ये प्रेरिता शक्तिः परिग्रहशक्तिरिति तयोः स्वरूपविवरणं क्रियते। प्रकारान्तरेण स्वशक्तिपरिग्रहशक्त्योर्भेदः प्रोच्यते। शिवालये शिवलिङ्गेन सह प्रतिष्ठिता स्वशक्तिः। शिवालयेऽन्यप्राकारे स्थापिता परिग्रहशक्तिरिति तयोः स्थापनं च निरूप्यते। पूर्वोक्तशक्तेः स्वतन्त्रा, केवला, सहजेति भेदत्रयं वर्तते। तथा परिग्रहशक्तिरेव मिश्रशक्ति-रित्युच्यते। ततः स्वतन्त्रशक्तेः स्वप्रधाना स्वाङ्गेति भेदद्वयं वर्तते। शिवालये द्वितीये, तृतीये वा प्राकारे गोपुरमण्डपयुक्तो ध्वजबलिपीठवृषसहितः परिवारसमन्वितः पृथगालयः कल्पनीयः। तत्र स्वप्रधानशक्तेः प्रतिष्ठा करणीयेत्युच्यते। ततः स्वाङ्गशक्तेः शिवालये ईशानभागे वृषभध्वजसंयुतः परिवारविहीनः पृथगालयः कल्पनीयः। तस्मिन्नालये स्वाङ्गशक्तिः प्रतिष्ठापनीयेत्युच्यते। तदनु शिवालये गर्भावरणे वा अन्तहरि वा गर्भालयस्य पूर्वभागे वा पार्श्वे वा सहजशक्त्यालयः कल्पनीयः। तत्र सहजशक्तिः प्रतिष्ठापनीयेति कथ्यते। तदनन्तरं केवलायाः शक्तेः शिवालयपृथक्स्थले प्राकारद्वारदेशे आलयं गोपुरध्वजसहितं प्राकारैर्युक्तं प्रकल्प्य तत्र केवला शक्तिः स्थापनीयेत्युच्यते। ततो मिश्रशक्तेः शिवालयादन्यदेशे गोपुरध्वजबलिपीठसंयुतं प्राकारमण्टपैर्युतं पृथगालयं प्रकल्पयेत्। तत्र सिंहो वा हंसो वा वाहनतया कल्पनीय इत्युच्यते। मिश्रशक्तिरेवेश्वरस्य परिग्रहशक्तिरिति स्पष्टमभिधीयते। ततः स्वप्रधान-स्वाङ्ग-सहजकेवलाख्यानां तथा मिश्रशक्तेश्चावरणपूजा विधीयते। तत्र पञ्चावरणस्थितानां पूजनीयानां शक्तीनां नामानि निर्दिश्यन्ते। परं तु शक्तिकलाकर्षणप्रकारो नात्र दृश्यते। एवं **षण्णवतितमपटलार्थसंग्रहः ।**

सप्तनवतितमे पटले गौर्युत्सवविधिर्वर्ण्यते। तत्र प्रथमं गौर्युत्सवफलं प्रोच्यते। तत उत्सवशब्दार्थवर्णनं दृश्यते। ततो गौर्युत्सवकालः शिवोत्सवे प्रोक्तवद्भवेदित्युच्यते। उत्सवोऽयं ध्वजारोहणपूर्वक इत्युच्यते। ततो

ध्वजदण्डप्रमाणं कथ्यते। ततो ध्वजपटवर्णनं तत्र कृष्णसारादिलेखनप्रकारोऽभिधीयते। तत्र ध्वजपटोऽणुशक्तिरित्युच्यते। ध्वजपटस्य मध्यभागे कृष्णसारमुत्पलं च लिखित्वा अन्यच्चैवोत्सवप्रोक्तवल्लेखनीयमिति सूच्यते। कृष्णसार आदिशक्तिरिति वर्णिता। ध्वजपटमध्यभागे कृष्णासारस्थाने वृषभो वा लिख्यतामिति पक्षान्तरं बोध्यते। ततो द्विविधा कृष्णसारगायत्री कथ्यते। तत उत्सवविषये शान्ताद्यष्टदिक्पालानां नामानि निर्दिश्यन्ते। ततोऽष्टपरिवारिकाणां नामानि कथितानि। तदनु कृष्णसारो वृषभश्च विष्णुमूर्ती भवत इति विशेषः प्रदर्शितः। ततो ध्वजपटलेखनविषये विशेषः प्रतिपाद्यते। तत्र शिवालयवास्तुप्रदेशे गौर्युत्सवकरणकाले वृषभं सिंहं च लिखेत्। तत्र वृषभः शक्त्यग्रे स्थितत्वेन लेखनीयः। तथा कृष्णसारश्च देशिकाज्ञया लेखनीय इत्युच्यते। ततः शक्त्यालयप्रदेशे गौर्युत्सवकरणे ध्वजपटे वृषभं वा सिंहं वा लेखयेदिति विशेषो निरूप्यते। ततो वृषभगायत्री कथ्यते। ततो वृषशक्तिः वृषपरिवारका अष्टौ एतेषां नामानि च कथ्यन्ते। वृषशक्तिपरिवारशक्तीनामष्टानां नामानि च कथ्यन्ते। ततः सिंहगायत्री सिंहशक्तिर्हास्यसिंहीति नाम्ना निर्दिश्यते। सिंहपरिवाराणां नामानि सिंहशक्तिगायत्री सिंहशक्तिपरिवारिकास्तत्प्रकारान्तरमपि कथ्यते। उत्सवदिनानि निर्दिश्यन्ते। ततो ध्वजदण्डयोग्यवृक्षाः कथ्यन्ते। ततो ध्वजारोहणं बलिदानं बलिदानकाले देयानि पुष्पाणि च कथ्यन्ते। ततो नवदिनेषूत्सवार्थं कल्पनीयानि वाहनानि निर्दिश्यन्ते। दशमदिने तीर्थोत्सवमाचरेदित्युच्यते। उत्सवे चतुर्थपञ्चमषष्ठदिनेषु कर्तव्या विषयाः प्रतिपाद्यन्ते। अन्ते यत्किंचिदनुक्तं शैवोत्सववत् कर्तव्यम्। अन्यथाकरणे तद्दोषशमनाय महाशान्तिर्विधेयेत्युच्यते। एवं **सप्तनवतितमपटलार्थसंग्रहः।**

अष्टनवतितमे पटले यागशालाविधिः कथ्यते। तत्र प्रथमं यागशालाशब्दनिर्वचनमभिधीयते। ततो यागशालास्थानानि निरूप्यन्ते। ततो द्विविधं मानं निरूप्यते। तत्र मानाङ्गुलं मात्रागुलं देहलब्धाङ्गुलमिति त्रिविधमङ्गुलं निरूप्यते। ततो मानाङ्गुलेन करणीयानि, मात्राङ्गुलेन करणीयानि, देहलब्धाङ्गुलेन कर्तव्यानि च प्रोच्यन्ते। तदनु यागशालालक्षणं कथ्यते। भूपरीक्षा तत्र शुभाशुभलक्षणदर्शनं च निरूप्यते। ततो रत्नन्यासप्रकारो निरूप्यते। ततो रुद्रविष्णुब्रह्ममनुरवीणां पञ्चसूत्राणां पदक्रमकल्पनप्रकारो वर्ण्यते। तत्र रुद्रसूत्रपदक्रमो विशेषेण निरूप्यते। तथा विष्णुसूत्रपदक्रमो मनुसूत्रपदक्रमो रविसूत्रपदक्रमश्च पृथक् पृथग्निरूप्यते। तत्र मनुसूत्रक्रमविषये प्रकारान्तरं कथ्यते। ततो रुद्रादिपञ्चसूत्रक्रमेण निर्मितयागशालासु कल्पनीयकुण्डसंख्या क्रमेण प्रोच्यते। ततो वेदिकायां कुण्डकल्पनप्रकारः सम्यगभिधीयते। ततो वेदिकालक्षणं कथ्यते। तत्रादौ नवकुण्डकल्पनरीतिर्निरूप्यते। ततस्त्रयस्त्रिंशत्कुण्डपञ्चविंशतिकुण्डसप्तदशकुण्डकल्पनप्रकारोऽभिधीयते।

ततो नवकुण्डानां शिवाष्टमूर्तित्वकल्पनं निरूप्यते। कुण्डेषु तत्त्वतत्त्वेश्वरन्यासकल्पनं मूर्तिमूर्तीश्वरन्यासकल्पनं च कथ्यते। ततः प्रतिष्ठादौ वर्जनीयानि कुण्डानि तथा क्षुद्रकर्मसु कर्तव्यानि कुण्डानि, प्रायश्चित्तादौ करणीयानि कुण्डानि च क्रमेण निरूप्यन्ते। कुण्डेषु खातकल्पनप्रकारः, मेखलात्रितयकल्पनप्रकारः, कुण्डेषु कर्णिकाकारकल्पनप्रकारः, नाभियोनिकल्पनप्रकारः, इत्येते विषया निरूप्यन्ते। ततः शिवाग्नौ पञ्चावरणकल्पनप्रकार इत्यादिबहवो विषयाः कथ्यन्ते। **एवमष्टनवतितमपटलार्थसंग्रहः।**

एकोनशततमे पटले रथोद्धारलक्षणविधिर्वर्ण्यते। या वीथी देवालयावृता सा रथवीथिरिति कथ्यते। रथःसप्तकोटिमहामन्त्ररूपः। रथेऽस्मिन्ननन्त-सिंह-पद्म-योग-विमलाख्यपञ्चासनोपरि महादेवः सोमास्कन्दरूपेण तिष्ठतीति प्रोच्यते। देहमध्ये हृदयस्थाने यथास्थितः महेश्वरः तथैव रथमध्ये च वर्तते। मेरुपर्वत एव रथः। रथ ऐवेदं शरीरमिति शरीरसदृशत्वेन रथवर्णनं दृश्यते। अस्य रथस्य रज्जुरस्त्रमन्त्रः। वेदा एव वाजिनः, ब्रह्मा सारथिरिति वर्ण्यते। ततो वाद्यघोषपुरःसरं वेदपारगैः शैवैः वैष्णवैरन्यैश्च भक्तैः सह रथवीथिप्रदक्षिणम्। ततो रथपरिवेषणसमाप्तौ रथाकर्षणकाले चण्डालस्पर्शदोषनिवृत्त्यर्थं संप्रोक्षणं स्नपनं च करणीयमिति विधीयते। **एवमेकोनशततमपटलार्थसंग्रहः।**

शततमे पटले भैरवीपूजाविधिरिति नाम निर्दिश्यते। परं तु अत्र पूजाप्रयोगो न दृश्यते। कुटजप्रदेशे

कोलद्वीपे स्थिताया भगवत्याः स्वरूपवर्णनं प्रोच्यते। सा अघोरचक्रस्योपरिस्थिता पीतवस्त्रा चतुर्भुजा त्रिनयना अर्धचन्द्राङ्कमालिनी स्वोपासकानां सर्वकामदा चेति तस्या लक्षणं प्रोक्तम्।

ततो रक्तवर्णा, रक्तवस्त्रधरा, स्वदन्तैर्दशिताधरा, सहस्रसर्पाभरणा, सिंहताक्ष्यहिमहिषसालावृकाद्यनेक-वाहनैर्युक्ता, विंशतिहस्ता, विंशत्यायुधधरा, ऊर्ध्वानना, संहारचक्रमध्यस्थिता, पृथक् पृथक् कोटिकोटिभैरवी-भैरवैरावृता चेति भैरवीलक्षणं वर्ण्यते। ततः पञ्चवक्त्रा प्रतिमुखं त्रिनयना, आवरणदेवताभिरावृता, आपत्काले स्मरणीया चेति कालरुद्रभैरवीलक्षणं प्रोक्तम्।

ततो भैरवीमालामन्त्रः, श्रीमन्त्रः, भैरवमन्त्रः, अष्टत्रिंशत्कलान्यासविधिश्च कथ्यते। एवं **शततमपटलार्थ-संग्रहः।**

एकाधिकशततमे पटले मुहूर्तनिर्णयविधिरुच्यते। तत्रादौ लिङ्गप्रतिष्ठाकालो विस्तरेण प्रतिपाद्यते। तत्रायन-मास-पक्ष-तिथिषु विषये उत्तममध्यमाधमानां परिगणनं क्रियते। एवं वार-नक्षत्र-राशिषु विषये उत्तम-मध्यमाधमनिरूपणं क्रियते। एवमुच्चस्थानादिषु स्थितानां नवग्रहाणां शुभाशुभफलानि प्रोच्यन्ते। ततो वर्ज्यकालाः प्रदर्श्यन्ते। एवं योगकरणयोर्विषये च शुभाशुभफलानि कथ्यन्ते। ततो राश्यधिपाः प्रोच्यन्ते। ततो रव्यादिसप्तग्रहाणामुच्चनीचस्थानं प्रोच्यते। ततोऽधिमासादयो निरूप्यन्ते। ततः सौरचान्द्रबार्हस्पत्याख्यमानत्रय-वर्णनं, तत्र सौरमानं कारणं, चान्द्रमानं सूक्ष्मं, बार्हस्पत्यमानं स्थूलमित्युक्त्वा स्थूलसूक्ष्मद्वयं परित्यज्य कारणं ग्राह्यमित्युच्यते।

ततो द्वादशभावस्थानानि निरूप्यन्ते। ततो गृहप्रवेशादिकर्मानुरोधेन लग्नविषये अवश्यशुद्धिस्थानानि प्रदर्श्यन्ते। ततो लग्नविषये केन्द्रस्थानत्रिकोणस्थानानि कथ्यन्ते। अन्धकाणादिनिषेधोऽपि विधीयते। **एवमेकाधिकशततमपटलार्थसंग्रहः।**

द्व्यधिकशततमे पटले षडध्वन्यासो विधीयते। षडध्वा तु परमेशस्य मार्गः। अङ्गानि षडध्वानः। अङ्गी च शिव इति विवरणं क्रियते। ब्रह्मविष्णुरुद्रमहेशसदाशिवनादबिन्दुशक्तिशिवाश्चेति नवधा मूर्तिभेदोऽभिधीयते। ततो लयाङ्गाधिकाराङ्गभोगाङ्गानां भेदो निर्दिश्यते। ततोऽध्वमूर्तिस्वरूपं वर्ण्यते। कुम्भे वा प्रतिमायां वाऽध्वन्यासं विना आवाहनं न कार्यमिति विधीयते। अध्वन्यासे सकलं निष्कलं सकलनिष्कलं चेति त्रिधा भेदो वर्ण्यते। एवं **द्व्यधिकशततमपटलार्थसंग्रहः।**

त्र्यधिकशततमपटले शैवश्राद्धविधिः प्रतिपाद्यते। तत्र प्रथमत आदिशैवैरनुष्ठीयमानः शैवश्राद्धविधिर्मुख्यो भवति। शैवश्राद्धमकृत्वा वैदिकश्राद्धकरणे प्रत्यवायः स्यादित्युच्यते। ततो मुक्तात्मा यस्मिन्मासे यस्यां तिथौ शिवे लीनस्तस्मिन्मासि तस्यां तिथौ शैवश्राद्धं क्रमात्कर्तव्यमिति प्रत्याब्दिकश्राद्धकालः प्रोच्यते। ततः श्राद्धतिथिनिर्णयप्रकारोऽभिधीयते। ततो नित्य-नैमित्तिक-काम्य-वृद्धि-पार्वणाख्यानि पञ्चविधश्राद्धानि नाम्ना निर्दिश्यन्ते। ततस्तेषु श्राद्धेषु पार्वणश्राद्धं सृष्टिः, वृद्धिश्राद्धं स्थितिः, काम्यश्राद्धं संहारः, नैमित्तिकश्राद्धं तिरोभावः, नित्यश्राद्धमनुग्रह इति प्रोक्तानां पञ्चविधश्राद्धानां शिवपञ्चकृत्यस्वरूपवर्णनं क्रियते। ततः पञ्चानां श्राद्धानां लक्षणं सम्यङ्निरूप्यते। तत आदिशैवमहाशैवानुशैवैः शैवश्राद्धमेव विधिवत्कर्तव्यम्। आमश्राद्धं न कर्तव्यमित्युच्यते। अन्त्यशैवैरेवामश्राद्धं कर्तव्यमित्युच्यते। तत आचार्यसाधकपुत्रकसमयिनां भोक्तॄणामनुसारेण शैवश्राद्धफलं विशिष्य प्रतिपाद्यते। ततः शैवश्राद्धविषये निमन्त्रणाय वरणीया प्रशस्ताः प्रतिपाद्यन्ते। ततः शैवश्राद्धविषये वर्ज्याश्च निरूप्यन्ते। तत आचार्यश्राद्धविषये तथा समयिविशेषिणोःश्राद्धविषये च नियोक्तव्या देवपितरोऽभिधीयन्ते। अत्र देवपित्रर्थं भोजनाय वरणीयानां ब्राह्मणानां संख्या च प्रतिपाद्यते। ततो नैमित्तिक-श्राद्धकरणप्रकारो वर्ण्यते। तत्र निमन्त्रणाय ब्राह्मणवरणं, प्रदक्षिणमन्त्रः, अनुज्ञाप्रार्थनम्, अनुज्ञाप्राप्त्यनन्तरं करणीयाः क्रियाः, देवपित्रर्थमर्घ्यकल्पनं, देवपितॄणामावाहनं, पाद्यवस्त्रोपवीतभूषणाद्यलंकारकरणम् इत्येते विषयाः प्रतिपाद्यन्ते।

ततोऽग्निकार्यविधिः कथ्यते। अत्राग्निसंधानविषये किञ्चिद्भेदो वक्ष्यत इत्युक्त्वा निर्वाणदीक्षासंपन्नानामाचार्या-भिषेकवतां विषये शिवाग्निं विधिवत्संपाद्य तत्र होमः कर्तव्यः। समयिनां विशेषदीक्षावतां च बालाग्नौ होमः

कार्य इति सूच्यते। शिवाग्नौ विशेषपितॄणां चतुर्विंशतिपितॄणां च होमकरणविधिरुच्यते। ततो हुतशेषान्नविनियोगविधिर्भोजनदानविधिश्च समन्त्रकं प्रतिपाद्यते। ततो वायसपिण्डदानविधिः संग्रहेणोच्यते। ततो विप्राणां सताम्बूलं दक्षिणादानप्रकारः, विप्रैस्तृप्तिवचनदानप्रकारश्च कथ्यते। ततः प्रसङ्गाच्चैवश्राद्धफलविशेषो निरूप्यते। तदनु विप्राणां विसर्जनविधिः कथ्यते। ततश्चतुर्विंशतिपितॄणां पिण्डदानविधिः प्रदर्श्यते। ततः पिण्डान् गोभ्यो विप्रेभ्यो वा दद्यात्। अग्नौ जलेऽपि वा प्रक्षिपेदित्युच्यते। कुलपत्न्या पैतामहं पिण्डं भक्षणीयमिति कथ्यते। तदनु कर्मसिद्ध्यर्थहोमकरणप्रकारो वर्ण्यते। तत्र तत्त्वत्रयव्योमव्यापिपदमन्त्रादीन् भवादिमन्त्रान् शक्तिनामानि चोच्चार्य होमः कर्तव्य इति कथ्यते। ततः पूर्णाहुतिविधानं वह्न्युद्वासनं च कर्तव्यमिति कर्मसिद्ध्यर्थहोमविधिरुच्यते। अन्ते 'यत् किञ्चित् कर्म हे देव' इति मन्त्रमुच्चार्य सदाशिवे समर्पणप्रकारः सूच्यते। ततः परेऽहनि कर्तव्यं तर्पणं विशेषेण कथ्यते। तद्दिने वा समाचरेदिति तर्पणविधिः सूच्यते।

अन्ते विधिवच्छ्राद्धकरणेन सप्तविधानां तृप्तिर्जायत इत्युक्त्वा सप्तविधतृप्तिप्रकारो वर्ण्यते। तत्राग्नौ हुतेन ब्रह्मलोकस्थाः, श्राद्धभोजनात् स्वर्गस्थाः, पिण्डदानेन पितृलोकस्थाः, विकिरेण नरकस्थाः, उच्छिष्टैः पिशाचाः, प्रभूतभोजनदानादसुराः, दक्षिणाभिर्मनुष्याश्च तृप्ता भवन्तीत्युच्यते। एवं **त्र्यधिकशततमपटलार्थसंग्रहः।**

प्रथमानुबन्धे रक्षाबन्धनविधिः कथ्यते। तत्र प्रथमं रक्षाबन्धनकालः रक्षाबन्धनफलं च प्रतिपाद्यते। ततो रक्षाबन्धनकर्मप्रयोगोऽभिधीयते। अन्ते लिङ्गस्य रुद्रभागे, पीठस्य नालमध्ये, देवानां दक्षिणहस्ते, शक्तीनां वामहस्ते, अस्त्रदेवस्य मध्यपत्रे, वृषभस्य दक्षिणशृङ्गे, ध्वजदण्डस्य रुद्रभागे, रथसिंहासनयोः पूर्वस्तम्भे, मण्टपादिषु सर्वेषु मुख्यस्तम्भे च रक्षाबन्धनं करणीयमिति विधीयते। एवं **प्रथमानुबन्धविषयसंग्रहः।**

द्वितीयानुबन्धे शिवमण्डपपूजाविधिरुच्यते। तत्रोत्तमादिचतुर्विधमण्डपविधिरभिधीयते। तत्र त्रयस्त्रिंशत्कुण्ड-संयुक्तः पञ्चावरणसंयुतमण्डप उत्तमः। प्राकारचतुष्टययुक्तः पञ्चविंशतिकुण्डसहितो मण्डपो मध्यमः। सप्तदशकुण्डसहितः प्राकारत्रयसंयुतः, नवकुण्डैः संयुतः एकावरण सहितो मण्डप अधमः। पञ्चकुण्डैस्तथैकेन कुण्डेन सहितो मण्डप अधमाधम इत्युच्यते। एवं चतुर्विधमण्डपः प्रोक्तः।

आत्मार्थलिङ्गप्रतिष्ठाविधौ दीक्षाकर्मणि अन्तरीतप्रतिष्ठायां प्रायश्चित्तकर्मणि अधमाधममण्डपो विधीयते। सशक्तिका विशक्तिका केवलेति मण्डपार्चना त्रिविधेति निर्दिश्यते। एवं **द्वितीयानुबन्धविषयसंग्रहः।**

तृतीयानुबन्धे भैरवपूजाविधौ प्रथमतो भैरवमन्त्रस्य कराङ्गन्यासः, भैरवध्यानं च कथ्यते। ततो बिन्दु-त्रिकोण-षट्कोण-वस्वब्ज-षोडशदल-द्वात्रिंशद्दल-भूपुरत्रयसहितमन्त्रस्य समन्त्रं लेखनक्रमो विधीयते। ततो 'यन्त्रपूजाप्रयोगः, भैरवमालामन्त्रः कलान्यासः, वटुकध्यानानि' इत्येते विषया वर्ण्यन्ते। एवं **तृतीयानुबन्ध-विषयसंग्रहः।**

चतुर्थानुबन्धेऽन्तर्बलिदानविधिरभिधीयते। तत्र प्रधानकुण्डे बलिद्वयं कर्तव्यम्। अन्येष्वष्टकुण्डेषु बहिर्बलिदानं कुर्यादिति कथ्यते। कुण्डेषु सत्सु मेखलासु बलिदानं करणीयम्। कुण्डाभावे अग्निस्थानस्याग्नेयभागे मण्डलं परिकल्प्य तत्र बलिदानं कुर्यात्। अन्तर्मण्डले क्षिप्तो बलिरन्तर्बलिः। बहिर्मण्डले क्षिप्तो बलिर्बहिर्बलिरित्युच्यते। तिसृषु मेखलासु ऊर्ध्वेऽनन्तादयः, मध्ये नन्द्यादयः, तृतीये इन्द्रादयः, अधोभागे अस्त्राणीति अन्तर्बलिबहिर्बलिदेवता निरूप्यन्ते। शिवप्रतिष्ठादौ वास्तुहोमादिषु च क्रमेणान्तर्बलिः करणीय इत्युच्यते। एवं **चतुर्थानुबन्धविषयसंग्रहः।**

पञ्चमानुबन्धे प्रायश्चित्तविधिरुच्यते। प्रासादे मनुष्याणां जननमरणसंभवे संभाव्यमानदोषकथनपूर्वकं तद्दोष-निवृत्तये करणीयप्रायश्चित्तविधिरभिधीयते। तत्र मृतदेशे जननदेशे च खातयोग्यं खात्वा तत्राशुद्धमृदः परित्यज्य शुद्धमृद्भिःपूरयेत् तत्र पञ्चगव्यप्रोक्षणं कृत्वा शैवविप्राणां भोजनं कर्तव्यम्। ततो जलसंप्रोक्षणं कुर्यादिति प्रायश्चित्तविधिरुच्यते। ततः पूर्वोक्तदोषो यदि गर्भगृहे अर्धमण्डपे प्रतिमामण्टपे च संभवेत् तदा पूर्वोक्तप्रायश्चित्तविधिं कृत्वा शान्तिहोमं स्नपनं चाधिकतया कुर्यादित्युच्यते। एवं **पञ्चमानुबन्धविषयसंग्रहः।**

कृतज्ञतानिवेदनम्

एतद्ग्रन्थसंपादनाय मातृका दत्त्वोपकृतवतां तिरुवाडुदुरै शिवश्री-स्वामिनाथशिवाचार्याणां तथा मद्रपुरी-राजकीयप्राच्यातालपत्रकोशागाराध्यक्षमहाशयानां तथैतत्पुस्तकसंपादनार्थं सर्वात्मना सर्वास्ववस्थासूपकृतवतां सुहृदां विदुषां तथा सुष्ठु मुद्रितवतां श्रीअरविन्दाश्रममुद्रणालयाधिकारिणां च हार्दिकीं कृतज्ञतां निवेदयामः ।

सुशिवेन शिवाय बोधितोऽयं
विदुषां चिद्गगनात्र विच्युतः ।
अजितं पदमाप्तुमत्र धीराः
प्रयतन्तामममलेन चेतसा ॥

एतद्ग्रन्थसंपादनोपयुक्तमातृकासूची

अ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ९ अस्यां मातृकायां ५५, ६५ तमौ पटलौ विद्येते।

आ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ५८ अस्यां मातृकायां ६४, ६६—७० पटला विद्यन्ते।

इ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ८७४ अस्यां मातृकायां ५६—६२, ६४, ६६—६८, ७१—८० पटला विद्यन्ते।

ई. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० १२५ अस्यां मातृकायां ६३, ६४, ६६, ६७, ६९—७१, ७४ पटला विद्यन्ते।

उ. तिरुवाडुदुरै स्वामिनाथशिवाचार्याणां मातृकायाः पाठभेदाः केवलं संगृहीताः। अस्यां मातृकायां ६४, ६६—६९, ७१ पटला विद्यन्ते।

ऊ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० १०८७ अस्यां मातृकायां ६६, ६७, ८१ पटला विद्यन्ते।

ऋ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० ३२६०२ अस्यां मातृकायां ९२, ९३ तमौ पटलौ विद्येते।

ॠ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० १०८८ अस्यां मातृकायां ६८, ६९, ७०, ७९, ८२ पटला विद्यन्ते।

ऌ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ५३५ अस्यां मातृकायां ५९ तमः पटलो विद्यते।

ए. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० १८३ अस्यां मातृकायां ८५ तमः पटलो विद्यते।

ऐ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ४७१ अस्यां मातृकायां ८५ तमः पटलो विद्यते।

ओ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ३६ अस्यां मातृकायां ८४ तमः पटलो विद्यते।

औ. मुद्रितपुस्तकम्। परार्थनित्यपूजाविधिः। ईशानशिवाचार्यविरचितः। कुम्भघोणे मुद्रितम् (१९१२) अस्मिन् पुस्तके ८६, ८७ तमौ पटलौ विद्यते।

क. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ४९५ अस्यां मातृकायां ७६, ९७ तमौ पटलौ विद्येते।

ख. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ५१६ अस्यां मातृकायां ७६ तमः पटलो विद्यते।

ग. मुद्रितपुस्तकम् (अजितागमचर्यापादश्राद्धविधिः) तिरुच्चेन्दूर् श्री आलालसुन्दरशिवाचार्यसङ्घेन प्रकाशितम्, १९५८
अस्मिन् पुस्तके १०३ तमः पटलो विद्यते।

घ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० २३९ अस्यां मातृकायां १०० तमः पटलो विद्यते।

ङ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ११५ अस्यां मातृकायां ८३ तमः पटलो विद्यते।

च. मुद्रितपुस्तकम् ईशानशिवाचार्यकृताष्टादशपद्धतौ गौरी-दक्षिणामूर्ति-भैरव-चण्डेश्वरप्रतिष्ठाविधिः। शिखागिरि-वास्तव्येन साम्बशिवचार्येण कुम्भधोणे प्रमोदूतसंवत्सरे (१९३१) प्रकाशितम्।
अस्मिन् पुस्तके ८३ तमः पटलो विद्यते।

छ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ५३६ अस्यां मातृकायां ९४ तमः पटलो विद्यते।

ज. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० २७६१३ अस्यां मातृकायां ८६ तमः पटलो विद्यते।

झ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० २४१०५ अस्यां मातृकायां ८६, ८७ तमौ पटलौ विद्यते।

ञ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० २७४९२ अस्यां मातृकायां ८६ तमः पटलो विद्यते।

ट. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० २०३१२ अस्यां मातृकायां ९२ तमः पटलो विद्यते।

ठ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० ११२६ अस्यां मातृकायां तृतीयोऽनुबन्ध-पटलो विद्यते।

ड. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० ३९७९३ अस्यां मातृकायां द्वितीयोऽनुबन्ध-पटलो विद्यते।

ढ. अस्मद्ग्रन्थालये विद्यमाना हस्तलिखितमातृका। अङ्कः टि० १००९ आर्० इ० ४३४२७ तालपत्रस्य प्रतिकृतिः।
अस्यां मातृकायां ९७ तमः पटलो विद्यते।

ण. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० १८६६६ अस्यां मातृकायां ९० तमः पटलो विद्यते।

त. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० ४५९५९ अस्यां मातृकायां ९९ तमः पटलो विद्यते।

थ. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० ८२५५ अस्यां मातृकायां ६५ तमः पटलो विद्यते।

द. अस्मद्ग्रन्थालये विद्यमाना तालपत्रमातृका। अङ्कः आर्० इ० ३७०१५ अस्यां मातृकायां ८५ तमः पटलो विद्यते।

सङ्केतसूची

अघोर० वि०	अघोरशिवाचार्यकृतविघ्नेश्वरप्रतिष्ठाविधिः
उ०	उत्तरार्धम्
ऋ० सं०	ऋग्वेदसंहिता
क्रिया०	क्रियापादः
चर्या०	चर्यापादः
टि०	ट्रान्स्क्रिपट्
तृ०	तृतीयमर्धम्
तै० ब्रा०	तैत्तिरीयब्राह्मणम्
प०	पत्रसंख्या
पू०	पूर्वार्धम्
पृ०	पृष्ठम्
मतङ्ग०	मतङ्गपारमेश्वरागमः
वायुसं०	वायुसंहिता
विद्या०	विद्यापादः
शिवपु०	शिवपुराणम्
स्वायंभु०	स्वायंभुवागमः

अजितागमः

[क्रियापादः]

[पञ्चपञ्चाशः पटलः]

[[1]षोडशगणपतिस्थापनविधिः]

गजाननकटद्वंद्वनिःसृता मदनिर्झरी ।
प्रक्षालयतु नः क्षिप्रं विघ्नसङ्घातकर्दमम् ॥१॥
धर्मश्चार्थश्च कामश्च नराणां येन विद्यते[2] ।
स्तोत्रं तद्विघ्नराजस्य कथ्यते षोडशात्मनः[3] ॥२॥

[बालगणपतिः]

करस्थकदलीचूतपनसेक्षुकमोदकम्[4] ।
बालसूर्यप्रभं वन्दे देवं बालगणाधिपम् ॥३॥

[भक्तगणपतिः]

नालिकेराम्रकदलीगुलपायसधारिणम् ।
[5]भजे शशाङ्कसङ्काशं देवं भक्तगणाधिपम् ॥४॥

---

[1]अयं पटलः 'अ' मातृकायां परं दृश्यते; एतद्विषये आर्-इ ४३४२८ (टि० १००१) इत्यङ्कितताालपत्र-कोशे २६—२९ पत्रेषु दृश्यमानः स्वायम्भुवागमीय-षोडशगणपतिप्रतिष्ठाविधिस्तथाघोरशिवाचार्यपद्धत्यां विघ्नेश्वरप्रतिष्ठाविधिश्च द्रष्टव्यौ ।

[2]'विद्‌ल् लाभे' (१४३३) इत्यस्माद्धातोः कर्मणि लट् ।

[3]'प्रथमं बालविघ्नेशं द्वितीयं तरुणं भवेत् ।
तृतीयं भक्तविघ्नेशं चतुर्थं वीरविघ्नकम् ।
पञ्चमं शक्तिविघ्नेशं षष्ठं ध्वज[द्विज]गणाधिपम् ।
सप्तमं पिङ्गलं देवमष्टमोच्छिष्टनायकम् ।
नवमं विघ्नराजं स्याद्दशमं क्षिप्रनायकम् ।
एकादशं तु हेरम्बं द्वादशं लक्ष्मिनायकम् ।
त्रयोदशं महानग्रं [विघ्नं] भुवनेशं चतुर्दशम् ।
नृत्ताख्यं पञ्चदशमं षोडशोर्ध्वगणाधिपम् ।
गणेशषोडशं नाम प्रयतः प्रातरुत्थितः ।
संस्मरेत्सर्वकुशलं स प्रयाति न संशयः ।
धर्मार्थकाममोक्षार्थं नराणां येन विद्यते ।
स्तोत्रं तु विघ्नराजस्य कथ्यते षोडशात्मकम् ।'
(अघोर० *विघ्नेश्वरप्रतिष्ठाविधौ* पृ० १)

[4]पनसेक्षुकपित्थकम्—अघोर० वि० पाठः

[5]शरच्चन्द्रसमानाङ्गं भजे भक्ति०—स्वायम्भुवागमपाठः; शरच्छशाङ्कसदृशं भजे भक्त०—अघोर० वि० पाठः

[वीरगणपतिः]

वेताल[६]शक्तिशरकार्मुक[७]शङ्खचक्र-
खट्वाङ्गमुद्गरगदाङ्कुशनागपाशैः[८] ।
शूलं च [९]कुन्तपरशुध्वजमुद्वहन्तं
[१०]वीरं गणेशमरुणं सततं स्मरामि ।।५।।

[शक्तिगणपतिः]

आलिङ्ग्य देवीं हरितां निषण्णां
[११]परस्परस्पृष्ट[१२]कटीनिवेशाम् ।
संध्यारुणं [१३]पाशसृणी वहन्तं
[१४]भयापहं शक्तिगणेशमीडे ।।६।।

[[१५]विधिगणपतिः]

यः पुस्तकाक्षगुणदण्डकमण्डलुश्री-[१६]
[१७]विद्योतमान[१८]करभूषणमिन्दुवर्णम्[१९] ।
[२०]स्तम्बेरमाननचतुष्टयशोभमानम्
[२१]अङ्गं स्मरेद्विधिगणाधिपतेः [२२]स धन्यः।।७।।

[[२३]पिङ्गलगणपतिः]

पक्वचूतफलकल्प[२४]मञ्जरी-
मिक्षुदण्डतिलमोदकं वहन् ।

---

[६]०शक्तिं धरकार्मुक० —अ; ०शक्तिकरकार्मुक० —स्वायम्भुवागमपाठः

[७]०चर्मखड्गं —स्वायम्भुवागमपाठः; ०खेटखड्ग० —अघोर० वि० पाठः

[८]नागपाशान् —अघोर० वि० पाठः

[९]कुन्दपरशु —अ

[१०]धीरं —अ

[११]परस्परास्पृष्ट —अघोर० वि० पाठः

[१२]कटी नवे —अ; कटिप्रदेशाम् —स्वायम्भुवागमपाठः

[१३]पाशसृणिं —अ, अघोर० वि० पाठः

[१४]सर्वार्थदं —स्वायम्भुवागमपाठः

[१५]ध्वजगणपतिः —अघोर० वि० पाठः

[१६]कमण्डलश्री० —स्वायम्भु० पाठः, अघोर० वि० पाठः

[१७]निर्वर्त्यमान० —स्वायम्भुवागमपाठः, अघोर० वि० पाठः

[१८]करपङ्कजमिन्दु —स्वायम्भुवागमपाठः

[१९]मिष्टवर्णम् —अ

[२०]तं घोरमाननचतुर्भुज० —अघोर० वि० पाठः

[२१]संस्मरेद्विधिगणाधिपतिं त्वधन्यम् —स्वायम्भु० पाठः; त्वां संस्मरेद्ध्वजगणाधिपते स —अघोर० वि० पाठः

[२२]ससैन्यैः —अ

[२३]'अ' मातृकायां पिङ्गलगणपतिध्यानश्लोको लुप्तः । षोडशगणपतिसंख्यासमर्थनाय स्वायम्भुवागमश्लोकोऽत्र सङ्घटितः ।

[२४]मञ्जरीमिक्षुदन्ततिल० —स्वायम्भुवागमपाठः; मञ्जरीमिक्षुसारतिलमोदकैः सह —अघोर० वि० पाठः

[25]राजते परशुहस्त ते नमः
श्रीसमृद्धिसहितश्च पिङ्गलः ।।८।।

[उच्छिष्टगणपतिः]

[26]नीलाब्जं दाडिमं वीणाशालि[27]पुञ्जाक्षसूत्रकम् ।
[28]दधदुच्छिष्ट[29]नामा तु [30]गणेशः पातु संनतः ।।९।।

[रक्तगणपतिः]

[31]पाशाङ्कुशस्वदन्ताम्रफलवानाखुवाहनः ।
विघ्नं [32]निहन्तु नः सर्वं रक्तवर्णो विनायकः ।।१०।।

[क्षिप्रगणपतिः]

दन्तकल्पलता[33]पाशरत्नकुम्भाङ्कुशोज्ज्वलम् ।
बन्धूक[34]कमनीयाङ्गं ध्यायेत्क्षिप्रविनायकम्[35] ।।११।।

[हेरम्बगणपतिः]

अभयवरदहस्तः[36] पाशदन्ताक्ष[37]माला-
[38]परशुसृणित्रिशीर्षं [39]मुद्गरं मोदकं च ।

---

[25] 'राजते' इत्यत्र भवान् इति पदमध्याहृत्य व्याख्येयम्; उद्वहत्परशुहस्त ते नमः श्रीसहाययुतदेवपिङ्गलः — अघोर० वि० पाठः

[26] लीलाब्जदाडिमावीणशालिपिङ्गाक्ष० — अ; नीलाब्जडाडिमीवीणाशालिपिष्टाक्ष० — स्वायम्भुवागमपाठः; लीलाब्जं — अघोर० वि० पाठः

[27] पुच्छाक्ष — अघोर० वि० पाठः

[28] दधत्रच्छिष्ट० — अ

[29] नामाद्यो — स्वायम्भुवागमपाठः; नामानं — अघोर० वि० पाठः

[30] गणेशः पातु मामिह — स्वायम्भुवागमपाठः; गणेशं वीरमेव च — अघोर० वि० पाठः

[31] अयं श्लोकोऽघोर० वि० प्रतिष्ठाविधौ विघ्नराजगणपतिध्यानत्वेन दृश्यते; पाशाङ्कुशौ धरन्नाम्रफलाशीचाखु° — अघोर० वि० पाठः

[32] निहन्यान्मे सर्वं० — स्वायम्भुवागमपाठः

[33] पाशं शरकुम्भाङ्कुशो — स्वायम्भुवागमपाठः; पाशरत्नकुम्भाङ्कुशोभितम् — अघोर० वि० पाठः

[34] कमनीयाभं — स्वायम्भुवागमपाठः

[35] क्षिप्रगणाधिपम् — स्वायम्भुवागमपाठः; अघोर० वि० पाठः

[36] हस्तं — स्वायम्भुवागमपाठः, अघोर० वि० पाठः

[37] मालां — अघोर० वि० पाठः

[38] परशुसृणिकशीर्षं — स्वायम्भुवागमपाठः; परशुमथ त्रिशीर्षैः — अघोर० वि० पाठः

[39] मुत्करं — स्वायम्भुवागमपाठः; मुद्गरैः — अघोर० वि० पाठः

[४०]दधदधिगत[४१]सिंहः पञ्चमातङ्गवक्त्रो[४२]
[४३]गणपति[४४]रथ गौरः पातु हेरम्बनामा[४५] ।।१२।।

[लक्ष्मीगणपतिः]

[४६]बिभ्राणः शुक[४७]बीजपूर[४८]कमलमाणिक्यकुम्भाङ्कुशान्
पाशं कल्पलतां च [४९]पाणिकलशं [५०]स्त्रोतः सुधानिर्झरम् ।
[५१]श्यामेनात्तसरोरुहेण सहितो देवीद्वयेनान्तिके
[५२]गौराङ्गो [५३]वरदानहस्तकमलो लक्ष्मीगणेशो[५४]ऽवतात् ।।१३।।

[५५] [स्वर्णगणपतिः]

शङ्खेक्षुचाप[५६]कुसुमेषुकुठारपाश-
चक्राङ्कुशैः कलममञ्जरिकासनाथैः ।
पाणिस्थितैः [५७]परिसमाहितभूषणश्री-
र्विघ्नेश्वरो विजयते [५८]तपनीयगौरः ।।१४।।

[नृत्तगणपतिः]

पाशाङ्कुशापूपकुठार[५९]दन्त-
[६०]चञ्चत्करं [६१]क्लृप्तवराङ्गुलीयकम् ।
[६२]पीतप्रभं कल्पतरोरधःस्थं
भजामि [६३]नृत्तैकपदं गणेशम् ।।१५।।

---

[४०]विदधतु वरसिंहः —अघोर० वि० पाठः
[४१]सिंह —स्वायम्भुवागमपाठः
[४२]वक्त्रे —स्वायम्भुवागमपाठः
[४३]कनकरुचिरवर्णः पातु —अघोर० वि० पाठः
[४४]रतिगौरं —स्वायम्भुवागमपाठः
[४५]मेरंबनामा —स्वायम्भुवागमपाठः
[४६]बिभ्राणाः —स्वायम्भुवागमपाठः; बिभ्राणं —अघोर० वि० पाठः
[४७]सायकन्धरुरिलां माणिक्ककुम्भांकुशं —स्वायम्भुवागमपाठः
[४८]कमलं —अघोर० वि० पाठः
[४९]बाणकलिकास्त्रोतःसरोनिःसरः —अघोर० वि० पाठः
[५०]द्योतत्सुरां निर्झराः —स्वायम्भुवागमपाठः
[५१]श्यामो रक्त —स्वायम्भु० पाठः, अघोर० वि० पाठः
[५२]गौरास्यो —अ; भाराङ्गो —स्वायम्भु० पाठः
[५३]वरदाभि —अ; वनदानहस्तनलिनो —स्वायम्भु० पाठः; वरदादि० —अघोर० वि० पाठः
[५४]महान् —स्वायम्भु० पाठः, अघोर० वि० पाठः
[५५]भुवनेशगणपतिः —अघोर० वि० पाठः
[५६]कुसुमेषु च कामदन्तं पाशाङ्कुशैः —अघोर० वि० पाठः
[५७]परिसमाश्रितभू० —स्वायम्भु० पाठः; परिसमावृतभू० —अघोर० वि० पाठः
[५८]विजयेह वक्त्रे —स्वायम्भु० पाठः; कमनीयगौरः —अघोर० वि० पाठः
[५९]दन्तं —अघोर० वि० पाठः
[६०]शंचत्पलं —स्वायम्भु० पाठः
[६१]कल्पलताङ्गुलीकः —स्वायम्भु० पाठः; वलयमङ्गुलीयकम् —अघोर० वि० पाठः
[६२]पीनप्रभं कल्पतरूरुहस्तं —अघोर० वि० पाठः
[६३]नृत्तोपपदं —अ

[महागणपतिः]

कल्हाराम्बुजबीजपूरकगदादन्तेक्षु[६४]बाणैः समं
बिभ्राणो मणिकुम्भशालि[६५]कणिशौ पाशं च चक्रान्वितम् ।
गौराङ्ग्या रुचिरारविन्द[६६]युतया देव्या समालिङ्गितः[६७]
शोणाङ्गः शुभमातनोतु भवतां नित्यं गणेशो महान् ।।१६।।

[ऊर्ध्वगणपतिः]

कल्हार[६८]शालिकणिशेषु[६९]परश्वधास्त्र-
दन्त[७०]प्ररोहफलभृत्कनकोज्ज्वलाङ्गः ।
आलिङ्गनोद्यतकरो हरिताङ्गयष्ट्या
देव्या दिशत्वभयमूर्ध्वगणेश्वरस्ते[७१] ।।१७।।

[हारिद्रगणपतिः]

[७२]पाशाङ्कुशेक्षुचषकेषुसरोजदन्त-
शाल्यग्ररत्नकलशाभरणाभिरामम् ।
पार्श्वे सदारयुगलं कनकाभमीडे
हारिद्रकुञ्जरनिभं करुणानिवासम् ।।१८।।

---

[६४]पाशैः समं—अ

[६५]कणिशं—स्वायम्भु० पाठः

[६६]करया—स्वायम्भु० पाठः

[६७]लिङ्गिता—स्वायम्भु० पाठः

[६८]चापकणिशेषु—स्वायम्भु० पाठः

[६९]परधास्त्रदन्तं—स्वायम्भु० पाठः

[७०]प्ररोहफलहत्कनकोज्ज्वलाङ्गं—स्वायम्भु० पाठः

[७१]गणेश्वरो मे—स्वायम्भु० पाठः

[७२]अयं श्लोकः स्वायम्भुवागमे अघोर० वि० विधौ च न दृश्यते ।

[33]इति विरचितमिमं गणाधिराज-
स्तवमनुत्तममादरेण नित्यम् ।
स्मरति पठति यः शृणोति वापि
जगति तस्य न किञ्चिदप्यवश्यम् ।।१९।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] षोडशगणपतिस्थापनविधिः
[पञ्चपञ्चाशः] पटलः ।

---

[33]अयं श्लोकः पटलपुष्पिका च 'अ' मातृकायामेव दृश्यते; सामान्यतया 'विनायकस्थापनविधिः' इत्ययं पटलः एकोनपञ्चाशपटलरूपेण अजितागमद्वितीयभागे प्राकाशि। परं तत्र षोडशगणपतीनां प्रतिष्ठास्थाननिर्देशः विशिष्य न दृश्यते। 'षोडशगणपतिस्थापनविधिः' इत्यस्मिन् पटले स्तोत्ररूपेण षोडशगणपतिबिम्बलक्षणं सूचयित्वा तेषां स्थापनं विनायकस्थापनपटलोक्त-प्रकारेण कर्तव्यमिति भावनयात्र षोडशगणपतिस्थापन-विधिरिति पटलनाम निर्दिष्टमिति भाति। प्रतिष्ठास्थान-निर्देशः स्वायम्भुवागमादत्रोद्धृतः टिप्पण्यां दीयते।
'वीथ्यग्रे वीथिमध्ये वा चैत्यवृक्षे तटाकके।
एतेषु कल्पयेद्धीमान्विघ्नेशस्यालयं तथा ।।
द्राविडं वेसरं वापि हस्तिकूटं [हस्तिपृष्ठं च] स्वस्तिकम् ।
पूर्वादिषु चतुर्दिक्षु चालयं कल्प्य बुद्धिमान् ।।
सुब्रह्मण्ये च कर्तव्यं काम्यार्थं तु विशेषतः ।
ग्रामे बालादिवीरान्तं विघ्नेशस्याधुनोच्यते ।।
विजयं वाथ नृत्तं वा स्थापयेत्तु विचक्षणः ।
शक्तिद्वयं च नगरे स्थापयेत्तु क्रमेण तु ।।
पत्तने चोच्छिष्टरक्तौ खेटे हेरम्बक्षिप्रकौ ।
लक्ष्मीं च विजयं चैव पुरे चैव समाचरेत् ।।
महागणं च नृत्तं च कुब्जके तु विशेषतः ।
राजधान्यां हरिद्रं च सर्वेषामपि कारयेत् ।।
सर्वस्थानेषु कर्तव्यं महागणं प्रकल्पयेत् ।
ऐन्द्रे स्यात्सुखदं प्रोक्तमाग्नेय्यां जयदं विदुः ।।
याम्यायां भवनाशार्थं नैर्ऋत्यां बुद्धिवर्धनम् ।
वारुण्यां वर्ष इत्युक्तो वायव्यां पुत्रवर्धनम् ।।
सौम्यायामन्नकामार्थमैशान्यां सर्वकामदम् ।
वीथ्यग्रे जयदं प्रोक्तं वीथिमध्ये सुखप्रदम् ।।'
'स्वतःप्रधानमन्याङ्गं द्विविधं स्थापनं स्मृतम् ।'
परिवारसमायुक्तं प्रधानं चैव कीर्तितम् ।
अन्याङ्गत्वेन कर्तव्ये परिवारं न कारयेत् ।।
षोडशानां गणे वक्ष्ये नाम चैव विधिक्रमात् ।
बालश्च भक्तो वीरश्च शक्तिश्च द्विजपिङ्गलौ ।।
उच्छिष्टरक्तौ क्षिप्रश्च लक्ष्मीहेरम्बकौ तथा ।
विघ्नेश ऊर्ध्वनृत्तौ च महाहारिद्रनामकौ ।।
षोडशानां गणे नाम एवं तु परिकीर्तितम् ।
इति षोडशगणानां तत्तत्स्थाने प्रतिष्ठितम् ।।
ब्राह्मणानां शुचिं विद्यात्क्षत्रियो विजयी भवेत् ।
वैश्यस्तु धनमाप्नोति शूद्रश्च सुखमाप्नुयात् ।।
गर्भिणी जनयेत्पुत्रं कन्या भर्तारमाप्नुयात् ।
आश्रितो लभते स्थाणुं बद्धो मुच्येत बन्धनात् ।।
इष्टसिद्धिमवाप्नोति गणलोके महीयते ।'
(*स्वायम्भुवागमे* षोडशगणपतिस्थापनपटले
टि० १००१ पृ० २६, २७.)

[षट्पञ्चाशः पटलः]

[[1]क्षेत्रपालस्थापनविधिः]

[2] [क्षेत्रपालोत्पत्तिः]

प्रतिष्ठां क्षेत्रपालस्य तदुत्पत्तिपुरःसरम् ।
मन्त्रेण सह वक्ष्यामि समासाच्छृणु देवप ॥१॥
पुरा क्षेत्राणि लोकेऽस्मिन्दिवि नागास्पदेऽपि च ।
[दुष्टग्रहैः पीडितानि ब्रह्मा तत्क्षेम]काम्यया ॥२॥
[3]भवं वीक्ष्याह ते [4]युक्तं क्षेत्राणां पालको भव ।
श्रुत्वा वाक्यमिदं तस्य क्षेत्राणां पालकोऽभवत्[5] ॥३॥
बालरूपं समास्थाय नग्नमष्टभुजान्वितम् ।
[श्वानवाहं सुदंष्ट्रं च त्रिनेत्रं] कुटिलाननम् ॥४॥
[6]योगक्षेमस्तु सर्वेषां क्षेत्राणां मयि पालके ।
सर्वदा वर्तते तस्मात्क्षेत्रपालोऽहमेव तु ॥५॥
इदं रूपं तदीयं तु दृष्ट्वा दुष्टग्रहास्तु ये ।
[प्रदुद्रुवुश्च क्षेत्रेभ्यो भयभीताः] समन्ततः ॥६॥

[क्षेत्रपालमन्त्राः[7]]

मन्त्रस्य [बीजं त्वं] विद्धि [कूट]मायाबलान्वितम् ।
बिन्दुनादसमायुक्तं मन्त्राणामुत्तमोत्तमम् ॥७॥
मूलमङ्गानि चाप्यस्य क्षकारेणैव कल्पयेत् ।
[8]क्षकारः कषयोर्योगात्कूटा[क्षरमिति स्मृतम्] ॥८॥
[श्वानवाहाय विद्महे] तीक्ष्णदंष्ट्राय धीमहि ।
तन्नो रुद्रः प्रचोदया[दिति पश्चाद्वदेत्सुधीः] ॥९॥
[9]गायत्री चेयमस्य स्यात्प्रतिष्ठाविधिरुच्यते ।

---

[1]अयं पटलः 'इ' मातृकायां परं दृश्यते; एतद्विषये पूर्वकारणे १०३; उत्तरकारणे ७०; दीप्ते ७३; मकुटे ७; रौरवे क्रियापादे ५१; सूक्ष्मे ९१ पटला द्रष्टव्याः ।

[2]'ईश्वरस्यायुतांशेन क्षेत्रपालोद्भवस्तथा ।'
(सुप्रभेदे क्रियापादे ५०.१ उ०);
एतद्विषये स्कान्दे महापुराणे १.२.६२.१—२१श्लोका द्रष्टव्याः ।

[3]अहं वक्ष्यामि—इ

[4]वक्तुं—इ

[5]पालको भव—इ

[6]योगक्षेमं तु—इ

[7]एतस्मिन् विषये रौरवे क्रियापादे ५१.२—५ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[8]क्षकारं—इ

[9]'ॐ शूलहस्ताय विद्महे श्वानवाहाय धीमहि ।
तन्नो भैरवः प्रचोदयात्' (*योगजागमे* टि० १६१, पृ० ३९)

[10] [क्षेत्रपालस्थापनोचितस्थानम्]

लिङ्गस्थापनयोग्येषु स्थापयेदेनमच्युत[11] ।।१०।।
ग्रामादिषु चतुर्दिक्षु ग्रामाभिमुखमेव वा ।
उदग्द्वारे तु धाम्न[स्तन्नैर्ऋते क्षेत्रपालकः] ।।११।।
दक्षिणद्वारके [12]वायौ मुखमण्टपसंयुते ।
स्थापयेत्क्षेत्रपालं'

[13] [मण्टपकल्पनं, तत्र कुण्डकल्पनं च]

'तद्धाम्नोऽग्रे वाथ पार्श्वयोः ।।१२।।
ईशपावकयोर्वापि कृत्वा देशेऽथ मण्टपम् ।
[तत्र वेद्यास्तु परितः कुण्डानि परि]कल्पयेत् ।।१३।।
आशासु चतुरश्राणि [वृत्तानि] स्युर्विदिक्षु च ।
पद्मं प्रधानकुण्डं स्यात्पञ्चहोमविधावपि ।।१४।।
वृत्तं हित्वा च पद्मं [14]स्यात्तद्दिशान्यत्तु कल्पयेत् ।

[15] [नेत्रोन्मीलनम्]

संस्कारादीनि सर्वाणि कृत्वा तत्रैव मण्टपे ।।१५।।
प्रतिमां लक्षणोपेतां स्नानमण्टपमध्यमम्[16] ।
नेत्रोन्मीलनकर्माणि कारयेच्छिल्पिना बुधः ।।१६।।
हेमसूच्या ततश्चापि देवाग्रे स्थण्डिले कृते ।
[17]मध्वाज्यपयसां पात्रं पृथगेव समाचरेत् ।।१७।।
पात्रं तु ताम्रजं शस्तं तेषु त्रिष्वपि हेमजम् ।

---

[10] एतस्मिन्विषये अजिते षष्ठः पटलः; रौरवे क्रियापादे ५१.१३ श्लोकस्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[11] ०मच्युतम् —इ

[12] वापि —इ

[13] आलयस्याग्रतः कुर्यात् सप्तहस्तं तु मण्डपम् ।
चतुस्तोरणसंयुक्तं चतुर्द्वारसमन्वितम् ॥
वितानध्वजसंयुक्तं मुक्तादामैरलङ्कृतम् ।
मण्डपं तु त्रिधा भज्य मध्ये वेदीं प्रकल्पयेत् ॥
तालमात्रोदयं कृत्वा गोमयेनोपलिप्य च ।
षोडशस्तम्भसंयुक्तं द्वारतोरणभूषितम् ॥
पूर्वे च चतुरश्रं तु दक्षिणे वृत्तकुण्डकम् ।
पश्चिमे पञ्चकोणं तु उत्तरे तु त्रिकोणकम् ॥
त्रिमेखलासमायुक्तमेकमेखलमेव वा ॥
नाभियोनिसमायुक्तं मध्ये पद्मसमायुतम् ॥
शोषणं प्लावनं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ।
(दीप्ते टि० १५, ७३.१३—१८ पृ०);
एतस्मिन् विषये रौरवे क्रियापादे ५१.१४-१९ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[14] स्यात्तद्दशान्यां तु—इ

[15] एतद्विषये रौरवे क्रियापादे ५१.२१उ०—२३ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[16] स्थानमध्यपमध्यमे —इ; अत्रानीयेति शेषः ।

[17] मद्ध्याज्याज्यपयसा पात्र पृथयेव —इ

[१८]कमलं विन्यसेदस्त्रमन्त्रमुच्चार्य देशिकः ॥१८॥
प्रोक्षयित्वा [१९]हृदा तानि मुद्रयेद्धेनुमुद्रया ।
कृत्वा यवनिकां तत्र [२०]हैमया दूर्वया ततः ॥१९॥
दक्षिणेतरयोश्चैव नेत्रयोर्मधुसर्पिषी ।
नेत्रमन्त्रं समुच्चार्य तर्पयेदूर्ध्वलोचने ॥२०॥
पयसा त[र्पयेत्तद्वत्] ततो हैमनखान्वितैः[२१] ।
तर्जन्यादित्रिभिः[२२] पश्चादङ्गुलैर्विन्यसेदथ[२३] ॥२१॥
नयनाख्यं ततस्तां च पञ्चमृत्पञ्चगव्यकैः ।
शोधयित्वा हृदास्त्रेण[२४] [गन्ध]तोयेन सेचयेत् ॥२२॥
ततो यवनिकापाये ब्राह्मणान् गां च दर्शयेत् ।

[२५][जलाधिवासः शयनाधिवासश्च]

प्रतिमां भूषितां [२६]सर्वै रथाद्येनाथवा नयेत् ॥२३॥
जलतीरे ततस्तत्र प्रतिमां स्थाप्य मन्त्रवित् ।
पुण्याहं वाचयित्वा तु प्रोक्ष्य च ब्रह्मपञ्चकैः ॥२४॥
ततोऽभिषिच्य [२७]कूर्चेन वस्त्रेणापि च वेष्टयेत् ।
जलमध्ये ततस्तां च [२८]फलकायां च शाययेत् ॥२५॥
प्राक्शिरश्चोर्ध्ववक्त्रं च परितो [२९]दिक्पतीन्न्यसेत् ।
[ततो] नीत्वा च तत्रापि कालं पूर्वोक्तमानयेत् ॥२६॥
जलादुत्थाप्य तं देवं स्नानमण्टपमध्यमम् ।
तत्र संस्थाप्य [३०]वस्त्रादीनपनीयाथ मन्त्रवित् ॥२७॥
अर्घ्यं दत्त्वा हृदा मूर्ध्नि कृत्वा शुद्धिं पुनः पुनः ।
गन्धतोयेन तन्मूलमुच्चरन्नभिषेचयेत् ॥२८॥

---

[१८]शकलं—इ
[१९]हृदन्तानि—इ
[२०]हेमया रूप्यया—इ
[२१]नखान्विते—इ
[२२]स्त्रिभिः—इ
[२३]न्यसेदयम्—इ
[२४]हृदास्त्रीयं—इ
[२५]'ग्रामप्रदक्षिणं कृत्वा पञ्चब्रह्म समुच्चरन् ।
पञ्चब्रह्मेण संक्षाल्य गन्धतोयेन सेचयेत् ॥
गन्धं पुष्पं च धूपं च दीपं चैव स्वमन्त्रतः ।
वस्त्रयुग्मसमायुक्तं जले चैवाधिवासयेत् ॥
त्रिरात्रमेकरात्रं वा याममेकं जलोषितम् ।'
(दीप्ते टि० १५, ७३.२२उ०—२४);
एतस्मिन् विषये रौरवे क्रियापादे ५१.२४उ०—२८ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।
[२६]सर्वैरताद्येनथवा—इ
[२७]कुर्चेनास्त्रेणापि—इ
[२८]फलकशब्दः पुल्लिङ्गः । अत्र स्त्रीलिङ्गे प्रयुक्तः ।
[२९]दिक्पतिं—इ
[३०]वस्त्राद्यैरप—इ

ततः पुण्याहमप्यत्र वाचयित्वा समाहितः ।
[31]सर्वात्मनाथ सम्प्रोक्ष्य बन्धयेत्कौतुकं [बुधः] ॥२९॥
[ततः] कूर्चेन वस्त्रेण [32]सितेनापि च वेष्टयेत् ।
अर्घ्यं दत्त्वा ततश्चापि मूर्ध्नि देवस्य मन्त्रवित् ॥३०॥
मण्डपे वेदिकायां च स्थण्डिले विधिवत्कृते ।
शयने [मन्त्रयन्मूलं बे]रमानीय शाययेत्[33] ॥३१॥
प्राक्शिरश्चोर्ध्ववक्त्रं तं रक्तवस्त्रेण वेष्टयेत् ।

[34][कुम्भस्थापनम्]

[35]ततः [प्रधानं] कलशं सर्वलक्षणलक्षितम् ॥३२॥
गन्धोदपूरितं हेमशूल[रत्न]समन्वितम् ।
वस्त्रकूर्चसमायुक्तं पिधानेन पिधाय च ॥३३॥
स्थापयेद्धेतिमुच्चार्य शङ्ख[दुन्दुभि]निस्वनैः ।
[सर्वातोद्यसमायुक्तं प्रतिमायाः] शिरोऽन्तिके ॥३४॥
परितोऽष्टौ न्यसेन्मन्त्री [कलशा]नर्चयेत्क्रमात् ।

[कुम्भपूजा]

अङ्गन्यासादिकं सर्वं पूर्ववत्परिकल्पयेत् ॥३५॥
[36]क्षेत्रपालं ततो ध्यायेच्छ्यामवर्णं त्रिलोचनम् ।
ऊर्ध्वकेशं सुदंष्ट्रं च भ्रुकुटी[कुटिलाननम्] ॥३६॥

---

[31] सर्वात्मना =हृदयमन्त्रेण
'सर्वात्मा हृदयं मुख्यं सुशिवाख्यं शिरः प्रभोः ।
ज्वालिनीति शिखा ज्ञेया कवचं पिङ्गलं महत् ॥'
(*मतङ्ग*० विद्या० ७.२७)

[32] सितेन च—इ

[33] 'जलादुत्तीर्य देवेशं वस्त्रकूर्चं व्यपोह्य च ।
स्नानमण्डपमानीय शुद्धिं कृत्वा यथाक्रमम् ।
गन्धपुष्पादिनाभ्यर्च्य पिण्डिकां सह शाययेत् ।
पञ्चब्रह्मेण संस्थाप्य अर्घ्यमाचमनं ददेत् ॥'
(*दीप्ते* टि० १५, ७३.२५, २६)

[34] एतद्विषये रौरवे क्रियापादे ५१.२८उ०—३० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[35] ततः कुशल . . . सर्व—इ

[36] 'बालसूर्याग्निसङ्काशं राजसं ध्यानमुच्यते ।
सात्त्विकं श्वेतवर्णं तु कृष्णं तामसमुच्यते ॥
सर्वकामार्थसिद्ध्यर्थं राजसं ध्यानमुच्यते ।
सात्त्विकं मुक्तिदं प्रोक्तं रोगनाशं च तामसम् ॥
चोरशत्रुक्षयकरं सर्वक्लेशविनाशनम् ॥
ग्रहभूतपिशाचादिसर्वविघ्नविनाशनम् ॥
एवं ध्यात्वा विशेषेण कृष्णवर्णं प्रशस्यते ।
(*पूर्वकारणे* १०३.३८—४१ पू०);
'तामसं ध्यानमुच्यते ।
वर्णं तु नीलमेघाभमूर्ध्वकेशं त्रिणेत्रकम् ॥
नग्नरूपं सरौद्रं च शिरोमालाविभूषितम् ।
नूपुरं छत्रवीरं च नागयज्ञोपवीतकम् ॥
किङ्किणीमालया भूष्यं भीमरूपं भयावहम् ।
डमरुं चाङ्कुशं चैव खड्गशूलाभयान्वितम् ॥
नागं पाशं च घण्टां च वरदं वामहस्तके ।
कपालं च विशेषेण वामहस्तसमन्वितम् ॥
सुदंष्ट्रं भीमनादं च सर्वपुष्पैरलङ्कृतम् ।

[पद्मपीठे स्थि]ताङ्घ्रिं च सर्पमेखलया युतम् ।
[37]क्षेपोत्तुङ्गमतिक्रुद्धं क्षुद्रघण्टामयीं तथा ।।३७।।
[38]करोटिकामयीं चापि [39]मालामागुल्फलम्बिनीम्[40] ।
दधानमुरगं बद्धं [भूषितं] चन्द्ररेखया ।।३८।।
दक्षि[णे शूलडमरुखड्गनागेषु]संयुतैः ।
वामे कपालं [41]घण्टास्त्रचर्मचापसमायुतैः ।।३९।।
अष्टाभिश्च करै[र्युक्तं नीलमेघ]समद्युतिम् ।
[42]चतुर्भुजं वा तं ध्यायेद्दक्षिणेतरयोरपि ।।४०।।
शूलं [डमरु]कं चैव कपालं पाशमेव च ।
दधानं भूषणैरन्यैः पूर्ववत्तं प्रकल्पयेत् ।।४१।।
यथा बहिः[स्थितं रूपमेवं कुम्भे तु भावयेत्] ।
ततो मूलं समुच्चार्य कृत्वा पुष्पाञ्जलिं सुधीः ।।४२।।
आवाहनादिकं [कृत्वा गन्धाद्यैः पूजये]द्बुधा ।
[परितः] स्थापिते चाथ[43]पूजार्थं कलशाष्टके ।।४३।।
भवादीनर्चयेत्सर्वान्[44] स्वनामपदमन्त्रकैः ।

[45][होमः]

ततो होमं प्रकुर्वीत [46]कुण्डेषु परितः क्रमात् ।।४४।।

सर्वक्षोभणकर्तारं सर्वव्याधिनिवारणम् ।।
सर्वशत्रुक्षयकरं सर्वदं सस्यवर्धनम् ।
एवं ध्यात्वा तु मन्त्रज्ञ आसनोपरि विन्यसेत् ।।'
(*पूर्वकारणे* १०३.५०—५५);
'क्षेत्रध्यानक्रमं वक्ष्ये शृणुष्वैवं प्रजापते ।'
'द्विदोर्दण्डं चतुर्हस्तं षड्भुजं चाष्टहस्तकम् ।
सुदंष्ट्रं भैरवाकारं कृष्णवर्णं दिगम्बरम् ।।
सर्पयज्ञोपवीतं च शिरोमालाविभूषितम् ।
ऊर्ध्वकेशं सुवृत्ताक्षं नागाभरणसंयुतम् ।।
त्रिणेत्रं नग्नरूपं च किञ्चित्प्रहसिताननम् ।
शूलं दक्षिणहस्ते तु वामहस्ते कपालकम् ।।
द्विभुजे तु प्रकर्तव्यम्'
'डमरुकं सव्यहस्ते वामहस्ते तु पाशधृक् ।
त्रिशूलं सव्यहस्ते स्यात्कपालं वामहस्तके ।।
चतुर्भुजमिति ख्यातं षड्भुजं चैव कारयेत् ।
खड्गं दक्षिणहस्ते तु वामहस्ते तु खेटकम् ।।
नागं च दक्षिणे हस्ते तोमरं वामहस्तके ।
त्रिशूलं दक्षिणे हस्ते वामहस्ते कपालधृक् ।
षड्भुजं त्विति विख्यातं भुजाष्टकमिदं शृणु ।।'
(*पूर्वकारणे* १०३.९; १४ उ०—२१ पू०);
एतद्विषये पुनः अजिते क्रियापादे ३६.३१४ उ० —३१८ श्लोकास्तदीयटिप्पणी, रौरवे क्रियापादे ५१.८—१२ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[37]क्षेपातङ्ग—इ

[38]करो . . . कामपञ्चापि—इ

[39]मालानां गु—इ

[40]लम्बिनी—इ

[41]'घण्टाभ्यां चर्म—इ

[42]चतु . . . वै तद्—इ

[43]पूजिते—इ

[44]त्पूर्वान्—इ

[45]एतद्विषये रौरवे क्रियापादे ५१.३१—३३पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[46]कृत्वा कुण्डेषु च क्रमात्—इ

कुण्डसंस्कारपूर्वं तु[४७] वह्निसंस्थापनं तथा ।
[कुण्डेषु पूर्ववद्] देवान्संस्थाप्य चार्चयेत्ततः ॥४५॥
युक्तो वाहादिभिर्मन्त्री होमं सर्वत्र कारयेत् ।
समिदाज्यचरूणां तु तिलसर्षपयोस्तथा ॥४६॥
[मुद्गमाषयवानां च प्रत्येकं तु शताहुतीः ।
तदर्धं वा क्रमान्मूलमन्त्राङ्गैश्च यथाक्रमम् ॥४७॥
गायत्र्या सह कुर्यात्तु प्रतिद्रव्यं तु सर्पिषा ।]
हुत्वा व्याहृतिमन्त्रेण देशिको होतृभिः सह ॥४८॥
तत्तदङ्गं स्पृशेन्मन्त्री [बेरस्य] पुष्पपाणिना ।
सर्वद्रव्यावसाने तु कुण्डेशानां दशाहुतीः[४८] ॥४९॥
सर्पिषा जुहुयात्पश्चात्परिषिच्य [समाप]येत् ।
ततो हविश्च देवानां कुम्भस्थानां प्रदापयेत् ॥५०॥
ताम्बूलं च ततो दत्त्वा नीत्वा रात्रिं तु देशिकः ।

[अधिवासानन्तरकृत्यम्]

प्रभाते कृतनित्यस्तु मण्डपं संप्रविश्य च ॥५१॥
[४९]मन्त्रात्मिकां तनुं कृत्वा यष्ट्वा देवांश्च पूर्ववत् ।
[५०]सर्वकुण्डेषु संपूज्य देवान् व्याहृतिपूर्वकम् ॥५२॥
स्रुचा पूर्णाहुतिं दद्यान्मूलविद्यां समुच्चरन् ।
[परिषिच्य ततो] देवान्कुण्डेऽभ्यर्च्य विसर्जयेत् ॥५३॥
परिधीन्विष्टरांश्चैव संप्रोक्ष्याग्नौ तु निक्षिपेत् ।

[प्रतिमास्थापनम्]

ततो गर्भगृहं गत्वा ब्राह्मे दिव्येऽथवा [पदे] ॥५४॥
[स्थाप्या]धारशिलां तत्र रत्नादि विधिवन्न्यसेत् ।
ततो मण्डपमासाद्य [बे]रमुद्धृत्य मूलतः ॥५५॥
वस्त्रादिकं समुत्सृज्य दत्त्वार्घ्यं शिरसि क्रमात् ।
रथादिषु समारोप्य कृत्वा धाम्नि प्रदक्षिणम् ॥५६॥
नीत्वा गर्भगृहं तत्र स्थापयेत्संस्पृशञ्शिरः ।
मूलविद्यां गृणन्मन्त्री शिल्पिना सह दैवते ॥५७॥
[५१]विशेषतस्तु पीठस्य कुर्यात्सन्धानमुत्तमम् ।

---

[४७]पूर्वेऽस्मिन् —इ
[४८]दशाहुतिः —इ
[४९]. . . तं तु कृत्वा यः देवांश्च —इ
[५०]सर्वत्रकुण्डे सं —इ
[५१]विशेष संत पीठस्य —इ

[५२] [कुम्भाभिषेकः]

शिल्पिकर्मणि निर्वृत्ते [५३]तमुद्वास्य ससत्कृतिम् ।।५८।।
स्नात्वा [५४]विद्यात्मकं देहं कृत्वा पुण्याहमत्र तु ।
गर्भगेहे ततो देवं पञ्चमृत्पञ्चगव्यकैः ।।५९।।
शोधयित्वा हृदा मन्त्री गन्धोदेनाभिषेचयेत् ।
ततस्तान्[५५]मण्डपात् कुम्भान्यथापूर्वं समानयेत् ।।६०।।
[बे]राग्रे स्थण्डिले तांश्च यथापूर्वं तु विन्यसेत् ।
[५६]ततोदङ्मुखमाविश्य पूर्ववत् [सकलीकृतः] ।।६१।।
सोष्णीषः सोत्तरीयश्च बद्धपञ्चाङ्गभूषणः[५७] ।
[५८]ध्यात्वा देवं तु कुम्भस्थं यथापूर्वं तु देशिकः ।।६२।।
मूलमन्त्रं समुच्चार्य ततः कूर्चसृताम्भसा ।
प्रतिमाहृदि [५९]कुम्भस्थदेवं विन्यस्य पूजयेत् ।।६३।।
योजयित्वा [६०]क्षकारेण विनियोगेषु योजयेत् ।
[अभिषेकं ततः कृत्वा ब्राह्मणान् भोजयेत्ततः ।।६४।।
आचार्यं पूजयेच्चैव दक्षिणां दापयेत्ततः ।
एवं यः कुरुते चैव स राजा विजयी भवेत्] ।।६५।।

[इत्यजिताख्ये महातन्त्रे क्रियापादे क्षेत्रपालस्थापनविधिः
षट्पञ्चाशः पटलः ।]

---

[५२]एतद्विषये रौरवे ५१.३३–३८ पू० श्लोकास्तदीय टिप्पणी च द्रष्टव्याः ।

[५३]तदुद्वास्य –इ

[५४]विद्यात्मिकां –इ

[५५]मण्डपान् –इ

[५६]ततः +उदङ्मुखं=तत उदङ्मुखं ततः सन्धिरार्षः ।

[५७]पञ्चाङ्गभूषणम् :–
'हेमाङ्गुलीयकटकं केयूरं कुण्डलं तथा ।
हेमयज्ञोपवीतं च पञ्चाङ्गभूषणं स्मृतम् ।।'
(*शैवागमपरिभाषामञ्जरी* ५.१७९ उ०, १८० पू०)

[५८]कृत्वा –इ

[५९]कुम्भात्म दे० –इ

[६०]चकारेण –इ

[1] [सप्तपञ्चाशः पटलः]

[परिवारस्थापनविधिः[2]]

अथान्यपरिवाराणां द्वारवक्त्राज्जनार्दन ।
पूजा[र्थं] स्थापनं [यत्स्यात्तद्विशिष्य] वदामि ते ।।१।।

[मण्डपकल्पनम्]

तत्तद्धामाग्रदेशे तु पार्श्वयोरुभयोस्तु वा ।
पञ्चहस्तं चतुर्गात्रं कृत्वा मण्डपमत्र वै ।।२।।
मध्ये च [वेदिकां तत्र कार]येत्षोडशांशकैः ।
तालमात्रसमुत्सेधां दर्पणोदरसंनिभाम्[3] ।।३।।
गोमयेनोपलिप्याथ वितानं प्रतनेत्ततः ।
दर्भमाला ध्वजांश्चापि मुक्तादामसमन्वितम् ।।४।।
तोरणं च चतुर्दिक्षु न्यस्त्वा पुण्याहमाचरेत् ।

[नेत्रोन्मीलनं बेरशुद्धिश्च]

ततो बेरस्य कुर्वीत नेत्रोन्मीलनकर्म च ।।५।।
तत्तन्नेत्रं समु[न्मील्य] बेरं गव्यादिभिस्ततः ।
शुद्धिं कृत्वा'

---

[1]अयं पटलः 'इ'मातृकायां परं दृश्यते। एतद्विषये पूर्वकामिके ७२तमपटलः पूर्वकारणे ६०तमपटलश्च द्रष्टव्यौ ।

[2]'स्थापनं परिवाराणां संक्षेपाच्छृणुत द्विजाः ।
त्रिहस्तं तु समारभ्य करस्यैकस्य वर्धनात् ।।
मण्डपस्यास्य विस्तारो नवहस्तान्तमेव हि ।
तन्मध्ये वेदिकोपेतं षोडशस्तम्भसंयुतम् ।।
रविस्तम्भयुतं वापि चतुस्तम्भयुतं तु वा ।
कुण्डं वा स्थण्डिलं वापि शरवेदैकसंख्यया ।।
वृत्तं वा चतुरश्रं वा कुण्डं कुर्याद्दिगश्रकम् ।
मातृणां नवकुण्डं वा चैककुण्डमथापि वा ।।
योग्यानां रत्नविन्यासं नेत्रोन्मीलनमेव च ।
पञ्चगव्यादिभिस्तेषां शुचिं तोयाधिवासनम् ।।
ततो मण्डपसंस्कारं ततो बिम्बादिशोधनम् ।
कौतुकं शयनारोहं कुम्भविन्यासमेव च ।।
कृत्वा तु पूर्ववत्सर्वं स्वनामाद्यक्षरेण तु ।
तत्तद्वर्णादिसंस्थानं यजेत्सम्यक् शिवद्विजाः ।।
तेषां मूर्त्यादिविन्यासं कृत्वा होमं समाचरेत् ।
पलाशोदुम्बराश्वत्थवटैः पूर्वादिदिक्षु च ।।
समिदाज्यचरूंल्लाजांस्तिलं च जुहुयात्क्रमात् ।
ततः प्रभाते बिम्बाद्यं कुम्भानग्नींश्च पूजयेत् ।।
दक्षिणां दापयेत्पश्चादाचार्यादिर्विधानतः ।
निष्कादिदशनिष्कान्तां गुरावन्येषु पूर्ववत् ।।
मुहूर्तनाडिकापूर्वं मन्त्रन्यासं समारभेत् ।
कुम्भाद्बीजं समादाय विन्यसेत्स्वस्वदेशके ।।
प्रासादतारपादं वा तदर्धं वा त्रिपादकम् ।
समं सपादं सार्धं वा सजगत्पादुकं बहिः ।।
न्यस्त्वा संस्थापयेत्पीठमथवादौ विधाय तत् ।
प्रतिष्ठां कारयेन्मुक्तारत्नन्यासं प्रदक्षिणम् ।।
जलाधिवासनं कुर्यादन्यत्कर्म समारभेत् ।'
(*पूर्वकामिके* ७२.१ — १४ पू०)

[3]संनिभम् —इ

[जलाधिवासः शयनाधिवासश्च]

'जले चापि तत्तद्धृदयमुच्चरन् ।।६।।
अधिवास्य यथापूर्वं ततो बेरं समानयेत् ।
मण्डपस्योत्तरे भागे फलकोपरि विन्यसेत् ।।७।।
ततोऽभिषिच्य गन्धोदैः कृत्वा कौतुकबन्धनम् ।
तत्तन्मूलेन मन्त्रेण ततो वस्त्रादिना पुनः ।।८।।
आवेष्ट्य प्रतिमां पश्चाद्वेदिकोपरि निर्मिते ।
स्थण्डिले पूर्ववत्कृत्वा [४]शयनं तत्र शाययेत् ।।९।।
तत्तद्धृदयमुच्चार्य [५]प्रतिमां तां यथा पुरा ।

[कुम्भस्थापनं, तत्पूजा च]

तत्तच्छिरोऽन्तिके [६]तस्याः कुम्भं पूर्वोक्तलक्षणम् ।।१०।।
गन्धोदपूरितं हेमपद्मयुक्तं सकूर्चकम् ।
सापिधानं सवस्त्रं च न्यस्त्वा मूलेन पूजयेत् ।।११।।
यथा रूपं [७]तथा ध्याये[त्प्रतिमायास्तु कुम्भके ।
[८]तथाष्टौ कलशान्दिक्षु न्यस्त्वा पूर्वोक्तलक्षणान्[९] ।।१२।।
धर्मादीनप्यधर्मादीन् [दिग्विदि]क्षु समर्चयेत् ।
पाद्यान्नैवेद्यपर्यन्तैः'

[होमः]

'ततो होमं समाचरेत् ।।१३।।
चतुरश्रेषु कुण्डेषु चतुर्दिक्षु विदिक्ष्वपि ।
[शाङ्करे तु प्रधानं स्याद्वृत्तकुण्डं तथैव हि ।।१४।।
विदिक्कुण्डपरित्यागे] पञ्चहोमविधिर्भवेत् ।
[एकहोम] विधाने तु प्राच्यामेव प्रकल्पयेत् ।।१५।।
सर्वत्र स्थण्डिले वाऽपि सैकते होममाचरेत् ।
कुण्डसंस्कारपूर्वाणि[१०] यथापूर्वं प्रकल्पयेत् ।।१६।।
[यथोक्तविधिना चाग्निं संपाद्य पू]जयेत्क्रमात् ।
प्रधान[११]देवतास्तस्मिन्स्थाप्य [१२]तास्तु समर्चयेत् ।।१७।।

---

[४]शयानं —इ
[५]प्रतिमन्त्रं यथा —इ
[६]तस्य —इ
[७]तदा —इ
[८]...दष्टौ कलशा दिक्षु —इ
[९]लक्षणात् —इ
[१०]अत्र कर्माणि इति शेषः ।
[११]देवता तस्मिन् —इ
[१२]मासां —इ

धर्माधर्मादिदेवांश्च विधिना] पूजयेत्क्रमात् ।
समिदाज्यचरूणां तु तिलसर्षपयोस्तथा ॥१८॥
यववे[ण्वो]श्च होतव्या प्रत्येकं तु शताहुतिः[13] ।
प्लक्षोदुम्बर[14]काश्वत्थवटजा ब्रह्मवृक्षजाः ॥१९॥
अङ्गैर्मूलादिभिर्मन्त्रैः समिदादि यथाक्रमम् ।
देशिको होतृभिः सार्धं होमयेद् द्रव्यसंचयम् ॥२०॥
प्रतिद्रव्यावसाने तु हृदयादीनि संस्पृशेत् ।
मूलेनापि च हृद्देशं[15]; धर्मादीनां ततः सुधीः ॥२१॥
सर्पिषैवाहुती:[16] सप्त प्रत्येकं जुहुयात्ततः ।
अधम[ादिचतुर्णां] तु प्रधाने तत्र होमयेत् ॥२२॥

[प्रतिमास्थापनम्]

एवं कृत्वा निशायां तु देशिको[17] मूर्तिपैः सह ।
[प्रभाते कृतनित्यस्तु मण्डपं संप्रविश्य च] ॥२३॥
कृत्वा मन्त्रमयं देहं तत्तन्मूलाङ्गमन्त्रकैः ।
[बेरं च पूजयि]त्वा [तु] तेषु कुम्भेषु पूजयेत् ॥२४॥
पूर्णाहुतिं तु सर्वत्र तत्तन्मूलेन दापयेत् ।
ततो बेरं समाहृत्य त्यक्त्वा कूर्चं सवस्त्रकम् ॥२५॥
[रथादिषु समारोप्य कृ]त्वा धाम्नि प्रदक्षिणम् ।
प्रविश्य धाम तत्रैव रत्नहेमादिसंयुते ॥२६॥
स्थापयेदवटे बेरं शिल्पिना मूलमुच्चरन् ।

[कुम्भाभिषेकः]

ततः स्नात्वा समाचान्तः कृत्वा [नित्यक्रियः सुधीः] ॥२७॥
पञ्चगव्येन तद्बेरमभिषिच्यास्त्रमन्त्रतः ।
गन्धतोयेन गायत्र्या ततश्चाप्यभिषेचयेत् ॥२८॥
पुण्याहं तत्र कृत्वा च प्रोक्षयित्वास्त्रमुच्चरन् ।
ततः कुम्भान्समुद्धृत्य कृत्वा धामप्रदक्षिणम् ॥२९॥
प्रविश्य गर्भगेहं तु देवाग्रे स्थण्डिले कृते ।
यथास्थानं तु विन्यस्य पूजयित्वा च पूर्ववत् ॥३०॥
देवतां मन्त्ररूपां तां कुम्भस्थां मूलमन्त्रतः ।
कूर्चाग्रयोः सृतेनैव तोयेन प्रतिमाहृदि ॥३१॥

---

[13] शतसंख्याका आहुतिः शताहुतिः। मध्यमपदलोपि समासः।
[14] माश्वत्थं —इ
[15] हृद्देश —इ
[16] वाहुतिः —इ
[17] मण्डपं —इ

विन्यसेत्तेन तोयेन तत्तदस्त्रं समुच्चरन् ।
अभिषिच्य ततोऽन्यांश्च धर्मादीन्परितस्तथा ॥३२॥
न्यस्त्वा तैश्च ततो बेरमभिषिच्य यथाक्रमम् ।
तत्तदङ्गानि चाङ्गेषु न्यस्त्वा मूलं हृदि न्यसेत् ॥३३॥

[मातृकान्यासः]

अवर्गं मूर्ध्नि विन्यस्य कवर्गं च मुखे न्यसेत् ।
चवर्गं वक्षसि न्यस्त्वा कुक्षौ चापि टवर्गकम् ॥३४॥
तवर्गं च पवर्गं च हस्तयोरुभयोर्न्यसेत् ।
यवर्गं च शवर्गं च पादयोरुभयोस्तथा ॥३५॥
हवर्गं पृष्ठदेशे तु विन्यस्यैवं[१८] तु मातृकाः ।
अभिषिच्य ततो बेरं गन्धपुष्पादिभिर्यजेत् ॥३६॥
प्रभूतं च हविर्दद्यात्ताम्बूलं च प्रदापयेत् ।
एवं संस्थापनं प्रोक्तं साधारणमिदं भवेत् ॥३७॥

[बेराभावे परिवाराणां [१९]पीठस्थापनम्]

अनुक्तानां तु सर्वेषां [पीठाकारस्तु] कथ्यते ।
देवतास्थापनं चैव समासाच्छृणु देवप ॥३८॥

[कुम्भस्थापनं, तत्पूजा च]

[२०]यस्य देवस्य यत्पीठं कल्पितं विधिना भवेत् ।
शिलादिभिस्तु तत्पार्श्वे पूर्वे वाप्युत्तरेऽपि वा ॥३९॥
शिल्पिकर्मणि निर्वृत्ते [२१]शिल्पिनं तु विसर्जयेत् ।
[प्र]पां तत्र वितानं च कृत्वा तद्देशमप्यथ ॥४०॥
गोमयेनोपलिप्यात्र पुण्याहं वाचयेत्ततः ।
स्थण्डिलं शालिभिः कृत्वा तत्र पद्मं समालिखेत् ॥४१॥
कर्णिकायां ततः कुम्भं गन्धोदपरिपूरितम् ।

---

[१८] विन्यस्यैव —इ

[१९] 'प्रतिमानामभावे तु पीठं वा कल्पयेत्सुधीः ।
विमानेन युतं वापि हीनं वा स्थापयेत्सुधीः ॥
पक्षतालप्रविस्तारमुत्सेधं तु तदर्धकम् ।
द्विमेखलासमायुक्तमेकैकं चतुरङ्गुलम् ॥
उत्सेधं तत्समं ज्ञेयं तन्मध्येऽब्जं तु कारयेत् ।
षडङ्गुलप्रमाणेन पद्मं कुर्याद्दलाष्टकम् ॥
अग्न्यङ्गुलप्रमाणेन तन्मध्ये कर्णिकां कुरु ।
वृत्तं वा चतुरश्रं वा एवं पीठं तु कारयेत् ॥'
(*पूर्वकारणे* ६०.२५-२८);
एतद्विषये पुनः *अजिते* ३९.३४ उ०, ३५ श्लोको द्रष्टव्यः ।

[२०] पीठविषये *अजिते* ३९.१६—२१ श्लोका द्रष्टव्याः ।

[२१] कृते शिल्पिं वि० —इ

पूर्वोक्तलक्षणोपेतं विन्यसेद्वस्त्रवेष्टितम् ।।४२।।
तत्र कुम्भे तु [२२]तद्देवं ध्यात्वावाह्य समर्चयेत् ।

[होमः]

ततो होमं प्रकुर्वीत पीठकुम्भान्तरालके ।।४३।।
कुण्डे वा स्थण्डिले वापि वह्निं संपूज्य पूर्ववत् ।
समिदाज्यचरूणां तु प्रत्येकं च शताहुतिम् ।।४४।।
तदर्धं वा तदर्धं वा तत्तन्मूलेन [होम]येत् ।
तत्तदङ्गैस्तथाज्येन प्रत्येकं तु दशाहुतिम् ।।४५।।
होमयेदथ सर्वान्ते [२३]पीठं सर्वात्मना स्पृशेत् ।

[कुम्भाभिषेकः]

एवं रात्रौ क्रियां कृत्वा प्रभाते [होतृभिः सह] ।।४६।।
कृतनित्यक्रियो मन्त्री कृत्वा मन्त्रात्मिकां तनुम् ।
कुम्भस्थं देवमभ्यर्च्य पूर्णां मूलेन होमयेत् ।।४७।।
ततः कुम्भस्थितं देवं पूर्ववत्पीठ[के] न्यसेत् ।
[कुम्भाद्भिर्वेदघोषा]द्यैर्मूलमन्त्रं समुच्चरन् ।।४८।।
अभिषिच्य ततः पीठे संपूज्यात्रैव देवताम् ।
हविर्निवेदयित्वाथ ताम्बूलं च निवेदयेत् ।।४९।।
प्रतिष्ठा[विधानं पीठाना]मेवमुक्तं समासतः ।

[२४] [महापीठप्रतिष्ठा]

महापीठस्य वक्ष्यामि प्रतिष्ठां तु जनार्दन ।।५०।।

---

[२२] तद्देवमध्यावाह्य —इ

[२३] स्पृशेत्सर्वात्मना पटम् —इ

[२४] 'महापीठप्रतिष्ठाया विधानमधुनोच्यते ।।
पूर्वपश्चिमसोमेषु मण्डपं पूर्ववन्नयेत् ।
वेदैकसंख्यया कुण्डं वेदाश्रं स्थण्डिलं तु वा ।।
पञ्चगव्यादिभिः पीठशुद्धिं कृत्वा च कौतुकम् ।
स्थण्डिले वेदिकायां तु कुम्भन्यासं तु कारयेत् ।।
मध्यपूर्वयमाप्येन्दुशंकरस्थघटेष्वथ ।
अविघ्नं च तथामोदं प्रमोदं प्रमुखं तथा ।।
दुर्मुखं विघ्नकर्तारं न्यस्त्वा वर्णांस्तु भावयेत् ।'
'पीठे तत्त्वेशमूर्त्यादिन्यासं होमं समाचरेत् ।
जङ्घागलकपद्मान्तमात्मतत्त्वादिकं न्यसेत् ।।
समिदाज्यचरूँल्लाजान् सर्षपं च यवं तिलम् ।
क्रमेण जुहुयाद्धीमान् पलाशोदुम्बरौ वटम् ।।
अश्वत्थं प्राग्दिगारभ्य पूर्ववद्धोममाचरेत् ।
संपूज्य पीठं कुम्भांश्च प्रभाते पावकं तथा ।।
दक्षिणां पूर्ववद्दत्त्वा मन्त्रन्यासं समारभेत् ।
अविघ्नं कर्णिकामध्ये विन्यसेत्कुम्भमध्यगम् ।।
आमोदादीन्न्यसेद्धीमांश्चतुर्दिक्ष्वीशकोणके ।
तत्तत्कुम्भोदकेनैव स्नापयेत्पीठमादरात् ।।
एवं स्याद्भूतपीठस्य पैशाचेऽप्येवमाचरेत् ।
किंतु मध्यमकुम्भस्य मध्यमे नीललोहितम् ।।

[25]महापीठविधौ प्रोक्तं[26] बाह्यमाभ्यन्तरं त्विति ।
तयोरग्रे प्रपां कृत्वा पार्श्वयो[स्तत्र वे]दिकाम् ।।५१।।
पञ्चहस्तमितां वापि; तत्र कुण्डानि कल्पयेत् ।
चतुरश्राणि सर्वत्र शाङ्करे वृत्तमेव च ।।५२।।
एकहोमविधाने तु प्राच्यां कुण्डं प्रकल्पयेत् ।
गोमयेन समालिप्य पुण्याहं कारयेत्ततः ।।५३।।

[अधिवासः]

ततोऽधिवासनं कुर्याद् [बाह्याभ्यन्तरयोरपि] ।
[उभयोरुच्य]ते तत्र वेदिकायां विधानतः ।।५४।।
स्थण्डिलं शालिभिः कृत्वा पद्ममष्टदलं लिखेत् ।
तत्र मध्ये न्यसेत्कुम्भं सितसूत्रविचित्रितम् ।।५५।।
गन्धोदपूरितं चापि सहिरण्यं सकूर्चकम् ।
[27]सापिधानं सवस्त्रं च [पूर्वोक्तलक्षणान्वितम्] ।।५६।।
[तथाष्टौ परितो वीक्ष्य] दृशा दिक्षु [च] देशिकः ।
पूर्वादिषु दलेष्वेते [स्थापनीया यथाक्रमम् ।।५७।।
पूर्ववद्गन्धतोयाद्यैस्तत्तत्]कुम्भं च पूरयेत् ।
ततश्चावाहनाद्यैश्च [28]देवांस्तेषु समर्चयेत् ।।५८।।
[29]आभ्यन्तरस्य पीठस्य मध्ये तत्कर्णिकोपरि ।
संस्थितश्चण्डरुद्राख्यो गणेशः परितः क्रमात् ।।५९।।

नक्षत्रं पूर्वदिग्भागे राशिं चैव तु दक्षिणे ।
पश्चिमे क्षेत्रपालं च सोमे विश्वगणान्न्यसेत् ॥
रुद्रांश्च पूर्वदिक्कुम्भे याम्ये मातृगणान्न्यसेत् ।
गणान् पश्चिमदिग्भागे यक्षानुत्तरदिग्गते ॥
ग्रहानीशानदिग्भागे वह्नावासुरसंज्ञकान् ।
राक्षसान् पितृदेशे तु वायौ नागगणान् न्यसेत् ॥
तद्बाह्ये कलशान् स्थाप्य लोकपालाधिदेवतान् ।
संपूज्य गन्धपुष्पाद्यैर्नैवेद्यान्तं हि देशिकः ॥
एतदेवं विशेषं स्यादन्यत्सर्वं समानकम् ।
कर्णिकायां न्यसेत्पञ्चगणानष्टौ दलेषु च ॥
दलबाह्ये न्यसेद्धीमाँल्लोकेशान्स्वस्वदिग्गतान् ।
मन्त्रन्यासविशेषोऽयं पिशाचबलिपीठके ॥
अनुक्तं यन्नयेत्सर्वं प्रतिमास्थापनोक्तवत् ॥'
(*पूर्वकामिके* ७२.१४ उ० – १८ पू०, २० – ३१)

[25]महापीठद्वयं कुर्याद्बह्याभ्यन्तरयोरपि ।
गोपुरस्याग्रसंस्थस्य चाभ्यन्तरस्य चावधौ ।'
(*अजिते* ३९.४१)

[26]विधिप्रोक्तं – इ

[27]सपिधानं – इ

[28]देवां तेषु – इ

[29]अभ्यन्तरस्य – इ;
'तयोर्देवानतः शृणु ।
आद्ये गणेश्वरं विद्धि द्वितीयेऽष्टगणाः स्मृताः ।।
(*अजिते* ३९-५३)

पूर्वादिषु दलेष्वेनं[30] मूलमन्त्रेण पूजयेत् ।
गुलान्नं परमान्नं च शुद्धान्नं च निवेदयेत् ।।
ताम्बूलं [31]मुखवासेन दद्याद्वै मूलविद्यया[32] ।।६०।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] परिवारस्थापनविधिः
[सप्तपञ्चाशः] पटलः ।

---

[30]दलेष्वेतं —इ

[31]मुखावासीनं —इ; मुखवासविषये *अजिते* २२.१३८—१४० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[32]इतः परं मातृकायां विषयस्यापूर्णत्वाद् ग्रन्थपातः स्यादित्यूह्यते ।

[अष्टपञ्चाशः पटलः]

[1] [विष्णुस्थापनविधिः] [2]

[देवदेवं प्रणम्यादौ पृच्छति स्म जनार्दनः ।
संस्थापनं कथं विष्णोस्तत्सर्वं ब्रूहि मे प्रभो ।।१।।

---

[1] अयं पटलः 'इ' मातृकायां परं दृश्यते; मातृकायां पटलारम्भभागो न लभ्यते। एतद्विषये *अचिन्त्यविश्वसादाख्ये* ६४; *पूर्वकारणे* ९९; *पारमेश्वरे* (टि० १४६. पृ० ४६. ४७); *रौरवे* क्रियापादे ३६; *रौरवोत्तरे* ११; *वीरे* (टि० १२३ पृ० ३२—३७); *सन्तानसंहितायां* ३३ पटला द्रष्टव्याः ।

[2] 'देवदेव प्रणम्यादौ पृच्छति स्म पितामहः ।
विष्णुस्थापनकं किं वा तत्सर्वं ब्रूहि मे प्रभो ।।'
'एकवक्त्रं द्विपादं च चतुर्हस्तसमायुतम् ।
चक्रं दक्षिणहस्ते तु शङ्खकं वामहस्तके ।।
अभयं दक्षिणे हस्ते वामे दण्डं च हस्तके ।
नेत्रद्वयसमायुक्तं सुस्थितं पद्मपीठकम् ।।
कौस्तुभं मण्डसंयुक्तं ललाटे हेमपट्टकम् ।
पीताम्बरधरं देवं श्यामवर्णसमन्वितम् ।।
सर्वाभरणसंयुक्तं किञ्चित्प्रहसिताननम् ।
श्रीभूमिसहितं चैव कारयेद्देशिकोत्तमः ।।
शिलालोहमृदा कुर्याच्छास्त्रदृष्टेन कर्मणा ।
विष्णुप्रतिष्ठा कर्तव्या उत्तमा देशिकोत्तमैः ।।
एवं लक्षणसंयुक्तं विष्णुरूपं तु कारयेत् ।
सप्तमे तु चतुर्थं तु सप्तमे तु द्वितीयकम् ।
प्रथमस्यादिसंयुक्तं बिन्दुनादविभूषितम् ।।
विष्णुबीजमिदं मन्त्रं त्रिदशैरपि दुर्लभम् ।
ह्रस्वा ब्रह्म समाख्याता दीर्घा ह्यङ्गानि चोच्यते ।।'
'रत्नन्यासः प्रकर्तव्यः लक्षणेन समन्वितः ।
शैलजे लोहजे वापि मृण्मये वापि कारयेत् ।।
स्थितिमूर्तिं प्रतिष्ठाप्य रत्नन्यासं तु कारयेत् ।
नयनमोक्षणं कुर्यान्नेत्रद्वययुते दिने ।।
स्वर्णसूचिकया चैव भ्रूरेखां शिल्पिना लिखेत् ।
मण्डलं च समालिख्य प्रच्छन्नपटसंयुतम् ।।
सुवर्णनखसंयुक्तं मध्वाज्यं चैव तर्पयेत् ।
अक्षिहोमं तु नेत्रेण आज्येनैव शताहुतिः ।।
कपिलां दर्शयेत्पश्चान्नेत्रद्वययुते दिने ।
ब्राह्मणान् दर्शयेत्तत्र ब्रह्मजज्ञानमन्त्रतः ।।
ग्रामप्रदक्षिणं कुर्याच्छिलालोहे विधीयते ।
जलाधिवासनं कुर्यात्पञ्चगव्येन स्नापयेत् ।।
प्रतिमां कण्ठदघ्ने तु जले चैवाधिवासयेत् ।
वस्त्रयुग्मेन संवेष्ट्य प्रच्छन्नपटसंयुतम् ।।
मूलमन्त्रेण विप्रेन्द्र जले चैवाधिवासयेत् ।
अभितः कलशानष्टौ लोकपालाधिदेवतान् ।।
गन्धपुष्पादिना पूज्य पायसान्नं बलिं ददेत् ।
एकरात्रं त्रिरात्रं वा पञ्चरात्रमथापि वा ।।
जलादुत्तीर्य पूर्वेद्युः स्नापयेत्पञ्चगव्यकैः ।
मण्टपं कारयेत्तत्र सप्ताष्टनवहस्तकम् ।।
मध्यमे वेदिकां कुर्यात्परितः कुण्डमुच्यते ।
दिशासु चतुरश्राणि वृत्तकुण्डं विदिक्षु च ।।
इन्द्रईशानयोर्मध्ये योन्याकारं भवेत्तदा ।'
'शालिभिर्विकिरेद्वेद्यां तण्डुलार्धतिलान् न्यसेत् ।।'
'शयनं पञ्चभिः कल्प्य मूलेन प्रतिमां न्यसेत् ।
प्रच्छन्नपटसंयुक्तं गन्धपुष्पादिनार्चयेत् ।।
श्रीभूमी चैव विप्रेन्द्र दक्षिणे चोत्तरे न्यसेत् ।
अभितः कलशानष्टौ विन्यसेद्विष्णुबीजतः ।।
सवस्त्रान् सापिधानांश्च सहिरण्यान् सकूर्चकान् ।
विष्णुं चैव महाविष्णुं सत्यविष्णुं तथैव च ।।
नारायणं वासुदेवं संकर्षणं तथैव च ।
प्रद्युम्नमनिरुद्धं च पूर्वादीशान्तके न्यसेत् ।।
स्वस्वनाम्नैव संस्थाप्य गन्धपुष्पादिनार्चयेत् ।
दद्याद्गुलोदनं चैव ताम्बूलं दापयेत्ततः ।।
ततो होमः प्रकर्तव्यः पलाशसमिधा सह ।
समिदाज्यचरून् हुत्वा मूलेनैव तु देशिकः ।।
इदं विष्णुर्विचक्रमेत्याज्येनैव शताहुतिः ।
विष्णोर्नुकेति मन्त्रेण चरुणा च शताहुतिः ।।
हुत्वा चैव स्पृशेद्बेरं व्याहृतिं जुहुयात्ततः ।'

विष्णोः संस्थापनं वक्ष्ये समासेन जनार्दन ।

[मूर्तिलक्षणम्]

विष्णुं चतुर्भुजं शान्तं वनमालाधरं तथा ।।२।।
किरीटमकुटोपेतं श्यामवर्णं द्विनेत्रकम् ।
शङ्खचक्रधरं चैव श्रीवत्साङ्कितवक्षसम् ।।३।।
दण्डाभयधरं देवं पीताम्बरसमन्वितम् ।
सुखासीनं स्थितं वापि धरण्या च श्रिया युतम् ।।४।।
[शयानं वापि तद्रूपं कल्पयेत्कल्पवित्तमः ।
नृसिंहरूपं वा कुर्याच्छङ्खचक्रधरं तथा ।।५।।
कुक्कुटासनमासीनमात्तपर्यङ्कबन्धनम् ।
जानुद्वयोपरिन्यस्तकूर्परद्वयमुज्ज्वलम्] ।।६।।

[स्थापनप्रकारः]

स्थापयेत्तत्र देवांश्च [स्थापनोक्तक्रमेण तु] ।
नेत्रोन्मीलन[3]पूर्वं तु तदीयैरणुभिः क्रमात् ।।७।।
नृसिंह[4]रूपस्याप्येवं स्थापनं परिकीर्तितम् ।
एवं यः कारयेन्मर्त्यो विष्णुसंस्थापनं परम् ।
इह लोके सुखं प्राप्य स याति परमां गतिम् ।।८।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] विष्णुस्थापन-
[विधिरष्टपञ्चाशः] पटलः

'ततः प्रभाते विमले स्नानं कृत्वा तु देशिकः ।
स्थितिन्यासं प्रकुर्याच्च पूर्वलक्षणसंयुतम् ।।
ततोऽवसानहोमे तु समिदाज्यचरून् सह ।
विष्णुबीजेन मूलेन हृदयेन क्रमाद्धुनेत् ।।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् ।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ।।
स्थापयेत्प्रतिमां तत्र मानुषे तु पदे तथा ।
स्नापयेद्विष्णुकुम्भेन विष्णुबीजेन संयुतं ।।
देव्याः कुम्भेन देव्यौ तु स्नापयेत्स्वस्वमन्त्रतः ।'
वीरतन्त्रे विष्णुप्रतिष्ठापटलः । (टि० १२३ पृ० ३२ —३७)

[3]पूर्वां तु—इ

[4]नृपस्याप्येवं—इ

[एकोनषष्टितमः पटलः]

[सरस्वतीस्थापनविधिः][1]

स्थापनं तु सरस्वत्याः समासाच्छृणु सांप्रतम् ।

[स्थापनयोग्यस्थानम्[2]]

ग्रामादीनां तु मध्ये तां पूर्वपश्चिमयोस्तु वा ॥१॥
ग्रामाद्यभिमुखां[3] देवीं स्थापयेज्ज्ञानसिद्धये ।
[4]शिवालयेषु सौम्ये वा[5] वारुणे पावकेऽपि वा ॥२॥
ग्रामादौ [6]प्राङ्मुखा देवी [7]मध्यस्था स्याच्छिवालये ।
[8]मूलाभिमुखमेवोक्तं नागरं द्राविडं तु वा ॥३॥

[मूर्तिलक्षणम्[9]]

श्वेतां श्वेताम्बुजासीनामेकवक्त्रां चतुर्भुजाम् ।
संदंशमक्षमालां च दक्षिणे तु [10]तथेतरे ॥४॥
[11]दधतीं तां सुरेशानीं पुस्तकं च कमण्डलुम् ।
शुक्लाम्बरधरां देवीं शुक्लमाल्यानुलेपनाम् ॥५॥
[12]त्रिनेत्रां [13]चारुवदनां सर्वाभरणभूषिताम् ।
[14]मृदा वा निर्मितां देवीं स्थापयेत्सर्वसिद्धये ॥६॥

---

[1] अयं पटलः 'इ' मातृकायां 'लृ' मातृकायां च दृश्यते।
[2] 'स्थापयेत्सूत्रमध्ये तु आलयैश्च समन्वितम् ।
स्थापयेत्स्वस्वदेशे तु शक्रादीन् लोकपालकान् ॥
अश्विनौ सप्तमातॄश्च वागीशीं कमलोद्भवाम् ।
ज्येष्ठां चैवोरगेन्द्रं च क्षेत्रपालं रविं क्रमात् ॥
ऐन्द्राग्नेयं च मध्यादिष्वन्तराले तु विन्यसेत् ।
मण्डपाकृतिकं वापि सभाकृतिमथापि वा ॥
नन्द्यावर्तविमानं वा सर्वेषां तु प्रकल्पयेत् ।'
(*पूर्वकारणे* ६०.१६ उ० — १९)
[3] मुखं — इ
[4] अजितागमे षोडशपरिवारेषु सरस्वती परिगणिता। तस्याः स्थानं च निर्दिष्टम् ।
'प्रागादिषु यथास्थानं लोकपालान् प्रकल्पयेत् ॥
अर्कचन्द्रमसोः स्थानं शक्रदक्षिणवामयोः ।
नारदागस्त्ययोश्चापि कीनाशस्य तथा भवेत् ॥
श्रियं सरस्वतीं चापि वरुणस्य तथैव हि ।
व्यासवागीशयोः स्थानं कुबेरस्य तथा भवेत् ॥
एवं षोडशकं प्रोक्तम्' (*अजिते* ३९.२३ उ०, २६पू०)
[5] च — इ
[6] प्राङ्मुखं देवं — इ; प्राङ्मुखां देवीं — लृ
[7] मध्यस्थः स्यात् — इ; मध्यस्थस्य — लृ
[8] 'मूलधाममुखं तेषां द्वारं च परिकल्पयेत् ।'
(*अजिते* ३९.६ उ०)
[9] एतद्विषये *अजिते* ३६.३५१पू० — ३५३पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।
[10] तथोत्तरे — लृ
[11] तथातीतां सुरेशानां — लृ
[12] त्रिणेत्रां — लृ
[13] च त्रिवदनां — लृ
[14] 'इ' मातृकायामयं पादो न दृश्यते; मृदु निर्मितां — लृ

[मण्डपकल्पनम्]

[15]तस्याः संस्थापनार्थं तु मण्डपं कारयेत्ततः ।
[16]पूर्वोक्तलक्षणोपेतं तत्र कुण्डानि कल्पयेत् ॥७॥
योन्याकाराणि सर्वाणि चतसृष्वपि देशिकः ।
शांकरे वृत्तकुण्डं तु प्रधानं परिकल्पयेत् ॥८॥
गोमयेनोपलिप्याथ मण्डपं कुण्डवेदियुक् ।

[नेत्रोन्मीलनम्]

आनीय प्रतिमां तत्र कल्पिते स्नानमण्डपे ॥९॥
उन्मीलनं तु नेत्राणां कुर्यान्मन्त्री यथा पुरा ।

[प्रतिमाशुद्धिर्जलाधिवासः शयनाधिवासश्च]

प्रतिमायास्ततः शुद्धिर्जले चाप्यधिवासनम् ॥१०॥
पूर्ववत्कारयित्वाथ स्नानमण्डपमध्यमे ।
वेदिकायां [17]ततोऽर्चां तामानीय स्थाप्य मन्त्रवित् ॥११॥
वस्त्रकूर्चादिकं त्यक्त्वा[18] गन्धतोयेन वर्मणा ।
अभिषिच्य ततो देवीं चन्दनेनोपलिप्य च ॥१२॥
कौतुकं बन्धयेद्धस्ते [19]दक्षिणे हेतिमुच्चरन् ।
पूर्ववद्वस्त्रकूर्चाभ्यां वेष्टयित्वा च वर्मणा ॥१३॥
शिरस्यर्घ्यं तु दत्त्वास्या वेदादीन्समुदीरयन् ।
[20]मण्डपस्याथ [21]संस्कारमलंकारादिकं[22] तथा ॥१४॥
यथापूर्वं तु निर्वृत्य स्थण्डिले [23]परिकल्पिते ।
शयने वेदिकामध्ये सर्वातोद्यसमन्वितम् ॥१५॥

---

[15]तस्य —इ

[16]'स्थापनं परिवाराणां षोडशानां शृणुष्व च ।
मूर्तीनां चैव सर्वासां प्रत्येकं व्योमकुण्डकम् ॥
सर्वासां चतुरश्रं तु कारयेद्विधिपूर्वकम् ।
मूर्तीनां चैव सर्वासां प्रत्येकं व्योमकुम्भकम् ॥
स्वनामाद्यक्षरं तासां बिन्दुनादसमन्वितम् ।
प्रणवादिनमोऽन्तं च सर्वासां मन्त्रमुच्यते ॥
एतासां च विशेषस्तु यत एव विधीयते ।
अन्यानि सर्वकार्याणि आचरेत्प्रोक्तमार्गतः ॥'
(*पूर्वकारणे* ६०.१२६—१२९)

[17]ततोच्चायामानीय —लृ

[18] . . . कन्यस्तु —लृ

[19]'कौतुकं बन्धयेत्पश्चाद्धृदा दक्षिणहस्तके ।
शक्तीनां चैव सर्वासां वामे वा दक्षिणेऽपि वा ॥'
(*पूर्वकामिके* ६८.६७)

[20]मण्डपस्याधि —इ

[21]संस्काराद्यलं —लृ

[22]काराधिकं —लृ

[23]परिकल्पयेत् —इ

आनीयार्चां ततश्चापि[24] [25]शाययेन्मूलविद्यया ।
प्राक्शिरश्चोर्ध्व[26]वक्त्रां तां छादयेद्रक्तवाससा ।।१६।।
कवचेन';

[कुम्भस्थापनम्]

ततः कुम्भान्पूर्ववत्साधयेच्छुभान्[27] ।
देव्याः [28]शिरोन्तिके तेषु प्रधानकलशं न्यसेत् ।।१७।।
परितः कलशानष्टौ [29]संस्थाप्य चार्चयेत्सुधीः ।
मध्ये सरस्वतीं ध्यात्वा कृत्वा[30] विद्यातनुं[31] तदा ।।१८।।
[32]आवाहनादिभिर्देवीं [33]मूलमन्त्रं समुच्चरन् ।
[यथोक्तविधिनाभ्यर्च्य परितः] कलशेष्वपि[34] ।।१९।।
श्रियं [35]शशीमुषेन्द्राण्यौ महादिक्षु समर्चयेत् ।
निवृत्तिं च प्रतिष्ठां च [विद्यां शान्तिं तथैव च ।।२०।।
[36]विदिक्षु च स]मावाह्य प्रणवेन समर्चयेत् ।

[होमः]

ततश्च होमं कुर्वीत साधकैः सह देशिकः ।।२१।।
[विधिनाग्निं][37]समाधाय कुण्डेष्वपि च पञ्चसु ।
[38]प्रधाने देवीमभ्यर्च्य शेषेष्वपि यथाक्रमम् ।।२२।।
[39]कमलादीः समाराध्य [40]होमयेद् द्रव्यसंचयम् ।
समिदाज्यचरूँल्लाजा[41]न्यत्रवेणुतिलान्क्रमात् ।।२३।।
[42]प्लक्षोदुम्बरकाश्वत्थवटाः पूर्वादिषु क्रमात् ।
[43]पलाशस्तु प्रधाने स्यात्समिद्धोमं[44] समाचरेत् ।।२४।।

---

[24] आनीयश्च ततःपश्चात् —लृ
[25] ध्याययेन्मूल —लृ
[26] वक्त्रं च्छाययेद्वस्त्रवाससा —इ; वक्त्रां छादयेद्वस्त्र-वाससा —लृ
[27] पूर्ववत्साधितान् शुभान् —इ; पूर्वादीशान्ततश्शु . . . त् —लृ
[28] चि . . . न्तकस्तस्या प्रधाने —लृ
[29] स्थाप्यार्चयेत् —इ; स्थाप्येप्यर्चयेत् —लृ
[30] . . . सनीध्या कृता —लृ
[31] विद्यां तनुं —इ
[32] 'इ' मातृकायां 'आवाहन' इत्यनन्तरं एतत्पटल-समाप्तिपर्यन्तं न दृश्यते ।
[33] मूलन्यासं —लृ
[34] अस्य अर्धस्य स्थाने 'लृ' मातृकायां 'ग . . . कलशेष्वपि' इत्येतावन्मात्रं दृश्यते ।
[35] शशिमुषे —लृ
[36] . . . मभ्यर्च्य —लृ
[37] समादाय —लृ
[38] प्रधानेन समभ्यर्च्य —लृ
[39] कलशादी . . . रभ्य —लृ
[40] होमद्रव्यं च सं —लृ
[41] पवनेतीतमान् क्रमात् —लृ
[42] प्लक्षोदुम्बराश्वत्थं वटं —लृ
[43] पलाशं तु प्रधानं स्यात् —लृ
[44] समिदिध्मं —लृ

[अ]धिपानां [च] सर्वेषां प्रत्येकं तु [45]शताहुतीः ।
होमयेत्सर्पिषा तेन [46]साममन्त्रेण साध[कैः] ॥२५॥
पूर्व[वदाहुतीर्हुत्वा परि]षिच्य समापयेत् ।
तस्मिन्काले चतुर्दिक्षु ऋगाद्यध्ययनं भवेत् ॥२६॥
[शांकरेऽस्त्रजपं] कुर्यात्सर्वातोद्यसमन्वितम् ।
ततः कुम्भस्थदेवीनां हविर्दद्याद्यथाक्रमम् ॥२७॥

[प्रतिमास्थापनम्]

एवं कृत्वा [निशायां तु] प्रभाते सुमुहूर्तके ।
कृतनित्यक्रियो[47] गत्वा मण्डपं होतृभिः सह ॥२८॥
देवीनामर्चनं कृत्वा पूर्णां मूलेन दापयेत् ।
ततो देवीं समुद्धृत्य कूर्चवस्त्रं व्यपोह्य च ॥२९॥
रथादिषु समारोप्य कृत्वा धामप्रदक्षिणम् ।
अन्तः प्रविश्य [48]गर्भस्थे दैविके मानुषेऽपि वा ॥३०॥
पदे संस्थापयेद्विद्वानवटे रत्नसंयुते ।
पूर्ववत्कल्पिते मन्त्री मूलविद्यां स[मुच्चरन्] ॥३१॥
[स्थापयेद्वा] पीठमपि[49] कृत्वा [50]संधिं विधानतः ।

[कुम्भाभिषेकः]

उद्वास्य शिल्पिनं पश्चात्स्नात्वाच[म्य यथाविधि] ॥३२॥
[प्रविश्य] गर्भगेहान्तः प्रतिमाशुद्धिमाचरेत् ।
पुण्याहं च ततः कृत्वा [51]कुम्भानुद्धृत्य वाहकैः ॥३३॥
[देशिको होतृ]भिः सार्धं कृत्वा धामप्रदक्षिणम् ।
अन्तः प्रविश्य [52]देव्यग्रे [53]स्थण्डिले विन्यसेत्सुधीः ॥३४॥
[सुप्रसन्नः प्र]शान्तात्मा कृत[विद्या]तनुस्तदा ।
मन्त्रन्यासं तु कुर्वीत पूर्ववन्मूलविद्यया ॥३५॥
अभिषेकं ततः कुर्यात्प्रागादिकुम्भतोयकैः[54] ।
[55]मूलाङ्गमातृकान्यासं पूर्ववत्सर्वमाचरेत् ॥३६॥
मालाभरणवस्त्राद्यैः कृत्वालंकारमुत्तमम् ।
अभ्यर्च्य देवीं गन्धाद्यैः परमान्नं निवेदयेत् ॥३७॥

---

[45] शताहुतिः —लृ
[46] (सामवेदसंहितायां २.१०.५) 'पावका नः सरस्वती' इति मन्त्रेण
[47] क्रियां —लृ
[48] गर्भस्य —लृ
[49] . . . मा पीठमपि —लृ
[50] सन्धिविधानतः —लृ
[51] ततः कुम्भा . . . वान . . . —लृ
[52] देव्याग्रे —लृ
[53] स्थण्डिलं —लृ
[54] त्प्रागादि . . . चितो भवेत् —लृ
[55] मूलाङ्गं —लृ

[प्रभूतव्यञ्जनोपेतं फ]ल[56]भक्ष्यं निवेदयेत् ।
ताम्बूलं मुखवासं च ततो दद्यादतन्द्रितः ॥३८॥
ततः पुस्त[करूपेण लिखितं] तु शिवागमम् ।
पुराणाद्यं च वेदाङ्गं पट्टवस्त्रैः समावृतम् ॥३९॥
देव्यास्तु वामपार्श्वे तु [विद्यापीठे च] विन्यसेत् ।
प्रत्यहं पूजयेद्देवीं पुस्तकं चापि मन्त्रवित् ॥४०॥
गुणप्रधानयोरेवं समानं [57]सर्वथोदितम् ।

[प्रधानालये विशेषः]

प्रधाने तु विशेषोऽयं कथ्यते मधुसूदन ॥४१॥
[58]पश्यन्ती मध्यमा [59]चैव प्रतीहारस्य देवते ।
[60]श्वेतवर्णे द्विनेत्रे च [61]द्विभुजे [वा] चतुर्भुजे ॥४२॥
वाहनं तु भवेद्धंसः [परिवारस्त]थोच्यते ।
[कमलादयः] शक्तयोऽस्याः पूर्वादिषु च संस्थिताः ॥४३॥
[पूर्वोदिता देवता]स्तु संस्थाप्य [पूजयेत्सुधीः] ।
[62]अधिवासादिकं तासां पूर्ववत्कारयेद् गुरुः ॥४४॥
नृत्तगीतादिवाद्यैश्च सर्व[वेदस्वनैर्युतम्] ।[63]
एवं यः कुरुते मर्त्यो [देव्याः] स्थापनमुत्तमम् ॥४५॥
विद्यार्थी लभते विद्यां भोगार्थी भोगमाप्नुयात् ।
मोक्षार्थी लभते मुक्तिं नात्र कार्या विचारणा ॥४६॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे] सरस्वतीस्थापनविधिः [एकोनषष्टितमः] पटलः ।

---

[56] भक्ष्यान् —लृ
[57] सर्वचोदितम् —लृ
[58] पश्यन्तं —लृ
[59] चा प्रहारस्य —लृ
[60] श्वेतवर्णद्विनेत्रं च —लृ
[61] द्विभुजं चतुर्हस्तके —लृ
[62] अधिवासादयस्तासां —लृ
[63] ४५ पूर्वार्धानन्तरं 'लृ' मातृकायाम् —
'ध्यानम् । चतुर्भुजां त्रिणेत्रां च श्वेतवस्त्रां तथैव च ।
अक्षमालाधरां . . . . ॥
. . . स्तको . . . यं वर . . . चैव पुस्तकं वामहस्तके ।
सर्वपद्मसमायुक्ता . . . . धारयेत् ॥
सर्वलक्षणसंयुक्तां पूजयेच्च सरस्वतीम् ।'
इत्यधिकं दृश्यते। तथा '४६' श्लोकानन्तरं च 'लृ' मातृकायाम्
'सव्यवामक . . . . स्तम् ।
नृत्तव्यसमयेशस्य देव्या लक्षणमुच्यते ॥
दक्षिणे चाक्षमालां च . . . मे . . . . ।
वाममुख्यकराभ्यां च कच्छपं वाममेव च ॥
दधती सर्व . . . पन्नांशे . . . पूर्ववदाचरेत् ।
शुक्लवदनां . . . नां वापि देवलक्षणसंयुताम् ॥'
इत्यधिकतया दृश्यते। मूर्तिलक्षणस्य पूर्वमेवोक्तत्वाद् अयं भागोऽत्र असमञ्जस इति कृत्वा मूले न निवेशितः ।

[षष्टितमः पटलः]

[त्रिशूलादिस्थापनविधिः[1]]

[त्रिशूललक्षणम्[2]]

[ग्रन्थपातः]

तन्मध्ये पद्ममंशाभ्यां साष्ट[पत्रं] सकर्णिकम् ।
सवृत्तं तत्प्रकर्तव्यं शेषं [युक्त्या] प्रकल्पयेत् ।।१।।

---

[1] अयं पटलः 'इ' मातृकायां परं दृश्यते; एतद्विषये *उत्तरकामिके* '६८, ६९' पटलौ; *पूर्वकारणे* '६८, ६९' पटलौ, *योगजे* (टि० ६२) '४' पटलः, *सन्तानसंहितायाम्* (टि० ६७) '२२' पटलः, *सुप्रभेदे* क्रियापादे ५१ पटलश्च द्रष्टव्याः ।

[2] अथातः संप्रवक्ष्यामि शृणुष्वायतलोचने ।
शूलस्य स्थापनादेव धनधान्यं च वर्धते ।।
उत्तमं दशतालं तु नवतालं तु मध्यमम् ।
अधमं चाष्टतालं स्याच्छूलस्योत्सेधमुच्यते ।।
अथवा द्वारमानेन कर्तव्यं लक्षणान्वितम् ।
लिङ्गस्योत्सेधमानं वा गर्भत्रयद्वियंशकम् ।।
गर्भमानप्रमाणेन वक्ष्यते विधिनाधुना ।
गर्भगृहं दशधा भित्त्वा भागहीनं तु चोत्तमम् ।।
सप्तभागेन मध्यं स्यात् षड्भागमधमं भवेत् ।
उत्तमं ब्राह्मणानां तु क्षत्रियाणां तु मध्यमम् ।।
अधमं वैश्यशूद्राणां योजयेत्तु विशेषतः ।
सौवर्णं राजतं ताम्रमायसं वापि कारयेत् ।।
शूलोत्सेधे तु पञ्चांशं पत्रदैर्घ्यमुदाहृतम् ।
फलकैकाङ्गुला देवि पालिका वृषभं गता ।।
चतुरङ्गुलं तु पद्मं स्यात्कर्णमर्धाङ्गुलं भवेत् ।
कुम्भमेकाङ्गुलं ज्ञेयमधो हीनं षडङ्गुलम् ।।
कलशाकृतिरेवोक्तमाचार्यहस्तसंयुतम् ।
मुखमात्रेण देवेशि अधःपद्ममुदाहृतम् ।।
दण्डस्यैव परीणाहमष्टाङ्गुलमिति स्मृतम् ।
पार्श्वपत्रं तु देवेशि त्र्यङ्गुलं विस्तरं भवेत् ।।
मध्यपत्रं तथैवोक्तं मत्स्याकारं त्रयं स्मृतम् ।
अष्टाङ्गुलं तु फलका विस्तारायामतः समा ।।
फलकोर्ध्वे चतुष्कोणे कारयेच्चतुरो वृषान् ।
एवं लक्षणसंयुक्तं त्रिशूलं शुभमुच्यते ।।
(*सन्तानसंहितायां* (टि० ६७) २२.२–१३);
त्रिशूलस्थापनं वक्ष्ये तल्लक्षणपुरःसरम् ।
हेमराजतताम्रैर्वायसेनाश्मादिभिस्तु वा ।।
गर्भगेहे नवांशे तु त्रिभागान्तं नवांशतः ।
महतामेकभागं तु शूलानां मानमिष्यते ।।
प्रत्येकमष्टधा भक्त्वानेकधा मानमेव च ।
द्वारस्तम्भोदयादेव मानं वा परिभाव्यताम् ।।
त्रिहस्तादेकमात्रद्ध्यर्धा चतुर्हस्तान्तमेव वा ।
जात्यंशं पूर्ववन्नीत्वा कल्पयेद्देशिकोत्तमः ।।
यल्लब्धं त्रिंशदंशादि शतान्तादनुभाजयेत् ।
भागमेकं प्रयुञ्जीयाच्छुभायादिप्रसिद्धये ।।
लौकिकं यौगिकं चेति द्विविधं शूलमिष्यते ।
यजमाननृपग्रामानुकूलं लौकिकं मतम् ।।
जात्यायांशोज्झितं रुद्राक्षानुकूलसमन्वितम् ।
अङ्गुलैर्निर्मितं यत्तु यौगिकं शूलमिष्यते ।।
लौकिकं चान्यधामस्थबेरसाधारणं मतम् ।
यौगिकं चान्यनगरस्थानकर्त्रनुरूपि यत् ।।
तदन्यत्रापि योज्यं वा प्रतिमास्वेवमेव वा ।
उत्सेधं दशधा कृत्वा व्योमद्वित्रिभिरेव वा ।।
तन्मध्याष्टांशमानं वा मध्यपत्रोच्चमानकम् ।
पादमानयुतं वाथ तन्मानं च पृथक् पृथक् ।।
तत्त्रिंशदंशं कृत्वैव द्वित्रिवेदशरांशकैः ।
रससप्ताष्टनवभिर्मध्यपत्रस्य विस्तरः ।।
संग्राह्य पत्रमानं तु चतुरश्रं समं नयेत् ।
पत्रमानं विसृज्याथ पार्श्वयोरुभयोरपि ।।
वृत्ताकारं नयेत्तत्र पत्रमानेन वोभयोः ।
मध्यपत्रततिर्यद्वत्पार्श्वपत्रततिस्तथा ।।

[यथाविधि] त्रिशूलस्य दण्डं [सम्यक्] प्रकल्पयेत्[३] ।
[ग्रन्थपातः]
[४]तत्तारादधिके तारे युगांशे[ऽग्]न्यंशतो भवेत् ।।२।।

चतुष्पञ्चषडंशोनवृद्धिर्वा तारमिष्यते ।
मध्यपत्राद्बहिश्चान्तर्मध्यसूत्रसमाश्रयात् ।।
पार्श्वपत्रे प्रकर्तव्ये कृशमूलाग्रसंयुते ।
पत्रमूलबलार्थं च मूलतारं विवर्धयेत् ।।
अधःपत्रं विचित्रं च पत्राग्रं तु कृशं भवेत् ।
पत्रतारेण चाग्रे तु तदर्धेनाथ पादतः ।।
अधिकं वाथ तत्पार्श्वपत्राग्राभ्यां मुनीश्वराः ।
पत्राग्रमध्यमं तद्वद्विशिष्टं वा प्रकल्पयेत् ।।
तद्वन्मूलान्तरं प्रोक्तं पार्श्वपत्रद्वयोरपि ।
पत्रतारं चतुष्पञ्चरसषष्ठाष्टभागतः ।।
नवांशांशेन वा प्रोक्तं घनं पत्रेषु वान्यथा ।
यवार्धं तु समारभ्य यवपादविवर्धनात् ।।
अङ्गुलान्तप्रमाणं वा मध्यदेशे घनं भवेत् ।
मध्यपत्रस्य मध्यात्तु हीनं तत्पत्रपार्श्वकम् ।।
मध्यपत्रस्य मूलेऽग्रे मध्ये पार्श्वद्वयोरपि ।
एकद्वित्रियवैर्वापि निर्गतं मुकुलं नयेत् ।।
पत्रायामं त्रिपञ्चांशं कृत्वैकद्वित्रिभागतः ।
पादायामस्तु मूले स्यात्तदर्धं पार्श्वपत्रयोः ।।
तदर्धविस्तरस्तस्य पादो वा परिकीर्तितः ।
द्विगुणो मध्यपादस्य विस्तारः पार्श्वपादतः ।।
पत्राणां पादमूले तु कुर्याद्वा चित्रमण्डनम् ।
तस्याधः पालिका कार्या पत्रायामार्धभागतः ।।
हीनावैकेन रुद्रांशी द्विस्त्रिभिर्वर्धिताथवा ।
फलकाविस्तृतिं भक्त्वा नवधैकेन वार्धतः ।।
पादेन वा त्रिपादेन घनं चाधो द्विपङ्कजम् ।
एकेन कर्णविस्तार इष्टांशेन मतो द्विजाः ।।
पालिकार्धो घटाकार उत्सेधः स्यात् त्रिपादतः ।
तदर्धं च गलं प्राग्वत्कर्तव्यं मुनिपुङ्गवाः ।।
पादोनकुम्भतारेण वार्धेनास्यं प्रकल्पितम् ।
घटवन्नाडिकामानं युगधा विभजेत्तु तत् ।।
एकभागान्तरं कुर्यात्तत्प्रमाणेन हीरिका ।
हीरिकाधः प्रकर्तव्यो दण्डस्तु विधिना द्विजाः ।।
आस्यतारचतुर्भागत्रिभागो दण्डविस्तरः ।
तदर्धं लोहदण्डश्चेद् यथाशोभांशतोऽथवा ।।
दण्डमूले तु पद्मं वा मध्यपत्रसमं तु वा ।
तदर्धं वान्तरेऽष्टांशे नवधा मानमेव वा ।।
विस्तारस्तत्समं तूच्चं त्रिपादं वार्धमेव वा ।
पादं वान्तरमानं वा तदुच्चे दशधा कृते ।।
पट्टिकैका त्रिभिर्द्वाभ्यां द्वाभ्यां वांशैः कुशेशयम् ।
वृत्तं वा चतुरश्रं वा द्विमिश्रं वा प्रकल्पयेत् ।।
हीरिकासममानेन तस्योर्ध्वे पट्टिकाऽथवा ।
मध्यपत्रस्य मध्ये तु लिखेद्वाब्जं तु तन्मुखम् ।।
अथवा मध्यपत्रस्य मूले वृषभवाहनम् ।
पत्रोच्चनवभागैकद्वित्रिवेदशरोच्चकम् ।।
देव्या समायुतं वाथ वृषभेण युतं न वा ।
देवान्तरं वा लोकेशानस्त्रान्वेष्टप्रमाणतः ।।
अथवा पालिकायास्तु विदिक्ष्वश्वत्थपत्रवत् ।
मालाचतुष्टयं कुर्यात्तद्विहीनं तु वा द्विजाः ।।
टङ्कास्ययुक्तं दण्डाग्रमथवा परिकल्पयेत् ।
पालिकोपरि कोणेषु कारयेद्वा वृषेश्वरम् ।।
शैलजे मृण्मये शूले विशेषः कश्चिदुच्यते ।
मध्यपत्रसमायामं त्रिपादेनार्धतोऽपि वा ।।
पादेन मध्यमेऽष्टांशमानाद्वा दण्डविस्तरः ।
विस्तारोच्चसमं तद्वद्विस्तारसममेव वा ।।
यथा दण्डघनं प्रोक्तं पत्राणां वा घनं तथा ।
पादभूषणमण्ड्यादि पत्राधो वा प्रकल्पयेत् ।।
चतुरश्रशिलायां तु शूलाकारं तु वा लिखेत् ।
त्रिशूलापरभागे तु वृषभं वा समालिखेत् ।।
अथवा दण्डमानेन पुरुषं जटिलं तु वा ।
पूर्वभागे परे दण्डं तदूर्ध्वे शूलमाचरेत् ।।
वृषाग्रे वृषपृष्ठे वा बलिपीठाग्र एव वा ।
सुदृढं स्थापयेच्छूलम्'

(*उत्तरकामिके* ६९.१—४४);

एतद्विषये पुनः *रौरवे* क्रियापादे ३३.११३०—१५ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[३]प्रकल्प्यते—इ

[४]तत्ताराधिका—इ

ऊर्ध्वं वायुप्रवेशाय दारुदण्डस्य कल्पनम् ।
पञ्चाङ्गुलप्रमाणेन विवरं गोलके भवेत् ।।३।।
साम्बिका वा स्थिता रम्या सर्वाभरणभूषिता ।
पालिकोपरि कोणेषु [५]कारयेद्वा वृषेश्वरम् ।।४।।
कुर्याच्छूलमुखे कुम्भे टङ्कास्यं [संप्रयोजयेत्] ।
एवं लक्षणमुद्दिष्टं प्रतिष्ठाविधिरुच्यते ।।५।।

[त्रिशूलप्रतिष्ठाविधिः]

[६][मण्डपकल्पनं तत्र कुण्डादिकल्पनं च]

[हर्म्या]ग्रे मण्डपं कृत्वा पूर्ववल्लक्षणान्वितम् ।
कुण्डानि परितस्तस्य प्रागादिषु यथाक्रमम् ।।६।।
चतुरश्रं धनुर्वृत्तं त्रिकोणं [७]शाङ्करे तथा ।
पद्मकुण्डं [तत्र मध्ये वेदीकल्पन]पूर्वकम् ।।७।।
[८]स्थण्डिलं च ततः कृत्वा स्नानमण्डपमत्र च ।

[नेत्रोन्मीलनम्][९]

तत्र शूलं समानीय नेत्रोन्मीलनमाचरेत् ।।८।।
सबेरं चेत्पुरोक्ते[न] विधिना [देशिकोत्तमः] ।
[स्थण्डिले च] लिखेन्मध्ये पद्ममष्टदलान्वितम् ।।९।।

---

[५]करं यद्वा—इ
[६]द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकम् ।
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा ।।
मण्टपं तु त्रिधा भज्य मध्यभागे तु वेदिकाम् ।
रत्निमात्रसमुत्सेधां दर्पणोदरसन्निभाम् ।।
कुण्डानि परितः कुर्याद्दिशासु विदिशासु च ।
दिशासु चतुरश्राणि चाब्जानि विदिशासु च ।।
ईशानशक्रयोर्मध्ये वृत्तं प्राधान्यकं कुरु ।
पश्चिमोत्तरयोर्वापि स्नानश्वभ्रं प्रकल्पयेत् ।।
उद्वास्य शिल्पिनं पश्चाद्गोमयेनानुलेपयेत् ।
मण्टपं भूषयेत्पश्चात्पुण्याहं वाचयेत्ततः ।।
ब्राह्मणान् भोजयेत्पश्चादुच्छिष्टोद्वासनं कुरु ।
गोमयेनोपलिप्याथ वास्तुहोमं तु कारयेत् ।।
पर्यग्निकरणं कृत्वा पुनः पुण्याहमाचरेत् ।
द्वारपूजादिकं सर्वं स्थापनक्रमवत्सुधीः ।।'
(*पूर्वकारणे* ६८.२९ उ०—३६ पू०)
[७]शाङ्करेऽथवा—इ
[८]कर्म कृत्वा च कृत्वाच—इ
[९]'रत्नन्यासो न कर्तव्यस्तथा नयनमोक्षणम् ।
अचलस्थापनं चेत्तु रत्नन्यासं तु कारयेत् ।।
विद्यते प्रतिमाद्यं चेत्तस्य दृङ्मोक्षणं नयेत् ।
शुद्धिं कृत्वा मृदाद्यैस्तु'
(*उत्तरकामिके* ६९.४७, ४८);
'नयनमोक्षणं नोक्तं कुर्याद्गव्याभिषेचनम् ।'
(*पूर्वकारणे* ६८.२७ पू०);
'प्रोक्षयेत्पञ्चगव्येन पुण्याहं वाचयेत्ततः ।
नयनमोक्षणं पश्चाच्छिल्पिनं पूजयेत्ततः ।।'
(*सन्तानसंहितायाम्* २२.१४)

तत्र [10]मध्वादि [विधिवद् बेरनेत्रेषु] तर्पयेत् ।
शूलान्वितं [11]तु तत्कृत्वा पञ्चमृत्पञ्चगव्यकैः[12] ॥१०॥

[ग्रामप्रदक्षिणं, जलाधिवासश्च[13]]

ग्राम[प्रदक्षिणं चादौ कृत्वालं]कारसंयुतम् ।
[14]जलतीरं समानीय पुण्याहं तत्र कारयेत् ॥११॥
तत्राभिषिच्य शूलाग्रं सकूर्चं वेष्टयेत्ततः ।
[15]वाससा च नवेनैव [प्राक्शिरोश्चोर्ध्ववक्त्रकम्] ॥१२॥
शाययेत्फलकायां तु परितोऽस्त्राणि चार्चयेत् ।
[16]वस्त्रादीनि ततो मन्त्री नीत्वा कालं तु पूर्ववत् ॥१३॥
उद्धृत्याथ जलात्तस्मात् [स्नानम]ण्डपमानयेत् ।

[शयनाधिवासः][17]

तन्मध्ये वेदिकायां तु शूलं तु प्राङ्मुखं न्यसेत् ॥१४॥

---

[10]मध्यादि —इ
[11]ततः कृत्वा —इ
[12]अत्र 'अभिषेचयेत्' इत्यध्याहृत्य व्याख्येयम् ।
[13]सर्वातोद्यसमायुक्तं सर्वालङ्कारसंयुतम् ।
त्रिशूलं समलङ्कृत्य कुर्याद्ग्रामप्रदक्षिणम् ॥'
(*पूर्वकारणे* ६८.२७ उ०, २८ पू०);
'कण्ठमात्रजले चैव प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
शाययित्वा त्रिशूलं च सद्येन फलकोपरि ॥
द्विरात्रं वा त्रिरात्रं वा एकरात्रमथापि वा ।'
(*योगजे* (टि० ६२) ८.३३ उ०, ३४);
'ततः शूलमलङ्कृत्य वस्त्रमाल्यैश्च सर्वतः ।
ग्रामप्रदक्षिणं कुर्याच्छङ्खभेरीरवैः सह ॥
जलाधिवासनं कुर्यात्पूर्वोक्तविधिना सह ।
वस्त्रेण वेष्टयेच्छूलं दर्भैराच्छाद्य यत्नतः ॥
पूर्वोक्तरात्रं देवेशि जले चैवाधिवासयेत् ।'
(*सन्तानसंहितायाम्* २२.१५—१७ पू०)
[14]जलतीरे —इ
[15]वासना वान्ततेनैव —इ
[16]वस्त्रादीनि —इ
[17]जलाधिवासनं कृत्वा ततो मण्टपमाश्रयेत् ।
पूर्वोक्तमानं भूतैकग्रहकुण्डसमन्वितम् ॥
संत्यक्ततक्षकोपेतं विप्रभुक्त्या च पावनम् ।
वास्तुहोमसमायुक्तं वेद्यां स्थण्डिलसंयुतम् ॥
शयनेनापि संयुक्तं पञ्चकेनाण्डजादिना ।
ततो बिम्बं समानीय स्नापयेत्पूर्ववर्त्मना ॥
कौतुकं बन्धयेत्पश्चात्पद्मपत्रेषु वा त्रिषु ।
बेरे च वृषभे चैव बन्धयेत्कौतुकं गुरुः ॥
शयने शाययेत्पश्चात्प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
आच्छाद्य श्वेतरक्ताभ्यां वासोभ्यामस्त्रमुच्चरन् ॥'
(*उत्तरकामिके* ६९.४९—५३);
'वेद्यूर्ध्वे स्थण्डिलं कृत्वा चाष्टद्रोणैश्च शालिभिः ।
तन्मध्येऽब्जं समालिख्य साष्टपत्रं सकर्णिकम् ॥
तण्डुलैस्तिलदर्भैश्च विकिरेत्समलङ्कृतम् ।
तन्मध्ये शयनं कल्प्य चर्मजाद्यैरनुक्रमात् ॥
जलादानीय शूलास्त्रं स्नानश्वभ्रोपरि न्यसेत् ।
वज्रमापाद्य [वस्त्रं व्यपोह्य ?] शूलास्त्रं
शुद्धिं कृत्वाष्टमृज्जलैः ॥
पञ्चगव्येन संस्नाप्य हृदयेन तु मन्त्रतः ।
गन्धतोयेन संस्नाप्य शुद्धैरुद्धैरिति ब्रुवन् ॥
हृदयेन तु मन्त्रेण गन्धपुष्पादिभिर्यजेत् ।
मध्यपत्रस्य मध्ये तु कौतुकं बन्धयेद्धृदा ॥
मूर्धादिपादपर्यन्तं रक्तवस्त्रेण वेष्टयेत् ।
शयने शाययेच्छूलं प्राक्शिरश्चोर्ध्ववक्त्रकम् ॥
गन्धपुष्पादिभिः पूज्य ईशानेन तु मन्त्रतः ।'
(*पूर्वकारणे* ६८.३६ उ०—४२)

ततः कूर्चं सवस्त्रं [च] व्यपोह्य परिशोधयेत् ।
पञ्चमृद्भिस्ततः पञ्चगव्येनाप्यभिषेचयेत् ।।१५।।
ब्रह्मपञ्चकमुच्चार्य गन्धोदेनैव देशिकः ।
ततः प्रतिसरं बद्ध्वा पूर्ववत्कूर्चसंयुतम् ।।१६।।
आवेष्ट्याहतवस्त्रेण सदण्डं हेतिमुच्चरन् ।
मण्डपे वेदिकामध्ये स्थण्डिले परिकल्पिते ।।१७।।
शयने पूर्ववत् क्लृप्ते सर्वातोद्यसमन्वितम् ।
शाययेत्प्राक्छिरश्चोर्ध्ववक्त्रमस्त्रं विचक्षणः ।।१८।।
तदूर्ध्वे पुष्पमादाय छादयित्वाथ वाससा ।
[18]'रक्तेनास्त्रं समुच्चार्य'

[कुम्भस्थापनं तत्पूजा च][19]

'ततः कुम्भांस्तु विन्यसेत् ।।१९।।
पूर्वोक्तलक्षणोपेतान्गन्धवारिसुपूरितान् ।
[सकूर्चान्सा][20]पिधानांश्च वस्त्रेण परिवेष्टयेत् ।।२०।।

---

[18] रत्नेन तां—इ

[19] त्रिशूलस्य शिरोदेशे वस्त्रहेमकजान्वितम् ।
शिवास्त्रं संयजेत्तत्र चतुर्बाह्विन्दुभूषितम् ।।
चतुर्वक्त्रं ज्वलत्केशं त्रिणेत्रं परिमण्डितम् ।
स्वास्ये दंष्ट्रान्वितं शक्तिशूलाभयवरान्वितम् ।।
विद्युत्पुञ्जनिभं भीममशनिध्वनिसंयुतम् ।
द्विरष्टवर्षेणोपेतं सुभासं स्वस्तिमा[का ?]न्वितम् ।
यद्यस्ति प्रतिमा शर्वे शिवकुम्भं च वर्धनीम् ।।
वृषो यद्यस्ति तत्कुम्भं तेषु तानर्चयेत्क्रमात् ।
वज्रादीन्वसुकुम्भेषु परितः संस्थितेषु च ।।
तत्त्वतत्त्वेश्वरोपेतं मूर्तिमूर्तीश्वरान्न्यसेत् ।
पूर्ववत्प्रतिमायां च वृषे च गुरुपुङ्गवाः ।।
दण्डमध्याग्रपत्रान्तं तत्त्वतत्त्वेश्वरान्न्यसेत् ।
शूलस्य मूर्तयः प्राग्वद्वज्राद्या मूर्तिपा मताः ।।
न्यस्त्वैवं मूर्तिमूर्तीशाञ्शिवास्त्रं विन्यसेद्गुरुः ।
ततस्तद्व्यापकत्वेन सर्वान्देवमनून्न्यसेत् ।
मध्यपत्रे न्यसेद्रुद्रं ब्रह्माणं दक्षपत्रके ।।
वामे विष्णुं समावाह्य पालिकायां तु पार्वतीम् ।
षण्मुखं कुम्भदेशे तु कुम्भस्यास्ये विनायकम् ।।
दण्डस्याग्रे तु शास्तारमादित्यान्दण्डमध्यमे ।
तन्मूले चण्डराजं च लक्ष्मीं पूर्वदलाग्रके ।।
दक्षिणे मातरः सप्त ज्येष्ठां पश्चिमदिग्दले ।
दुर्गां वै सौम्यदेशे तु रुद्रानर्कान्वसूनपि ।।
दण्डमूलेऽश्विनौ चैव अष्टादशगणांस्तथा ।
(*उत्तरकामिके*, ६९.५४—६५ पू०);
सर्वालंकारसंयुक्तान्कुम्भान्द्रोणोदपूरितान् ।
सवस्त्रान्सापिधानांश्च ससूत्रान्कूर्चसंयुतान् ।।
गन्धोदकेन संपूर्णान्स्थण्डिलोर्ध्वे तु विन्यसेत् ।
शूलस्य दक्षिणे चैव मध्ये पश्चिमपूर्वयोः ।।
स्थापयेत्तु घटान्पूज्य मध्यमे तु शिवं यजेत् ।
ब्रह्माणं पश्चिमे पूज्य पूर्वे विष्णुं च पूजयेत् ।।
कुम्भमध्ये न्यसेद्धीमान्पद्ममुद्रां प्रदर्शयेत् ।
पार्वतीं पूर्वकुम्भे तु स्कन्दमाग्नेयकुम्भके ।।
विघ्नेशं याम्यकुम्भे तु भास्करं निर्ऋतौ घटे ।
श्रीदेवीं वारुणे कुम्भे वायौ सरस्वतीं न्यसेत् ।।
वसुधां सौम्यकुम्भे तु दुर्गामीशानकुम्भके ।
तत्तद्बीजानि विन्यस्य पूजयेत्तु हृदा बुधैः ।।'
(*पूर्वकारणे* ६८.४३—४८)

[20] विधानांश्च—इ

वस्त्राग्रेषु त्रिशूलस्य [२१]नामोङ्कारेण कारयेत् ।[२२]
[२३]सौवर्णं मध्यमे शूलं दक्षिणे कनकाम्बुजम् ॥२१॥
वामे [२४]च[ापि तथैवाब्जं] विन्यसेत् कलशत्रये[२५] ।
तादृशान्कलशानष्टौ [२६]परि[तो] दि[क्षु विन्यसे]त् ॥२२॥
पुण्याहं वाचयित्वा तु पूजयेद्देवताः क्रमात् ।
मध्ये महेश्वरं देवं दक्षिणेतरपार्श्वयोः ॥२३॥
ब्रह्मविष्णू च संपूज्य कलशेषु ततः क्रमात् ।
लोकपालान्यथास्थानं गन्धाद्यैरर्चयेत्क्रमात् ॥२४॥

[होमः][२७]

ततो होमं प्रकुर्वीत तद्विधानमथोच्यते ।
आधाय विधिनैवाग्निं सर्वकुण्डेषु मन्त्रवित् ॥२५॥
ब्रह्मविष्णुमहेशांस्तु प्रधानेऽस्मिन्समर्चयेत् ।
प्राक्कुण्डे तु भवानीं च दक्षिणे विघ्ननायकम् ॥२६॥
पश्चिमे षण्मुखं भानुमुत्तरे च यजेत्क्रमात् ।
समिदाज्यचरूँल्लाजांस्तिल[२८]सर्षपकान्यवान् ॥२७॥

---

[२१]नोङ्कारेणैव कारयेत्—इ
[२२]'२१' श्लोकस्य पूर्वार्धानन्तरं ग्रन्थपातः स्यादिति भाति ।
[२३]सौवर्णमध्यमे—इ
[२४]च . . . विन्यसेत्कलशत्रये ।—इ
[२५]अत्र स्थापयेदिति शेषः; एतदनन्तरं ग्रन्थपातः स्यादिति भाति ।
[२६]परिदि . . . त्—इ
[२७]'होमं कुर्यात्तदन्ते तु कृत्वा कुण्डाग्निसंस्कृतिम् ।
समिदाज्यान्नलाजैश्च तिलसस्येन्द्रसंयुतम् ॥
पलाशोदुम्बराश्वत्थवटाः प्रागादिदिक्षु च ।
पलाशस्त्वन्यकुण्डेषु स च सर्वत्र वा मतः ॥
प्रधाने तर्पयेद्धीमाञ्शिवं साङ्गं गुरूत्तमः ।
पूर्वस्मिन्पार्वतीं दक्षे ब्रह्माणं विष्णुमुत्तरे ॥
सेनानीं पश्चिमे कुण्डे रवीनग्निदिशि स्थिते ।
विघ्नेशं नैर्ऋते वायौ मदनं चण्डरुद्रकम् ॥
इशानकुण्डे पूर्वस्मिँल्लक्ष्मीं दक्षे तु मातरः ।
ज्येष्ठां तु पश्चिमे कुण्डे दुर्गामुत्तरतो दिशि ॥
तद्दिङ्मूर्त्यादिसंयुक्तं पूर्वसंख्यासमन्वितम् ।
रुद्रार्कवसवोऽश्विभ्यामष्टादशगणा अपि ॥
एकैकाहुतिदानेन तर्प्याः कुण्डे प्रधानके ।
वृषारूढादिदेवांश्च पूर्ववत्तर्पयेद्गुरुः ॥
वज्रादीन्पङ्कजे सर्वान्देवान्प्राग्वन्निवेशयेत् ।'
(*उत्तरकामिके* ६९, ६५ उ० —७२);
'दिशास्वध्ययनं कुर्याच्चतुरो वेदपारगान् ।
स्थापयेन्मूर्तिपैः सार्धं ततो होमं समारभेत् ॥
अग्न्याधानादिकं सर्वं पूर्वोक्तविधिना कुरु ।
अश्वत्थोदुम्बरप्लक्षवटं पूर्वादिदिक्षु च ॥
शमीखदिरबिल्वार्कमायूरं च विदिक्षु वै ।
प्रधानस्य पलाशस्तु समिधः संप्रकीर्तिताः ॥
समिधः सद्यमन्त्रेण मूलेनाज्यं तु होमयेत् ।
अघोरेण चरुं हुत्वा लाजं वामेन होमयेत् ॥
तिलं हुत्वा तु शिखया नेत्रेणैव यवं हुनेत् ।
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ॥
द्रव्यान्ते व्याहृतिं हुत्वा स्पृशेच्छूलं समस्तकम् ।
ब्रह्मजज्ञानमन्त्रेण इदं विष्ण्वादिमन्त्रतः ॥
त्रियम्बकेन मन्त्रेण प्रत्येकं षोडशं हुनेत् ।
मूलब्रह्मषडङ्गैश्च प्रत्येकं तु दशाहुतिः ॥
एवं जागरणं रात्रौ'
(*पूर्वकारणे* ६९.४९ —५६ पू०)
[२८]सर्षप . . . मान्—इ

प्रतिकुण्डं तु होतव्यं मूलाङ्गैश्च यथाक्रमात् ।
प्रत्येकं शतमर्धं वा तदर्धं वाहुतिर्भवेत् ।।२८।।
होमकाले चतुर्दिक्षु ऋगाद्यध्ययनं भवेत् ।
ब्रह्मविष्ण्वोश्च सर्वत्र घृतेनैव [29]शताहु[तिम्] ।।२९।।
हुत्वा गौर्याश्च पश्चात्तु गजास्यगुहयोरपि ।
भास्करस्य च[30] [चण्डस्य दिक्]पालानां तथैव च ।।३०।।
पञ्चपञ्चाहुतीर्हुत्वा[31] सर्वेषां च पृथक् पृथक् ।
सर्वकुण्डेषु मन्त्रज्ञो होमकाले स्पृशेत्क्रमात् ।।३१।।
सर्वद्रव्यावसाने तु [मध्यमे चैव दक्षि]णे ।
वामे चैव क्रमान्मन्त्रै[32]स्तत्तत्पत्रपरात्मकैः ।।३२।।
पालिकां च ततः कुम्भं दण्डाग्रं दण्डमध्यमम् ।
दण्डमूलं ततः [33]पीठकर्णिकादि[दलेषु च] ।।३३।।
[सर्वत्रापि त्रि][34]शूलस्य क्रमेणैवाथ संस्पृशेत् ।
सर्वकुण्डेषु तां मूर्तिमर्चयित्वा च पावकम् ।।३४।।
परिषिच्याथ होमं तु समाप्यैवं हविः क्रमात् ।
कुम्भस्थानां [तु देवानां दद्या]त्तत्तद्धृदा सुधीः ।।३५।।
नीत्वा शेषं ततो [35]रात्रेः'

[कुम्भाभिषेकः][36]

'प्रभाते होतृभिः सह ।
कृतकृत्यक्रियो मन्त्री मण्डपं संप्रविश्य च ।।३६।।

---

[29]शतसंख्याका आहुतिः शताहुतिः ताम् शताहुतिम् ।
[30]भास्करेभ्यश्च—इ
[31]हुतिर्हुत्वा—इ
[32]स्तद्दद्वक्त्रे वरात्मनैः—इ
[33]पीठं कण्ठिकादि . . .—इ
[34]शूलेन—इ
[35]रात्रि—इ
[36] "प्रभाते विमले ततः ।
आचार्यो मूर्तिपैः सार्धं विधिना स्नानमाचरेत् ।।
अङ्गन्यासं करन्यासं पूर्वोक्तविधिना कुरु [चरेत् ?] ।
जयादिरभ्यातानं च राष्ट्रभृच्च हुनेत् क्रमात् ।।
पूर्णाहुतिं च शिरसा स्विष्टमग्नेति होमयेत् ।
पावकं तु विसृज्याथ स्थापनं तु समारभेत् ।।
पूर्वोक्तविधिमार्गेण देशिकादीन्प्रपूजयेत् ।
शयनाच्छूलमुद्धृत्य वस्त्रादीनि व्यपोह्य च ।।
सर्वातोद्यसमायुक्तं स्नानश्वभ्रे तु विन्यसेत् ।
अर्चयेद्धृदयेनैव गन्धपुष्पादिभिः क्रमात् ।।
घृतं शिरोऽर्पणं कुर्यात्प्रागुक्तविधिना सह ।
मुहूर्ते समनुप्राप्ते गुरवे सन्निवेशयेत् ।।
कुम्भानुद्धृत्य शिरसा बाह्यधामप्रदक्षिणम् ।
कृत्वा शूलस्य चाग्रे तु स्थापयेत्तण्डुलोपरि ।।
(*पूर्वकारणे* ६९.५६—६२);
'ततः प्रभाते विमले सुमुहूर्ते विशेषतः ।
स्नानवेद्यां समानीय पूर्ववस्त्रं विसर्जयेत् ।।
ब्रह्माणं दक्षिणे पत्रे विन्यसेत्तु विचक्षणः ।
वामे जनार्दनं चैव शिवरूपं तु मध्यमे ।।
भवादिसाधितैश्चापि कलशैः स्नापयेत्ततः ।
एकैकं कलशान्सर्वान्प्रासादेन तु मन्त्रतः ।।
गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च पूजयेत् ।
पञ्चवर्णं हविर्दत्त्वा ताम्बूलं दापयेत्ततः ।।

देवं पूर्ववदभ्यर्च्य सुमुहूर्ते सुलग्नके ।
पू[र्णाहुतिं प्र]दत्त्वा तु [३७]ह्यघोरास्त्रं समुच्चरन् ।।३७।।
सर्वेष्वपि च कुण्डेषु [३८]व्याहत्यन्ते तु देशिकः ।
ततः शूलं समुद्धृत्य शिवास्त्रेण समाहितः ।।३८।।
स्नानवेद्यां तु विन्यस्य वस्त्रकूर्चादिकं त्यजेत् ।
पञ्चगव्येन संस्नाप्य गन्धोदेन सुसेचयेत्[३९]।।३९।।
कुम्भानुद्धृत्य तान्सर्वांस्त्रिशूलाग्रे तु यथापुरा ।
विन्यस्य स्थण्डिले धीमान्कृतविद्यातनुस्ततः ।।४०।।
[४०]मध्यकुम्भे महेशं तु ध्यात्वा मन्त्रतनुस्तदा ।
तस्य मूलं समुच्चार्य तोयेन प्रतिमाहृदि ।।४१।।
मध्यपत्रस्य मध्ये च पूर्ववद्विन्यसेत्सुधीः ।
ब्रह्माणं दक्षिणे पत्रे वामपत्रे च केशवम् ।।४२।।
तत्तत्कुम्भान्क्रमान्न्यस्य तैः क्रमादभिषेचयेत् ।
कुम्भैः प्रणवमुच्चार्य शेषैस्तु कलशैस्ततः ।।४३।।
अभिषिच्य'

[मन्त्रन्यासः]

'तथा [४१]शूले मूलम[न्त्रं तु विन्यसेत्] ।
ईशविष्णुविरिञ्चानां [मन्त्रं पत्रेषु] विन्यसेत् ।।४४।।

आचार्यपूजनं कृत्वा वस्त्रहेमाङ्गुलीयकैः ।
ऋत्विजः पूजयेत्तत्र पर्यष्टिपरिचारकान् ।।'
(*सन्तानसंहितायाम्* २२.२७ उ० —३२ पू०);
'सुमुहूर्ते सुलग्ने तु तत्तन्मन्त्राणि संस्मरन् ।
मध्यपत्राधिपो रुद्रो दक्षिणे तु पितामहः ।।
वामपत्रे तथा विष्णुस्त्रिपत्राणां तु देवताः ।
वामा ज्येष्ठा च रौद्री च शूलमूले तु देवताः ।।
फलका स्कन्ददैवत्या कुम्भे तु वरुणः स्थितः ।
तदर्धं [दण्डार्धं ?] चाग्निदैवत्यं दण्डे चैव सरस्वती ।।
पीठे चैवमुमादेवी भूमिभागे वसुन्धरा ।
स्थापयेत्क्रमशो विद्वान्गन्धपुष्पाक्षतान्वितम् ।।
स्वनामाद्येन बीजेन कलशैरभिषेचयेत् ।
अभ्यर्च्य हृदयेनैव हविष्यं तु निवेदयेत् ।।
शूलसंस्थापनं प्रोक्तम्'
(*सुप्रभेदे* क्रियापादे ५१.१९ —२४ पू०)

[३७]दत्वाघोरास्त्रमुच्चरन् —इ

[३८]व्याहत्यन्तेषु —इ

[३९]सुचोदिना —इ

[४०]मध्ये कुम्भे —इ;

'शिवाख्यबीजमादाय मध्यपत्रे तु विन्यसेत् ।
ब्रह्मबीजं समादाय दक्षिणे पत्रके न्यसेत् ।।
विष्णुबीजं समादाय वामपत्रे तु विन्यसेत् ।
पार्वतीबीजमादाय पालिकायां तु विन्यसेत् ।।
स्कन्दबीजं समादाय कुम्भमध्ये तु विन्यसेत् ।
विघ्नेशबीजमादाय पिण्डिकायां च विन्यसेत् ।।
सूर्यबीजं समुद्धृत्य दण्डमध्ये तु विन्यसेत् ।
लक्ष्मीबीजं समादाय पद्मे पूर्वे तु विन्यसेत् ।।
वागीशबीजमादाय दक्षिणे तु दले न्यसेत् ।
वसुधाबीजमादाय पश्चिमे तु दले न्यसेत् ।।
दुर्गाया बीजमादाय उत्तरे तु दले न्यसेत् ।
तद्घटस्थोदकैश्चैव त्रिशूलं स्नापयेद्धृदा ।।
गन्धपुष्पादिभिस्तत्र ईशानेनैव पूजयेत् ।
स्नपनं कारयेदन्ते यथावित्तानुसारतः ।।
गन्धं पुष्पं च धूपं च दीपं नैवेद्यकादिभिः ।
तत्तदीशानमन्त्रेण प्रतिसंधिषु पूजयेत् ।।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।'
(*पूर्वकारणे* ६९.६३ —७१ पू०)

[४१]शूलं —इ

पालि[कायां] न्यसेद्गौर्याः[४२] [४३]कुम्भे हस्तिमुखस्य च ।
दण्डाग्रे षण्मुखस्यापि दण्डमध्ये रवेस्तथा ॥४५॥
[दण्डमूले] शशाङ्कस्य चण्डस्य तदधःक्रमात् ।
[४४]पीठादिषु दिगीशानां दलेष्वथ च [४५]विन्यसेत् ॥४६॥
तत्तद्[देवयुतं शूलं ब्रह्म]पञ्चकमुच्चरन् ।
गन्धाम्बुनाभिषिच्याथ गन्धपुष्पादिभिर्यजेत् ॥४७॥
तस्यापि[४६] सर्वदेवा[नां][४७] हविर्दद्यात्क्रमेण तु ।
त्रिमूर्तीनां ततो दद्यात्ताम्बूलं मुखवासयुक् ॥४८॥
तत्तद्धृदयमन्त्रेण; ततश्चाभरणादिभिः ।
[पुष्पैः शूलमलङ्कृत्य] सर्वदेवमयं ततः ॥४९॥
ग्रामादावुत्सवं कुर्यात्सर्वातोद्यसमन्वितम् ।
[४८]अचलस्य प्रतिष्ठायां रत्नन्यासं च कारयेत् ॥५०॥

[दशायुधानामन्येषामायुधानां च प्रतिष्ठाविधिः]

[४९]वज्रादीनामथान्येषामायुधानां जनार्दन ।
स्वर्णादिनिर्मितानां तु [५०]प्रतिष्ठा वक्ष्यतेऽधुना ॥५१॥

---

[४२]अत्र 'मन्त्रं' इति पदमध्याहृत्य व्याख्येयम् ।

[४३]कुम्भे=शूलावयवकुम्भे इत्यर्थः ।

[४४]पिष्टैस्सु . . . दिगीशाना—इ

[४५]'४५, ४६' श्लोकयोर्विद्यमानानां हस्तिमुख, षण्मुख, रवि, शशाङ्क, चण्ड, दिगीशानां षण्णां षष्ठ्यन्तानां पदानामनन्तरं 'मन्त्रं' इति पदमध्याहृत्य विन्यसेत् इत्यत्रान्वयः कर्तव्यः ।

[४६]अपिशब्दो भिन्नक्रमः

[४७]सर्वदेवा . . . तस्यापि—इ

[४८]'अचलस्थापनं चेत्तु रत्नन्यासं तु कारयेत्'
(*उत्तरकामिके* ६९.४७ उ०)

[४९]'दशायुधप्रतिष्ठां तु वक्ष्ये लक्षणपूर्वकम् ।
वज्रं शक्तिं च दण्डं च खड्गं पाशं तथाङ्कुशम् ॥
गदा त्रिशूलं पद्मं च चक्रं चेति दशायुधम् ।
एकवक्त्रं द्विनेत्रं च करण्डमकुटान्वितम् ॥
कृताञ्जलिपुटोपेतं द्विबाहुं सर्वलक्षणम् ।
प्रतिमालक्षणप्रोक्तमानेनैव समाचरेत् ॥
जाये शक्तिगदे ज्ञेये चक्रपद्मे नपुंसके ।
शेषाः पुमांसो विज्ञेयास्त्वष्टतालविनिर्मिताः ॥
स्वमूर्ध्न्यायुधसंयुक्ता[:] स्वकीयादेकतालतः ।
तालाष्टांशविवृद्ध्या तु चतुस्तालावसानकम् ॥
कल्पयेदायुधं विद्वानस्त्रवर्गोक्तमार्गतः ।
तेषां मूर्ध्न्यायुधं कार्यमथवा मकुटोपरि ॥
हस्तयोरन्तरे वापि वामेतरकरेऽपि वा ।
परित्यज्याङ्कुशं यद्वा तत्स्थाने कल्पयेद्ध्वजम् ॥
ततः प्रतिष्ठा कर्तव्या तद्विधानमिहोच्यते ।
रत्नन्यासं पुरा कुर्यान्नेत्रमोक्षणकं ततः ॥
तर्पणं नेत्रयोर्धान्यदर्शनं मधुसर्पिषा ।
गव्याभिषेचितं शस्त्रमलङ्कृत्य नयेत्ततः ॥
ग्रामप्रदक्षिणं नीत्वा शाययेज्जलमध्यमे ।
प्रागुक्तमण्डपं कृत्वा चतुर्द्वारसमन्वितम् ॥
एकवेदिसमोपेतं पृथग्वेदियुतं तु वा ।
मण्डपं दशसंख्यातं प्रपाकुण्डसमन्वितम् ॥
पूर्वस्मिन्स्वस्वदिक्कुण्डसंस्थानैरन्वितं यथा ।
एकस्मिन्मण्डपे त्वष्टदिक्कुण्डं परितो भवेत् ॥
इन्द्रेशानान्तरे वृत्तं पितृवारुणमध्यमे ।
वृत्तकुण्डं भवेदेवं कुण्डानि दशसंख्यया ॥
ब्राह्मणान्भोजयेद्वास्तुहोमं प्रत्येकमेव वा ।
पुण्याहप्रोक्षणान्ते तु स्थण्डिलं लक्षणान्वितम् ॥
शयनं कल्पयेद्वस्त्रैरनेकैरेकतोऽपि वा ।

[वेद्यां तु स्थण्डिलं कृ]त्वा पद्ममालिख्य तत्र वै ।
मध्यमे कर्णिकायां तु [51]विन्यसेत्कुम्भ[मेककम्] ।।५२।।
ससूत्रं वस्त्रसंयुक्तं गन्धोदपरिपूरितम् ।
सहिरण्यं सकूर्चं च पिधानेन पिधाय च ।।५३।।
वज्रादिपद्म[52]पर्यन्तान्यायुधानि दश क्रमात् ।
एवं [53]स्थाने तु विन्यस्य [प्रागादि] परितः क्रमात् ।।५४।।
क्षालितानि ततः पश्चाद्गन्धेन प्रोक्षितानि च ।
अस्त्रादीन्यथ सर्वाणि स्वस्वमन्त्रेण पूजयेत् ।।५५।।
[54]तत्तत्कुम्भेषु पुष्पाद्यैर्विधिवच्च यथाक्रमात् ।
[55]ततो होमं तु कुर्वीत प्राच्यां दिशि समाहितः ।।५६।।
कुण्डे वा स्थण्डिले वापि विधिनाग्निं निवेश्य च ।
समिदाज्यचरूणां तु वज्र[ादिषु] दशस्वपि ।।५७।।
[विधानेना]हुतीनां तु प्रतिद्रव्यं [56]दशार्धकम् ।
हुत्वाघोरास्त्रमन्त्रेण दत्त्वा पूर्णाहुतिं ततः ।।५८।
[57]कुम्भस्थकूर्चतोयेन मन्त्रान्विन्यस्य तेषु च ।[58]
[59]सर्वाण्[यस्त्राणि वै तत्त]त्कुम्भेनैवाभिषेचयेत् ।।५९।।
एवमस्त्राणि सर्वाणि यः सम्यक्स्थापयेन्नरः[60] ।
[61]विरोधिनः सर्वशत्रूञ्जित्वान्ते गणपो भवेत् ।।६०।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] [62]त्रिशूलादिस्थापनविधिः
[षष्टितमः] पटलः ।

आसनं प्रणवं कृत्वा दर्भैः पुष्पैः परिस्तरेत् ।।
जलानीतं च सुस्नातं पूजितं कृतकौतुकम् ।
शयने शाययेद्बिम्बं प्रदक्षिणशिरोऽन्वितम् ।।
वस्त्रैराच्छादयेत्सर्वान्'
(*उत्तरकामिके* , ६८.१ – १७ पू०)

[50]प्रो . . . ते वक्ष्यते – इ

[51] 'कुम्भान्संस्थापयेद्गुरुः ।
परितोऽष्टघटान्वापि कलशान्प्राग्दिगादितः ।।
स्वस्ववर्णैश्च मूलाणुं ब्रह्माण्यङ्गानि कल्पयेत् ।
मध्यकुम्भे च मूलाणुं दिक्षु ब्रह्माणि पूजयेत् ।।
विदिक्ष्वङ्गानि संपूज्य व्याप्तिं पुरुषगोचराम् ।
स्मृत्वा'
(*उत्तरकामिके* ६८.१७ – १९ पू०)

[52]पर्यन्तानायुधानि – इ

[53]स्थानं तु – इ

[54]तत्कुम्भैर्जलपुष्पा . . . . . . यत् । – इ

[55]'होमं स्वमन्त्रैश्च समिदाज्यतिलान्वितम् ।
हविषा पूर्णया युक्तं स्वाग्नौ सद्धोममाचरेत् ।।
पलाशोदुम्बराश्वत्थवटा दिक्षु विदिक्षु च ।
शमीखदिरमायूरश्रीवृक्षाः संप्रकीर्तिताः ।।
पलाशो ब्रह्मणो विष्णोः श्रीवृक्षः समिधो मताः ।।
प्रातः पूर्णाहुतिं दत्त्वा मन्त्रन्यासं समारभेत् ।
संपूज्य गन्धपुष्पाद्यैर्नैवेद्यसहितं यथा ।।
स्नपनं कारयेन्नो वा तद्वदुत्सव एव हि ।
एवं यः कारयेन्मर्त्यः सर्वारिष्टैर्विमुच्यते' ।।
(*उत्तरकामिके* ६८.१९ उ० – २३)

[56]दशाद्युत – इ

[57]कुम्भान् सकूर्चतोयेन – इ

[58]तेषु=बिम्बेषु इत्यर्थो व्याख्येयः ।

[59]सर्वाणि कुम्भ – इ

[60]स्थाप्यते नरः – इ

[61]सर्वशत्रून् विरोधींश्च जित्वान्ते – इ

[62]शूलस्थापनपटलः – इ

[एकषष्टितमः पटलः]

[विमानप्रतिष्ठाविधिः[1]]

अथ वक्ष्ये विमानस्य प्रतिष्ठां तामिमां शृणु ।
[2]ये देवाः [3]स्युर्विमानस्थास्तेषां तु क्रियतेऽधुना ।।१।।
सा विमान[4]प्रतिष्ठा स्यात्तद्विधानमथोच्यते ।

[5][मण्डपकल्पनं तत्र वेदीकुण्डकल्पनं च]

प्रासादस्य चतुर्दिक्षु [6]शांकरे वापि मण्डपान् ।।२।।
सप्तपञ्चत्रिभिर्हस्तैः कुर्याच्छ्रेष्ठादिकांस्तु तान् ।
विकारचरणोपेतांश्चतुर्गात्रयुतांस्तु वा ।।३।।
पङ्क्तित्रयसमोपेतांस्तन्मध्ये वेदिका भवेत् ।
सा विकाराङ्गुलोत्सेधा दर्पणोदरसन्निभा ।।४।।
नवभागैक[7]भागा च मण्डपेषु पृथक् पृथक् ।
[8]पूर्वे तु चतुरश्राणि चतुर्दिक्षु प्रकल्पयेत् ।।५।।
दक्षिणे मण्डपे चापि चतुर्दिक्षु समन्ततः ।
[चापाकारा]णि कुर्वीत वृत्तकुण्डानि पश्चिमे ।।६।।

---

[1]अयं पटलः 'इ' मातृकायां परं दृश्यते। एतद्विषये *पूर्वकामिके* ६९; *पूर्वकारणे* ७०; *उत्तरकारणे* ९०; *रौरवोत्तरे* ५; वीरे (टि०-२९) ६८; *संतानसंहितायां* (टि०-६७) २३; सहस्रे (टि०-३३) ४६; पटला द्रष्टव्याः। स्वायम्भुवे १३७—१४२ पृष्ठानि च द्रष्टव्यानि। १०—४९पू० श्लोका जीर्णोद्धार-दशकव्याख्याने 'अजिते' इति निर्दिश्य समुद्धृताः।

[2]यो देवाः—इ

[3]स्युर्विमानास्त्रमेषां—इ

[4]प्रतिष्ठां तत् तद्विधान—इ

[5]'प्रासादस्याग्रतः कुर्यान्मण्डपं वेदिकान्वितम्।
नवकुण्डसमायुक्तं पञ्चकुण्डयुतं तु वा॥
(*पूर्वकामिके* ६९.२);
'प्रासादस्य चतुर्दिक्षु मण्डपं तु प्रकल्पयेत्।
नवहस्ताष्टहस्तं वा सप्तहस्तमथापि वा॥
कलास्तम्भसमायुक्तं द्वादशस्तम्भमेव वा।
मण्टपस्य त्रिभागैकमध्यभागैकवेदिका॥
रत्निमात्रसमुत्सेधा दर्पणोदरसन्निभा।
कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात्॥
युगाश्रं योनिचापं च त्र्यश्रं वृत्तमथाब्जकम्।
सप्ताश्रं चैव वस्वश्रमिन्द्रादिषु प्रकल्पयेत्॥
प्राक्कुण्डवेदिकामध्ये वृत्तं प्राधानिकं कुरु।
हर्म्याग्रे मण्टपं ह्येवं कारयेल्लक्षणैः सह॥
अन्येषां मण्टपे ह्येवं कुर्यात्सर्वं युगाश्रकम्।
नवाग्न्यायतनं वापि पञ्चाग्न्यायतनं तु वा॥
पञ्चाग्न्यायतनं चेत्तु विदिशासु विवर्जयेत्।
प्रासादस्याग्रभागे तु मण्टपं स्कन्दमण्टपम्॥
हर्म्यस्यैवापरे भागे मण्टपं विष्णुमण्टपम्।
सौम्येऽब्जमण्टपं प्रोक्तं दक्षिणे त्वीशमण्टपम्॥'
(*पूर्वकारणे* ७०.६ उ०—१४ पू०);
एतद्विषये *रौरवोत्तरे* ५.१—६ श्लोका द्रष्टव्याः।

[6]शंकरे वापि—इ

[7]भागश्च—इ

[8]पूर्वे=पूर्वदिङ्मण्डपे इत्यर्थः।

षडश्राण्युत्तरे चापि[९] तथा कुण्डानि कल्पयेत् ।
सर्वेषां शांकरे देशे [प्रधानं] पद्मकुण्डकम् ।।७।।

[मण्डपसंस्कारस्तदलङ्कारश्च[१०]]

गोमयेनोपलिप्याथ भोजयित्वा द्विजांस्ततः ।
शुद्धिं कृत्वाथ पुण्याहं कृत्वा [११]सर्वान्यथाविधि ।।८।।
कुण्डवेदिसमा[१२]युक्तान्सर्वांस्तान्मण्डपांस्ततः ।
वितानाद्यैरलंकृत्य'

[वेदिकासु स्थण्डिलकल्पनं तत्र कुम्भस्थापनं च][१३]

'वेदिकासु प्रकल्पयेत् ।।९।।
[१४]स्थण्डिलं विधिवत्तेषु पद्ममालिख्य तेषु च ।
[१५]शक्तिचक्रं समभ्यर्च्य वेदिकादिक्षु[१६] पूर्ववत् ।।१०।।
देवान्सर्वान्समभ्यर्च्य कुम्भानथ समाहरेत् ।
द्रोणपूर्णान्घटान्पञ्च पूर्ववल्लक्षणान्वितान् ।।११।।
गन्धोदपूरितान्सर्वान् [१७]स्वर्णपुष्पसमन्वितान् ।

---

[९] अत्र अपिशब्देन शाङ्करे मण्डपेऽपि षडश्राणि कुण्डानि कर्तव्यानीति बोध्यत इति भाति ।

[१०] मण्डपं भण्डयित्वा तु कुर्याच्छिल्पिविसर्जनम् ।
ब्राह्मणान्भोजयेत्तत्र तद्दिनात्प्राग्दिनत्रये ।।
तदा प्रासाददेहस्थबेराणां दृष्टिमोचनम् ।
मध्वाज्यधान्यगोविप्रकन्यानां दर्शनं द्विजाः ।।
तत्तद्धृदयमन्त्रेण कृत्वा संप्रोक्ष्य गव्यतः ।
संपूज्य गन्धपुष्पाद्यैः प्रासादं प्रोक्षयेत्ततः ।।
जङ्घायुगलचूडान्तं तत्त्वतत्त्वेश्वरान्न्यसेत् ।
मूर्तिमूर्तीश्वरान्न्यस्त्वा बेरेष्वपि तथाचरेत् ।।
वस्त्राद्याच्छाद्य सर्वं तु पुष्पैर्दर्भैः परिस्तरेत् ।
मण्डपं संप्रविश्याथ पुण्याहं वाचयेत्ततः ।।
(*पूर्वकामिके* ६९.३ — ७);
अलङ्कृत्य वितानाद्यैर्मण्टपानि विशेषतः ।
भूसुरान्भोजयेत्पश्चान्मण्टपं प्रति बुद्धिमान् ।।
पश्चादुच्छिष्टमुद्वास्य गोमयेनोपलेपयेत् ।
विमानाभ्यन्तरे पश्चाद्वास्तुहोमं समाचरेत् ।।
पर्यग्निकरणं हर्म्ये कुर्यात्तेनैव वह्निना ।
(*पूर्वकारणे* ७०.१४ उ० — १६);
एतद्विषये *रौरवोत्तरे* ५.७, ८ पू० श्लोकौ द्रष्टव्यौ ।

[११] अत्र 'सर्वान्' इत्यस्य पदस्य सर्वसंस्कारानित्यर्थो व्याख्येयः ।

[१२] युक्ताः सर्वास्ता भण्डपां ततः — इ

[१३] पूर्वोक्तमण्डपे वेद्यां गोमयेनानुलेपयेत् ।
शालिना विकिरेत्तत्र भारद्वयेन संयुतम् ।।
शाल्यर्धतण्डुलान् न्यस्य तण्डुलार्धतिलान् न्यसेत् ।
पद्ममष्टदलं लिख्य दर्भैश्चैव परिस्तरेत् ।।
नवकुम्भान् समादाय सूत्रेण परिवेष्टयेत् ।
शुद्धोदकेन संपूर्य वस्त्रकूर्चसमन्वितान् ।।
प्रधानकलशं विप्र मध्यमे स्थापयेत्क्रमात् ।'
(*वीरे* (टि०-२९) ६८.२२ — २५ पू०);
एतद्विषये *रौरवोत्तरे* ५.८ — १६पू० श्लोकास्तदीय-टिप्पणी च द्रष्टव्याः ।

[१४] स्थण्डिले — इ

[१५] शक्तिचक्रम् = शक्तिसमूहमित्यर्थः ।

[१६] वेदिकादिषु — इ

[१७] स्वर्णपुष्पम् = *रौरवे* क्रियापादे ४३.१३, १४ पू०; *अजिते* क्रियापादे २२.६५ — ६८ पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

सकूर्चान्सापिधानांश्च नववस्त्रेण वेष्टितान् ।।१२।।
पञ्चसंस्थापयेन्मध्ये वेदिकासु समाहितः ।
प्रत्येकमष्टौ परित[18]स्तदर्धपरिमाणकान् ।।१३।।
तादृशानथ कुम्भांस्तु विन्यसेद्दिग्दलेषु वा ।
एवं विन्यस्य कुम्भांस्तु'

[प्रासादमध्ये पुण्याहप्रोक्षणं पञ्चगव्यप्रोक्षणं च]

'पुण्याहं वाचयेत्ततः ।।१४।।
ततः प्रासादमध्ये तु प्रोक्षयित्वा तदम्भसा ।
पञ्चगव्येन संप्रोक्ष्य ब्रह्मपञ्चकमुच्चरन् ।।१५।।

[कौतुकबन्धनम्]

पुण्याहं वाचयित्वान्ते कौतुकं बन्धयेत्सुधीः ।
स्थूप्यां पूर्वं शिवास्त्रेण ततश्चाग्रस्थितस्य तु ।।१६।।
देवस्य तद्धृदा बद्ध्वा ततोऽन्येषामपि क्रमात् ।
गलस्थितानां देवानां प्रादक्षिण्यक्रमेण तु ।।१७।।
स्वस्वहेतिं समुच्चार्य वृषाणामपि बन्धयेत् ।
दक्षिणे शृङ्गमूले तु'

[स्थूप्यादीनां वस्त्रादिवेष्टनम्[19]]

'ततः सर्वान्नवाम्बरैः ।।१८।।
स्थूप्यादीन्वेष्टयेन्मन्त्री तत्तत्कवचमुच्चरन् ।
सर्वेषु कुशकूर्चं तु मालया सह बन्धयेत् ।।१९।।
प्रणवं सुसमुच्चार्य ततः शिखरमंशुकैः ।
कण्ठं च प्रस्तरं पादमधिष्ठानं तथैव च ।।२०।।

---

[18] स्तदर्थं परि—इ

[19] 'प्रासादं तन्तुनावेष्ट्य दर्भमालाभिरावृतम् ।
स्थूप्याद्युपानपर्यन्तं नववस्त्रेण वेष्टयेत् ।।
दुकूलपट्टदेवाङ्गैः कार्पासैश्च विभूषयेत् ।
द्वारपूजादिकं सर्वं स्थापनक्रमवत्सुधीः ।।'
(*पूर्वकारणे* ७०.१७, १८);
'आचार्यश्च शुचिर्भूत्वा नववस्त्रेण वेष्टितः ।
सोष्णीषः सोत्तरीयश्च गन्धद्रव्येण लेपयेत् ।।
प्रासादं दर्भमालाभिर्वेष्टयेत्तु विशेषतः ।
पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत् ।।
वास्तुदेवबलिं दद्यात्पूर्वोक्तविधिना सह ।
प्रासादं नववस्त्रेण वेष्टयेद्धृदयेन तु ।।
लम्बयेन्नववस्त्रेण प्रासादेन तु मन्त्रतः ।
दर्भमाल्येन पुष्पेण वेष्टयेत्स्थूपिमेव च ।।'
(*वीरे* ६८.१४ उ० —१८ पू०)

वस्त्रैरावेष्ट्य मन्त्रज्ञः सद्यादि ब्रह्मभिः क्रमात् ।

[पञ्चगव्यप्रोक्षणम्]

ततश्चान्तः प्रविश्यैवमभिषिच्य समाहितः ॥२१॥
पञ्चगव्येन सर्वत्र प्रोक्षयेदस्त्रमन्त्रतः[२०] ।

[देवपूजनम्]

ततः पाद्यादिभिर्देवं हविरन्तैः क्रमाद्यजेत् ॥२२॥

[शांकरादिमण्टपपूजा]

ततो बहिर्विनिष्क्रम्य शांकरे मण्डपे गुरुः ।
होतृभिः सह मन्त्रज्ञैश्चतुर्भिः सह मण्टपम् ॥२३॥
शिवास्त्रेण तु संप्रोक्ष्य कृतविद्यातनुर्गुरुः ।
[२१]पूजयेत्कुम्भगान्देवांस्तद्विधानमथोच्यते ॥२४॥
स्कन्दस्य मण्टपे वेद्यां शिवकुम्भं तु मध्यमे ।
विन्यस्य तस्य मध्ये तु पञ्चरत्नं विशेषतः ॥२५॥
ध्यात्वा सदाशिवं तस्मिञ्शिवकुम्भे तु विन्यसेत् ।
वर्धनीं तस्य वामे तु तस्यां हैमं विनिक्षिपेत् ॥२६॥
ध्यात्वा मनोन्मनीं तस्यां तन्मूलेन तु विन्यसेत् ।
स्कन्दकुम्भं न्यसेद्धीमाञ्शिवकुम्भस्य दक्षिणे ॥२७॥
पञ्चरत्नं क्षिपेत्तस्मिन्ध्यात्वा स्कन्दस्य रूपकम् ।
तन्मूलं तु न्यसेत्तस्मिन्गन्धपुष्पादिकं क्रमात् ॥२८॥
तत्तदीशानमन्त्रैश्च पूजयेत्तु विशेषतः ।
लिङ्गमुद्रां च पद्माख्यां शक्तिमुद्रां प्रदर्शयेत् ॥२९॥
अभितस्तु घटानष्टौ पूर्वाशादिषु विन्यसेत् ।
कुमारं षण्मुखं चैव सुब्रह्मण्यं सुराष्ट्रकम् ॥३०॥
सेनापतिं सुरेशं च कार्तिकेयं गुहं क्रमात् ।
पूर्वादिषु घटेष्वेतान्न्यसेत्तद्बीजमन्त्रकैः ॥३१॥
तत्तदीशानमन्त्रेण गन्धपुष्पादिभिर्यजेत् ।
ईशस्य मण्टपे वेद्यां स्थण्डिलोपरि मध्यमे ॥३२॥
प्रधानकुम्भं न्यस्त्वा तु दक्षिणामूर्तिरूपकम् ।
ध्यात्वा महेशबीजं तु विन्यसेद्घटमध्यमे ॥३३॥

---

[२०] प्रोक्षयेद्दर्भमस्त्रतः —इ
[२१] २४ श्लोकस्योत्तरार्धप्रभृति ४८ श्लोकस्य पूर्वार्धपर्यन्तो भागः जीर्णोद्धारदशकव्याख्यायाम् अजितागमश्लोकत्वेनोद्धृतश्लोकैः पूरितः ।

परितोऽष्टघटेष्वेतान्भवादीन्पूर्वतो यजेत् ।
भवं शर्वं तथैशानं पशुपतिं रुद्रमेव च ।।३४।।
उग्रं भीमं महादेवं यजेत्पूर्वादितः क्रमात् ।
विष्णुमण्टपवेद्यां तु स्थण्डिलोपरि मध्यमे ।।३५।।
प्रधानकुम्भं न्यस्त्वा तु तन्मध्ये विष्णुरूपकम् ।
ध्यात्वा बीजं च विन्यस्य गन्धादिभिर्यजेद्धृदा ।।३६।।
संकर्षणश्च प्रद्युम्नो वासुदेवोऽनिरुद्धकः ।
रामश्चैवाच्युतश्चैव नारसिंहश्च वामनः ।।३७।।
क्रमेणैतांस्तथा सर्वानष्टकुम्भेषु पूजयेत् ।
ब्रह्ममण्टपके वेद्यां स्थण्डिलोपरि मध्यमे ।।३८।।
प्रधानकुम्भं विन्यस्य तन्मध्ये ब्रह्मरूपकम् ।
ध्यात्वा बीजं तु विन्यस्य पूजयेत्पुरुषेण तु ।।३९।।
त्रयीमयं च मूर्तिं च पद्माक्षं पद्मयोनिकम् ।
चतुर्मुखं च धातारं पितामहमजं तथा ।।४०।।
तत्तन्मन्त्रं क्रमान्न्यस्त्वा ईशानेनाभितो यजेत् ।
एवं संपूज्य देवांस्तान्गन्धाद्यैः स्वस्वनामभिः ।।४१।।
ऋगाद्यध्ययनं कुर्याच्चतुर्दिक्षु क्रमेण तु ।
देशिको मूर्तिपैः सार्धं होमकर्म समारभेत् ।।४२।।

[होमः] [२२]

चत्वारस्तु प्रधानास्ते होतारो नैव पुत्रकाः ।

---

[२२] कृत्वा तथाग्निसंस्कारमग्निकार्योक्तमार्गतः ।
प्रधानकुण्डे हर्म्यस्य शिवाङ्गब्रह्मशम्बरैः ।।
पूर्वस्मिन्पूर्वदिग्देवमन्त्रैर्दक्षे तु विन्यसेत् ।
पश्चिमे वरुणस्थैश्च सोमे सोमदिशि स्थितैः ।।
विदिक्षु हृदयाद्यैश्च जुहुयाच्छतसंख्यया ।
पञ्चहोमाङ्गहीनैश्च मन्त्रैर्होमं समाचरेत् ।।
समिदाज्यचरूँल्लाजतिलसस्येन्द्रवैणवैः ।
उदुम्बरवटाश्वत्थन्यग्रोधा दिक्षु शंसिताः ।।
शम्यपामार्गखदिरबिल्वाः कोणेषु शंसिताः ।
प्रधानस्य पलाशः स्यादेवं ज्ञात्वा समाचरेत् ।।
तत्त्वतत्त्वेश्वराद्यैश्च हुत्वा पूर्णां समाचरेत् ।'
(*पूर्वकामिके* ६९.११ उ० —१६);
'ऋगाद्यध्ययनं कुर्याच्चतुर्दिक्षु क्रमेण तु ।
देशिको मूर्तिपैः सार्धं होमकर्म समारभेत् ।।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
पलाशखदिराश्वत्थन्यग्रोधं प्लक्ष एव च ।।
शमीबिल्वमपामार्गमौदुम्बरं क्रमेण तु ।
इन्द्रादीनां च कुण्डानां समिधः सम्प्रकीर्तिताः ।।
समिदाज्यचरूँल्लाजान्सर्षपं च यवं तिलान् ।
आढकं शालिमाषं च निष्पावं च क्रमेण तु ।।
तत्तद्ब्रह्मषडङ्गैश्च समिदादीनि होमयेत् ।
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ।।
द्रव्यान्ते व्याहृतिं हुत्वा भवनं स्पर्शयेत्क्रमात् ।
द्रव्यं प्रति च हुत्वा तु तत्तदीशासु [तत्तद्दिशासु ?] वर्मणा ।।
स्पृष्ट्वाधिष्ठानभागं तु व्याहृतिं जुहुयात्ततः ।
तेषां स्वनाममन्त्रेण जुहुयाच्छतसंख्यया ।।'
एवं जागरणं रात्रौ'
(*पूर्वकारणे* ७०.४४ उ० —५१);
ततो होमं प्रकुर्वीत पलाशसमिधा सह ।

मण्टपं प्रति चत्वारस्तैः तैः पूजां समारभेत् ।।४३।।
गलस्थितांस्तु तान् देवान् मध्यकुम्भेषु योजयेत् ।
अग्रेऽन्येषु च कुम्भेषु प्रागादिषु यथाक्रमम् ।।४४।।
ततः प्रधानकुण्डेषु प्रधानघटसंस्थितान् ।
देवानभ्यर्च्य सर्वत्र होमयेत्समिदादिभिः ।।४५।।
प्लक्षोदुम्बरकाश्वत्थवटाः पूर्वादितः क्रमात् ।
पलाशस्तु प्रधाने स्यात् सर्वत्र समिदुच्यते ।।४६।।
होमकालेषु सर्वेषु मण्टपेषु ऋगादिभिः ।
चतुर्भिश्च चतुर्दिक्षु वेदैरध्ययनं भवेत् ।।४७।।
सर्वत्र शांकरे देशे भवेदस्त्रजपस्तदा ।
गुरुर्वृषेन्द्रमूलाङ्गैः प्रत्येकं तु शताहुतिः ।।४८।।
आज्येन होमयेदन्ते विद्याङ्गैश्च ततो गुरुः[३३] **।**
[ग्रन्थपातः]

इत्यजिताख्ये महातन्त्रे [क्रियापादे] विमानस्थापनविधिः
[एकषष्टितमः] पटलः।

समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ।।
वेणुं माषं च मुद्गं च शिम्बं चैकादशं युतम् ।
ईशानादीनि सद्यान्तं हृदयास्त्रान्तमेव च ।।
अष्टोत्तरशतं वापि पञ्चाशद्वापि होमयेत् ।
विमानबीजं सर्वेषु हुत्वा चैव शताहुतिः ।।
(*वीरे* ६८.३२—३४);

[३३]होमानन्तरं विद्यमानः प्रातःकरणीयविधिरागमान्तरतो लिख्यते :–
'प्रभाते विमले पूज्य आचार्यः स्नानमाचरेत् ।
मन्त्रन्यासोक्तमार्गेण न्यासं कृत्वा विशेषतः ।।
सृष्टिं स्थितिं च संहारं हृदयादीनि विन्यसेत् ।
ततो वासनहोमं [ततोऽवसानहोमं ?] च कर्तव्यं देशिकोत्तम ।।
समिदाज्यचरूणां तु प्रासादेन शताहुतिः ।
विमानबीजसंयुक्तं पञ्चविंशतिरुच्यते ।।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् ।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ।।
चित्तादींश्च जयादींश्च राष्ट्रभृच्चैव होमयेत् ।
हुत्वान्ते तु यदस्येति पूर्णाहुतिमथाचरेत् ।।
आचार्यदक्षिणां दद्यात्पञ्चाङ्गभूषणैर्युतम् ।
शिरसोपरि विप्रेन्द्र कुम्भमुद्वाहयेत्ततः ।।
विमानप्रदक्षिणं कुर्यात्प्रासादस्योपरि स्थितः ।
विमानमूलसंयुक्तं व्योमव्यापि समुच्चरन् ।।
पञ्चब्रह्मषडङ्गेन स्नापयेत्कुम्भमेव च ।
पूर्वादीशानपर्यन्तं स्नापयेत्स्वस्वमन्त्रतः ।।
दिशामूर्तिं च विप्रेन्द्र स्वस्वमन्त्रेण स्नापयेत् ।
गन्धपुष्पादिनाभ्यर्च्य हविर्दद्याद्विशेषतः ।।
ब्राह्मणान्भोजयेत्तत्र शिवभक्तांश्च भोजयेत् ।
सप्तकन्याश्च विप्रेन्द्र वस्त्रादीनि च दापयेत् ।।
विमानस्थापनं प्रोक्तम्'
(*वीरे* ६८.३५—४५ पू०);
होमविषये संप्रोक्षणविषये च *रौरवोत्तरे* १८—३० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[द्विषष्टितमः पटलः]

[गोलकादिस्थापनविधिः[1]]

[ग्रन्थपातः]

[2] [होमः]

पृथक् पृथक् ।
मूलमन्त्रेण हुत्वाथ परिषिच्य च [पूर्ववत्] ॥१॥
उद्वास्योद्धृत्य पश्चात्तु विन्यसेत्पूर्ववत्क्रमात् ।

[कुम्भस्थापनं कुम्भाभिषेकः पूजनं च]

तयोरग्रे घटान्सम्यक्स्थाप्य पूर्ववदेव तु ॥२॥
पूजयित्वा न्यसेन्मन्त्रं पूर्ववच्चाभिषेचयेत् ।
लोकपालात्मकैः पश्चादभिषेको[3] घटैर्भवेत् ॥३॥
ततश्च धर्मयज्ञाभ्यां हविर्दद्यात्स्वनामतः ।

[देवाग्रे पादुकयोः स्थापनम्]

सर्वातोद्यसमायुक्तं पादुके स्थण्डिलोपरि ॥४॥
न्यस्योद्धृत्य वहन्मूर्ध्ना धाम्नि कृत्वा प्रदक्षिणम् ।
अन्तः[4]प्रविश्य देवाग्रे [5]विन्यसेत्ते समाहितः ॥५॥

---

[1] अयं पटलः 'इ' मातृकायां परं दृश्यते। अस्य पटलस्य पुष्पिकायां 'गोलकादिस्थापनपटलः' इति दृश्यमानत्वात् पादुकास्थापनात्पूर्वं गोलकास्थापनविषयको ग्रन्थो भवितव्यः। स लुप्त इति भाति; अजिते क्रियापादे द्वाविंशे पटले गोलकादिभूषणानां लक्षणमुक्तम्।

[2] 'ततो होमं प्रकर्तव्यं पूर्वोक्तविधिना सह।
होमान्ते पञ्चगव्येन प्रोक्षयेत्सद्यमन्त्रतः ॥
सुमुहूर्ते सुलग्ने च वर्धनीं विन्यसेत्ततः।
पूर्वादीशानपर्यन्तं स्नापयेन्मूलमन्त्रतः ॥
गन्धपुष्पादिना पूज्य विन्यसेच्छिवसन्निधौ।
हविर्निवेदयेत्पश्चात्ताम्बूलं दापयेत्ततः ॥
आचार्यं पूजयेत्पूर्वं पर्यष्टिपरिचारकान्।
भोजयेच्छिवभक्तांश्च सवस्त्रांश्च सदक्षिणान् ॥
नित्योत्सवस्य काले तु प्रदक्षिणमथाचरेत्।
अग्रतः पृष्ठतो वापि व्रजेत्संपत्कराय च ॥
ब्रह्मचारी वहित्वा तु पादुकावर्चयेत्ततः।
पादुकस्योपरिष्टात्तु कल्पयेदस्त्रराजकम् ॥
एवं यः कुरुते मर्त्यः शिवलोकमवाप्नुयात्।
पादुकास्थापनं प्रोक्तम्'
(*वीरे* ६६.५७ उ० —६४ पू०)

[3] पश्चादभिषेकं —इ

[4] प्रवेश्य —इ

[5] विन्यसेत्तौ —इ

[1]'पादुकास्थापनं प्रोक्तम्'

[2][मकुटादिप्रोक्षणम्]

'प्रोक्षणं मकुटादिषु ।
हेमरत्नादिसिद्धेषु प्रोच्यते देवसत्तम ।।६।।

'प्रोक्षणं विधिना कुरु ।
मण्टपस्य तु मध्ये तु स्थण्डिलं शालिना कुरु ।।
परिस्तीर्य ततो दर्भैर्हृदा गन्धादिनार्चयेत् ।
नववस्त्रमथास्तीर्य पञ्चगव्यैस्तु पादुकम् ।।
क्षालयेदष्टमृद्भिस्तु शुद्धतोयेन सेचयेत् ।
वस्त्रोपरि न्यसेद्धीमान्पादुकं वर्मणा ततः ।।
वस्त्रेणोपरि सञ्छाद्य स्थापयेत्कलशाष्टकान् ।
तन्मध्ये पादुकाग्रे तु वृषकुम्भं निधापयेत् ।
सकूर्चान्सापिधानान्ससूत्रान्दिक्पालकात्मकान् ।।
मध्यमे वृषकुम्भे तु वृषबीजं न्यसेत्ततः ।
धेनुमुद्रां प्रदर्श्याथ हैमं तत्र विनिक्षिपेत् ।।
पुण्याहं वाचयेत्तत्र स्थण्डिलस्य घृतेन तु ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।।
समिदाज्यचरूँल्लाजांस्तिलान्सद्यादिमन्त्रतः ।
होमयेत्तु विशेषेण प्रत्येकं पञ्चविंशतिम् ।।
घृतेन वृषमन्त्रेण हुनेदष्टोत्तरं शतम् ।
प्रभाते सुमुहूर्ते तु मन्त्रन्यासमथाचरेत् ।।
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
स्विष्टमग्नेति मन्त्रेण होमं परिसमापयेत् ।।
आचार्यं पूजयेत्तत्र वस्त्रनिष्कादिभिः क्रमात् ।
वृषबीजं समादाय कुम्भात्तत्पादुकाद्वये ।।
तज्जलस्याभिषेकं तु कुम्भादादाय देशिकः ।
तत्पादुकस्य परितस्तत्तद्बीजानि विन्यसेत् ।।
तत्कुम्भस्थजलेनैव अभिषेच्य स्वबीजकैः ।
अर्चयेद्गन्धपुष्पाद्यैर्मुद्गान्नं तु निवेदयेत् ।।
सर्वालङ्कारसंयुक्तं प्रासादभ्रमणं कुरु ।
एवं कृत्वा तु विधिना अर्चयेत्प्रतिसन्धिषु ।।
पादुकास्थापनं प्रोक्तम्'
(*पूर्वकारणे* १८.३०५ उ० — ३१९ पू०);
'पूर्ववद्यागशालां च षोडशस्तम्भसंयुताम् ।
वेदिकां पूर्ववत्कल्प्य दशकुम्भं न्यसेत्ततः ।।
परिवारघटान्पूज्य तोरणान्मङ्गलान्यजेत् ।
नवकुण्डं प्रकल्प्याथ पञ्चकुण्डमथापि वा ।।
अथवा एककुण्डं वा पूर्वोक्तविधिनाचरेत् ।
कुम्भमूले वृषं पूज्य कुम्भे चैव सदाशिवम् ।।
पञ्चावरणमार्गेण पूजयित्वा विशेषतः ।
उक्तमन्त्रैर्हुनेदग्निं जलाधिवासनं तथा ।।
नयनोन्मीलनं चैव मध्ये पादुकयोश्चरेत् ।
रत्नन्यासं विना चैव शेषं पूर्ववदाचरेत् ।
न्यासकर्म समाराध्य घटस्नानं समाचरेत् ।।
महाहविर्निवेद्याथ ब्राह्मणान्पूजयेत्ततः ।
दक्षिणां दापयेत्पश्चान्नित्योत्सवमतः परम् ।।'
(*उत्तरकारणे*, ४३.४ उ० — १०);
'गोलकालक्षणं शृणु ।
अर्धाङ्गुलसमायामं पूजाभागसमायुतम् ।।
नाहं चैव परिग्राह्यं कुर्याद्धैमेन गोलकाम् ।
प्राग्वल्लक्षणमुद्धृत्य सूत्राग्रे सुषिरत्रयम् ।।
नानारत्नसमायुक्तं लिङ्गवत्कारयेत्ततः ।
गोलकालक्षणं प्रोक्तं पट्टलक्षणमुच्यते ।।
रुद्राक्षाङ्गुलमानेन पट्टतारं प्रकीर्तितम् ।
लिङ्गनाहं तु नाहं स्यात्पट्टं हैमेन कारयेत् ।।
पट्टलक्षणमेवं स्यात्पुष्पलक्षणमुच्यते ।
अग्न्यङ्गुलं तु विस्तारं मध्यमे कर्णिकायुतम् ।।
दलाष्टकसमायुक्तं सरत्नं काञ्चनेन तु ।
सुवर्णकुसुमं ह्येवं मकुटस्य विधिं शृणु ।।
कपर्दमकुटं चैव किरीटमकुटं तथा ।
करण्डमकुटं चैव केयूरमकुटं तथा ।।
रशनां कर्णपूरं च कुक्षिबन्धनमेव च ।
कटिसूत्रं नूपुरं च छन्नवीरं तथैव च ।।
कर्णमालां च यज्ञं च प्रतिमानां यथार्हकम् ।
नानारत्नसमायुक्तं सर्वं हैमेन कारयेत् ।।
धूपपात्रादिकान्सर्वान्मानाङ्गुलेन कारयेत् ।

देवा[ग्रे मण्डपं कृत्वा] गोमयेनोपलिप्य तु[८] ।
स्थण्डिलं विधिवत्कृत्वा मध्यमे विन्यसेत्ततः ॥७॥
प्रोक्षयेद्बहुरूपेण ततः संवत्सरात्मना ।
संस्पृशेन्मन्त्रवर्येण ततः प्राच्यां तु होमयेत् ॥८॥
सैकतस्थण्डिले[९] वह्निं विधिनाधाय [देशिकः] ।
समिदाज्यचरूणां तु प्रत्येकं तु शताहुतिः[१०] ॥९॥
[११]शिवास्त्रं क्षुरिकास्त्रं च तथा पाशुपतास्त्रकम् ।
[१२]मन्त्रत्रयं समुद्दिष्टं; वेदेषु [१३]संहितादिषु ॥१०॥
[विहितेन च] मन्त्रेण व्याहृत्यन्ते स्पृशेच्च तम् ।
पूर्णां सर्वात्मना हुत्वा होमकर्म समाप्य च ॥११॥
सर्वातोद्यसमायुक्तं दापयेत्तु शिवस्य तु ।
गायत्रि[या भूषणानि तथा सर्वा]त्मना [१४]यजेत् ॥१२॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे] गोलकादिस्थापनविधिः
[द्विषष्टितमः] पटलः ।

प्रोक्षयेत्पञ्चगव्येन पुरुषेण विशेषतः ॥
प्रासादस्याग्रतः कुर्यान्मण्टपं चतुरश्रकम् ।
संप्रोक्ष्य हृदयेनैव पात्रे चैव तु विन्यसेत् ॥
शिवाग्निं कारयेद्धीमान्पूर्ववद्विधिना सह ।
समिदाज्यचरूँश्चैव सद्यास्त्रहृदयैर्हुनेत् ॥
प्रत्येकं तु शतं हुत्वा हुत्वान्ते स्पर्शनं कुरु ।
आदावन्ते च कर्तव्यमग्निकार्योक्तमार्गतः ॥
हृदयेनैव संग्राह्यमीशानेन तु भूषयेत् ।
एवमाभरणं प्रोक्तम् ।'
(*पूर्वकारणे* १८.३२७ उ० — ३४१ पू०)

[८] लिप्यते — इ

[९] स्थण्डिलं — इ

[१०] शतसंख्याका आहुतिः शताहुतिः मध्यमपदलोपिसमासः ।

[११] 'शिवास्त्रमन्त्रोद्धारं च प्रवक्ष्ये शृणु षण्मुख ।
ओंकारं प्रथमं बीजं शिकारं च द्वितीयकम् ॥
तृतीयं बीजं वाकारं स्त्राकारं च चतुर्थकम् ।
पञ्चमं तु यकारं स्यात्षष्ठं फट्कारमेव च ॥
शिवास्त्रमन्त्रः षड्वर्णः सर्वसिद्धिप्रदायकः ।
शिवास्त्रमन्त्रः सम्प्रोक्तः; शृणु पाशुपतं मनुम् ॥
ओङ्कारं प्रथमं बीजं श्लीङ्कारं च द्वितीयकम् ।
पकारं स्यात्तृतीयं तु शुकारं च चतुर्थकम् ॥
हुङ्कारं पञ्चमं बीजं फट्कारं षष्ठबीजकम् ।
एष पाशुपताख्यस्तु मन्त्रः षड्वर्णको भवेत् ॥
प्रोक्तं पाशुपतास्त्रं हि'
'क्षुरिकास्त्रमथ शृणु ।
शिकारं प्रथमं बीजं छिकारं तु द्वितीयकम् ॥
क्षुकारः स्यात्तृतीयं च रिकारं च चतुर्थकम् ।
काकारं पञ्चमं बीजं स्त्राकारं षष्ठवर्णकम् ॥
यकारं सप्तमं बीजं फट्कारं चाष्टमं भवेत् ।
क्षुरिकास्त्रमनुश्चाष्टवर्णोऽयं स्याद्रसप्रदः ॥
क्षुरिकास्त्रमनुः प्रोक्तः'
(*वातुलशुद्धे* ८.४४ उ० — ४९; ५२ — ५५ पू०)

[१२] मन्त्रत्रयसमुद्दिष्टा — इ

[१३] समिदादिषु — इ

[१४] भवेत् — इ

[त्रिषष्टितमः पटलः[1]]

[भक्तप्रतिष्ठाविधिः[2]]

[अच्युत उवाच] —

निखिलागमसञ्चारिकारुण्यामृतसागर ।
प्रतिष्ठादिक्रमश्चैव [3]सम्यगुक्तस्त्वयानघ ।।१।।
ज्ञात्वा ततः प्रहृष्टोऽस्मि सन्देहः कश्चिदस्ति मे ।
[4]मद्भक्तिं कुरुते यस्तु सोऽहमेव न संशयः ।।२।।
वसेयं हृदये तस्य नित्यं सन्तुष्टमानसः ।
मदीयानां प्रतिष्ठादीन्ये कुर्वन्त्यतिभक्तितः ।।३।।
मदीयास्तेऽपि कथ्यन्ते ब्रह्माद्यैर्निखिलैः सुरैः ।
आगस्तेषां [5]प्रकुर्युर्ये [हृदा] वाचा तथैव च ।।४।।
तेषां प्रसादलेशोऽपि[6] जायते नात्र संशयः ।
तेषां प्रतिष्ठा कर्तव्या पूजनीयास्त एव मे[7] ।।५।।
एवमुक्तं त्वया [8]पूर्वं भक्तानामिष्टदायक ।
[9]कथं तर्हि प्रकर्तव्या [10]प्रतिष्ठा च [11]महात्मनाम् ।।६।।

[महेश्वर उवाच] —

साधु साधु महाप्राज्ञ यद्यदुक्तं त्वयाधुना ।
तत्सर्वं कथयाम्यद्य गोपनीयं जनार्दन ।।७।।

[12][शैवभेदाः सप्त]

अनादिशैवभेदेन शैवाः सप्तेत्युदाहृताः ।

---

[1] अयं पटलः 'ई' मातृकायां परं दृश्यते।

[2] भक्तप्रतिष्ठाविधिविषये *अचिन्त्यविश्वसादाख्ये* ५८, *उत्तरकामिके* ६६, *पूर्वकारणे* ८८, *उत्तरकारणे* १०१ पटलाश्च द्रष्टव्याः।

[3] सम्यगुक्तं त्वया —ई

[4] प्रतिष्ठापूर्वकं शिवभक्तपूजनमेव परमेश्वरस्यातीव प्रियावहमित्यस्मिन्विषये *शिवरहस्ये* ४.२.२३०—६पू०; ८पू०; ११, १२; १५—१७ श्लोका द्रष्टव्याः।

[5] प्रकुर्वीत वाचा . . . तथैव —इ

[6] अत्र 'न' इति पदमध्याहृत्य व्याख्येयम्।

[7] अत्र 'मताः' इति पदमध्याहृत्य 'त एव मे पूजनीया मताः' इति व्याख्येयम्। 'मे' इत्यत्र 'मतिबुद्धि-पूजार्थेभ्यश्च' (*पा० सू०* ३.२.१८८) इति कर्तरि षष्ठी।

[8] अजितागमे पूर्वं (३६.३६२, ३६३ उ०) इति श्लोके भक्तानां लक्षणं परं प्रतिपादितम्।

[9] अत्र मातृकायां 'तर्हि कथं प्रकर्तव्यं' इत्येव पाठो दृश्यते। छन्दोऽनुरोधेन लिङ्गानुरोधेन च पाठः शोधितः।

[10] 'प्रतिष्ठासु महात्मनः' इति मातृकायां पाठान्तरं दृश्यते।

[11] महात्मभिः —ई

[12] 'पञ्च शैवाः समाख्याताः सिद्धान्ते तु प्रजापते।
प्रथमोऽनादिशैवस्तु स शैवस्तु सदाशिवः।।
आदिशैवो द्वितीयस्तु स शिवब्राह्मणः स्मृतः।'
'तृतीयस्तु महाशैवः स शैवो विप्र उच्यते।

[13]शिवो ह्यनादिशैवः स्यादादिशैवः शिवद्विजः ॥८॥
[14]महाशैवो द्विजः प्रोक्तः सर्वशास्त्रेषु संमतः ।
अनुशैवो बाहुजः स्यादार्याः[15] प्रोक्तास्तथैव च ॥९॥
अवान्तरा जघन्या[:] स्युः प्रवरा[:] पारशैवकाः ।
आन्तरालिकशैवास्तु तदन्ये मानवाः स्मृताः ॥१०॥

[[16]अनादिशैवः]

अनादित्वं कथं तस्येत्युच्यते चेद् ब्रवीमि ते ।
आद्यन्त[17]रहितत्वाच्च अनादिः शिव उच्यते ॥११
अनादिः शिव एव स्यात्सर्वदा [18]सर्वथा नृणाम् ।

[19] [आदिशैवः]

शिवद्विजानामादित्वं तस्मात्संभवति ध्रुवम् ॥१२॥
शिवसृष्टे[:] संभवत्वादादि[20]पूर्वः शिवद्विजः ।
सृष्ट्यारम्भे शिवस्यास्य जननादादिशैवकः ॥१३॥

चतुर्था अनुशैवाश्च नृपा वैश्या इति स्मृताः ॥
पञ्चमोऽन्तरशैवस्तु शूद्रश्चेति तथा मतः ।'
(*पूर्वकारणे* २६.१पू०, २, ९, १०पू०);
'सप्तधा शैवमुद्दिष्टं मत्तस्त्वं तन्मनाः शृणु ।
अनादिशैवं प्रथममादिशैवं द्वितीयकम् ॥
महाशैवं तृतीयं तु चतुर्थं चानुशैवकम् ।
अवान्तरं तु शैवं तु पञ्चमं च विदुर्बुधाः ।
षष्ठं प्रवरशैवं तु सप्तमं चान्त्यशैवकम् ॥
(*वीरे* ९.४—६पू०);
'अनादिशैवाः प्रथमं महाशैवा द्वितीयकम् ।
आदिशैवास्तृतीयं च चतुर्थं चानुशैवकाः ॥
पञ्चमान्तरशैवास्तु शैवाः पञ्चविधाः स्मृताः ।
(*सुप्रभेदे* चर्यापादे १.१९उ०, २०)

[13]शिवोऽनादि० —इ

[14]महाशैव द्विज प्रोक्तः —ई

[15]प्रकरणवशादत्र 'आर्याः' इत्यनेन वैश्या बोध्यन्त इत्यभ्युपेयम् ।

[16]'अनादिशैवं विज्ञेयमहमेव न॰संशयः ।'
'शक्त्यधिष्ठितः शक्तिश्च नादो बिन्दुरिति स्मृतः ।
सदाशिवेश्वरौ चैव षट्स्थाने ये च संस्थिताः ॥
अनादिशैवा इमे प्रोक्ताः'
(*सुप्रभेदे*, चर्यापादे १.२१, २२पू०)

[17]रहितत्वाचानादिः —ई

[18]सर्वदा —ई

[19]'आदौ सदाशिवेनैव दीक्षितस्त्वादिशैवकः ।
कौशिकः काश्यपश्चैव भारद्वाजोऽथ गौतमः ॥
अगस्त्यश्चैव पञ्चैते पञ्चवक्त्रेषु दीक्षिताः ।'
'ऋषीणामेव पञ्चानां गोचराः संप्रकीर्तिताः ।
आदिशैवा इमे ख्याताः'
(*पूर्वकारणे* २६.३, ४ पू०, ७);
'शिवद्विजाश्च विप्रेन्द्र आदिशैवाः प्रकीर्तिताः ।'
(*वीरे* ९.६ उ०); अस्मिन्विषये *उत्तरकामिके* २४.६४ उ०, ६५ श्लोकाश्च द्रष्टव्याः;
'मायाद्यवनिपर्यन्तं रुद्रा ये च महाबलाः ।
अनन्तेश्वरशिष्यास्ते आदिशैवाः प्रकीर्तिताः ॥'
(*सुप्रभेदे* चर्यापादे १.२३ उ०, २४ पू०)

(*वीरे* ९.७उ०); [20]०पूर्वं —ई

[21] [महाशैवः]

[22]महापूर्वशिवत्वं हि कथं स्याच्च द्विजन्मनाम् ।
ब्रह्मणः सृष्टिजातत्वान्महाशैवः प्रकीर्तितः [23] ।।१४।।

[24] [अनुशैवाः]

क्षत्रियाणां च वैश्यानामानुशैवं कथं स्मृतम् ।
भूसुराचारकल्पत्वादनुशैवा इति स्मृताः ।।१५।।
विराजश्चाथ वैश्याः स्युरनुशैवा[ः] प्रभेदतः ।

[25] [अवान्तरशैवाः]

अवान्तरत्वं शूद्राणामुक्तं स्यात्क्रमशो हरे ।।१६।।
दीक्षाभिषेकयोग्यत्वाच्छैवावान्तरसंज्ञकाः[26] ।

[27] [पारशैवाः]

प्रवराणां कथं तेषां पारशैवत्वमुच्यते ।।१७।।
विजातियोनिभेदत्वात्पारशैवा इति स्मृताः ।

---

[21]'महाशैवं तु विप्राणां शिवदीक्षासमन्वितम् ।'
(*वीरे* ९.११पू०);
'अनन्तादिशिखण्ड्यन्तास्तथा मन्त्रमहेश्वराः ।
महाशैवास्तु विख्याताः'
(*सुप्रभेदे*० चर्यापादे १.२२उ० , २३पू०)

[22]महत्पूर्वं शिवत्वं—ई

[23]१४उत्तरार्धानन्तरम् 'ई' मातृकायां 'विरिञ्चिसृष्टेः सञ्जातो महाशैवः प्रकीर्तितः' इत्यर्धमेकमधिकं दृश्यते। पुनरुक्तत्वात्तन्नात्र पाठतया सङ्घटितम् ।

[24]'क्षत्रियश्चैव वैश्यस्तु अनुशैव इहोच्यते ।'
(*वीरे* ९.१५ पू०);
'ब्रह्मविष्ण्वादिदेवाश्च दैत्याश्च ऋषयस्तथा ।
अनुशैवाः स्मृता ह्येते यक्षरक्षोरगैः सह ।।'
(*सुप्रभेदे* चर्यापादे० १.२४ उ० , २५ पू०)

[25]'शूद्रोऽप्यन्तरशैवस्तु उच्यते क्रमशोऽधुना ।'
(*वीरे* ९.१५ उ०);
'ब्राह्मणादिचतुर्वर्णाः काश्यपादिसमुद्भवाः ।
परमेशप्रसादेन अधिकारे नियोजिताः ।।
शिवधर्मप्रकाशाय सर्वेषां बोधनाय च ।
स्थापनाप्रोक्षणादीक्षाविधिना कृत्यकारणात् ।।
ऋषीणां मूर्तिमास्थाय शिवेन परमात्मना ।
अनुगृहीताश्च ये सर्वे शैवास्त्वेवान्तराः स्मृताः ।।
(*सुप्रभेदे* चर्यापादे १.२५उ० —२८ पू०)

[26]शैवाः+अवान्तरसंज्ञकाः शैवा अवान्तरसंज्ञकाः; ततो दीर्घसन्धिरार्षः ।

[27]'सवर्णाम्बिष्ठमध्यस्थाः कुलालः पारकस्तथा ।
प्रवर [पार ?] शैवमिति ख्यातमिदमन्यच्छृणुष्व च ।।'
(*वीरे* ९.१६, १७ पू०);
'सवर्णं प्रथमं विद्यादम्बष्ठं च द्वितीयकम् ।
पारशैवं तृतीयं तु जायन्ते ब्राह्मणोद्भवैः ।।'
'शूद्रस्त्रीविप्रसंयोगाज्जातः पारशवः स्मृतः'
(*सुप्रभेदे*, चर्यापादे २.१८ उ०, १९ पू०; २४ पू०)

[[28] आन्तरालिकशैवाः]

तदन्यानां नराणां चाप्यन्तरालत्वमुच्यते ।।१८।।
[29]विजातीयानुयोनित्वात्तन्नाम समुदाहृतम् ।
प्रवराः पारशैवाः स्युस्तदन्ये चान्तरालिकाः ।।१९।।

[30] [विप्रक्षत्रियवैश्यसच्छूद्राः शिवभक्ता वैदिकैस्तान्त्रिकैश्च मन्त्रैः पूजनीयाः]

ब्राह्मणाः क्षत्रिया वैश्याः सच्छूद्रा भक्तिसंयुताः ।
वैदिकैस्तान्त्रिकैश्चाथ पूजनीया महात्मभिः ।।२०।।

[31] [आदिशैवमहाशैवानामधिकारः]

आदिशैवमहाशैवाः [32]षट्कर्मसु नियन्त्रिताः ।
दीक्षाभिषेक[33]पूजासु अधिकारो विशेषतः ।।२१।।
परार्थयज[ने] [34]किंत्वधिकारी स्याच्छिवद्विजः ।
[35]ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।।२२।।
[36]चत्वारश्चाश्रमास्तेषां पुरुषार्थप्रदायकाः ।

---

[28] 'अन्यासामेव जातीनामन्त्यशैवमिहोच्यते ।'
(*वीरे* ९.१७ पू०)
'चातुर्वर्ण्यस्य संयोगात्प्रतिलोमानुलोमतः ।
तेषां तद्योगकाले तु जायन्ते चान्तरालकाः ।।
(*सुप्रभेदे* चर्यापादे २.३ उ०, ४ पू०)

[29] विजातीयान्वयोनित्वा तन्नाम —ई

[30] एतस्मिन्विषये *उत्तरकामिके* (६६.१३० —५पू०) श्लोकास्तथा *शिवरहस्ये* (४.२.२८ —३०पू०) श्लोकाश्च द्रष्टव्याः ।

[31] 'महाशैवानुशैवाश्च तथा चान्तरशैवकाः ।
आत्मार्थयजनं कुर्युर्न कुर्युश्च परार्थकम् ।।'
'आदिशैवस्य कर्तव्यमात्मार्थं च परार्थकम् ।
स्थापनं यजनं सर्वं चादिशैवार्हकं विदुः ।।'
(*पूर्वकारणे* २६.१२ उ०, १३ पू०, १४);
एतस्मिन्विषये *उत्तरकामिके* २४.५—१०) श्लोकाश्च द्रष्टव्याः ।

[32] षट्कर्मेषु —ई;
षट्कर्माणि : —
'अध्यापनं चाध्ययनं यजनं याजनं तथा ।
दानं प्रतिग्रहं चैव तेषां कर्माणि चोच्यते ।।'
(*सुप्रभेदे* चर्यापादे २.९);
'इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च ।
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा ।।'
(*याज्ञवल्क्यस्मृतौ* १.११८)

[33] पूजायामधिकारो —ई

[34] किं त्वधिकारि स्या० —ई

[35] अत्राश्रमिवाचकशब्दानां लक्षणया तत्तदाश्रमवाचकत्वमभ्युपेयम् ।

[36] 'चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः ।
क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोः ।।'
(*बृहद्योगियाज्ञवल्क्यस्मृतौ* परिशिष्टे ४३);
'शूद्रः शुश्रूषयेन्नित्यं ग्रहस्थाश्रममाचरेत् ।
शूद्रस्य ब्रह्मचर्यं च मुनिभिः कैश्चिदिष्यते ।।'
('*योगयाज्ञवल्क्ये*' इति निर्दिश्य *वर्णाश्रमचन्द्रिकायां* ७०तमे पृष्ठे उदाहृतोऽयं श्लोकः ।

[अनुशैवानामाश्रमत्रयेऽधिकारः]

अधिकारोऽनुशैवानामाश्रमाणां [३७]त्रयेऽपि च ॥२३॥

[सच्छूद्राणामाश्रमद्वयेऽधिकारः]

सच्छूद्राणां तु सर्वेषामाश्रमद्वितये[ऽपि] च ।

[अवान्तरशैवानामेव, सच्छूद्रत्वं न तु तदन्ययोः]

अवान्तराणां शैवानां [३८]सच्छूद्रत्वमुदाहृतम् ॥२४॥
आन्तरालिकशैवानां पाराणां क्रमतो हरे ।
सच्छूद्रत्वं ध्रुवं तेषां न भवेत्तु कदाचन ॥२५॥
प्रवराः [३९]पारशैवाश्च आन्तरालिकशैवकाः ।
तेषामाग[म]सिद्धान्ते सच्छूद्रत्वं न दृश्यते ॥२६॥

[४०] [अनुशैवावान्तरशैवानामपि विशिष्टानुष्ठानादिसंभवे भिक्षुत्वप्राप्तिः]

अनुसंज्ञिकशैवास्तु [४१]सच्छूद्रावान्तराश्च ते ।
अनुष्ठानविशेषेण भिक्षुत्वं [४२]यान्ति शैवकम् ॥२७॥
अन्येषु च प्रमाणेषु भिक्षुत्व[४३]मभिदृश्यते ।

---

[३७]त्रयेषु च —ई

[३८]शुश्रूषा तु द्विजानां च शूद्राणां वृत्तिरुच्यते ।
कृष्णाश्च कर्षकाः शूद्रा वृषलाः प्रेष्यकारकाः ॥
एतानि पञ्च नामानि शूद्रपर्यायवाचकाः ।
कथितश्चाथ शूद्रस्तु सच्छूद्रो वैश्यवत्स्मरेत् ॥
अमद्यपाः कुलीनास्तु सच्छूद्रास्ते प्रकीर्तिताः ।
(सुप्रभेदे चर्यापादे २.१४ उ० —१६)

[३९]पारशैवाश्चान्तरालिक० —ई

[४०]''यतः स्वच्छन्दे —
'शूद्रोऽपि शूद्रदीक्षायां स्वार्थे तु चलसंज्ञके ।
बाणलिङ्गे क्षणे वापि स्थापको यदि नैष्ठिकः ॥'
इति तुरीयवर्णस्य तुरीयाश्रमश्रवणात् तस्यान्त्याश्रमाभ्युपगमे च बाधको न दृश्यते। किञ्चैतेनाप्येतेषां चतुराश्रमधर्मत्वमस्तीत्यवगन्तव्यम् ।
यतः स्वच्छन्दे सर्वे जटाधराः प्रोक्ता इति चतुर्णां जटाधारणमभिधीयते। वानप्रस्थसन्न्यासिनावन्तरेण च तत्र विधीयते। किं बहुना चतुर्णां दीक्षाप्रतिष्ठाद्यधिकारित्वसंपादकगुरुत्वाभ्युपगमेन केन वा दीक्षाङ्गभूतचतुराश्रमित्वं निवार्यते। अतश्चतुर्युगेषु चतुराश्रमित्वं संभाव्यत इत्यवगन्तव्यम् ।''
(*वर्णाश्रमचन्द्रिकायाम्* पृ० ७५)
'अनेनैव विधानेन दीक्षिता ये वरानने ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्येऽथवा प्रिये ।
सर्वे ते समधर्माणः शिवधर्मे नियोजिताः ॥
सर्वे जटाधराः प्रोक्ता भस्मोद्धूलितविग्रहाः ॥'
(*स्वच्छन्दतन्त्रे* ४.५३९ उ० —५४१ पू०)

[४१]सच्छूद्राः+अवान्तराः = सच्छूद्रा अवान्तराः। ततो दीर्घसंधिरार्षः। एतादृशः प्रयोगोऽत्र २९ उत्तरार्धेऽपि दृश्यते।

[४२]याति —ई

[४३]०मभिपृश्यते —ई

भवानुरागहीनानां शैवाचारप्रवर्तिनाम् ॥२८॥
योगाभ्यासपराणां तु समयाचारवर्तिनाम् ।

[६४] [प्रतिमां कृत्वा प्रतिष्ठाप्य पूजनीयानां शिवभक्तानां स्वरूपकथनम्]

ब्राह्मणाः क्षत्रिया वैश्याः सच्छूद्रावान्तराश्च ये ॥२९॥
[६५]नैष्ठिका यतिनश्चैव गृहस्था वनचारिणः ।
दीक्षाभिषेकयुक्ताश्च देशिकाज्ञानुसारिणः ॥३०॥
शिवालयप्रतिष्ठायां शिवधर्मविशेषतः ।
[६६]शिवशुश्रूषणं चैव द्विजानां परिपालनम् ॥३१॥
तटाकादिप्रखननं ग्रामाणामभिरक्षणम् ।
पुष्कलं चान्नदानं च शिवरात्रिव्रतादिकम् ॥३२॥
कुर्वन्ति मनसा भक्त्या कथ्यन्ते ते [६७]महात्मनः ।
ते मदीया इति ज्ञात्वा धीमान्निश्चितमानसः ॥३३॥
कुरुते पूजनं [६८]यस्तु गन्धपुष्पादिसंयुतम् ।
[६९]स एव मत्कृपापात्रं भवतीति न संशयः ॥३४॥
मदीयानां मृतानां च जीवितानां महात्मनाम् ।
आचार्यसेकयुक्तानां समयाचारवर्तिनाम् ॥३५॥
ज्ञानिनां योगिनां तेषां [७०]सिद्धमार्गप्रवर्तिनाम् ।

[७१] [प्रतिमाकरणयोग्यद्रव्याणि]

तेषां प्रतिकृतिं चाथ दिव्यलक्षणसंयुताम् ॥३६॥

---

[६४]''विप्रक्षत्रियविट्शूद्रास्त्वन्तरालाः स्त्रियोऽपि वा ॥''
शिवभक्तिसमोपेता जीवन्तो वा मृताश्च वा ।
कृत्वा तेषां प्रतिकृतिं प्रतिष्ठाप्य समाचरेत् [समर्चयेत् ?]'
(*अचिन्त्यविश्वसादाख्ये* ५८.१३उ०, २);
एतस्मिन्विषये *उत्तरकामिके* (६६.१ उ०—५पू०) श्लोकास्तथा *शिवरहस्ये* ४.२.२८—३०पू० श्लोकाश्च द्रष्टव्याः ।

[६५]अत्र ब्रह्मचारिणामनुक्तत्वाद् 'वटवो यतिनश्चैव' इति पाठो युक्त इति भाति ।

[६६]अत्र 'शैवशुश्रूषणं चैव' इति पाठश्चेत्सुष्ठु ।

[६७]अत्र 'महात्मानः' इति पाठो युक्तः । तथा कृते छन्दोभङ्गः स्यात् । 'महात्मनः' इत्यस्यानन्तरं 'परमेश्वरस्य प्रियतमाः' इति पदद्वयमधिकृत्य व्याख्याने कृते यथाश्रुतपाठोऽपि समर्थयितुं शक्यते ।

[६८]'यस्तु' इत्यत्र मातृकायां 'यत्र' इति दृश्यते । अर्थानुरोधेन 'यस्तु' इति पाठः शोधितः ।

[६९]'स एव' इत्यत्र मातृकायां 'तत्रैव' इति पाठो वर्तते । अर्थानुरोधेनात्रापि 'स एव' इति पाठः साधितः ।

[७०]'योगिनां विहितात्मनाम्' इति 'ई' मातृकायां पाठान्तरं निर्दिष्टम् ।

[७१]'तदात्वं [तदर्थं ?] शिवलिङ्गं वा प्रतिमा वा शिवस्य तु ।
विघ्नेशगुहनन्द्यादिप्रतिमाकृतिमेव वा ॥
हेमराजतताम्रादिहैमैर्लोहैश्च [लोहैः शैलैश्च ?] दारुभिः ।
मृद्भिर्वा कारयेद्धीमान् सर्वमा[यादिसंयुतम्] ॥
भित्तौ चित्रे पटे वापि कल्पयेन्नन्दिकेश्वर ।
लिङ्गं वा चोक्तमार्गेण प्रतिमां वापि कारयेत् ॥'
(*अचिन्त्यविश्वसादाख्ये* ५८.१२—१४);
अस्मिन् विषये *उत्तरकामिके* ६६.१२उ०—१५पू० श्लोकाश्च द्रष्टव्याः ।

[५२]दृषदा ताम्रलोहैश्च सुवर्णरजतैः शुभैः ।
पटीरदारुभिश्चैव कृत्वा सर्वार्थसिद्धये ।।३७।।

[५३] [प्रतिष्ठायोग्यस्थानानि]

अरण्ये च नदीतीरे पुण्यक्षेत्रे सुशोभने ।
[५४]आगमोक्तविधानेन प्रतिष्ठां कारयेद्बुधः ।।३८।।

---

[५२] पृषदा —ई

[५३] 'सर्वेषामपि शैवानां स्थापनं द्विविधं मतम् ।
स्वप्रधानं पराङ्गं च रत्नगर्भं विशेषतः ।।
अग्रहारे पुरादौ वा नदीतीरे वनेऽपि वा ।
उद्याने पुष्करिण्यादौ सर्वतो वा मनोरमे ।।
स्थानेऽन्यत्र च कर्तव्यं स्वप्रधानस्य मन्दिरम् ।
देवालये येताखादौ [ऽन्तः सालादौ ?] तत्र कल्पित-मन्दिरे ।।
परिवारसमोपेतं स्वप्रधानं च कारयेत् ।'
(*अचिन्त्यविश्वसादाख्ये* ५८.४ उ० —७);
एतद्विषये *उत्तरकामिके* ६६.५उ० —८पू० श्लोकाश्च द्रष्टव्याः ।

[५४] अथातः संप्रवक्ष्यामि भक्तानां स्थापनं शृणु ।
उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।।
शुभवारादिभिर्युक्ते स्थापनं तु समारभेत् ।
अङ्कुराण्यर्पयेद्धीमान्प्रागुक्तविधिना सह ।।
विचित्रे मण्टपे रम्ये स्थण्डिलं शालिभिः कुरु ।
हेमसूच्या लिखेत्पक्ष्मरेखां वै कृष्णमण्डलम् ।।
मधुना तर्पयित्वा तु कुर्याद्गव्याभिषेचनम् ।
ग्रामप्रदक्षिणं कुर्याज्जलाधिवासमारभेत् ।।
वस्त्रेण प्रतिमां वेष्ट्य लम्बकूर्चसमन्वितम् ।
जलमध्ये प्रपां कुर्यात्तन्मध्ये शाययेत्ततः ।।
एकरात्रं द्विरात्रं वा त्रिरात्रं याममात्रकम् ।
हर्म्याग्रे मण्टपं कुर्यादष्टहस्तप्रमाणतः ।।
कलास्तम्भसमायुक्तं ध्वजतोरणसंयुतम् ।
तन्मध्ये वेदिकां कुर्यात्तत्त्रिभागैकभागतः ।।
रत्निमात्रसमुत्सेधां दर्पणोदरसन्निभाम् ।
कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात् ।।
इन्द्रादिषु चतुर्दिक्षु वेदाश्रं कारयेद्बुधः ।
वृत्तकुण्डं तथैशान्यां प्रधानं तु प्रकल्पयेत् ।।
मण्टपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत् ।
उद्वास्य शिल्पिनं पश्चाद् गोमयेनानुलेपयेत् ।।
मण्टपं मण्डयित्वा तु भूसुरान्भोजयेत्ततः ।
गोमयालेपनं कृत्वा पुण्याहं वाचयेत्ततः ।।
स्थण्डिलं कारयेन्मध्येऽप्यष्टद्रोणैश्च शालिभिः ।
तण्डुलैश्च तिलैर्दर्भैः पुष्पैश्चैव परिस्तरेत् ।।
कर्णिकामध्यमे चैव शयनं कल्पयेत्ततः ।
जलादुत्तीर्य बिम्बं तु वस्त्रादीनि व्यपोह्य च ।।
कृत्वा तु पूर्ववच्छुद्धिं शाययेच्छयनोपरि ।
गन्धपुष्पादिभिश्चैव पूर्ववत्पूजयेद्धृदा ।।
आवेष्ट्य धौतवस्त्रेण प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
कौतुकं बन्धयित्वा तु शाययेत्प्रतिमां ततः ।।
तस्योर्ध्वे तु शिरोभागे भक्तकुम्भं तु निक्षिपेत् ।
तन्मध्ये तु स्वनाम्ना तु प्रणवादिनमोऽन्तकम् ।।
स्थापयेद्भक्तकुम्भं तु पूजयेत्तु विशेषतः ।
भक्तकुम्भस्य तस्यैव पद्ममुद्रां प्रदर्शयेत् ।।
अभितः कलशानष्टौ सूत्रादिभिः समन्वितान् ।
इन्द्राद्याशासु विन्यस्य लोकपालांश्च विन्यसेत् ।।
गन्धपुष्पादिभिस्तत्र संपूज्येशानमन्त्रतः ।
शुक्लवस्त्रधरो [वरो ?] ष्णीषः सोत्तरीयः सुमालिकः ।।
आचार्यो मूर्तिपैः सार्धं होमकर्म समारभेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमार्गतः ।।
शमीखदिरमायूरप्लक्षं चैव दिशासु वै ।
प्रधानस्य पलाशं तु समिधः संप्रकीर्तिताः ।।
हृदयेन समिद्धुत्वा घृतं मूलेन होमयेत् ।
अस्त्रेणैव चरुं हुत्वा लाजमीशेन होमयेत् ।।
सर्षपं कवचेनैव द्रव्यान्ते व्याहृतिं हुनेत् ।
प्रत्येकं शतमर्धं वा तदर्धं वापि होमयेत् ।।
द्रव्यान्ते व्याहृतिं हुत्वा स्पृशेद्बिम्बस्य मस्तकम् ।
एवमेव क्रमाद्रात्रौ प्रभाते स्थापनं कुरु ।।
देशिको होतृभिः सार्धं स्नानं पूर्ववदाचरेत् ।

[55] [प्रतिष्ठितानां नित्यपूजोत्सवादिकं कर्तव्यम्]

नित्यपूजादिकं कृत्वा चोत्सवादिकमाचरेत् ।

[56] [शिवालये प्रतिष्ठाप्य पूजनीयानां शिवभक्तानां लक्षणं, प्रतिष्ठायोग्यस्थानानि च]

शिवालये विशेषेण [57]शिवभक्तान्कृताञ्जलीन् ।।३९।।

ऋत्विग्भिः सममाचार्यः पूजयेत्पूर्ववत्ततः ।।
शयनाद्बिम्बमुद्धृत्य वस्त्रादीनि विसर्जयेत् ।
गन्धपुष्पादिभिश्चैव पूजयेत्पुरुषेण तु ।।
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
पूर्णाहुतिं च शिरसा हुत्वाग्निं च विसर्जयेत् ।।
उद्धृत्य शयनाद्बिम्बं स्नानवेद्यां तु विन्यसेत् ।
पूर्वोदितेन मार्गेण घृतेनैव शिरोऽर्पणम् ।।
कुम्भमुद्धृत्य बिम्बाग्रे स्थापयेत्स्थण्डिलोपरि ।
कुम्भाद्बीजं समादाय प्रतिमाहृदि विन्यसेत् ।।
तत्तत्कुम्भोदकैः स्नाप्य गन्धपुष्पादिभिर्यजेत् ।
नैवेद्यं दापयित्वा तु ताम्बूलं तु निवेदयेत् ।।
भक्तानां परिचाराणां यथायुक्त्या प्रपूजयेत् ।
भक्तानां स्थापनं प्रोक्तं यथाशास्त्रं प्रजापते ।।'

(*पूर्वकारणे* ८८.१ — ३१);

अस्मिन्विषये *उत्तरकामिके* ६६.२९ — ७२ श्लोकाश्च द्रष्टव्याः ।

[55] एतस्मिन्विषये *उत्तरकामिके* (६६.७३ — १०१) श्लोका द्रष्टव्याः;

'भक्तजन्मदिने वापि कर्तृजन्मदिनेऽपि वा ।
प्रतिमासोत्सवं कुर्याद्विभवस्यानुसारतः ।।
ध्वजारोहणपूर्वं तु कर्तव्यं कर्तुमिच्छता ।
ध्वजेऽपि वृषभं कुर्याच्छिववच्चोत्सवं भवेत् ।।'

(*अचिन्त्यविश्वसादाख्ये* ५८.६६, ५७);

'रुद्रपूजावसाने तु भक्तानामुत्सवं नयेत् ।
मध्याह्नपूजनान्ते तु तदन्ते यानमाचरेत् ।।
रथे वा वाहने वापि गण्डिके शिबिकेऽपि वा ।
यानारम्भस्य काले तु दीपज्वालासमायुतम् ।।
छत्रचामरपिच्छाद्यैः स्तोत्रमङ्गलवाचकैः ।
वेदध्वनिसमायुक्तं भक्तस्तोत्रसमन्वितम् ।।
सर्वातोद्यसमायुक्तं सर्वभक्तेन[क्तैश्च ?] सार्धकम् ।
शनैः प्रदक्षिणं कृत्वा प्रविशेदालयं प्रति ।।
यात्रार्थस्नपनं पश्चाद् भूरि चान्नं निवेदयेत् ।।
भक्ष्यपूपादिकं दत्त्वा ताम्बूलं तु निवेदयेत् ।
तीर्थनक्षत्रदिवसे चूर्णोत्सवं समाचरेत् ।
नदीतटाकतीरे च तीर्थकर्म समाचरेत् ।।
आचार्यं पूजयेत्पूर्वं वस्त्रहेमाङ्गुलीयकैः ।
भक्तानां परिचाराणां वस्त्रदानं तु दापयेत् ।।
यजमानेन कर्तव्यं दीर्घमायुः श्रियो भवेत् ।
पुत्रपौत्रसमृद्ध्यर्थमन्ते सायुज्यमाप्नुयात् ।।
भक्तानामुत्सवं प्रोक्तम्'

(*सूक्ष्मे* १९.१६ उ० — २४)

[56] 'देवालयादौ सर्वत्र मालिकामण्टपादिषु ।
परिवारविहीनं तु कल्पितं त्वङ्गमिष्यते ।।'
'मानाङ्गुलोक्तमार्गेण हर्म्यादीन्कारयेद्गुरुः ।
सर्वलक्षणसंयुक्तं सर्वमानोपशोभितम् ।।
द्वारगोपुरसंयुक्तं प्रासादांश्च प्रकल्पयेत् ।
तस्मिन्प्रतिकृतिं कुर्याद्गतरुद्रानुकूलतः ।।
लिङ्गं वा तद्विधातव्यं विधिना रत्नगर्भकम् ।
अष्टतालेन मानेन [मानं तु ?] प्रतिकृत्यां विधीयते ।।
बद्धपद्मासनारूढं वाहनादौ स्थितं तु वा ।
आसनं मान [आसनोन्मान ?] विस्तारं सर्वलक्षण-संयुतम् ।।
मुण्डी जटी बद्धकेशः शिखी वा मकुटान्वितः ।
क्षत्रियश्चेद्विधातव्यं सर्वभूषणभूषितम् ।।
यथेष्टायुधसंयुक्तं नमस्कारेण वा युतम् ।
स्त्रियः श्वेतदुकूलैश्च भूषणैर्भूषयेत्पुनः ।।
लक्षणं त्वेवमाख्यातम्'

(*अचिन्त्यविश्वसादाख्ये* ५८.८, १५ — २१पू०);

एतस्मिन्विषये *उत्तरकामिके* (६६.८उ०, ९पू०, २१ — २८) श्लोकाश्च द्रष्टव्याः ।

[57] 'शिवहस्तान्' इति मातृकापाठो दृश्यते । अर्थानुरोधेनात्र 'शिवभक्तान्' इति पाठः साधितः ।

सवालचामरकराँल्लिङ्गहस्तान्सलक्षणान् ।
बिम्बरूपान्विधायाथ महामण्टपदेशतः ।।४०।।
मणिमण्टपदेशे वा प्राकाराभ्यन्तरेषु वा ।
तस्मात्सर्वप्रयत्नेन प्रतिष्ठाप्य यथाविधि ।।४१।।
शिवागमविधानेन नित्यपूजां समाचरेत् ।

[आलये प्रतिष्ठितानां भक्तानां नित्यपूजाद्यकरणे प्रत्यवायः]

प्रतिष्ठितानां भक्तानामालये बिम्बरूपिणाम् ।।४२।।
नित्यं नैमित्तिकं काम्यमुत्सवं च समाचरेत् ।
मोहादज्ञानतो वापि उत्सवादीन्न कारयेत्[५८] ।।४३।।
स नरो निरयं याति यावदाचन्द्रतारकम् ।

[५९] [समाधिभूमौ लिङ्गं प्रतिष्ठाप्य पूजनीयम्]

समाधिभूमौ लिङ्गं च मनोज्ञं च सुलक्षणम् ।।४४।।
प्रतिष्ठाप्य यथान्यायं नित्यपूजादिकं चरेत् ।

---

[५८] अत्र 'यदि' इत्यध्याहारः कर्तव्यः ।

[५९] 'देवदेव महादेव सर्वज्ञ करुणाकर ।
प्रतिष्ठां समाधिलिङ्गस्य ब्रूहि त्वस्माकमीश्वर ।।
वक्ष्ये समाधिलिङ्गस्य प्रतिष्ठां द्विजसत्तमाः ।
द्विविधं तत्तु संप्रोक्तमालये वा बहिःस्थले ।।
प्राकारचतुरश्रान्ते पञ्चमस्य तु मध्यमे ।
स्थापितं विधिना लिङ्गं परं शृणुत साम्प्रतम् ।।
नदीतीरे तटाके वा चोद्याने स्वमठेऽपि वा ।
अन्यत्र च मनोयोग्ये स्थले तु द्विविधं भवेत् ।।
महात्मानश्च सर्वज्ञा नानाश्चर्यसमन्विताः ।
अनेकान्तरजन्मभ्यः कृत्यकृत्या मदाज्ञया ।।
मदंशभाजः सुप्रीत्या मत्स्वरूपपरायणाः ।
दयादाक्षिण्यसंयुक्ता निरपेक्षाणिमादयः ।।
सर्वागमज्ञाः सर्वज्ञा लोकरक्षार्थमागताः ।
समयाज्ज्ञानपर्यन्तं दीक्षया संयुताश्च ये ।।
तेषां मृतस्य काले तु दहनं न प्रशस्यते ।
यदि मोहेन कुर्याच्चेद्राजराष्ट्रस्य दोषकृत् ।।
समाधिलिङ्गमेतेषां कारयेद् द्विजसत्तमाः ।
पश्चात्षण्मासकाले तु लिङ्गं संस्थापयेत्सुधीः ।।'
'समाधिस्थानमागत्य सर्वैर्भक्तजनैः सह ।
पूर्वोक्तविधिना सर्वं कारयेद् द्विजसत्तमाः ।।
छादयेन्नववस्त्रेण प्रोक्षयेत्पञ्चगव्यकैः ।
आच्छाद्य मृद्भिस्तस्योर्ध्वे लिङ्गं कृत्वा ततो मृदा ।।
तदा प्रभृति षष्मासमथवा वत्सरान्तकम् ।
पूजयेन्मृण्मये लिङ्गे शिष्यः प्रधान्यसंज्ञकः ।।
पश्चाच्छिलामयं लिङ्गं प्रापयेत्तु मुनीश्वराः ।
आचार्यः शिल्पिसंयुक्तः कर्ता कारयिता तथा ।
वनाद्वनान्तरं गत्वा पर्वतात्पर्वतान्तरम् ।।
यथोक्तं ग्राहयेच्छैलं शुचिं भस्मादिवर्जितम् ।
निश्चित्य देशिकाद्यैस्तु गृह्णीयादुपलं तथा ।।
लिङ्गं समं वा प्राञ्चं वा शिवाधिक्यमथापि वा ।
स्वस्तिकं मुखलिङ्गं वा धारालिङ्गमथापि वा ।।
तेषामशेषलिङ्गानां शिवाधिक्यं महाफलम् ।
समाधिस्थापने लिङ्गमिदमेव महात्मनाम् ।।
तस्माच्छिवाधिकं लिङ्गं स्थापयेद्विधिना द्विजाः ।
अलाभे त्वन्यलिङ्गं वा प्रतिष्ठाप्य सुपूजयेत् ।।
प्रासादं नागरं वापि द्राविडं वेसरं तु वा ।
पञ्चप्राकारसंयुक्तमालयं कारयेद्बुधः ।।
विभवस्यानुसारेण अथवा कारयेत्ततः ।
लिङ्गं संस्थापयेत्पश्चात्पूर्वोक्तविधिना द्विजाः ।।'

[पारशैवा आन्तरालिकशैवाश्च प्रतिष्ठाप्य न पूजनार्हाः]

शैवानां पारपूर्वाणामान्तरालिकसंज्ञिनाम् ।।४५।।
पूर्वोक्तविधिना तेषां प्रतिष्ठादीन्न कारयेत् ।
[६०]जातिसंकरतो यान्ति पूजार्हत्वं न ते पुनः ।।४६।।
भक्तिशुश्रूषणेनैव चाप्नुवन्ति परां गतिम् ।
जन्मान्तरे मृतास्तेऽपि सच्छूद्रत्वं व्रजन्ति हि ।।४७।।

[६१] [प्रतिष्ठापूर्वकं शिवभक्तपूजनस्य फलम्]

मद्भक्तपूजनेनैव प्रतिष्ठा[६२]पूर्वकेण तु ।
[६३]अत्यन्तानन्दसंयुक्तस्तथा तृप्तिं व्रजाम्यहम् ।।४८।।
अनेकशिव[६४]रात्रौ तु [६५]भोग्यैः शुद्धोदकैरपि ।
एलालवङ्गसंयुक्तै[६६]श्चन्द्रचन्दनवासितैः ।।४९।।
बिल्वपुष्पाक्षतैश्चैव जातीपुन्नागचम्पकैः ।
मन्दारपारिजातैश्चा[६७]प्यन्नैः षड्रससंयुतैः ।।५०।।
अष्टाङ्ग[६८]नतिभिश्चापि स्तोत्रैः श्रुत्यादिसंयुतैः ।
तत्तदीशैः पूजनैश्च यथा तृप्तिः प्रजायते ।।५१।।

'सुमुहूर्ते सुलग्ने तु सुमासे शून्यवर्जिते ।
शुभर्क्षे च तथा शुद्धे चोत्तरायणकालिके ।।
आचार्यः कर्तृणा साकं प्रतिष्ठामारभेत्सुधीः ।
मण्टपं कारयेत्तत्र पूर्वोक्तविधिना द्विजाः ।।
वेदिकां तत्र मध्ये तु कुण्डानश्रादिकान्क्रमात् ।
अलङ्कृत्य यथोक्तं तु अङ्कुरार्पणपूर्वकम् ।।
रत्नन्यासादिकं सर्वं पूर्वोक्तेन समाचरेत् ।
सर्वेषां शिवलिङ्गानां स्थापनं च यथाक्रमम् ।।
तथा सर्वं समाप्याथ विनाकर्षणमात्रकम् ।
प्रतिष्ठाप्य मुनिश्रेष्ठाः पूजयेत्परमेश्वरम् ।।
नित्योत्सवं च नित्याग्निहोमं चापि विशेषतः ।
वारपूजां मासपूजां पूर्वोक्तां तु समाचरेत् ।।
महोत्सवं च पूर्वोक्तकर्मणैव समाचरेत् ।
प्रतिष्ठाद्युत्सवान्तं तु सर्वकर्म समाचरेत् ।।
('*पौष्करे*' इति निर्दिश्य *वर्णाश्रमचन्द्रिकायाम्* १०४—१०६ पृष्ठेषु उद्धृताः); एतस्मिन्विषये *रौरवे* क्रियापादे ३०तमः पटलश्च द्रष्टव्यः ।

[६०]जातिसंस्कारतो —ई

[६१]'अथ वक्ष्ये विशेषेण भक्तानां स्थापनं परम् ।
सर्वपापहरं पुण्यं सर्वदोषप्रणाशनम् ।।'
(*भीमसंहितायाम्* (आर्० इ० २२७१६) ३३तमे पत्रे); एतस्मिन्विषये *उत्तरकामिके* ६६तमे पटले प्रथमश्लोकान्तिमश्लोकौ च द्रष्टव्यौ ।

[६२]०पूर्वकेन —ई

[६३]कृत्यन्तानन्द० —ई

[६४]रात्रै तु —ई

[६५]भागी स्याच्छुद्धो० —ई; तथा स्याच्छुद्धो० —'ई' मातृकापाठान्तरम् ।

[६६]चन्द्रः –कर्पूरम्; 'घनसारश्चन्द्रसंज्ञः' इत्यमरकोशे (१३३४)

[६७]'०प्यन्यैः' इति 'ई' मातृकापाठान्तरम् ।

[६८]०नदिभिः स्तोत्रैः —ई

मद्भक्तपूजनं यस्तु कुरुते मानवोत्तमः ।
अणिमाद्यष्टसिद्धिं च पुत्रपौत्रधनादिकम् ।।५२।।
स एव सर्वानाप्नोति मम लोके महीयते ।
बहुनोक्तेन किं देव स एवाहं न संशयः ।।५३।।

[६१]इत्यजिताख्ये महातन्त्रे [क्रियापादे] भक्तप्रतिष्ठाविधिः [त्रिषष्टितमः] पटलः ।

---

[६१]इत्यजिते भक्तप्रतिष्ठाविधिपटलः —ई

[चतुष्षष्टितमः पटलः]

[नरप्रतिष्ठाविधिः][1]

[2]नरप्रतिष्ठां वक्ष्यामि समासाच्छृणु सांप्रतम् ।
[3][मद्ध]क्तास्तु नरा लोके पूर्वोक्ताश्च निजैर्गणैः ।।१।।
तेषां तु करणापाये कृत्वा [4]प्रतिकृतिं बुधः ।
पूर्वोक्तलक्षणोपेतां[5] तत्प्रतिष्ठां समारभेत् ।।२।।

[अधिवासाय मण्डपकल्पनं तत्र वेदिकाकुण्डकल्पनं च]

[6]श्रेष्ठमध्यकनिष्ठांस्तु मुनिभूताग्निहस्तकैः ।
अधिवासाय कुर्वीत मण्डपं कुण्डवेदियुक् ।।३।।
विकारस्तम्भसंयुक्तं[7] मण्डपं [8]नवपदं भवेत् ।
तत्र मध्यपदे [9]वेदिं विस्तारार्धसमुच्छ्रिताम्[10] ।।४।।
तस्याश्च परितो दिक्षु कुण्डानि विधिना ततः ।
चत्वारि कारयित्वा तु [11]मुष्टिमात्रप्रमाणतः ।।५।।
चतुरश्राणि सर्वाणि [12]वृत्तमेकं तु शाङ्करे ।
गोमयेनोपलिप्याथ मण्डपं कुण्डवेदियुक् ।।६।।
पुण्याहं वाचयित्वा तु वितानादींस्तु बन्धयेत् ।

---

[1]अयं पटलः 'आ, इ, ई, उ' मातृकासु दृश्यते। एतद्विषये *अचिन्त्यविश्वसादाख्ये* ६६, *उत्तरकामिके* ६६, *उत्तरकारणे* १०१, *पूर्वकारणे* ८८, *वीरे* ६९, *सन्तानसंहितायां* ३६ पटला द्रष्टव्याः ।

[2]'आ, ई, उ' मातृकासु १—७ पूर्वार्धपर्यन्तश्लोकाः न दृश्यन्ते ।

[3]एतद्विषये अजिते ३६.३६१—३६३पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[4]प्रतिनिधिं —इ

[5]लक्षणोपेतं —इ

[6]'यागार्थं मण्डपं कुर्याद्धाम्नोऽग्रे तस्य पार्श्वयोः ।
नवपञ्चैकसंख्यानि तत्र कुण्डानि कल्पयेत् ।।
उद्वास्य शिल्पिनं पश्चाद्विप्रभोजनमाचरेत् ।'
(*उत्तरकामिके* ६६.३६ उ०, ३७);
'मण्डपं कारयेत्पश्चात्पञ्चषट्सप्तहस्तकैः ।
तन्मध्ये वेदिकां कुर्याद्रत्निमात्रोच्छ्रितां शुभाम् ।।
वेदिबाह्ये तु परितः पञ्चकुण्डानि कारयेत् ।
चतुर्दिक्षु च ईशान्यां वृत्तकुण्डं तु कारयेत् ।।
त्रिमेखलासमायुक्तमथवा एकमेखलम् ।
शोधनं क्षालनं चैव शोषणं पाचनं तथा ।।'
(*सन्तानसंहितायाम्* ३६.११—१३)

[7]संयुक्ते —इ

[8]नवधा —इ

[9]वेदि —इ

[10]अत्र कल्पयेदिति शेषः ।

[11]'षड्विंशैस्तु धनुर्मुष्टिः' *अजिते* १२.८ पू०

[12]प्राच्यामेकं तु चाहरे —इ

[नेत्रोन्मीलनम्]

[13]ततः प्रतिकृतिं तत्र समानीय तु मण्डपे ।।७।।
प्राङ्मुखं [14]स्थण्डिले [15]स्थाप्य नेत्रोन्मीलनमारभेत् ।
[16]पक्ष्मादिरेखाः [17]सूच्या तु हैमया[18] शिल्पिना ततः ।।८।।
कारयित्वा [19]दृशोः पश्चाद्विन्यसेदमृताक्षरम्[20] ।
सुवर्णनखयुक्ताभ्यामङ्गुलिभ्यां तु देशिकः ।।९।।
[21]तर्जन्यनामिकाभ्यां तु दक्षिणेतरयोः क्रमात् ।
[22]ततो गवां च धान्यानां [23]दर्शनं विप्रकन्ययोः ।।१०।।
ततः [24]शुद्धिं तु कुर्वीत'

[शयनाधिवासः] [25]

'[26]स्थण्डिलं विधिना ततः[27] ।

---

[13]'नेत्रोन्मीलनमाचरेत् ।
स्थण्डिलं पूर्ववत्कृत्वा तदूर्ध्वे विन्यसेत्पटम् ।।
संकल्प्य प्रणवं पीठं तदूर्ध्वे प्रतिमां न्यसेत् ।
हेमसूचिप्रहाराभिः कृष्णमण्डलमालिखेत् ।
ज्योतिर्मण्डलमालिख्य दृष्टिर्यूकप्रमाणिका ।।
नेत्रमन्त्रं समुच्चार्य क्रियामेनां समाचरेत् ।
तर्पयेन्मधुसर्पिर्भ्यां विद्वान्सौवर्णदूर्वया ।।
मध्वाज्यपूरितं पात्रद्वयं तस्य प्रदर्शयेत् ।
सौवर्णेन नखेनैव नेत्रमन्त्रेण संस्पृशेत् ।।
धान्यानि गां सवत्सां च कन्यकां ब्राह्मणानपि ।
दर्शयित्वा पटान्हित्वा बेरशुद्धिमथाचरेत् ।।'
(*उत्तरकामिके* ६६.३० पू० — ३५ पू०);
'विचित्रे मण्टपे रम्ये स्थण्डिलं शालिभिः कुरु ।
हेमसूच्या लिखेत्पक्ष्मरेखां वै कृष्णमण्डलम् ।।
मधुना तर्पयित्वा तु कुर्याद्गव्याभिषेचनम् ।'
(*पूर्वकारणे* ८८.३, ४ पू०);
'नयनं मोक्षणं कुर्यान्नेत्रद्वययुते दिने ।'
(*सन्तानसंहितायाम्* ३६.१४ पू०)

[14]स्थण्डिलं — आ, इ, ई, उ

[15]चाप्य — इ

[16]रूक्ष्मादि रेखा — आ; रक्षादि रेखा — उ

[17]सूच्याथ — उ

[18]हेमया — इ

[19]दिशोः — आ, इ, ई, उ

[20]अमृताक्षरम् = 'वं' इत्यक्षरम्; 'अमृतबीजं वं' *वर्णबीजकोशे* पृ० २

[21]तर्जन्यानामि० — इ, ई, उ

[22]ततोऽग्निं दर्शयेत्तस्य — आ, ई, उ

[23]राशिं तु तिलधान्ययोः — आ, ई, उ; राशीं तु तिलधान्ययोः उ० पाठान्तरम् ।

[24]शुद्धिश्च — आ; शुद्धिं च — ई, उ पाठान्तरम् ।

[25]'स्थण्डिलं कारयेन्मध्येऽप्यष्टद्रोणैश्च शालिभिः ।
तण्डुलैश्च तिलैर्दर्भैः पुष्पैश्चैव परिस्तरेत् ।।
कर्णिकामध्यमे चैव शयनं कल्पयेत्ततः ।
जलादुत्तीर्य बिम्बं तु वस्त्रादीनि व्यपोह्य च ।।
कृत्वा तु पूर्ववच्छुद्धिं शाययेच्छयनोपरि ।
गन्धपुष्पादिभिश्चैव पूर्ववत्पूजयेद्धृदा ।।
आवेष्ट्य धौतवस्त्रेण प्राक्शिरश्चोर्ध्ववक्त्रकम् ।
कौतुकं बन्धयित्वा तु शाययेत्प्रतिमां ततः ।।'
(*पूर्वकारणे* ८८.१२ — १५);
'जलादुत्तीर्य पूर्वेद्युः स्नापयेत्पञ्चगव्यकैः ।
वास्तुहोमं ततः कुर्याल्लक्षणेन समन्वितम् ।।
शालिना विकिरेद्वेदिं तण्डुलार्धतिलं न्यसेत् ।
शयनं पञ्चभिः कल्प्य कार्पासैर्वस्त्रवेष्टितम् ।।
शयने शाययेद्बिम्बं प्रच्छन्नपटसंयुतम् ।
काये तु विन्यसेद्विप्र पञ्चविंशतिकं तथा ।।

[२८]तत्र पद्मं समालिख्य साष्टपत्रं सकर्णिकम् ॥११॥
तन्मध्ये [२९]शयनं चापि पूर्ववत्परिकल्पयेत् ।
शाययेत्प्रतिमां मन्त्री प्राक्शिरश्चोर्ध्ववक्त्रकम् ॥१२॥
[३०]वस्त्रं चास्त्रेण संछाद्य'

[३१] [कुम्भस्थापनं तत्र चेतनपूजनं च]

'तस्य मूर्धनि चोत्तरे ।

पृथिव्यापस्तथा तेजो वायुराकाशमेव च ।
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमम् ॥
वाक्पाणि पादपायू च उपस्थं चैव पञ्चमम् ।
श्रोत्रत्वक्चक्षुर्जिह्वा च घ्राणं चैव तु पञ्चमम् ॥
मनोऽहंकारबुद्धी च प्रकृतिः पुरुषस्तथा ।
पञ्चविंशतितत्त्वानि शरीरे विन्यसेत्ततः ॥
मन्त्रन्यासोक्तमार्गेण सृष्टिन्यासं तु विन्यसेत् ।
गन्धपुष्पादिनाभ्यर्च्य'
(*वीरे* ६९.२२ –२८)

[२६]स्थण्डिले—आ, इ, ई, उ
[२७]अत्र कल्पयेदिति शेषः ।
[२८]तत—आ, इ, ई, उ
[२९]शयने—आ, इ
[३०]वक्त्रं चास्त्रेण—आ; अस्त्रमन्त्रेण—इ; वस्त्रेणास्त्रेण—ई, उ; वस्त्रच्छास्त्रेण—उ पाठान्तरम् ।
[३१]'शिरसश्चोत्तरे भागे कुम्भं प्राधानिकं न्यसेत् ।
अभितोऽष्टौ घटान्वस्त्रहेमसूत्रविभूषितान् ॥
चन्दनोदकसंपूर्णान्फलपल्लवसंयुतान् ।
तन्मध्यमे न्यसेन्मन्त्रांस्तद्विधानमिहोच्यते ॥
सान्तमाद्यस्वरोपेतं बिन्दुयुक्तं यथा भवेत् ।
आत्ममन्त्रः समाख्यातो हंसशब्दोऽथवा मतः ॥
सान्तेनैव च वर्णेन ब्रह्माङ्गानि प्रकल्पयेत् ।
विद्याङ्गानि च वा तस्य स्वाख्यायुक्तस्तु वा मनुः ॥
ह्रींकारः स्त्रीप्रतिष्ठायां तेन ब्रह्माङ्गकल्पना ।
स्वपत्नीसहिता यत्र प्रतिष्ठा प्रविधीयते ॥
प्रधानघटसौम्ये तद्भार्यार्थं करकं न्यसेत् ।
पत्नीद्वयं चेद्याम्येऽपि वर्धनीमपरां न्यसेत् ॥
बह्व्यश्चेत्करका ग्राह्या बहवः पार्श्वयोर्द्वयोः ।
स्त्रीप्रतिष्ठासु सर्वासु वर्धन्यः संप्रकीर्तिताः ॥
पृथिव्यादीनि भूतानि मनोऽहङ्कारबुद्धयः ।
परिवारघटे पूज्या अष्टौ वा वसवो मताः ॥
स्त्रीणां दिशस्तु पूर्वस्माद्देवताः परिकीर्तिताः ॥
पुरुषे लोकपाला वा पूर्वाद्यष्टघटेषु च ।
संपूज्य गन्धपुष्पाद्यैस्तत्त्वतत्त्वेश्वरान्न्यसेत् ॥
आत्मविद्याशिवाख्यं च तत्त्वत्रयमुदीरितम् ।
आत्मानमन्तरात्मानं परमात्मानमेव च ॥
तत्त्वतत्त्वाधिपत्वेन क्रमेण विनिवेशयेत् ।
स्त्रीणामप्येवमेवं स्यात् क्ष्मादयो मूर्तयो मताः ॥
अष्टौ स्युः पञ्चपक्षे तु क्ष्मादयः पञ्च एव हि ।
इन्द्राद्या मूर्तिपाः पक्षे निवृत्त्याद्यास्तु मूर्तिपाः ॥
तत्तद्ब्रह्माणि विन्यस्य तत्तन्मूर्तिहृदि न्यसेत् ।
अकारादिक्षकारान्तं न्यस्त्वा मूर्धादिषु क्रमात् ॥
जीवन्यासं स्वमन्त्रेण न्यस्त्वाङ्गानि च विन्यसेत् ।
संपूज्य गन्धपुष्पाद्यैर्वस्त्रेणाच्छाद्य वर्मणा ॥'
(*उत्तरकामिके* ६६.४३ उ० –५७);
'पश्चात्कुम्भांस्तु विन्यसेत् ।
सवस्त्रान्सापिधानांश्च सहिरण्यान्सकूर्चकान् ॥
प्रतिमादक्षिणेभागे कुम्भं मूलेन स्थापयेत् ॥
प्रतिमस्योत्तरे भागे कुम्भमेकं प्रतिष्ठितम् ।
पूर्वादीशानपर्यन्तं स्थापयेत्कुम्भमष्टकम् ॥
प्राणोऽपानश्च व्यानश्चोदानः समान एव च ।
नागः कूर्मश्च कृकरः कुम्भे पूर्वादि विन्यसेत् ॥
प्रतिमादक्षिणे कुम्भे देवदत्तं तु विन्यसेत् ।
धनञ्जयमुत्तरे न्यस्य गन्धपुष्पादिनार्चयेत् ॥
नैवेद्यं पायसं दद्यात्ताम्बूलं दापयेत्ततः ।'
(*वीरे* ६९.२८ उ० –३३ पू०)

प्रधानघटमेकं तु [32]द्रोणपूर्णं मनोहरम् ।।१३।।
सितसूत्रविचित्रं च गन्धोदपरिपूरितम् ।
सहिरण्यं सवस्त्रं च सकूर्चं [33]सापिधानकम् ।।१४।।
विन्यस्य परितो दिक्षु चतुरस्तादृशान्घटान् ।
विन्यस्य पूजयेन्मध्ये [34]गन्धाद्यैस्तत्र चेतनम् ।।१५।।

[चेतनमन्त्रः]

[35]प्रणवं पूर्वमुच्चार्य चात्मतत्त्वपदं ततः ।
चतुर्थ्यन्तं समायोज्य ततश्चापि नमस्कृतिम् ।।१६।।
चेतनस्य तु मन्त्रोऽयं स्थापनार्थमुदीरितः[36] ।
अनेन मन्त्रवर्येण पूजयित्वा ततः क्रमात् ।।१७।।
प्रागादिषु मनो [37]बुद्धिमहङ्कारं [38]क्रमेण तु ।
चित्तं चापि यजेद्धीमान्नमस्कारान्तसंयुतम्[39] ।।१८।।
[40]चतुर्थ्यन्तैस्तु [41]तन्मन्त्रैस्तार[42]पूर्वैस्ततो हविः ।
सर्वेषां च क्रमाद्दत्त्वा होमकर्म समारभेत् ।।१९।।

[होमः]

[43]कुण्डेषु वह्निमाधाय[44] विधिना होतृभिः सह ।
प्राक्कुण्डे देशिको धीमान्द्रव्यैरेतैः क्रमेण तु ।।२०।।

---

[32]द्रोणपूरं मनोरमम् —आ, इ, ई, उ
[33]सपिधानकम् —आ, इ
[34]गन्धोदैस्तत्र —इ
[35]'तस्य मन्त्रं प्रवक्ष्यामि शृणुष्व कमलासन ।
स्वनामाद्येन संयुक्तं द्वितीयं वापि गृह्यताम् ।।
सप्तमस्य द्वितीयं तु प्रथमस्य चतुर्दशम् ।
बिन्दुनादसमायुक्तं मानुषं बीजमुच्यते ।।
ह्रस्वा ब्रह्म समाख्याता दीर्घा ह्यङ्गानि विन्यसेत् ।'
(*वीरे* ६९.१३ उ० —१५)
[36]०मुदीरितम् —ई, उ
[37]बुद्धिरहङ्कारं —इ
[38]क्रमेण वै —आ, ई, 'उ' पाठान्तरम्; तथैव च —उ
[39]संयुतः —इ, ई
[40]चतुर्थ्यन्तं तु —आ
[41]तैर्मन्त्रै —आ
[42]पूर्वं ततो —आ
[43]'ततः कुण्डान्तिकं गत्वा होमकर्म समारभेत् ।
प्राग्वच्च कुण्डसंस्कारं शिवाग्न्याधानमेव वा ।।
तन्मध्ये भक्तमावाह्य साङ्गं सम्पूज्य तर्पयेत् ।
समिदाज्यचरूँल्लाजांस्तिलैर्द्रव्याणि मूर्तिपैः ।।
पलाशोदुम्बराश्वत्थवटाः प्रागादिषु क्रमात् ।
शमीखदिरमायूरश्रीवृक्षास्त्वग्निकोणतः ।।
प्रधानेऽपि पलाशः स्याच्छतं वार्धं तदर्धकम् ।
हुत्वा पूर्णां ततो दत्त्वा तत्त्वतत्त्वेश्वरान्प्रति ।।
मूर्तिमूर्तीश्वरोपेतं प्रत्येकं चाहुतित्रयम् ।
हुत्वा घोराणुना होमं निच्छिद्रार्थं शतं द्विजाः ।।
स्पृष्ट्वा मूर्धादिपादान्तं शान्तितोयेन सेचयेत् ।
ततश्चान्तर्बलिं बाह्यबलिं दत्त्वा शुचिर्गुरुः ।।
रात्रिशेषं व्यपोह्याथ'
(*उत्तरकामिके* ६६.५८ —६४ पू०)
[44]०मादाय —आ, इ, ई

समिदाज्यचरूँल्लाजां[45]स्तिलांश्चाप्यात्मपूर्वकैः[46] ।
मन्त्रैस्तु पञ्चभिः सर्वकुण्डेष्वपि च होमयेत् ॥२१॥
प्रत्येकं शतमर्धं वा; प्रागादिषु [47]समिद्भवेत् ।
प्लक्षोदुम्बर[48]काश्वत्थवटजा च ततः क्रमात् ॥२२॥
[49]विद्याङ्गैः [50]षड्भिराज्येन प्रत्येकं तु दशाहुतीः ।
[51]जुहुयात् [52]सर्वकुण्डेषु हृदादीनि च संस्पृशेत् ॥२३॥
प्रतिमायाः क्रमान्मन्त्रं प्रतिव्याहृत्यनन्तरम् ।
परिषिच्य ततो वह्निं सर्वकुण्डेषु रक्षयेत् ॥२४॥

[कुम्भतोयाभिषेकः]

[53]प्रभाते कृतनित्यस्तु होतृभिः सह देशिकः ।
प्रविश्य मण्डपं तत्र [54]घटानर्चां[55] च पूजयेत् ॥२५॥
ततः [56]सर्वेषु कुण्डेषु समिद्धे पावके ततः ।
सर्वात्महृदयेनैव कृत्वा पूर्णाहुतिं ततः ॥२६॥

---

[45] तिलं चापि . . . ।—इ
[46] पूर्वकम्—आ, ई, उ
[47] समुद्भवेत्—आ, इ, ई
[48] माश्वत्थवटजं च—इ; मश्वत्थवटजा च—आ;
मश्वत्थवटजाश्च—ई, उ
[49] विद्या . . . ष्टिराज्येन—इ;
'शिवास्त्रं पशुपत्यस्त्रं ब्रह्मास्त्रं क्षुरिकास्त्रकम् ।
व्योमास्त्रमित्यघोरास्त्रमेतद्विद्याङ्गमीरितम् ॥'
(*वातुलशुद्धे* ८.४३ उ०, ४४ पू०);
एतद्विषये मतङ्गपारमेश्वरे क्रियापादे १.१११उ०
—११४ श्लोकास्तदीयवृत्तयश्च द्रष्टव्याः ।
[50] षष्टिराज्येन—ई, उ
[51] हुत्वा कुण्डेषु सर्वेषु—उ
[52] कुण्डेषु सर्वेषु—ई; कुण्डसर्वेषु—'उ' पाठान्तरम् ।
[53] 'प्रभाते स्थापनं कुरु ।
देशिको होतृभिः सार्धं स्नानं पूर्ववदाचरेत् ॥
ऋत्विग्भिः सममाचार्यः पूजयेत्पूर्ववत्ततः ।
शयनाद् बिम्बमुद्धृत्य वस्त्रादीनि विसर्जयेत् ॥
गन्धपुष्पादिभिश्चैव पूजयेत्पुरुषेण तु ॥
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
पूर्णाहुतिं च शिरसा हुत्वाग्निं च विसर्जयेत् ॥
उद्धृत्य शयनाद्बिम्बं स्नानवेद्यां तु विन्यसेत् ॥
पूर्वोदितेन मार्गेण घृतेनैव शिरोऽर्पणम् ।
कुम्भमुद्धृत्य बिम्बाग्रे स्थापयेत्स्थण्डिलोपरि ॥
कुम्भाद्बीजं समादाय प्रतिमाहृदि विन्यसेत् ।
तत्तत्कुम्भोदकैः स्नाप्य गन्धपुष्पादिभिर्यजेत् ॥
नैवेद्यं दापयित्वा तु ताम्बूलं तु निवेदयेत् ।
भक्तानां परिचाराणां यथायुक्त्या प्रपूजयेत् ।
भक्तानां स्थापनं प्रोक्तं यथाशास्त्रं प्रजापते ॥'
(*पूर्वकारणे* ८८.२४ उ०—३१);
'ततः प्रभाते विमले पूर्णाहुतिमथाचरेत् ।
स्नानवेद्यां समानीय तस्याग्रे [ङ्गे ?] तु विशेषतः ।
पूर्ववद्विन्यसेद्विद्वान्पञ्चविंशतितत्त्वकम् ॥
प्रतिष्ठाकुम्भमादाय दक्षिणे तु विशेषतः ।
प्रासादेन तु मन्त्रेण स्नापयेन्मानुषं ततः ॥
वामकुम्भं ततोद्धृत्य शिवबीजेन स्नापयेत् ।
पूर्वादीशानपर्यन्तं मानुषं सूक्तमुच्चरन् ॥
स्नापयेद्विधिना चैव गन्धैः पुष्पैश्च पूजयेत् ।
पायसान्नं निवेदित्वा [निवेद्याथ ?] ताम्बूलं
दापयेत्ततः ॥
(*सन्तानसंहितायां* ३६.३२—३६ पू०)
[54] घटानां पूजनं चरेत्—उ
[55] अर्चा=प्रतिमाम् इत्यर्थः ।
[56] कुण्डेषु सर्वेषु—ई, उ

प्रतिमां [५७]तत उत्थाप्य त्यक्त्वा कूर्चं [५८]सवस्त्रकम् ।
स्नानवेद्यां तु विन्यस्य [५९]गन्धोदेनाभिषिच्य च ।।२७।।
पञ्चब्रह्म समुच्चार्य ततस्तं घटपञ्चकम् ।
प्रतिमादिक्रमेणैव समुद्धृत्य प्रदक्षिणम् ।।२८।।
प्रतिमां तामुपावृत्य [६०]घटान्वै स्थण्डिले [६१]तथा ।
यथापूर्वं तु विन्यस्य [६२]कृतविद्यातनुर्गुरुः ।।२९।।
शिवाङ्गैर्ब्रह्मभिश्चैव ततः कुम्भेषु पूजयेत् ।
आत्मतत्त्वादिचित्तान्तान्गन्धपुष्पादिभिः क्रमात् ।।३०।।
ततः [६३]कूर्चसृतेनैव [६४]मन्त्रांस्तोयेन देशिकः ।
[६५]प्रतिमाहृदि विन्यस्य [६६]पञ्चकात्सुसमाहितः ।।३१।।
तैस्तोयैरभिषेकं च तैर्मन्त्रैः परिकल्पयेत् ।
तस्य मूर्ध्नि ततो [६७]धीमानीशानं मुद्रया न्यसेत् ।।३२।।
मुखे तत्पुरुषं चैव हृदयेऽघोरमेव च ।
गुह्ये वामं ततः [६८]सद्यं पादयोरुभयोरपि ।।३३।।
प्रणवेन शिरस्यर्घ्यं दत्त्वाङ्गानि यथाक्रमम् ।
[६९]हृत्पूर्वाणि न्यसेद्धीमान्पूर्वोक्तानि समाहितः ।।३४।।

[प्रतिमास्थापनम्]

[७०]ततस्तां वस्त्र[७१]माल्याद्यैरलङ्कृत्य विशेषतः ।
सर्वातोद्यसमायुक्तं कृत्वा [७२]धामप्रदक्षिणम् ।।३५।।
शिवाग्रे स्थाप्य तन्मूर्ध्नि भस्म मूलेन दापयेत् ।

[देवपार्श्वसंस्थितभक्तप्रतिमास्थापनम्]

भक्तप्रतिकृतिर्या तु [७३]संस्थिता देवपार्श्वतः ।।३६।।

---

[५७]तां तदुत्थाप्य—आ; तां तथोत्थाप्य—ई, तां ततोत्थाप्य—उ
[५८]सकूर्चकम्—ई
[५९]गन्धतोयैरभिषिच्य च—ई; सुतोयैरभिषिच्य च—उ
[६०]घटाग्रे—आ, इ
[६१]च ताम्—आ, इ
[६२]विद्यातत्त्वतनू कृतिः—आ
[६३]कूर्चं तु तेनैव—आ; कूर्चस्मृतेनैव—ई; कूर्चस्तृतेनैव—उ
[६४]मन्त्रं तोयेन—इ
[६५]प्रतिमां हृदि—आ, इ
[६६]पञ्चमात् सुसमाहितः—इ; पञ्चमान् सुसमाहितः—ई, उ
[६७]देवानीशान . . . दया—आ; धीमान् . . . मुद्रया— इ; देवानीशानं मुद्रया—ई; देवानीशानमुद्रया—उ;
[६८]सौम्यं—आ, 'उ' पाठान्तरम्; सद्यः—इ
[६९]हृत्पर्वाणि—इ
[७०]ततस्तान्—ई, उ
[७१]मालाद्यै—आ
[७२]धाम्नः प्रदक्षिणम्—आ; धाम्नि प्रदक्षिणम्—ई
[७३]संस्थितां—इ

तस्यास्तु स्थापने [74]कुर्यान्नयनोन्मीलनादिकम् ।
[75]सर्वं सहैव; होमे तु देवहोमादनन्तरम् ॥३७॥
तस्मिन्कुण्डे [76]घृतेनैव प्रत्येकं तु [77]दशाहुतीः ।
पूर्वोक्तैः पञ्चभिर्मन्त्रैर्जुहुयाच्छेषं[78] समं भवेत् ॥३८॥
[79]एवं यः कुरुते कर्ता सर्वान्कामानवाप्य सः ।
मोदते रुद्रसामीप्यं लब्ध्वान्ते रुद्रसद्मनि[80] ॥३९॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे] नरप्रतिष्ठाविधिः
[चतुष्षष्टितमः] पटलः ।

---

[74]कुर्यादागमोक्तविधानतः —उ
[75]३७ उ०, ३८ पू० श्लोकार्धे 'उ' मातृकायां न दृश्येते ।
[76]वृतेनैव —इ, ई
[77]दशाहुतिः —आ; दशाहुतिम् —इ, ई
[78]जुहुयाच्चेशं —इ, ई
[79]अयं श्लोकः 'उ' मातृकायामेव दृश्यते ।
[80]अत्र मातृकायां 'रुद्रसन्निधिं' इति पाठो दृश्यते । ४१.६८ श्लोकमनुसृत्यात्र पाठः साधितः ।

[पञ्चषष्टितमः पटलः]

[1] [हर्म्यसम्प्रोक्षणविधिः]

[2] [सम्प्रोक्षणं चतुर्विधम्]

अतः परं प्रवक्ष्यामि हर्म्यसम्प्रोक्षणं परम् ।
आवर्तं चेत्यनावर्तं पुनरावर्तनं तथा ।।१।।
अन्तरितं हि विज्ञेयं प्रोक्षणं तु चतुर्विधम्[3] ।

---

[1] अयं पटलः 'अ' मातृकायां परं दृश्यते ।; एतद्विषये *अंशुमदागमे* ६४, *उत्तरकामिके* ३४, *पूर्वकारणे* १३७, *दीप्ते* ६४ पटला द्रष्टव्याः ।

[2] संप्रोक्षणमहं वक्ष्ये श्रूयतां रविसत्तम ।
आवर्तं प्रथमं चैव अनावर्तं द्वितीयकम् ।।
तृतीयं पुनरावर्तं चान्तरीतं चतुर्थकम् ।
कर्षणादिप्रतिष्ठान्तमावर्तं चेति कीर्तितम् ।।
प्रायश्चित्तादिकं चैव अनावर्तं तथोच्यते ।
प्रत्यङ्गोपाङ्गहीने च बेरचित्रादिहीनके ।।
स्थलकर्मविहीने च पिण्डिकाब्जविहीनके ।
भूषणायुधहीने च प्रोक्षणं चान्तरीतकम् ।।
पुनरावर्तकं चैव द्विविधं चेति कीर्तितम् ।
युगे युगे तु सम्पूज्य जीर्णे कालान्तरे गते ।।
प्रासादं पतितं चैव लिङ्गं चलनसंयुतम् ।
स्थानशुद्धिं समावाह्य बालबिम्बे तु योजयेत् ।।
प्रासादं पूर्ववत्कृत्वा सम्प्रोक्षणमथाचरेत् ।
एवं क्रमेण विधिवद्विशालार्थविधिं शृणु ।।
अविशालविशालार्थं मानोत्कृष्टं च कारयेत् ।
मूलालयात्समावाह्य बालबिम्बे तु योजयेत् ।।
पञ्जरं लिङ्गमित्याहुः शिवं चैव तु कीरवत् ।
तच्छक्तिं घटमध्ये च बालबिम्बे तु योजयेत् ।।
तल्लिङ्गे तच्छिवं चैव भावयेच्चैत्रपक्षिवत् ।
लिङ्गपञ्जरमेवं च योजयेद्दारुपञ्जरे ।।
तस्मात्तद्रक्षितं चैव शुकपञ्जरनामतः ।
विप्रवाक्यं शुभं योग्यं कारयेत्तु विशालकम् ।।
शिल्पिस्पर्शनमेवं च मानोत्कृष्टं च कारयेत् ।
नित्यपूजाविहीने च सर्वकर्मविहीनके ।।
तस्मात्सर्वप्रयत्नेन प्रासादं चैव कारयेत् ।
उद्वास्य शिल्पिनं पश्चान्मार्जनं प्रोक्षणं ततः ।।
(*अंशुमदागमे* ६४.१—१३);

[3] सम्प्रोक्षणविधिं वक्ष्ये सर्वदोषनिकृन्तनम् ।
आवर्तं चेत्यनावर्तं पुनरावर्तनं तथा ।।
ततोऽन्तरितकं चेति प्रोक्षणं तु चतुर्विधम् ।
मूलबालगृहान्मूलस्थाने यत्स्थापनं मतम् ।।
तदावर्तमिति प्रोक्तमनावर्तं तथोच्यते ।
पतितैः पातकैः स्पृष्टे चण्डालैरन्त्यजैस्तथा ।।
मासोर्ध्वपूजाहीने च विश्लिष्टे स्थलकर्मणि ।
लिङ्गे पीठे च चलिते अनावर्तमिति स्मृतम् ।।
मूलालयात्समादाय स्थाप्य बालालये पुनः ।
तस्मात्संस्थापनं मूले पुनरावर्तनं स्मृतम् ।।
प्रतिमानां च मिश्राणां शक्तीनामायुधादिभिः ।
स्फोटने वर्णहीने च अङ्गोपाङ्गविहीनके ।।
चर्मच्छेदेऽस्त्रहीने च भूषणादिविहीनके ।
अम्बुजासनहीने च स्थलकर्मविहीनके ।।
विश्लिष्टे पीठबन्धे तु तदन्तरितमुच्यते ।
यात्राहोमयुगावर्तमन्ये स्युस्तद्विहीनकाः ।।
आवर्ते तु द्विजाः सर्वान्मासपक्षर्क्षकादिकान् ।
लिङ्गसंस्थापनस्योक्तमार्गेणैव समाचरेत् ।।
न तिथिर्न च नक्षत्रं न वाराद्यंशकादिकाः ।
कालापेक्षां विना कुर्याच्छेषाण्यन्यानि सुव्रताः ।।
आवर्तवदनावर्तं कुर्यादेभिर्विहीनकम् ।
लक्षणोद्धारणं तोयाधिवासः शयनं तथा ।।
अनावर्तमिति ज्ञेयं पुनरावर्तनं त्विह ।
सर्वमावर्तवत्कुर्यात्किं तु मूलद्वयान्वितम् ।।
ततोऽन्तरितकं विप्राः संक्षेपेण वदाम्यहम् ।
रत्नन्यासाक्षिमोक्षौ च जले चैवाधिवासनम् ।।

[सम्प्रोक्षणफलम्]

सर्वपापविनाशेन[४] सर्वप्राणिसुखावहम् ।।२।।

[कालापेक्षां विना कर्तव्यं सम्प्रोक्षणम्]

न तिथिर्न च नक्षत्रं[५] कालापनयनं विना[६] ।
[७]चतुर्मूर्त्यष्टमूर्त्योर्वा नासिकायास्तथैव च ।।३।।
[८]वर्णभेदेऽन्यभेदे वा चूलिकायास्तथैव च ।
[९]तत्र योग्यानि[१०] कर्माणि [११]कारयेत्तु विचक्षणः ।।४।।

शय्याधिवासनं विप्रा विना वै बेरकर्मणि ।
नववस्त्रेण संवेष्ट्य बेरस्य सकलाङ्गकम् ।।
प्रागुक्तविधिना कुम्भन्यासं होमं च कारयेत् ।
स्नपनं कारयेदन्ते चान्यत्सर्वं समानकम् ।।'
(*उत्तरकामिके* ३४.१ – १५)
अतः परं प्रवक्ष्यामि शिवसम्प्रोक्षणं शुभम् ।
आवर्तं चेत्यनावर्तं पुनरावर्तकं स्मृतम् ।।
अन्तरितं हि विज्ञेयं प्रोक्षणं तु चतुर्विधम् ।
आद्यं बालगृहाद्देवं मूलस्थाने प्रतिष्ठितम् ।।
तदावर्तमिति ज्ञेयमनावर्तमथ शृणु ।
प्रायश्चित्तार्थकं यत्र प्रोक्षणं तु विधीयते ।।
अनावर्तमिति ज्ञेयं पुनरावर्तकं शृणु ।
प्रासादे पतिते भिन्ने लिङ्गे च चलिते तथा ।।
मूलालयात्समादाय स्थाप्यं बालगृहे ततः ।
तस्मान्मूलप्रवेशे तु पुनरावर्तकं स्मृतम् ।।
वर्णस्फोटनविच्छिन्ने प्रत्यङ्गोपाङ्गहीनके ।
वस्त्राभरणहीने तु पीठाम्बुजविहीनके ।
स्थलकर्मविहीने च प्रोक्षणं चान्तरीतकम् ।
आवर्तस्यायनं पक्षत्रृक्षवारादिकान् क्रमात् ।।
लिङ्गसंस्थापने प्रोक्तमार्गेणैव समाचरेत् ।
आवर्तस्यैमवाख्यातमनावर्तमथ शृणु ।।
न तिथिर्न च नक्षत्रं न कालोऽपि तथैव च ।
कालापेक्षां विना कुर्यादनावर्तमिति स्मृतम् ।
पुनरावर्तकस्यैव मासपक्षर्क्षकादिभिः ।।
पुनरावर्तकं कुर्यात्तथान्तरितकं स्मृतम् ।
यात्राहोमयुतं कर्म त्वन्येषां तु विहीनकम् ।।
(*पूर्वकारणे* १३७.१ – ११पू०)
'अतः परं प्रवक्ष्यामि जलसम्प्रोक्षणं शुभम् ।
त्रिविधं प्रोक्षणं वक्ष्ये शृणु त्वं हि महानल ।।
आवर्तं चेत्यनावर्तं पुनरावर्तनमेव च ।
आद्यं बालगृहाद्देवं मूलस्थाने प्रतिष्ठितम् ।।
तदावर्तमिदं प्रोक्तमनावर्तमिदं शृणु ।
चण्डालैः शिल्पिभिः स्पृष्टे पतितैः पातकैरपि ।।
मासादूर्ध्वपदं तत्र पूजाहीने विशेषतः ।
अनावर्तमिदं प्रोक्तं पुनरावर्तकं शृणु ।।
मूलालयात्समानीय प्राप्य बालगृहं ततः ।
तस्मान्मूलालये स्थाप्यं पुनरावर्तकं स्मृतम् ।।
यात्राहोमयुगावर्तमनावर्तं विहीनकम् ।
क्षणहोमयुतं वह्ने पुनरावर्तकं स्मृतम् ।।'
(*दीप्ते* (टि० १५) ६६.१ – ६)

[३]चतुर्विधानां प्रोक्षणानां विवरणं न दृश्यते ।

[४]विनाशं च – अ

[५]अत्र 'अपेक्ष्यते' इति पदमध्याहृत्य व्याख्येयम् ।

[६]न काले तु नयो विना – अ

[७]चतुर्मूर्तीरष्टमूर्तिं वा – अ; चतुः संख्याका मूर्तिः चतुर्मूर्तिः । अष्टसंख्याका मूर्तिरष्टमूर्तिः । मध्यमपदलोपिसमासः । चतुर्मूर्त्यष्टमूर्तिविषये *रौरवोत्तरे* द्वितीयतृतीयपटलौ द्रष्टव्यौ ।

[८]वर्णभेदादिभेदं वा – अ

[९]तथा – अ

[१०]चान्येन – अ

[११]अत्र शिल्पिनेति शेषः ।

[शिल्पिना भिन्नमूर्त्यादीनां सन्धाने सम्प्रोक्षणम्]

शिल्पिस्पर्शे तु [12]षण्मासे सन्धानं चैव कारयेत्।
अत ऊर्ध्वं न कर्तव्यं तदन्ते प्रोक्षणं गुरुः[13] ।।५।।

[सन्धानकाले बालालये करणीया पूजा]

[14]मूर्तिः सन्धान[15]योग्या चेत्तरुणालयमुत्तमम्[16]।
आवाहनक्रमेणैव [17]बालस्थानं प्रवेशयेत् ।।६।।
यथा सम्पूजयेद्देवं तथा कुम्भं सुपूजयेत्।
विना नित्याग्निकार्येण नैवेद्यं दापयेद्बुधः ।।७।।

[18] [विमानपालाः]

चण्डरुद्रो [19] महावेगो विबुधोऽविह्वलोत्तमः[20]।
विश्वरूपो विशालाक्षो भूधरो मेघवाहनः ।।८।।
[21]एतान्विमानपालांश्च[22]पूर्वादिषु क्रमान्न्यसेत्।

[दिङ्मूर्तीनां पूजा]

[23]दिगीशप्रतिमाः कृत्वा [24]निष्कार्धार्धतदर्धकैः ।।९।।
उमया सहितं पूर्वे[25] दक्षिणे लकुलीश्वरम्।
पश्चिमे तु गजारूढं कङ्कालं [26]चोत्तरे तथा ।।१०।।
पूर्वादिषु[27] क्रमान्न्यस्य अर्चयेत्स्वस्वनामतः।
हर्म्यबेरेण तद्देवान्नेत्रोन्मीलनकर्मणि ।।११।।

---

[12]षण्मासं —अ
[13]अत्र कुर्यादिति शेषः।
[14]इति —अ
[15]योग्यश्चेत् —अ
[16]अत्र कल्पयेदिति शेषः।; तरुणालयविषये *रौरवे* क्रियापादे २७.५—८पू०, ४६उ०—५० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः।
[17]बालस्थाने —अ; अत्र 'मूर्तिं' इत्यध्याहृत्य व्याख्येयम्।
[18]'विश्वरूपो विशालाक्षो विबुधोऽविह्वलस्तथा।
चण्डरुद्रो महावेगो भूधरो मेघवाहनः।
एतद्विमानपालांश्च पूर्वादिकलशे न्यसेत् ।।'
(दीप्ते ६४.२४ उ०, २५)
[19]महामोढो —अ; दीप्तागममनुसृत्यात्र विमानपालानां नाम शोधितम्।
[20]विन्यलोत्तमः —अ
[21]एते विमानपालाश्च —अ
[22]पूर्वादीनि —अ; अत्र 'दिक्षु' इति पदमध्याहृत्य व्याख्येयम्।
[23]दिगीशप्रतिमान् कृत्वा —अ
[24]निष्कमर्धं तदर्धकम् —अ
[25]पूर्वं —अ
[26]चोत्तरीं न्यसेत् —अ
[27]पूर्वादीनि —अ; अत्र 'दिक्षु' इति पदमध्याहृत्य व्याख्येयम्।

जलाधिवासं शयनं रक्षासूत्रं [२८]विना भवेत् ।
[२९]तन्मासे चैव कर्तव्यमुत्तमं तु विधीयते ॥१२॥
अत [३०]ऊर्ध्वं च कर्माणि[३१] पुनरावाहनं कुरु ।
श्रेष्ठं च सौरमासे तु चान्द्रमासे तु मध्यमम्[३२] ॥१३॥
मासद्वयं विमाने न मासषट्कं विधीयते ।
षण्मासान्ते च कर्तव्यं सम्प्रोक्षणमथाचरेत् ॥१४॥

[मण्टपकल्पनं तत्र कुण्डकल्पनं च]

[३३] प्रासादस्य चतुर्दिक्षु अथवाप्यग्रकेऽपि वा ।
मण्टपं कल्पयेद्धीमान्पूर्वोक्तविधिना सह ॥१५॥
पञ्चाग्निं [३४]वाथ एकाग्निं [३५]कुण्डे वा स्थण्डिलेऽपि वा ।
[३६]पर्यग्निकरणं कृत्वा वास्तुपूजां विचक्षणः[३७] ॥१६॥

[३८] [कुम्भस्थापनं तत्पूजा च]

उमया सहितं चैव[३९] [४०]शवर्गान्तं समुच्चरन्[४१] ।
अभितः कलशानष्टौ [४२]विद्येशानां स्वनामतः[४३] ॥१७॥

---

[२८]विता भवेत्—अ
[२९]उन्मासं—अ
[३०]ऊर्ध्वे—अ
[३१]अत्र कर्तव्यानि कर्माणि कुर्यादिति व्याख्येयम् ।
[३२]मध्यमे—अ
[३३]'प्रासादस्य चतुर्दिक्षु सप्तहस्तेन मण्डपान् ।
कारयेत्तु पृथग्वह्ने दर्पणोदरसन्निभम् ॥
ध्वजदामवितानैश्च दर्भमालातरङ्गकैः ।'
'प्रासादाभ्यन्तरे धीमान् वास्तुहोमं समाचरेत् ।
पर्यग्निकरणं कृत्वा पुनः पुण्याहमाचरेत् ॥'
(दीप्ते ६४.३, ४ पू०, ७)
[३४]वायमेकाग्निं—अ
[३५]कुण्डं—अ
[३६]एतद्विषये *रौरवे* क्रियापादे ५३.१४उ०–२४पू० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।
[३७]अत्र 'कुर्यात्' इति पदमध्याहृत्य विचक्षणः वास्तुपूजां कृत्वा पर्यग्निकरणं कुर्यादितिव्याख्येयम् ।
[३८]'स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैः पृथक् पृथक् ।
तण्डुलैः शोभितं कृत्वा तिलदर्भैः परिस्तरेत् ॥
कलशाँल्लक्षणोपेतान्गन्धवारिप्रपूरितान् ।
सकूर्चान्सापिधानांश्च ससूत्रान्वस्त्रसंयुतान् ॥
स्थापयित्वार्चयेद्धीमान्वेदिकोपरि मध्यमे ।
मध्ये कुमारकुम्भः स्यात्तस्य बीजमुदाहरन् ॥
अग्निवर्गादिमं बीजं पञ्चमस्वरसंयुतम् ।
बिन्दुनादसमायुक्तं कौमारं बीजमुत्तमम् ॥
षणमुखं च सुरेशानं सेनापतिं सुराग्रकम् ।
गजेन्द्रं हरिरूपं च सुब्रह्मण्यं गुहं क्रमात् ॥
पूर्वादिकलशे न्यस्त्वा पूजयेत्तु स्वनामतः ।
दक्षिणे वेदिकामध्ये दक्षिणामूर्तिकुम्भकम् ।
यवर्गस्याष्टमं बीजं प्रलयाग्निसमन्वितम् ॥
औकारस्वरसंयुक्तं बिन्दुनादसमन्वितम् ।
अभितः कलशानष्टौ विद्येश्वरसमन्वितम् ॥
स्थापयित्वा स्वनाम्ना तु पूजयेत्तु विधानतः ।
पश्चिमे वेदिकामध्ये स्थाप्य विष्णुमयं घटम् ॥
सकूर्चं सापिधानं तु सवस्त्रं बीजसंयुतम् ।
सप्तवर्गाच्चतुर्थं तु तृतीयस्वरसंयुतम् ॥
बिन्दुनादसमायुक्तं विष्णुबीजमनुस्मरन् ।
अभितः कलशानष्टौ स्थापयेद्वारिपूरितान् ॥

लकुलीशेन संयुक्तं सप्तवर्गतृतीयकम्[४४] ।
[४५]कलशानष्ट विन्यस्य पूर्वोक्तविधिना सह[४६] ।।१८।।
पुरन्दरस्य देवस्य प्रथमस्य तृतीयकम्[४७] ।
[४८]तत्तत्कुम्भाष्टकं न्यस्य तत्तन्मन्त्रेण पूजयेत् ।।१९।।
कङ्कालमूर्तेरेवं तु [४९]प्रथमं स्वरसंयुतम्[५०] ।
अष्टविद्येश्वरान् कुम्भे स्वस्वनाम्ना तु पूजयेत् ।।२०।।

[होमः[५१]]

वेदिकापञ्चकुण्डेषु[५२] पूर्वोक्तविधिना सह ।
[५३]समिधा हृदयेनैव आज्यं घोरेण होमयेत्[५४] ।।२१।।
चरुं हुत्वा विशेषेण बहुरूपेण मन्त्रतः ।
तिलमीशानमन्त्रेण हुत्वा मुद्गं तु नेत्रतः ।।२२।।

संकर्षणं च प्रद्युम्नमनिरुद्धाच्युतौ तथा ।
प्रभविष्णुं महाविष्णुं पुरुषं सत्यकं न्यसेत् ।।
पूजयित्वा यथान्यायं स्वस्वबीजेन देशिकः ।
उत्तरे वेदिकामध्ये न्यसेद्ब्रह्ममयं घटम् ।
षष्ठवर्गतृतीयं तु मायानलसमन्वितम् ।।
बिन्दुनादसमायुक्तं ब्रह्मबीजमुदाहृतम् ।
अभितः कलशानष्टौ विन्यसेद्वारिपूरितान् ।।
प्रजापतिं च धातारं विधातारं पितामहम् ।
हिरण्यगर्भं यमं धौतं स्रष्टारं क्रमशो न्यसेत् ।।
पूजयित्वा स्वनाम्ना तु गन्धपुष्पादिना बुधः ।
शिवाग्रे स्थण्डिलं कृत्वा पूर्वोक्तविधिना सह ।।
विद्यातत्त्वमयं कुम्भं बीजेन सह विन्यसेत् ।
यवर्गस्याष्टमं बीजं षष्ठस्वरसमन्वितम् ।।
ओङ्कारस्वरसंयुक्तं बिन्दुनादसमन्वितम् ।
अभितः कलशानष्टौ स्थापयेत्तु विचक्षणः ।।
विश्वरूपो विशालाक्षो विबुधोऽविह्वलस्तथा ।
चण्डरुद्रो महावेगो भूधरो मेघवाहनः ।।
एतद्विमानपालांश्च पूर्वादिकलशे न्यसेत् ।
पूजयित्वा स्वनाम्ना तु गन्धपुष्पादिभिः क्रमात् ।।'
(दीप्ते ६४.८ – २७)

[३९]सहितेनैव – अ
[४०]यवर्गान्तं – अ
[४१]तस्य कुम्भं स्थापयेदिति शेषः ।
[४२]विद्येशान् स्वस्वनामतः – अ
[४३]अत्र स्थापयेदिति शेषः ।
[४४]अष्टवर्गात् तृतीयकम् – अ
[४५]कलशानष्टकं न्यस्त्वा – अ
[४६]विद्येशान् पूजयेदिति शेषः ।
[४७]समुच्चरन् तस्य कुम्भं स्थापयेदिति शेषः ।
[४८]अत्र विद्येशकुम्भाष्टकं इति व्याख्येयम् ।
[४९]कवर्गप्रथमं ककारमित्यर्थः ।
[५०]अत्र 'कं' इत्युच्चरन् तस्य कुम्भं स्थापयेदिति शेषः ।
[५१]तस्याग्रे स्थण्डिलं कृत्वा निर्दोषैः सिकतैस्तथा ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।।
पलाशखदिराश्वत्थप्लक्षन्यग्रोधमेव च ।
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ।।
पूर्वादिषु चतुर्दिक्षु जुहुयात्खदिरादिभिः ।
पलाशं स्थण्डिले हुत्वा हृदयेन तु मन्त्रतः ।।
अयं कुमारेतिमन्त्रेण पूर्वायां दिशि होमयेत् ।
होमयेद् दक्षिणे कुण्डे कद्रुद्रायेति मन्त्रतः ।।
प्लक्षं वै वारुणे हुत्वा इदं विष्णिवति मन्त्रतः ।
होमयेदुत्तरे कुण्डे ब्रह्मजज्ञानमन्त्रतः ।।
तत्तद्ब्रह्माङ्गकैर्हुत्वा घृतं गव्यं स्वरेण तु ।
चरुं हुत्वा तु शिरसा लाजं तु शिखया हुनेत् ।।
तण्डुलैस्तिलसम्मिश्रैर्होमयेद्बहुरूपिणा ।
एवं जागरणं रात्रौ'
(दीप्ते ६४.२६ उ० – ३३ पू०)

[५२]कुम्भे तु – अ
[५३]समिधे – अ
[५४]हूयते – अ

[५५]पलाशसमिधा चैव [५६]द्रव्यान्ते व्याहृतीर्हुनेत् ।
[५७]चतुर्दिक्षु [५८]चतुर्वेदैः कुर्याददध्ययनं ततः ॥२३॥
वेष्टनं [५९]रक्तवस्त्रेण स्थूप्यन्तं कल्पयेद्बुधः ।
पूर्वेद्युरधिवासः स्यात्[६०]'

[प्रातः सम्प्रोक्षणप्रकारः[६१]]

'प्रभाते प्रोक्षणं कुरु ॥२४॥
पञ्चकुम्भान्समादाय धामप्रदक्षिणं गुरुः[६२]
तत्तत्कुम्भोदकेनैव [६३]तत्तन्मूर्तीस्सुयोजयेत् ॥२५॥
मध्यकुम्भोदकेनैव स्थूप्यन्तं प्रोक्षयेद्बुधः ।
सुमुहूर्तेऽप्युक्तराशौ[६४] लग्न[६५]शुद्धिस्तथा भवेत् ॥२६॥
तत्तत्स्थाने तु सम्प्रोक्ष्य तत्तत्कुम्भजलेन तु ।
[६६]प्रधानकुम्भोदेनैव दर्पणं चाभिषेचयेत् ॥२७॥
बहुरूपेण मन्त्रेण प्रोक्षयेद्दोषशान्तये ।
गन्धपुष्पादिभिः पूज्य [६७]धूपदीपादि दापयेत् ॥२८॥

---

[५५]अत्र मन्त्रभागो लुप्तः ।

[५६]द्रव्यान्तं—अ

[५७]'स्नानत्रयं ततः कृत्वा आचार्यो मूर्तिपैः सह ।
स्थानशुद्धिं ततः कृत्वा प्रोक्षयेत्पुरुषेण तु ॥
दर्भमालाभिरावेष्ट्य प्रासादं तन्तुना सह ।
स्थूप्यग्रादन्तपर्यन्तं वस्त्रैर्हर्म्यं सुवेष्टयेत् ॥'
(दीप्ते ६४.५, ६)

[५८]चतुर्वेदी—अ

[५९]रक्तवस्त्रेण संवेष्ट्य—अ

[६०]वासस्य—अ

[६१]'प्रभाते स्नापनं कुरु ।
आचार्यो मूर्तिपैः सार्धं स्नानत्रयमथाचरेत् ॥
पूर्वं सम्पूजयेल्लिङ्गं मूर्तिकुम्भांस्तु पूजयेत् ।
जयादिरभ्यातानं च स्विष्टान्तं होममाचरेत् ॥
विद्यातत्त्वमयं कुम्भं शिरसा धारयेद्गुरुः ।
धामप्रदक्षिणं कुर्याद्घोषेण स्वस्तिवाचकैः ॥
ततः प्रासादमारुह्य स्थूपिकायां सुविन्यसेत् ।
सुमुहूर्ते सुलग्ने च नक्षत्रकरणान्विते ॥
कुम्भाद्बीजं समादाय स्थूपिकायां न्यसेत्क्रमात् ।
कुम्भोदकेन संस्नाप्य स्थूपीं व्योमेति मन्त्रतः ॥
पूर्वाद्यष्टदले धीमान्न्यसेच्च लोकपालकान् ।
कुम्भोदकेन संस्नाप्य शिखरं नासिकान्वितम् ॥
गन्धपुष्पादिना पूज्य बलिं तेभ्यो निवेदयेत् ।
बीजं कुमारकुम्भात्तु कुमारस्य हृदि न्यसेत् ॥
दक्षिणामूर्तिकुम्भात्तु बीजं मूर्तिहृदि न्यसेत् ।
विष्णुकुम्भात्तु तद्बीजं विष्णोश्च हृदि विन्यसेत् ॥
ब्रह्मकुम्भात्परं बीजं ब्रह्मणो हृदि विन्यसेत् ।
दिशाकुम्भं समुद्धृत्य प्रासादस्याभिषेचनम् ॥
अष्टादशगणानां तु परितो बलिमाचरेत् ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥
दक्षिणां गुरवे दद्याद्यथावित्तानुसारतः ।
मूर्तिपान्पूजयेत्तत्र दैवज्ञमपि पूजयेत् ॥
ब्राह्मणान्भोजयेत्तत्र मूर्तिपान्गुरुणा सह ।
इहैव धनवाञ्छ्रीमान्सोऽन्ते सायुज्यमाप्नुयात् ॥
(दीप्ते ६४.३३—४४)

[६२]अत्र कुर्यादिति शेषः ।

[६३]तत्तत्कुम्भान्—अ

[६४]मुहूर्तेन्यूर्ध्वराश्ये—अ

[६५]शद्धिशुचिर्भवेत्—अ

[६६]नान्यकुम्भोदकेनैव—अ

[६७]हृदयादीनि—अ

मूललिङ्गे च [६८]हर्म्ये च नैवेद्यं दापयेद्बुधः ।
उपचाराणि सर्वाणि ताम्बूलादीनि दापयेत् ॥२९॥
आचार्यदक्षिणां दद्याद्वस्त्रहेमाङ्गुलीयकैः ।
शक्त्या दानादिकं कृत्वा ब्राह्मणान्भोजयेत्ततः ॥
इहैव धनवान्श्रीमान्देहान्ते मोक्षमाप्नुयात् ॥३०॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे] हर्म्यसंप्रोक्षणविधिः
[पञ्चषष्टितमः] पटलः[६९] ।

---

[६८]हर्म्ये इत्यस्य पदस्य लक्षणया हर्म्यस्थबिम्बे इत्यर्थो व्याख्येय इति भाति ।

[६९]अस्मिन् पटले '९' श्लोकस्योत्तरार्धप्रभृति पटलान्तं विद्यमानाः श्लोकाः अर्थानुगुण्येन पाठसंशोधनपूर्वकं स्थानविपर्ययं कृत्वा सम्पादिताः । मातृकायां विद्यमानानुपूर्वीपरिज्ञानाय स भागोऽत्र यथावस्थितं विलिख्य नियोजितः ॥

'प्रासादस्य चतुर्दिक्षु अथवाप्यत्र केऽपिवा ॥९॥
उमया सहितेनैव यवर्गान्तं समुच्चरन् ।
अभितः कलशानष्टौ विद्येशान् स्वस्वमानतः ॥१०॥
मण्टपं कल्पयेद्धीमान् पूर्वोक्तविधिना सह ।
लकुलीशेन संयुक्तं अष्टवर्गात्तृतीयकम् ॥११॥
कलशानष्टकं न्यस्त्वा पूर्वोक्तविधिना सह ।
पुरन्दरोऽथ देवेन प्रथमस्य तृतीयकम् ॥१२॥
तत्तत्कुम्भाष्टकं न्यस्त्वा तत्तन्मन्त्रेण पूजयेत् ।
कङ्कालमूर्तिरेवं तु प्रथमस्वरसंयुतम् ॥१३॥
अष्टविद्येश्वरान् कुम्भान् स्वस्वनाम्ना तु पूजयेत् ।
उमया सहितं पूर्वं दक्षिणे लकुलीश्वरम् ॥१४॥
पश्चिमे तु गजारूढं कङ्कालं चोत्तरीं न्यसेत् ।
पूर्वादीनि क्रमान्न्यस्त्वा अर्चयेत्स्वस्वनामतः ॥१५॥
हर्म्यबेरेण तद्देवान् नेत्रोन्मीलनकर्मणि ।
जलाधिवासं शयनं रक्षासूत्रं विना भवेत् ॥१६॥
उन्मासं चैव कर्तव्यम् उत्तमं तु विधीयते ।
अत उर्ध्वं च कर्माणि पुनरावाहनं कुरु ॥१७॥
श्रेष्ठं च सौरमासे तु चान्द्रमासे तु मध्यमे ।
मासद्वयविमानेन मासे षट्कं विधीयते ॥१८॥
षण्मासान्ते च कर्तव्यं सम्प्रोक्षणमथाचरेत् ।
पर्यग्निकरणं कृत्वा वास्तुपूजां विचक्षणः ॥१९॥
पञ्चाग्निं वायमेकाग्निं कुण्डं वा स्थण्डिलेऽपि वा ।
दिगीशप्रतिमान् कृत्वा निष्कमर्धं तदर्धकम् ॥२०॥
वेदिकापञ्चकुम्भे तु पूर्वोक्तविधिना सह ।
समिधे हृदयेनैव आज्यं घोरेण हूयते ॥२१॥
चरुं हुत्वा विशेषेण बहुरूपेण मन्त्रतः ।
तिलमीशानमन्त्रेण हुत्वा मुद्गं तु नेत्रतः ॥२२॥
पलाशसमिधां चैव द्रव्यान्तं व्याहृतिं हुनेत् ।
रक्तवस्त्रेण संवेष्ट्य स्थूप्यन्तं कल्पयेद्बुधः ॥२३॥
पूर्वेद्युरधिवासस्य प्रभाते प्रोक्षणं कुरु ।
पञ्चकुम्भान् समादाय धामप्रदक्षिणं गुरुः ॥२४॥
तत्तत्कुम्भोदकेनैव तत्तत्कुम्भान् सुयोजयेत् ।
मध्यकुम्भोदकेनैव स्थूप्यन्तं प्रोक्षयेद्बुधः ॥२५॥
मुहूर्तेन्यूर्ध्वराश्ये लग्नशुद्धिशुचिर्भवेत् ।
तत्तत्स्थाने तु सम्प्रोक्ष्य तत्तत्कुम्भजलेन तु ॥२६॥
नान्यकुम्भोदकेनैव दर्पणं चाभिषेचयेत् ।
बहुरूपेण मन्त्रेण प्रोक्षयेद्दोषशान्तये ॥२७॥
गन्धपुष्पादिभिः पूज्य हृदयादीनि दापयेत् ।
मूललिङ्गे च हर्म्ये च नैवेद्यं दापयेद् बुधः २८॥
उपचाराणि सर्वाणि ताम्बूलादीनि दापयेत् ।
चतुर्दिक्षु चतुर्वेदी कुर्यादध्ययनं ततः ॥२९॥
आचार्यदक्षिणां दद्यात् वस्त्रहेमाङ्गुलीयकैः ।
शक्त्या दानादिकं कृत्वा ब्राह्मणान् भोजयेत्ततः ॥३०॥
इहैव धनवान् श्रीमान् देहान्ते मोक्षमाप्नुयात् ।
इत्यजिताख्ये महातन्त्रे हर्म्यसंप्रोक्षणविधिः
अष्टचत्वारिंशः पटलः ।'

[[1]षट्षष्टितमः पटलः]

[वृषदानविधिः]

[2][वृषदानफलम्, दानयोग्यवृषलक्षणं च]

वृष[3]दानमथो वक्ष्ये सर्वकामार्थसाधनम् ।
दत्त्वा [4]वृषं ककुद्मन्तं शिवस्य परमात्मनः ।।१।।
सर्वयज्ञफलं प्राप्य शिवलोके महीयते ।
ब्राह्मणः [5]कापिलं दद्याद्वृषं श्वेतमथापि वा ।।२।।
क्षत्रियो रक्तवर्णं[6] तु [7]धूम्रवर्णं वणिक् तथा ।
[8]शूद्रस्तु कृष्णं; सर्वेषां [9]कृष्णवर्णः शुभप्रदः ।।३।।
[10]अरोगी हृष्टपुष्टाङ्गः पीनोन्नतककुत्तमः[11] ।
[12]नाङ्गहीनं [13]न चैवोग्रं दद्याद् [14]देवाय [15]प्रीतये ।।४।।

[[16]वृषदानकालः, तद्दानविधिश्च]

उत्तरायणकाले तु माघमासविवर्जिते[17] ।
शुभवारसमायुक्ते शुक्लपक्षे [18]ददेद्वृषम् ।।५।।

---

[1] अयं पटलः आ, इ, ई, उ, ऊ मातृकासु दृश्यते।; एतद्विषये *उत्तरकामिके* ९२, ९५ पटलौ; *शिवधर्मे* पूर्वे ८, १० अध्यायौ; *शिवधर्मोत्तरे* १२ अध्यायश्च द्रष्टव्याः।

[2] 'वृषभं परिपूर्णाङ्गमुदारं च शशिप्रभम् ।।
गोपतिं धूर्वहं चापि शिवाय विनिवेदयेत् ।
यावन्ति तस्य रोमाणि तत्प्रसूतिकुलेषु च ।।
तावद्युगसहस्राणि रुद्रलोके महीयते।'
(*शिवधर्मे* पूर्वे ८.४७ उ० –४९ पू०);
'यः प्रदद्यात्सुधवलं शिवं ध्यात्वा महावृषम् ।।
विस्तीर्णोरस्कमुच्चं च समुन्नतबृहत्कटिम् ।'
(*शिवधर्मोत्तरे* १२.१५० उ० , १५१ पू०)

[3] दानमतो –इ; दानं ततो –ऊ

[4] वृषं ककुम्भं तं –इ; वृषभयुग्मं तं –ई; वृषभ कुद्मन्तं –उ

[5] कपिलां –आ, इ, उ; कपिला –ऊ

[6] वर्णां –आ

[7] धूम्रवर्णां –आ; धूम्रे वैश्यक्रमं तथा –ऊ

[8] शूद्रास्तु –आ

[9] कृष्णवर्णं शुभप्रदम् –आ, ई, उ, ऊ; कृष्णवर्णां शुभप्रदाम् –इ

[10] आरोग्यहृष्टपुष्टाङ्गपी० –आ, इ, ई, उ, ऊ

[11] ककुत्तरम् –आ, इ, उ, ऊ

[12] नागहीनं –आ; अङ्गहीनं –ऊ

[13] नवैवे दत्वा –आ; न चोग्रं तु दत्वा –इ; न वै वोग्रं दत्वा –ई; नवै चोग्रं दत्वा –उ; न चै वोग्रं दत्वा –ऊ

[14] देवस्य –ई

[15] सिद्धये –आ, इ, उ, ऊ

[16] 'प्रतिमासं प्रवक्ष्यामि शिवव्रतमिहोत्तमम् ।
धर्मार्थकाममोक्षार्थं नरनार्यादिदेहिनाम् ।।
पुष्यमासे तु सम्प्राप्ते यः कुर्यान्नक्तभोजनम् ।
जितेन्द्रियः सत्यवादी शालिगोधूमगोरसैः ।।
पक्षयोरष्टमीं यत्नादुपवासेन वर्तयेत् ।
त्रिसंध्यमर्चयेदीशमग्निकार्यं च शक्तितः ।।
भूमिशायी तु मासान्ते पौर्णमास्यां घृतादिभिः ।
कृत्वा स्नानं महापूजां शिवे यत्नात्प्रकल्पयेत् ।।

दिवसे पुण्यलग्ने तु तद्विधानमथोच्यते ।
शिवक्षेत्रसमीपे तु स्नापयित्वा वृषं ततः ।।६।।

नैवेद्यं यावकप्रस्थं क्षीरसिद्धं निवेदयेत् ।
भोजयेच्च द्विजानष्टौ शिवभक्तान्सदक्षिणम् ।।
शिवायैवं गोमिथुनं कापिलं च निवेदयेत् ।
अलङ्कृत्य सुरूपं च तस्य पुण्यफलं शृणु ।।
सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामिकैः ।
रुद्रकन्यासमाकीर्णैर्महावृषभसंयुतैः ।।
सङ्गीतनृत्तवाद्याद्यैरप्सरोगणसेवितैः ।
चामरैर्धूयमानश्च स्तूयमानः सुरासुरैः ।।
त्रिणेत्रः शूलपाणिश्च शिवैश्वर्यसमन्वितः ।
गच्छेच्छिवपुरं रम्यं यत्रास्ते शंकरः स्वयम् ।।
यावत्तद्रोमसंख्यानं तत्प्रसूतिकुलेषु च ।
तावद्युगसहस्राणि सुखी शिवपुरे वसेत् ।।
त्रिसप्तकुलजैः सार्धं भोगान्भुङ्क्ते यथेच्छया ।
ज्ञानयोगं समासाद्य स तत्रैव विमुच्यते ।।
योगाद्दुःखान्तमाप्नोति ज्ञानाद्योगः प्रवर्तते ।
शिवधर्मोद्भवं ज्ञानं शिवधर्मः शिवार्चनात् ।।
इत्येष वः समाख्यातः संसारार्णववर्तिनाम् ।
शिवमोक्षक्रमोपायः शिवाश्रमनिषेविणाम् ।।
माघमासे शुभे प्राप्ते यः कुर्यान्नक्तभोजनम् ।
कृसरं घृतसंयुक्तं भुञ्जानः संयतेन्द्रियः ।।
सोपवासश्चतुर्दश्यां भवेदुभयपक्षयोः ।
शिवाय पौर्णमास्यन्ते प्रदद्याद्घृतकम्बलम्
कृष्णगोमिथुनं चात्र सुरूपं विनिवेदयेत् ।
शेषं कृत्वा यथोद्दिष्टं पूर्वोक्तं लभते फलम् ।।
इन्द्रनीलप्रतीकाशैर्विमानैः सार्वकामिकैः ।
गत्वा शिवपुरं दिव्यं भोगान्भुङ्क्ते यथेप्सितम् ।।
सम्प्राप्ते फाल्गुने मासे यः कुर्यान्नक्तभोजनम् ।
श्यामाकक्षीरनीवारैर्जितक्रोधो जितेन्द्रियः ।।
चतुर्दश्यामथाष्टम्यामुपवासरतो भवेत् ।
पौर्णमास्यां महास्नानं पञ्चगव्यघृतादिभिः ।।
वल्मीकाग्रादिमृद्भिश्च गोमूत्रैर्गोमयादिभिः ।
त्वग्भिश्च क्षीरवृक्षाणां धात्रीगन्धादिभिः सह ।।
दद्याद्गोमिथुनं भक्त्या ताम्राभं परमेष्ठिने ।
शेषमन्यद्यथोद्दिष्टं कृत्वाप्नोति महत्फलम् ।।
पद्मरागप्रतीकाशैर्विमानैः सार्वकामिकैः ।
गत्वा शिवपुरं दिव्यं पूर्वोक्तं लभते फलम् ।।
चैत्रमासे शुभे प्राप्ते यः कुर्यान्नक्तभोजनम् ।
पिष्टकं पयसा युक्तं भुञ्जानो विजितेन्द्रियः ।।
दद्याद्गोमिथुनं चात्र पाटलं समलङ्कृतम् ।
शिवायातिसुरूपं च शेषं पूर्ववदाचरेत् ।।
पुष्परागप्रभैर्यानैर्दिव्याश्वगणसंयुतैः ।
यायाच्छिवपुरं दिव्यं दुष्प्रापमकृतात्मभिः ।।
वैशाखमासे सम्प्राप्ते यः कुर्यान्नक्तभोजनम् ।
शाल्यन्नं क्षीरसंयुक्तं भुञ्जानः संयतेन्द्रियः ।।
गोष्ठशायी शिवध्यायी निशायामेकवस्त्रधृत् ।
नियमं च यथोद्दिष्टं सर्वं सम्यक् समाचरेत् ।।
वैशाखपौर्णमास्यां तु कृत्वा स्नानं घृतादिभिः ।
शिवायालङ्कृतं श्वेतं दद्याद्गोमिथुनं शुभम् ।।
हिमकुन्देन्दुवर्णाढ्यैर्महायानैरलङ्कृतैः ।
सुश्वेतवृषसंयुक्तैः प्रयातीश्वरमन्दिरम् ।।
सर्वातिशायिरूपाभिः स्त्रीभिश्च परिवारितः ।
नीलोत्पलसुगन्धाभिः क्रीडते कालमक्षयम् ।।
ज्येष्ठमासे शुभे प्राप्ते यः कुर्यान्नक्तभोजनम् ।
शाल्यन्नमम्भसा धौतमाज्यक्षीरविवर्जितम् ।।
विरसानि तु रात्रौ स्याद्दिवा गामनुगच्छति ।
हितकारी गवां नित्यमहङ्कारविवर्जितः ।।
पौर्णमास्यां च पूर्वोक्तं कुर्यात्स्नानादिकं विधिम् ।
देयं गोमिथुनं चैव धूम्रवर्णमलङ्कृतम् ।।
नीलोत्पलदलप्रख्यैर्महायानैर्मनोरमैः ।
महासिंहनिबद्धैश्च क्रीडते कालमक्षयम् ।।
आषाढे सुशुभे प्राप्ते यः कुर्यान्नक्तभोजनम् ।
भूरिखण्डाज्यसम्मिश्रं सक्तुमद्यात्सगोरसम् ।।
दद्याद्गोमिथुनं गौरं शिवायालङ्कृतं शुभम् ।
सामान्यं च विधिं सर्वं यः कुर्यात्प्राक्प्रचोदितम् ।।
शुद्धस्फटिकसङ्काशैर्यानैः सारसवाहनैः ।
अणिमादिगुणैर्युक्तः शिववद्विचरेत्स्वयम् ।।
सम्प्राप्ते श्रावणे मासे यः कुर्यान्नक्तभोजनम् ।
क्षीरषाष्टिकभक्तेन सर्वभूतहिते रतः ।।
श्वेताग्रपादं पौण्ड्रं च दद्याद्गोमिथुनं शिवे ।
सामान्यमखिलं कुर्याद्विधानं यत्प्रकीर्तितम् ।।

सितेन वाससा [19]कण्ठे [20]बद्ध्वानीय शिवास्त्रतः[21] ।
[22]शिवगायत्रिमन्त्रेण प्रोक्षयित्वा वृषं ततः ।।७।।
[23]यज्ञवृक्षसमुद्भूते स्तम्भे तं [24]बन्धयेद्दृढा ।
चतुस्तालसमुत्सेधे षोडशाङ्गुलनाहके ।।८।।
देवाग्रे दक्षिणे वाथ [25]स्थापिते सुदृढं यथा ।
तस्य [26]तत्रामिता दूर्वा दद्याद्गायत्रिया[27] तदा[28] ।।९।।

सुविचित्रैर्महायानैर्विचित्राश्वनियोजितैः ।
गत्वा शिवपुरं रम्यं पूर्वोक्तं लभते फलम् ।।
प्राप्ते भाद्रपदे मासे यः कुर्यान्नक्तभोजनम् ।
हुतशेषं प्रभुञ्जानो वृक्षमूलाश्रितो दिवा ।।
रात्रौ चायतने वासी सर्वभूतानुकम्पकः ।
नीलस्कन्धं वृषं गां च शिवाय विनिवेदयेत् ।।
निशाकरकरप्रख्यैर्वज्रवैडूर्यशोभितैः ।
चक्रवालसमायुक्तैर्विमानैः सार्वकामिकैः ।।
गत्वा शिवपुरं दिव्यममरासुरवन्दितः ।
स क्रीडते महाभोगैर्यावदाभूतसंप्लवम् ।।
प्राप्ते चाश्वयुजे मासे यः कुर्यान्नक्तभोजनम् ।
घृतोदनं प्रभुञ्जानः प्रसन्नात्मा जितेन्द्रियः ।।
वृषभं नीलवर्णं च उरोदेशे समुन्नतम् ।
विमुच्य दद्याद्रुद्राय गामेकामप्यलङ्कृताम् ।।
विधिशेषमशेषेण पूर्वोक्तं समुपाचरेत् ।
प्राणान्ते च शिवस्थानं प्रयाति शिववत्सुखी ।।
स्वच्छमौक्तिकसङ्काशैरिन्द्रनीलोपशोभितैः ।
जीवजीवकसंयुक्तैर्विमानैः सार्वकामिकैः ।।
संक्रीडते महाभोगैर्यावदाभूतसंप्लवम् ।
प्राप्ते तु कार्तिके मासे यः कुर्यान्नक्तभोजनम् ।।
क्षीरोदनं प्रभुञ्जानः सत्यवादी जितेन्द्रियः ।
दद्याद्गोमिथुनं चात्र कापिलं च ज्वलत्प्रभम् ।।
पूर्वोक्तं च विधिं कुर्याच्छिवतुल्यबलो भवेत् ।
कल्पानलसमप्रख्यैर्महायानैर्महाबलैः ।।
महासिंहकृताटोपैः शिववच्चेष्टते सुखी ।
मार्गशीर्षे शुभे मासे यः कुर्यान्नक्तभोजनम् ।।
यवान्नं पयसा युक्तं भुञ्जानः संयतेन्द्रियः ।
दद्याद्गोमिथुनं दिव्यं पाण्डरं समलङ्कृतम् ।।
शिवाय शेषं पूर्वोक्तविधिना समुपाचरेत् ।
सितपद्मनिभैर्यानैः श्वेताश्ववरसंयुतैः ।।
गत्वा शिवपुरं दिव्यं शिवतुल्यबलो भवेत् ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दमो दया ।।
त्रिःस्नानं चाग्निहवनं भूशय्या नक्तभोजनम् ।
पक्षयोरुपवासेन चतुर्दश्यष्टमीषु च ।।
इत्येवमादिक्रियया संचरेत्तु शिवव्रतम् ।'

(*शिवधर्मे* पूर्वे १०.४०—९६ पू०)

[17]मासं विसर्जयेत्—इ

[18]शुभे दिने—ऊ

[19]कण्ठो . . . य—आ; कण्ठे स्वाध्वीनय—इ; कर्णोद्ध्वाध्नीनय—उ

[20]बध्वानय—ऊ

[21]शिवाग्रतः—इ, ई, उ, ऊ

[22]शिवगायत्री :—तन्महेशाय विद्महे महादेवाय धीमहि
तन्नः शिवः प्रचोदयात्'
(*कामिकागमे* पूर्वभागे पृ० १६)

[23]वज्रवृक्ष—आ, ई, ऊ

[24]बद्धये—इ

[25]स्थापितेषु दृढं—आ, ई

[26]त . . मिता दूर्वा—आ; तत्रामितान् जप्यान्—इ; तद्रामितां दूर्वां—ई; तत्रामिचा दूर्वे—ऊ

[27]०द्गायत्र्या—ई; वृषगायत्री :—
अजिते ४६.५ श्लोकस्तदीयटिप्पणी च द्रष्टव्ये ।

[28]तथा—ऊ

ततस्तस्य [29]खुरौ शृङ्गे कल्पयेत्स्वर्णवेष्टितौ ।
लम्बयेच्च ततोऽस्त्रेण [30]घण्टां कण्ठे च चामरम् ॥१०॥
पृष्ठे च [31]कुथमाधाय [32]तनुत्राणेन वस्त्रजम् ।
तं बद्ध्वा वस्त्रयुग्मेन सितेनास्त्रं समुच्चरन् ॥११॥
वृषेन्द्रमूर्ध्नि तन्मूलमन्त्रेणार्घ्यं तु विन्यसेत् ।
चतुरश्रे तु [33]देवाग्रे कुण्डे वा स्थण्डिलेऽपि वा ॥१२॥
विधिनाग्निं [34]समाधाय समिदाज्यचरून्क्रमात्[35] ।
माषंमुद्गकुलुत्थांश्च[36] दूर्वांश्चापि[37] समूलकैः[38] ॥१३॥
[39]अङ्गैः षड्भिर्वृषेन्द्रस्य जुहुयात्तदनन्तरम्[40] ।
ततश्च वृष[41]गायत्र्या तं स्पृष्ट्वा तु दशाहुतीः[42] ॥१४॥
वृषेन्द्रं जुहुयात्पश्चात्पूर्णां मूलेन[43] होमयेत् ।
ततो देवं तु [44]संस्नाप्य सहस्रादिषु सम्भवैः ॥१५॥
कलशैरथ सम्पूज्य विशेषादर्चयेच्छिवम् ।
ततो वृष[45]प्रदाने तु कारयित्वा प्रदक्षिणम् ॥१६॥
वृषेण सह देवाग्रे स्थाप[46]यित्वा च [47]तौ तदा ।
जपेन्मन्त्रमिमं[48] मन्त्री देवस्य पुरतः स्थितः ॥१७॥

---

[29]खुरे शृङ्गौ —आ; खुरशृङ्गके —ई;
'वृषं मणिरथो [सरो] पेतं घण्टाचामरकान्वितम् ॥
स्वस्तिकैरर्धचन्द्रैश्च नानारत्नैश्च शोभितम् ।'
'कार्यं शृङ्गद्वयं तस्य सवस्त्रं चामरान्वितम् ।
पट्टं शिरसि सौवर्णं चन्द्र [भूषण] भूषितम् ॥
चामराश्वत्थपत्रैश्च बध्नीयाद्रत्नसंयुतम् ।
ग्रैवेयकेन दिव्येन नानारत्नोपशोभितम् ॥'
'खुरैः सौवर्णकाद्यैश्च केयूराङ्गदभूषितम् ॥
पट्टवस्त्रैर्विचित्रैश्च यथाशोभमलङ्कृतम् ।'
'दोधूयमानचमरैः शिवाय विनिवेदयेत् ।'
(*शिवधर्मोत्तरे* १२.१५३ उ०, १५४ पू०; १५७, १५८; १५९ उ०, १६० पू०, १६१ पू०)
[30]घण्टां घण्टे च —इ, ई, उ; घण्टावर्णैश्च —ऊ
[31]कृतमाधाय —आ; कुसुमादाय —इ; कुतमायाथ —ई; कुतमाधाय —उ; गुदमाधाय —ऊ
[32]तनुस्त्राणेन —आ, उ
[33]वेदाश्रे —आ, ई; वेदाग्रे —इ, उ, ऊ
[34]समादाय —ऊ
[35]०चरुक्रमात् —उ
[36]०कुलुत्थानि —ई; कुलस्थांश्च —उ, ऊ
[37]दूर्वांश्चापि —आ; पूर्वां चापि —इ; दूर्वाणि च —ई; दूर्वाभिश्च —ई पाठान्तरम्; दूर्वां चापि —उ, ऊ
[38]समूलिकैः —उ
[39]अङ्गेष्वभिवृषे० —आ; अङ्गषड्भिः वृषे० —ऊ
[40]तदन्तरे —आ, इ, ई, उ, ऊ
[41]०गायत्रीमास्पृष्ट्वा —आ, इ, उ; ०गायत्र्या मा सृष्ट्वा —ई; ०गायत्रीमङ्गं स्पृष्ट्वा —ऊ; वृषगायत्री — अजिते ४६.५ शलोकस्तदीयटिप्पणी च द्रष्टव्ये ।
[42]दशाहुतिः —आ, उ; दशाहुतिम् —इ, ई, ऊ
[43]पूर्णांमूलेन —ई
[44]संस्थाप्य —आ
[45]०प्रदानेऽपि —आ, उ; ०प्रधानेऽपि —ई; ०प्रदानोऽपि —'ई' पाठान्तरम्
[46]यित्वा तथा तदा —आ, ऊ; यित्वाथ तौ तदा —इ, उ
[47]तौ=वृषं यजमानं च
[48]०मिदं —ई, ऊ

ककुद्मन्तममुं देव[49] समुत्सृष्टमनेन तु[50] ।
[51]त्वदर्थं प्रतिगृह्यैनमनु[52]गृह्णीष्व सर्वदा ॥१८॥
[53]एवमुच्चार्य [54]मन्त्रज्ञोऽप्युत्सृजेति प्रदापयेत् ।
[55]उत्सृष्टे तु वृषे तस्मिन्देशिकं [56]वृषदोऽर्चयेत् ॥१९॥

[57]इत्यजिताख्ये महातन्त्रे [क्रियापादे] [58]वृषदानविधिः
[षट्षष्टितमः] पटलः ।

---

[49]देवं —आ, इ, ई, उ, ऊ
[50]तत् —ऊ
[51]तदर्धेर्थप्रतिगृह्येत० —आ, उ; तदर्धे . . . न० —इ; तदर्धं प्रतिगृह्येत० —ई; तदर्थेन शिवज्ञानं अनु० —ऊ
[52]०गृह्य सर्वदा —आ; ग्रहणिषु सर्वदा —ऊ
[53]हरमु० —आ
[54]मन्त्रज्ञ उत्सृजेति तदा० —इ; मन्त्रज्ञो व्युत्सृजेति —ई; मन्त्रज्ञो मुत्सृजेति तदा० —ऊ
[55]सृष्टे तु वृषभे तस्मिन् —ऊ
[56]पृष्ठतो —आ, ई
[57]इत्यजिते वृषदानविधिपटलः —ई
[58]वृषदानविधिपटलः —आ; वृषदानपटलः —इ, उ; वृषदानपटलः षट्षष्टितमः श्लोकः एकोनविंशत् —ऊ

[सप्तषष्टितमः पटलः]

[1] [प्रदक्षिणनमस्कारविधिः]

[2] [प्रदक्षिणं त्रिविधम्]

[3]प्रदक्षिणनमस्कारविधिं वक्ष्ये समासतः ।
तयोः प्रदक्षिणं तावत्त्रिविधं परिकीर्तितम् ॥१॥
आद्यं [4]प्रदक्षिणाख्यं स्याद्देवाय परिकल्पितम् ।
सव्यापसव्यमन्यच्च सर्वाङ्गैः स्यात्तृतीयकम् ॥२॥
तेषु प्रदक्षिणं [5]त्वाद्यं प्रादक्षिण्येन कल्पितम् ।
सव्यापसव्यतः [6]सोमसूत्रालङ्घनतः कृतम् ॥३॥
सव्यापसव्यमित्युक्तं दीक्षितानां तु तद्भवेत् ।
अङ्गप्रदक्षिणं यत्तत्सर्वाङ्गैः परिकल्पितम् ॥४॥

[7] [प्रदक्षिणे संख्यानुसारेणोत्तमादित्वकथनम्]

एकत्रिपञ्चसप्ताद्यैः [8]कारयेदोजसंख्यया ।

---

[1]अयं पटलः आ, इ, ई, उ, ऊ मातृकासु दृश्यते ।; एतद्विषये *अंशुमदागमे* ३४, ५२ पटलौ द्रष्टव्यौ । तथा *स्वायंभुवे* (टि० २४७) ३२५—३३२ पृष्ठेषु विद्यमानः प्रदक्षिणनमस्कारविधिपटलश्च द्रष्टव्यः ।

[2]'इन्द्रादिचेन्द्रपर्यन्तं सव्यप्रदक्षिणं कुरु ।
सव्यं प्रदक्षिणं प्रोक्तमपसव्यविधिं शृणु ।
यथासव्यप्रकारेणापसव्यं समाचरेत् ।
अपसव्यविधिः प्रोक्तः सव्यापसव्य[कं] शृणु ।
वृषभाच्चण्डदेशं तु पुनर्वृषं तथैव च ।
सव्यान्तं सोमसूत्रान्तमपसव्यं वृषं तथा ।
चण्डं च सोमसूत्रान्तं पुनश्चण्डं वृषं तथा ।
सव्यापसव्यमेवोक्तम्'

(*अंशुमदागमे* (टि० ९५७) पृ० ११५);

'तत् प्रदक्षिणं त्रिविधम् । सव्यमपसव्यं सव्यापसव्यं चेति । देवं स्वस्य दक्षिणभागे कृत्वा क्रियमाणं सव्यम् । तद्विपरीतमपसव्यम् । उभयं मिलितं सव्यापसव्यम् । त्रिविधमपि इन्द्रदिगादीन्द्रदिक्पर्यन्तं कर्तव्यम् । सव्यापसव्यं सोमसूत्रस्थानादि सोमसूत्रस्थानान्तं वा कर्तव्यम् ।'

(*शिवार्चनचन्द्रिका* पृ० १००)

[3]प्रदक्षिणे नमस्कारं—ऊ

[4]प्रदक्षिणं संख्याद्देवाय—ऊ

[5]चाद्यं—आ, ई

[6]सोमसूत्रालम्बनतत्कृतम्—आ; सोमसूत्रलङ्घनतत्कृतम्—इ; सोमसूत्रालङ्घनतत्कृतम्—उ; सोमः तत्र . . . नतत्कृतम्—ऊ

[7]'प्रदक्षिणत्रयं कुर्यात्सर्वकामार्थसाधनम् ।
पञ्चप्रदक्षिणफलं विजयप्रदमीरितम् ।
सप्तभिः शत्रुनाशः स्यान्नवभिः पुत्रवर्धनम् ।
एकादशभिरायुष्यं त्रयोदशभिरीप्सितम् ।
श्रीपदं पञ्चदशभिः स्यात्सप्तदशवर्धनम् ।
एकोनविंशतेरुक्तमारोग्यं व्याधिनाशनम् ।
एकविंशतिभिः पुंसां विद्यावृद्धिर्भविष्यति ।
त्रयोविंशत्पञ्चविंशत्फलं सौख्यं बलं क्रमात् ।
इति काम्यार्थिभिः कार्यं नित्यमेवं प्रदक्षिणम् ।'

(*स्वायम्भुवे* (टि० २४७) पृ० ३२९)

[8]कारयेद्दोष०—ऊ

एकविंशति[9]संख्याभिरुत्तमं तु प्रदक्षिणम् ।।५।।
तिथि[10]संख्याकृतं [11]मध्यमधमं मुनिसंख्यया ।
पञ्चसंख्याकृतं यत्तदधमे मध्यमं भवेत् ।।६।।
[12]अधमाधममेवोक्तं गुणसंख्याकृतं तु यत् ।
[13]तस्मादप्यवरं प्रोक्तं कृतमेकं प्रदक्षिणम् ।।७।।

[14] [प्रदक्षिणकरणप्रकारः]

प्रदक्षिणप्रयोगे तु मृदुगत्या समाहितः ।
[15]दृष्ट्वा पूर्वं पदं [16]न्यस्य [17]हित्वा चान्याभिभाषणम् ।।८।।
[18]वेदमन्त्रं स्तवं वापि [19]गृणन्नेव समाचरेत् ।

[20] [प्रदक्षिणेऽधिकारिभेदेन स्थानभेदः]

सर्वेषां योग्यमाद्यं स्याच्छिवाय परिकल्पितम् ।।९।।
सव्यापसव्यमार्गेण पूजान्ते तु प्रदक्षिणम् ।

---

[9]संख्यादिरुत्तमं—आ, उ; . . . तरुत्तमं—इ; संख्यादि उत्तमं—ऊ
[10]संख्या तु तन्मध्ये अधमं—आ;
[11]'ई' मातृकायां '६' श्लोकस्य द्वितीयतृतीयपादौ न स्तः; 'मध्यमं' इत्यर्थे 'मध्यं' इति प्रयुक्तम् ।
[12]अधमे अधमं प्रोक्तं—आ; अधमादधमं प्रोक्तं—इ, उ; अधमाधमं प्रोक्तं—ऊ
[13]तस्मादप्यधमं—ई
[14]'पदात्पदान्तरं गच्छेत्करौ चलनवर्जितौ ।
स्तुतिर्वाचा हृदि ध्यानं चतुरङ्गं प्रदक्षिणम् ।।'
आत्मार्थपूजापद्धत्याम् (टि० ५५) ५९२ पृष्ठे 'अंशुमदागमे' इति निर्दिश्योद्धृतः;
'आसन्नप्रसवा नारी तैलपूर्णं यथा घटम् ।
वहन्ती शनकैर्याति तथा कुर्यात्प्रदक्षिणम् ।।'
(*स्वायम्भुवे* (टि० २४७) पृ० ३२६)
[15]दृष्टो पूर्वपदं न्यस्त्वा—आ; दृष्टिपूर्वं—इ;दृष्टे पूर्वं पदं न्यस्त्वा—उ; दृष्टे पूर्वपदं न्यस्त्वा—ऊ
[16]न्यस्त्वा—ई
[17]भित्त्वाथोऽन्याभि०—इ; हित्वाथोऽन्याभि०—उ
[18]वेदमन्त्रस्तवं—आ
[19]गृणन्नैव—आ, ऊ; गृणन्नेवं—इ, उ
[20]'अपसव्यं यतीनां तु सव्यं तु ब्रह्मचारिणाम् ।
सव्यापसव्यमार्गेण वानप्रस्थगृहस्थयोः ।।'
'गर्भे प्रदक्षिणं किन्तु पूजकस्य विधीयते ।
तत्रापि देवदेवस्य छायानिर्माल्यलङ्घनम् ।
सोमसूत्रं च तत्काले परिहृत्य समाचरेत् ।
सव्यापसव्यमार्गेण कर्तव्यं तत्प्रदक्षिणम् ।'
आत्मार्थपूजापद्धत्याम् ६०३तमे पृष्ठे 'स्वायम्भुवे' इति निर्दिश्यैते श्लोका उद्धृताः;
'सव्यापसव्यमार्गेण अन्तर्मण्डलके कुरु ।
बाह्यप्राकारदेशे तु सव्यमार्गं प्रदक्षिणम् ।।'
आत्मार्थपूजापद्धत्याम् ६०३तमे पृष्ठे 'कालोत्तरे' इति निर्दिश्यायं श्लोक उद्धृतः;
'तत्र सव्यं ब्रह्मचारिणामपसव्यं यतीनां सव्यापसव्यं गृहिवानप्रस्थयोरिति कश्चन पक्षः । सव्यं साधारणमपसव्यं यतीनामेव सव्यापसव्यं दीक्षितानामेवेत्यपरः पक्षः'
(*शिवार्चनचन्द्रिकायां* पृ० १००)

गर्भ[21]गेहेऽर्चकस्योक्तं ; दीक्षितस्यैव [22]बाह्यके ।।१०।।
प्रदक्षिणं [23]नृणां [24]नोक्तमन्तर्मण्डलके सदा ।

[25] [अङ्गप्रदक्षिणविधिः]

अङ्गप्रदक्षिणं [26]कुर्वन्कृत्वा भूमौ निजां तनुम् ।।११।।
दण्डवद्बाहुयुग्मेन सह बद्ध्वा [27]ततोऽञ्जलिम् ।
कृत्वा दण्डनमस्कारं शिवाग्रे तु सकृन्नरः ।।१२।।
प्रदक्षिणं तथा कुर्यादेकं वा त्रयमेव वा ।
[28]पञ्च वा सप्त वा चैव सर्वपापनिवृत्तये ।।१३।।
कृत्वा [29]पुनस्तथाग्रे[30] तु नमस्कारं च भक्तितः ।
उत्थाय प्रणतिं भूयो भूयः कृत्वा समापयेत् ।।१४।।

[31] [स्थानभेदेन प्रदक्षिणफले विशेषः]

कृत्वा प्रदक्षिणं [32]भक्त्या शिवस्यैकं समाहितः ।
अश्वमेधस्य यज्ञस्य सुखेन लभते फलम् ।।१५।।
[33]अन्तर्हारकृते[34] प्रोक्तं फलमेतत्प्रदक्षिणे[35] ।
त्रिगुणं [36]मध्यहारे तु [37]मर्यादायां चतुर्गुणम्[38] ।।१६।।
महामर्यादिके चैव [39]कृतं पञ्चगुणं भवेत् ।

---

[21]गेहे तु कस्योक्तं —इ
[22]वाह्यकैः —इ; बाह्यकैः —उ
[23]नृणानोक्ष अन्त —ऊ
[24]प्रोक्तमन्त० —ई
[25]कराग्रौ बन्धयित्वा तु पादौ स्वस्तिकमाचरेत् ।
नेमिवद्भ्रमणं कृत्वा प्रासादात्परितस्तथा ।।
अङ्गप्रदक्षिणं प्रोक्तमेवमेवं प्रदक्षिणम् ।
प्रदक्षिणसहस्रं स्यादेकमेकं प्रदक्षिणम् ।।'
आत्मार्थपूजापद्धत्यां ६०२तमे पृष्ठे 'अंशुमति' इति निर्दिश्योद्धृतौ;
'अङ्गप्रदक्षिणं चेत्तु शिवसायुज्यकारणम् ।
प्रदक्षिणसहस्रं स्यादेकमङ्गप्रदक्षिणम् ।।'
(*स्वायम्भुवे* (टि० २४७) पृ० ३२९)
[26]कुर्यात् —ऊ
[27]तताञ्जलिम् —इ, उ
[28]पञ्चमा सप्तमा —ऊ
[29]पुरस्तथा —ऊ
[30]तदाग्रे —इ
[31]'दशाश्वमेधजं पुण्यं गर्भगेहे प्रदक्षिणम् ।
तस्माद्दशगुणं पुण्यमन्तर्मण्डलदेशके ।
अन्तर्हारादिसालेषु तत्तद्दशगुणं भवेत् ।'
(*स्वायम्भुवे* (टि० २४७) पृ० ३२८)
[32]कृत्या —ऊ
[33]अन्तर्हाराकृते —इ, उ; अन्तर्हारकृता —ऊ
[34]०कृतं —आ
[35]प्रदक्षिणम् —आ, इ, उ, ऊ
[36]मध्यहारा तु —इ, उ, ऊ
[37]मर्यादायाः —आ; मध्यादायञ्चतु० —ऊ
[38]'इ' मातृकायाम् एतदनन्तरं वसन्तोत्सवपटले चतुर्थश्लोकस्य पूर्वार्धपर्यन्तं न दृश्यते। मातृकायामपि ग्रन्थपातः सूचितः ।
[39]फलं —ऊ

क्षेत्रावधिकृतं बाह्ये [60]भवेच्छतगुणं नृणाम् ।।१७।।
एवं प्रदक्षिणं [61]कुर्यात्'

[नमस्कारे त्रैविध्यम्[62]]

'[63]नमस्कारमथोच्यते ।
अष्टाङ्गमथ पञ्चाङ्गमेकाङ्गं त्रिविधं भवेत् ।।१८।।

[64][अष्टाङ्गनमस्कारः]

तेष्वष्टाङ्गमिदं विद्धि भूपृष्ठे दण्डवत्तनुम् ।
कृत्वा [65]बद्ध्वाञ्जलिं तत्र कराभ्यां प्रणमेत्पुरा ।।१९।।
शिरसा च ततः श्रोत्रनेत्रभ्रूहनुयुग्मकैः ।
दोर्भ्यां [66]हृद्देशतश्चापि भवेदष्टाङ्गमुत्तमम् ।।२०।।

[67][पञ्चाङ्गनमस्कारः]

पञ्चाङ्गमुच्यते तत्रा[68]प्यञ्जलिं प्रथमं[69] ततः ।
द्वितीयं शिरसा प्रोक्तं तृतीयं श्रोत्रयुग्मकम्[70] ।।२१।।
चतुर्थं चाङ्गयुग्मेन [71]हृद्देशेनापि [72]पञ्चमम् ।
एवं पञ्चाङ्गमुद्दिष्टमथ चैकाङ्गमुच्यते ।।२२।।

---

[60] भवच्छेदगुणं—ऊ
[61] कृत्वा—आ, ई, उ, ऊ
[62] 'एकाङ्गं च द्वयाङ्गं च त्रयाङ्गं पञ्चमाङ्गकम् ।
अष्टमाङ्गं क्रमेणैव तत्तत्फलमवाप्नुयात् ।।'
शिरसा तु नमस्कारमेकाङ्गमिति कीर्तितम् ।
शिरसा दक्षहस्तेन द्वयाङ्गं च भवेदिदम् ।।
करद्वयेन शिरसा त्रयाङ्गमिति कीर्तितम् ।
शिरसा पाणिपादैस्तु पञ्चाङ्गं दण्डवद्भवेत् ।।
शिरसा चिबुकेनैव श्रवणद्वयजानुके ।
करद्वयेन संयुक्तमष्टाङ्गमिति कीर्तितम् ।।'
(*अचिन्त्यविश्वसादाख्ये* (टि० ७) पृ० ८२०, ८२१);
'शिरो हस्तौ च कर्णौ च चिबुकं बाहुयुग्मकम् ।
अष्टाङ्गं तु नमस्कारं पञ्चाङ्गं च ततः शृणु ।
शिरो हस्तौ द्विजानू च भूमिस्थस्थितिकारणम् ।
पञ्चाङ्गं तु नमस्कारं त्रयाङ्गं च ततः शृणु ।
मुद्रां बद्ध्वा तु मुकुलीं मूर्धदेशे तु विन्यसेत् ।
त्रयाङ्गं च नमस्कारं सर्वपापहरं परम् ।'
'शिरोऽञ्जलिस्तु देवानां गुरूणां तु ललाटके ।
अन्येषामुरसि प्रोक्तं नमस्कारं त्रिधा मतम् ।।'
(*स्वायम्भुवे* (टि० २४७) पृ० ३३२; ३२७)
[63] नमस्कारशब्दोऽत्र क्लीबे प्रयुक्तः ।
[64] एतस्मिन्विषये शिवार्चनचन्द्रिकायां पृ० १०० द्रष्टव्यम् ।
[65] बद्धाञ्जलिं --आ, ई
[66] प्रदेशतश्चापि—ऊ
[67] एतस्मिन्विषये शिवार्चनचन्द्रिकायां १००, १०१ पृष्ठे द्रष्टव्ये ।
[68] ०प्यञ्जलिप्रथमं—ई, उ, ऊ
[69] अत्र 'कुर्यात्' इति शेषः ।
[70] अत्र 'भवेत्' इति शेषः ।
[71] हृद्देशेनाभि—आ, ई, उ
[72] पञ्चकम्—आ, ई

[53] [एकाङ्गनमस्कारः]

एकाङ्गं तु नमस्कारं शिरसैव कृतं भवेत् ।

[नमस्कारफलम्[54]]

भक्त्या कृत्वा नमस्कारं शिवस्याग्रे [55]सकृन्नरः ।।२३।।
अश्वमेधस्य यज्ञस्य लभते फलमुत्तमम् ।
[56]पञ्चाङ्गे त्रिगुणं प्रोक्तमष्टाङ्गेऽष्टगुणं भवेत् ।।२४।।
[57]शिवमुद्दिश्य यद्दत्तं कृतं [58]वा कर्म यद्भवेत् ।
भक्त्या कृतं च [59]तत्सर्वमनन्तगुणमुच्यते ।।२५।।
भक्ति[60]हीनैर्नरैः [61]शाठ्यादपि [62]वा या शिवे कृता ।
[63]नमस्क्रिया सकृद्वापि सर्वपापहरी भवेत् ।।२६।।
[64]तस्मान्नित्यं सकृद्भक्त्या यो लिङ्गं प्रणमेन्नरः ।
सर्वान्कामानवाप्यासौ शिवेन सह मोदते ।।२७।।

[मानुषादिलिङ्गविषये विशेषकालकृतप्रदक्षिणनमस्कारयोः फलम्]

अष्टम्यां च चतुर्दश्यां पञ्चदश्यां [65]त्रिजन्मनि ।

---

[53]एतस्मिन्विषये शिवार्चनचन्द्रिकायां पृ० १०१ द्रष्टव्यम् ।
[54]'नमस्कारः स्मृतो यज्ञः सर्वयज्ञोत्तमः शिवे ।।
नमस्कृत्वा महादेवमश्वमेधफलं लभेत् ।
प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत् ।।
स यां गतिमवाप्नोति न तां यज्ञशतैरपि ।
सर्वयज्ञोपवासेषु सर्वतीर्थेषु यत्फलम् ।।
स्तुतिजप्योपहारेण शिवे तत्फलमाप्नुयात् ।'
(*शिवधर्मे* पूर्वे ५.१६५ उ० —१६८ पू०);
'पशुः पशुपतेरग्रे दण्डवत्पतितो भुवि ।
पतन्ति पातकाः सर्वे नोत्तिष्ठन्ति पुनः सह ।'
(*स्वायम्भुवे* (टि० २४७) पृ० ३२६);
'पञ्चपातकदोषघ्नं सर्वयज्ञफलप्रदम् ।।
सर्वरोगविनाशार्थं नमस्कारमथाचरेत् ।'
(*अंशुमदागमे* ३४.१३०, २पू०);
'देहसंसक्तरेणूनां यावत्संख्याभिगण्यते ।
तावद्वर्षसहस्राणि शिवलोके महीयते ।'
(*आत्मार्थपूजापद्धत्याम्* (टि० ५५) ५८९तमे पृष्ठे 'अंशुमति' इति निर्दिश्योद्धृतः ।)
[55]तु तन्नरः —आ, ई, उ; कृतं नरः —ऊ
[56]पञ्चाङ्गत्रिगुणं —ई
[57]शिवामुद्दिश्य —उ
[58]वाक्कर्म —आ, ई, उ
[59]यत्सर्व० —आ, उ, ऊ; तत्सर्वमनन्तं —ई
तत्सर्वमनन्तं —ई
[60]०हीने नरे —ऊ
[61]शाम्यादपि —ऊ;
'अर्थातुरेण शाठ्येन परिहासेन मायया ।
नमस्कारे कृते लिङ्गे सर्वपापक्षयो भवेत् ।'
(*स्वायम्भुवे* (टि० २४७) पृ० ३२६)
[62]चाधः शिवे —उ
[63]नमस्कृत्वा —ई
[64]तस्माल्लिङ्गं —ई
[65]जन्मत्रयऋक्षेषु इत्यर्थ इति भाति ।

आर्द्रायामर्कवारे च करणे [66]विष्टिसंज्ञके[67] ।।२८।।
अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
[68]संक्रमे चोत्सवे चैव स्नात्वा कृत्वा प्रदक्षिणम् ।।२९।।
[69]प्रणमेद्यः शिवं भक्त्या सर्वकामानवाप्य सः ।
लभेच्छतगुणं पुण्यं केवलं नात्र संशयः ।।३०।।
मानुषस्य तु लिङ्गस्य [70]फलमुक्तं [71]प्रदक्षिणे ।
नमस्कारेण तस्माद्वै द्विगुणं [72]चार्षके भवेत् ।।३१।।
त्रिगुणं दैविके लिङ्गे फलं [73]गाणेश्वरे च तत् ।
चतुर्गुणं समुद्दिष्टं फलं पञ्चगुणं भवेत् ।।३२।।
स्वयंभूतस्य लिङ्गस्य तथा [74]संस्पर्शने [75]शतम् ।
[76]प्रवासी पथि कृत्वा तु शिवलिङ्गं प्रदक्षिणम् ।।३३।।
नमस्कृत्वा [77]च [78]पूर्वोक्तात्फलं पञ्चगुणं लभेत् ।

[पुण्यक्षेत्रकृतयोः प्रदक्षिणनमस्कारयोः फलम्]

[79]प्रदक्षिणनमस्कारौ पुण्य[80]कीर्तिषु कल्पितौ ।।३४।।
[81]क्षेत्रेषु [82]वाञ्छितां तस्य [83]ऋद्धिमाशु प्रयच्छतः[84] ।
आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान् ।।३५।।

---

[66]वृष्टि० —ऊ; विष्टिः =भवाद्येकादशकरणान्तर्गतसप्तमकरणम् ।
(*शब्दकल्पद्रुमे* विष्टिशब्दविवरणे)

[67]०संज्ञिके —उ; ०संज्ञकैः —ऊ

[68]संक्रमो —आ;
'उत्सवे बलिकाले तु यथा कुर्वन्प्रदक्षिणम् ।
पदे पदेऽश्वमेधस्य फलमाप्नोति मानवः ।'
(*आत्मार्थपूजापद्धत्यां* ५९५ पृष्ठे योगजे इति निर्दिश्योद्धृतः ।)

[69]प्रणमेत —आ; प्रणम्य तं —ई; प्रणम्येत —उ; प्रणमेत्य —ऊ

[70]फलमेतत् —ई

[71]प्रदक्षिणम् —आ, उ, ऊ

[72]चार्षसंज्ञके —ऊ

[73]अनेन गाणपलिङ्गं विवक्षितमिति भाति; गाणपलिङ्गविषये *रौरवे* क्रियापादे ३०.३ श्लोको *अजिते* ३०.९ श्लोकश्च द्रष्टव्यः; गाणैश्वरे —आ

[74]संस्पर्शनैश्च तैः —आ; संस्पर्शनैश्छतैः —उ; संस्पर्श . . . च्छनैः —ऊ

[75]शतैः —ई

[76]प्रवासि पथि —ऊ;
'प्रवासी पथि दृष्ट्वा तु पुष्पहीनं तु मस्तकम् ।।
शिवलिङ्गस्य गच्छेच्चेत्सर्वपापनिधिर्भवेत् ।
तस्मात्पूजाविहीनं तु लिङ्गं दृष्ट्वा पथि स्थितम् ।।
स्नाप्य पुष्पं च पत्रं वा शिवस्याधार्य यो व्रजेत् ।
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।।
स पुण्यं लभते मर्त्यो नात्र कार्या विचारणा ।'
(*अजिते* ३०.१९ उ० —२२ पू०)

[77]तु —ऊ

[78]पूर्वोक्तान् फलं —आ, ऊ; पूर्वोक्तं फलं —ई

[79]प्रदक्षिणे नम० —ई

[80]०कीर्त्यष्टकल्पितौ —ऊ

[81]क्षत्रेषु —आ; क्षेत्रे तु —ऊ

[82]वाछितं तस्य —ई, ऊ

[83]शुद्धिमाशु —आ, उ, ऊ

[84]प्रयच्छति —ई

लभते नात्र [८५]संदेहः प्रदक्षिणरतो नरः ।
शतं सहस्रमयुतं नियुतं [८६]प्रयुतं तथा ॥३६॥
कोटिं वा [८७]कारयेदिष्टसिद्ध्यर्थं तु प्रदक्षिणम् ।
[८८]सूर्योदयं समारभ्य[८९] यावदस्तं [९०]रवेर्भवेत् ॥३७॥
तावत्प्रदक्षिणं कृत्वा सर्वान्कामानवाप्नुयात् ।
अथाहोरात्रकं[९१] वापि कालेष्वेतेषु यो नरः ॥३८॥
प्रदक्षिणं [९२]प्रकुर्वीत सोऽनन्तफलमश्नुते[९३] ।
[९४]सव्यापसव्यं कुर्वीत संकल्पस्य तु सिद्धये ॥३९॥
फलं सव्यापसव्ये तु केवलाद्वै शतोत्तरम् ।
तस्माच्चापि तथा प्रोक्तं फल[९५]मङ्गप्रदक्षिणे ॥४०॥
दूरमार्गात्समागम्य[९६] [९७]फलशान्तियुतोऽपि वा ।
कृत्वा प्रदक्षिणं भक्त्या प्रणमेच्छिवमव्ययम् ॥४१॥
तस्य [९८]मार्गसमुद्भूता [९९]यागतिश्चापि केशव[१००] ।
प्रदक्षिणफलं नृणां [१०१]ददात्येव न संशयः ॥४२॥
[१०२]दत्तमिष्टमधीतं च यज्ञाश्च बहुदक्षिणाः ।
शिवलिङ्गप्रणामस्य शतांशेनापि नो समाः ॥४३॥
[१०३]संपर्कादर्थलोभाद्वा [१०४]भयात्संगेन वा तथा ।
[१०५]मूर्खो [१०६]वाथ शठो वापि नीचो वा सर्वपापकृत् ॥४४॥

---

[८५] संदेहं —आ, ई, उ
[८६] प्रायुतं —ई
[८७] 'कुर्यात्' इत्यर्थे 'कारयेत्' इति वृत्तार्थं प्रयुक्तमिति भाति ।
[८८] 'भानोरुदयमारभ्य यावदस्तमनं शुचिः ।
कुर्वन् प्रदक्षिणं भक्त्या शिवलोकमवाप्नुयात् ॥'
(*स्वायम्भुवे* (टि० २४७) पृ० ३२८)
[८९] '३७' तमश्लोकस्य तृतीयपादानन्तरं 'आ, ई, उ, ऊ' मातृकासु
'ग्रहणे विषुवायने ।
अष्टम्यां च चतुर्दश्यां जन्मर्क्षे चैव पर्वणि ।
आर्द्रायामर्कवारे च'
इति पादचतुष्टयमधिकं दृश्यते। एतद्विषयस्य पूर्वं २८, २९ श्लोकयोः प्रतिपादितत्वादत्रासंगतत्वाद् आत्मार्थ-पूजापद्धत्याम् अजितागमश्लोकत्वेनोद्धृतेषु श्लोकेषु चास्य विषयस्यानुपलब्धत्वादयं भागो मूले न संकलितः ।
[९०] रविर्जपेत् —आ; रविर्भवेत् —ई, उ, ऊ
[९१] ०रात्रिकं —आ, उ, ऊ
[९२] प्रयुञ्जीत —आ, ई, उ, ऊ; अत्र पाठ आत्मार्थ-पूजापद्धतिमनुसृत्य साधितः ।
[९३] ०फलमोदते —ऊ
[९४] 'कल्पायुतसहस्राणि रुद्रलोकेमहीयते ।
कृत्वा प्रदक्षिणं भक्त्या शिवस्योभयथा नरः ॥
अश्वमेधसहस्रस्य लभते फलमुत्तमम् ।'
(*शिवधर्मे* पूर्वे ५.१६४, १६५ पू०)
[९५] ०मङ्गुलदक्षिणे —आ, उ
[९६] समारभ्य —ई, उ
[९७] पलाशान्रियुतोऽपि यः —आ, ई, उ
[९८] मार्गं —उ
[९९] यागतस्यापि —ऊ
[१००] केशवः —आ, उ, ऊ
[१०१] ददात्येवं —ई
[१०२] दत्तमष्ट —आ, ई, उ
[१०३] संपाकादर्थ —ऊ
[१०४] भयात्संधेनव —आ; भयात्सङ्गेन —उ; भयासंभावना तथा —ऊ
[१०५] मूको वाथ —ऊ
[१०६] वापि —ई

नमस्कृत्वा सकृल्लिङ्गं सर्वपापैः प्रमुच्यते ।
तस्मात्सर्वं समुत्सृज्य सर्वयत्नेन बुद्धिमान् ।।४५।।
नमस्कुर्यात्सकृद्वापि लिङ्गं त्रिभुवनेश्वरम् ।
अग्रादारभ्य कुर्वीत सर्वं चापि प्रदक्षिणम् ।।
[107]धाम्नि च सोमदिक्छायां सिद्धिकामो न लङ्घयेत् ।।४६।।

[108]इत्यजिताख्ये महातन्त्रे [क्रियापादे] [109]प्रदक्षिणनमस्कारविधिः [सप्तषष्टितमः] पटलः ।

---

[107]धाम्नी च —आ

[108]इत्यजिते —ई

[109]प्रदक्षिणनमस्कारविधिपटलः —आ, ई; प्रदक्षिण-नमस्कारपटलः —उ; प्रदक्षिणनमस्कारपटलः सप्त-षष्टितमः —ऊ

[अष्टषष्टितमः पटलः]

[वसन्तोत्सवविधिः][१]

[उत्सवकालः][२]

[३]वसन्तोत्सवं प्रवक्ष्यामि[४] समासेन जनार्दन ।

---

[१]अयं पटलः 'आ, इ, उ, ऋ' मातृकासु दृश्यते; एतद्विषये उत्तरकामिके १४ पटले; दीप्ते (टि० १००९) ३२३—३२५ पृष्ठेषु; योगजे (टि० १००९) १५६—१६१ पृष्ठेषु; सहस्रे (टि० १०३) २०४—२१७ पृष्ठेषु; सिद्धतन्त्रे (टि० ७९८) २७५—२८० पृष्ठेषु; सूक्ष्मे (टि० ९७) ६२—६५ पृष्ठेषु; स्वायम्भुवे (टि० ७५१) ११, १२ पृष्ठयोश्च दृश्यमानो वसन्तोत्सवविधिः द्रष्टव्यः; 'ऋ' मातृकायां ३, १३ उ०—१६, १७ उ०, १८ उ०, २० उ०, २१, २२ उ०, २३ पू० श्लोकाः परमुपलभ्यन्ते;

'नवाहादित्र्यहान्तेषु पूर्वं कृत्वाङ्कुरार्पणम् ।
देवस्य कौतुकं बद्ध्वा कुर्याद्धामप्रदक्षिणम् ॥
सायन्तने विशेषेण प्रभूतहविषं ददेत् ।
वास्तुहोमादि तत्सर्वं बलिकर्म विना ददेत् ॥
अमलाम्बरसंयुक्तं मुक्तादामविभूषितम् ।
मल्लिकाशतपत्रादिभूषितं परमेश्वरम् ॥
शिबिकायां समारोप्य नृत्तवाद्योपशोभितम् ।
श्वेतातपत्रसंयुक्तं श्वेतध्वजविभूषितम् ॥
धामप्रदक्षिणं कुर्यान्नित्यं सायाह्न एव हि ।
समाप्यमाने दिवसे तत्पूर्वे चाङ्कुरार्पणम् ॥
तीर्थार्थमेव तत्प्रोक्तं नवाहादित्र्यहोत्सवे ।
नवाहादित्र्यहान्तोऽयमेकाहोत्सव उच्यते ॥
वसन्तमण्टपं कुर्यादारामोद्यानमध्यमे ।
उद्यानेऽम्बुसमीपे स्यादारामे मध्यमे ततः ॥
त्रिहस्तादि समारभ्य द्विद्विहस्तविवर्धनात् ।
यावद्विंशतिहस्तान्तं यथामति यथारुचि ।
त्रिहस्तकं समारभ्य सप्तहस्तान्तमुत्तमम् ॥
नवहस्तं समारभ्य त्रयोदशकं मध्यमम् ।
त्रयोदशादि चैकोनविंशान्तं कन्यसं भवेत् ॥'
'मण्टपे पश्चिमे भागे वेदीं तत्र प्रकल्पयेत् ।'
'चतुरङ्गुलमुत्सेधं परितो धिष्ण्यमर्पयेत् ।
भित्तिकां परितो दद्यात्पूर्वभागं परित्यजेत् ॥
दक्षिणे पश्चिमे सौम्ये जालकं विधिनार्पयेत् ।'
'एवं सजालकं कृत्वा मण्टपं समविस्तरम् ।
वितानध्वजचित्राभिः पताकाभिरलङ्कृतम् ॥
मुक्तादामादिसंयुक्तं दिव्यपुष्पैः सुशोभितम् ।
कांस्यैश्च चषकैश्चित्रैर्दर्पणैश्च विचित्रितम् ॥
चामरैरपि संकीर्णं नानाकृत्रिमपक्षिभिः ।
नानाविधविचित्राणि नानाविधफलानि च ॥
एतैरन्यैरलङ्कारैस्ताम्बूलक्रमुकादिभिः ।
कदलीस्तम्भपूगैश्च पनसेक्षुकपिप्पलैः ॥
नारिकेलदलैर्वापि नानाविधफलैरपि ।
अलङ्कृत्य विशेषेण अगरूद्भवधूपकैः ॥
एवं मण्टपमाख्यातं तत्स्थानं शोधयेत्सुधीः ।
आलेपनक्रमेणैव शोधयेच्छुद्धवारिणा ।
मण्टपाद्बाह्ये परितो विकीर्य सिकतेन च ॥
निम्नोन्नतं प्रकर्तव्यं गन्धतोयेन सेचयेत् ।
तस्य दक्षिणभागे तु वामे वाथ प्रकल्पयेत् ॥
स्नानार्थं मण्टपं तत्र स्नानवेदीं प्रकल्पयेत् ।'
'तदग्रे च प्रपां कृत्वा पुष्पपुष्करिणीं खनेत् ।'
'पुष्पपुष्करिणीमध्ये गन्धपुष्पाणि विन्यसेत् ।
कदलीस्तम्भवस्त्राद्यैरलङ्कृत्य प्रपां ततः ॥
पूजोत्सवार्थद्रव्याणि समानेयानि पूर्वतः ।
समुद्रशिवकाँल्लाजानधिवासार्थमाददेत् ॥
चतुःशिवांस्ततो लाजान्विकिरार्थं तु सङ्ग्रहेत् ।
सुवर्णे रजतैर्वापि कांस्यैर्वा दारुणापि वा ॥
अष्टौ वंशान्द्रुतीरष्टौ अष्टौ सूकानि कल्पयेत् ।
लीलार्थमर्पयेत्तेषामन्येषां सेविनामपि ॥
वंशादिकानां सर्वेषां प्रमाणमिति कथ्यते ।
हस्तमात्राश्च वंशाः स्युः सार्धहस्ताश्च यष्टिकाः ॥

मधुमाधवयोर्मासि[५] पूर्णायामहनि स्मृतम् ॥१॥
तस्मिन्काले शुभे लग्ने कारयेद्विधिरुच्यते ।

पञ्चाङ्गुलपरीणाहो ह्यङ्गुलं यष्टिकासु च ।
दण्डाग्रं वस्त्रखण्डेन वेष्टयेद् दृढबन्धनम् ॥
एकाङ्गुलप्रमाणेन वंशे तु सुषिरं ददेत् ।
छिद्रैकभागो वंशः स्याद्यष्टिं तत्र नियोजयेत् ॥
वंशलक्षणमाख्यातं द्रुतीलक्षणमुच्यते ।
मृगचर्म समादाय सार्धप्रादेशमात्रकम् ॥
सप्ताङ्गुलपरीणाहं यन्त्रं कृत्वापि रन्ध्रकम् ।
तर्जन्यङ्गुलमानेन तद्रन्ध्रद्वितयं भवेत् ॥
मूलभागे तु सुषिरे शलाकाश्च नियोजयेत् ॥
सूत्रेण बन्धयेद्धीमान्सुखविक्षेपणाय वै ।
द्रुतिलक्षणमेवोक्तं शृङ्गलक्षणमुच्यते ॥
वन्यं वार्षभं वापि गव्यं वा शृङ्गमाहरेत् ।
हस्तत्र्यंशप्रमाणेन सूकेऽग्रादिकं भवेत् ॥
हस्तसंयोगसूत्रार्थं रन्ध्रयेत्तस्य पार्श्वतः ।
पाटली शतपत्री च चम्पकं बकुलं तथा ॥
कल्हारं केतकी चैवोशीरं हिरिबेरकम् ।
एतान्यष्टौ समाहृत्य तालवृन्तानि कल्पयेत् ॥'
'दमनं शतपत्री च मल्लिका जाति चम्पकम् ।
पुन्नागं वकुलं चैव मन्दारं बकपुष्पकम् ॥
जपापुष्पं च बन्धूकमाम्रं चैव तमालकम् ।
कल्हारोत्पलपुष्पाणि पुण्डरीकं च संग्रहेत् ॥
एलालवङ्गतक्कोलकुङ्कुमागरुकोष्ठकम् ।
गन्धं चैव समाहृत्य धान्यं चैव सतण्डुलम् ॥
निश्चित्य दिवसात्पूर्वं महेशं पूजयेद्बुधः ।
सायरक्षावसाने वा निवेद्यान्तेऽथवा पुनः ॥
पूजावसाने तत्काले पूजां विज्ञापयेद्बुधः ।
कौतुकं बन्धयित्वा तु पाद्याद्येन प्रपूज्य च ॥
वसन्तयानं विज्ञाप्य महेशस्याग्रमण्डपे ।
पुष्पाधिवासनं कुर्याद्दमनारोहणक्रमात् ॥
दमनारोहणं कर्म पूर्वमेव सुभाषितम् ।
दमनादीनि पुष्पाणि शुद्धवस्त्रे विनिक्षिपेत् ॥
धान्यराशिं निधायाग्रे स्थण्डिलं कल्पयेद्बुधः ।
वंशादिकानि यन्त्राणि स्थलिकेऽत्र तु विन्यसेत् ॥
वंशानां सुषिरे मध्येऽमृतात्मकमर्चयेत् ॥
द्रुतिरन्ध्रद्वये मध्ये वरुणेऽम्बु च पूजयेत् ।
शृङ्गमध्ये शिवं पूज्य तेजस्त्रयमथापि वा ॥
अष्टमूर्तीश्च वंशाद्येऽष्टशक्तीश्च पूजयेत् ।
रात्रिचूर्णस्य भाण्डं च लाजभाण्डं च विन्यसेत् ॥
कुम्भमेकं समादाय जलपूर्णं निधाय च ।
नदीः सप्त समाहूय तस्मिन्सम्पूजयेत्सुधीः ॥
एलादिसप्तद्रव्याणि निक्षिप्य घटतोयके ।
ब्रह्माङ्गमन्त्रैः सम्पूज्य देवमभ्यर्च्य शङ्करम् ॥
दमनारोहणे काले प्रणवाद्येन कल्पयेत् ।
आत्मतत्त्वादिमन्त्रेण सस्वरेण सबिन्दुना ॥
दामादिपुष्पाञ्जलिना समभ्यर्च्य महेश्वरम् ।
द्रव्याणि वस्त्रैराच्छाद्य सम्यग्धृत्वा सुरक्षितम् ॥
व्रती मन्त्रं जपेद्धीमानरात्रिशेषं व्यपोह्य च ।'
(*योगजे* (टि० १००९) पृ० १५६—१५८)
[३]'तस्मिन्मासे विधेयः स्याद्वसन्तोत्सव इष्टदः ।'
(*उत्तरकामिके* १४.१पू०);
'वैशाखे चान्द्रपक्षेण पर्वान्तं वा विशेषतः ।
नवाहं वाथ सप्ताहं पञ्चाहं वा विशेषतः ॥'
(*सहस्रे* १२.२);
'फाल्गुने चैत्रमासे च वैशाखे तु विशेषतः ।
नवाहे वाथ सप्ताहे पञ्चाहे वा त्र्यहेऽपि वा ॥
एकाहे वा प्रकर्तव्यं वसन्ताख्यं तदुत्सवम् ।
तत्तन्मासर्क्षके कुर्यात्'
(*सूक्ष्मे* २३.१ उ०—३ पू०)
[३]'इ' मातृकायां आदित आरभ्य चतुर्थश्लोकस्योत्तरार्धे 'मण्टपे' इत्यन्तं न दृश्यते ।
[४]ततोत्सवं प्रवक्ष्यामि—उ, वसन्तोत्सवं प्रवक्ष्यामि —'उ' पाठान्तरम् ।
[५]मासौ—आ, 'उ' पाठान्तरम् ।

[उत्सवविधिस्तत्र दान्ताधिवासः]

[6]तत्पूर्वनिशि [7]दान्तं तु गन्धपुष्पैः समन्वितम् ॥२॥
गन्धतोयेन मन्त्रेण प्रोक्षितं हृदयेन तु[8] ।
[9]मालामाबध्य पात्रेऽथ निक्षिप्य कवचेन तु ॥३॥
[10]प्रासादस्यैशदिग्भागे सौम्ये वा परिकल्पिते ।
मण्टपे पूर्ववत्तत्र [11]वेदिमध्ये तु कारयेत् ॥४॥
विधिना स्थण्डिलं तत्र पद्ममष्टदलं लिखेत् ।
तन्मध्ये विन्यसेन्मन्त्री [12]दान्तं [13]तं बद्धमालिकम् ॥५॥

[कुम्भस्थापनं तत्पूजा च]

[14]तस्येशाने[15]ऽथवा पूर्वे [16]स्थण्डिले परिकल्पिते ।

---

[6]तत्पूर्वे निशि —आ;
'पूर्वेद्युः कौतुकं बध्वा नानावृक्षसमाकुले ।
नानामालासमाकीर्णे नानाफलविचित्रिते ॥
नानागानसमोपेते नानावाद्यसमन्विते ।
नानानृत्तसमायुक्ते नानायन्त्रसमन्विते ॥
प्रकीर्णपुष्पप्रकरे नानागन्धसमायुते ।
पताकाभिः समाकीर्णे ज्वलद्दीपैश्च दीपिते ॥
आस्थानमण्डपोपेते जलक्रीडासमन्विते ।
दैवोद्याने नयेद्देवं सर्वालङ्कारसंयुतम् ॥
ग्रामप्रदक्षिणोपेतं मन्दीभूते दिवाकरे ।
परिवेषक्रमं तस्मिन्कृत्वा देवं विशेषतः ॥
पूजयेदुपचारैस्तु गन्धधूपस्रगादिभिः ।
सेवार्थमागतं स्मृत्वा वसन्तं कुसुमायुधम् ॥
देवस्य दक्षिणे वामे नानागन्धादिभिः क्रमात् ।
कुम्भयोरर्चयेत्तौ तु हेमवस्त्राद्युपेतयोः ॥
स्थण्डिलद्वितये वापि नानापुष्पसमन्विते ।
वस्त्रेणाच्छाद्य नैवेद्य पायसं विनिवेदयेत् ॥
ताम्बूलं दापयेदन्ते तोषयेत्तौ विशेषतः ।
नृत्तवाद्यसमोपेतैर्दिव्यगानैर्व्यपोह्य च ॥
एवं कालं तु देवेशं नयेद्देवालयं पुनः ।
स्नपनं कारयेच्चैव विशेषेणार्चयेच्छिवम् ॥
एवं देवं विशेषेणाभ्यर्चयेच्छिवमादरात् ।
एवं यः कुरुते मर्त्यः सर्वान्कामानवाप्नुयात् ॥'
(*उत्तरकामिके* १४.१ उ० —१२ पू०)

[7]तान्तं —आ
[8]प्रोक्षयेत्पुरुषेण तु —उ
[9]मालां च बध्य पात्रे च —ऋ
[10]प्रासादस्येश —आ, उ;
'वसन्तोत्सवं [प्र]कुर्यादारामोद्यानमध्यमे ।
विस्तारं सप्तहस्तं स्यादायामं तद्द्वयं भवेत् ॥
तत्र पश्चिमभागे तु पद्मासनं प्रकल्पयेत् ।
विस्तारं तत्त्रिभागं स्यादुत्सेधं स्यात्तदर्धकम् ॥
परितः कल्पयेत्कुण्डं पूर्वभागे विवर्जयेत् ।
जालत्रयसमायुक्तं यास्यपश्चिममुत्तरे ॥
चतुरङ्गुलमुत्सेधं स्थलं निम्नोन्नतवर्जितम् ।
वितानैश्चैव जालैश्च तरङ्गैर्गात्रवेष्टनैः ॥
श्वेतताम्बूलक्रमुकैर्लिकुचैर्यन्त्रपक्षिभिः ।
सुगन्धपुष्पदामैश्च मुक्तादामैः प्रलम्बयेत् ॥
कदलीस्तम्भदीपैश्च मण्डपं भूषयेद्बुधः ।'
(*सूक्ष्मे* २३.३ उ० —८)
[11]मध्ये वेदिं तु —उ
[12]तदर्धपरिमाणकम् —इ
[13]तद्बद्धमालिखेत् —आ, 'उ' पाठान्तरम्; तद्बन्धमालिखेत् —उ
[14]तस्यैशाने —इ, 'उ' पाठान्तरम् ।
[15]तथा पूर्वे —उ
[16]स्थण्डिलं परिकल्पयेत् —उ

हेमरूप्यादि संसिद्धं कुम्भं चातिमनोहरम्[17] ।।६।।
सितसूत्रविचित्रं च गन्धतोयेन [18]पूरितम् ।
सकूर्चं सहिरण्यं च [19]सापिधानं सवस्त्रकम् ।।७।।
विन्यस्योङ्कारमुच्चार्य वर्धनीं तस्य चोत्तरे ।
[20]तादृशीं विन्यसेन्मन्त्री [21]तदर्धपरिमाणकाम्[22] ।।८।।
पुण्याहं वाचयित्वाथ [23]देवं देवीं ततो यजेत् ।
[24]दान्तं चापि ततो मन्त्री [25]मन्त्रसंहितया यजेत्[26] ।।९।।

[होमः]

ततो होमं [27]प्रकुर्वीत कुण्डे वा स्थण्डिलेऽपि वा ।
तत्पूर्वे वाथ[28] वैशान्यां[29] पश्चिमे चोत्तरेऽपि वा ।।१०।।
विधिनाग्निं समाधाय समिद्धेऽथ[30] हुताशने ।
समिदाज्यचरूंल्लाजांस्तिलांश्च[31] ब्रह्मपञ्चकैः ।।११।।
सद्यादिभिः [32]क्रमाद्यष्ट्वा कृत्वा [33]पूर्णाहुतिं ततः ।

[कामपूजा तमुद्दिश्य होमश्च]

[34]सर्वात्महृदयेनैव [35]तदन्तरीशदेशके ।।१२।।
स्थण्डिलं [36]विधिना कृत्वा [37]तत्र कूर्चं तु विन्यसेत् ।
तन्मध्ये काममावाह्य गन्धपुष्पैः समर्चयेत् ।।१३।।
ततस्तु काममूलेन दान्तेनैव [38]शताहुतीः ।
हुत्वा [39]षड्भिस्तदङ्गैस्तु [40]शिवाग्नौ जुहुयात्ततः ।।१४।।

---

[17]मनोहरः—आ
[18]पूरयेत्—उ
[19]सपिधानं—आ
[20]तादृशान्—आ, इ; इदमर्धं 'उ' मातृकायां न दृश्यते।
[21]तदण्डं—इ
[22]परिमाणकान्—आ
[23]देवदेवीं—आ, इ, उ
[24]ततश्चापि—आ; दान्तश्चापि—इ, 'उ' पाठान्तरम्।
[25]मन्त्रं—आ
[26]लभेत्—आ, इ, ऋ
[27]प्रयुञ्जीत—आ
[28]ततः पूर्वेऽथ—आ, इ
[29]चैशान्यां—इ, उ पाठान्तरम्।
[30]समिद्धोमं—उ
[31]लाजतिलौ च—आ, 'उ' पाठान्तरम्; लाजान् तिलं च—इ; लाजा तिलान्वै—उ
[32]क्रमात्र्यस्त्वा—आ, इ
[33]पुण्याहुतिं—इ
[34]इदमर्धं 'उ' मातृकायां न दृश्यते।
[35]तदन्ते रशदेशके—इ, 'उ' पाठान्तरम्।
[36]शालिनं—आ, उ
[37]तत्तत्कूर्चं—'उ' पाठान्तरम्।
[38]शताहुतिम्—आ; शताहुतिः—उ, ऋ
[39]षड्भिस्तु दर्भैस्तु—उ
[40]शिवान्तौ—इ, 'उ' पाठान्तरम्; शिवान्तं—ऋ

चन्दनागरु[41]कर्पूरकुष्ठं कुङ्कुममेव च ।
[42]कस्तूरीं च क्रमेणैव [43]मूलमन्त्रेण होमयेत् ।।१५।।
ततः स्विष्टकृतं हुत्वा व्याहृत्यन्ते समाहितः ।
परिषिच्याग्निमुद्वास्य काममुद्वासयेत्ततः ।।१६।।

[44] [प्रातः करणीयविधिः]

एवं रात्रौ विधिं कृत्वा प्रभाते देशिकः सुधीः ।

---

[41] कर्पूरं कुष्ठं — उ; कर्पूराकुष्ठं — 'उ' पाठान्तरम्;
कर्पूरकुष्ठी — ऋ
[42] कस्तूरि च — उ
[43] मूलार्धं तु — आ; मूलादूर्ध्वं — इ; मूलादर्धं — 'उ'
पाठान्तरम्, ऋ
[44] 'प्रातः स्नानादिकं कृत्वा स्नपनैरभिषिच्य च ।
देवं देवीं च सम्पूज्य प्रातःसंध्यावसानके ।।
सर्वालङ्कारसंयुक्तं पीतवस्त्रोपशोभितम् ।
हारकेयूरमकुटकटकाद्युपशोभितम् ।।
विमाने शिबिकायां वा समारोप्य महेश्वरम् ।
नानावस्त्रसमायुक्तं नानाध्वजगणावृतम् ।।
नानाचामरसंकीर्णं नानाव्यजनसंकुलम् ।
नानावृत्तसमोपेतं दीपैर्वाद्योपघोषितम् ।।
अधिवासिततद्द्रव्यं वाहकैरुद्धृतं नयेत् ।
ग्रामप्रदक्षिणं कुर्याद्यानक्रममिहोच्यते ।।
पात्रं यौवतमाहूय केलियष्टिकरोज्वलम् ।
गतिं प्रथमतः श्राव्य ततः क्रीडनमादिशेत् ।।
वीथिकायां नयेद्देवं तत्र रथ्यान्तरान्तरे ।
कदलीतोरणोपेतदीपपूर्णघटोज्वले ।।
गृहद्वारस्य परितो गर्ते भाण्डं निधाय च ।
रजनीचूर्णसंयुक्तलाजतोयैः प्रपूर्य च ।।
द्वारोपान्ते तु सलिललीलां वापि समादिशेत् ।
जललीलां समादद्याद्भाण्डस्थनववारिभिः ।।
एवं क्रीडनकेनैव कृत्वा ग्रामप्रदक्षिणम् ।
उद्यानमण्टपं गत्वा तत्र देवं निवेश्य च ।।
स्नानमण्टपमावेश्य स्नानवेद्युपरि न्यसेत् ।
स्नपनेनाभिषिच्याथ देवं देवीं च पूजयेत् ।।
अधिवासितपुष्पेषु किञ्चिदादाय चार्चयेत् ।
पाद्यमर्घ्यादिकं दत्त्वा नैवेद्यं च निवेदयेत् ।।
राजोपचारकं सर्वं कुर्यादेवं विशेषतः ।
वसन्तमण्टपं गत्वा पुण्याहाम्बुसमुक्षितम् ।।
चन्दनैर्हिमतोयैश्च वेदिकायां विलिप्य च ।
तत्र सिंहासनं स्थाप्य तदूर्ध्वे पीठमर्प्य च ।।
तस्य मध्ये तु संस्थाप्य सकलाराधनं चरेत् ।
शिवमन्त्रं समुच्चार्य देवं देवीं प्रणम्य च ।
वसन्तं दक्षिणे पूज्य मन्मथं चोत्तरे यजेत् ।।
स्वस्वमन्त्रैः समभ्यर्च्य पश्चिमेऽनिलमावहेत् ।
वन्यमारुतविन्मन्दमारुतमर्चयेत्सुधीः ।।
देवाग्रे स्थापयेत्कुम्भं भाण्डं वा जलपूरितम् ।
धान्यस्योपरि संस्थाप्य चूर्णलाजोपशोभितम् ।।
चन्द्रचन्दनकाश्मीररात्रिचूर्णहिमाम्बुभिः ।
सौगन्धिकादिपुष्पैश्च पूरयेत्तज्जलेन च ।।
गङ्गां कुम्भे समभ्यर्च्य व्रती मन्त्रं समुच्चरन् ।
वंशषट्कं च संस्थाप्य द्रुतिशृङ्गाणि षट् तथा ।।
दक्षिणे परिवाराणां वंशलीलार्थमर्पयेत् ।
उत्तरे देवदासीभ्यः षट्शृङ्गाणि समर्पयेत् ।।
द्रुतीरष्टौ विभज्याथ पश्चिमे परतोऽर्पयेत् ।।
तत्कुम्भतोयैः सम्पूर्य द्रुतिं वा सूकमेव वा ।
शिवगायत्रिमन्त्रेण योजयेद्देशिकोत्तमः ।।
देवी देवमुखाम्भोजे जललीलां समाचरेत् ।
तद्वंशं सङ्गृहीत्वा तु शक्तिमूलेन पूरयेत् ।।
शिवलीलां प्रकुर्वीत गौरीमुखसरोरुहे ।
एवं विनोदयित्वा तु देवदेव्यौ परस्परम् ।।
अष्टाभिर्देवदासीभिर्व्यजनानि प्रचालयेत् ।
वसन्ते लास्यगानैश्च सन्तोष्य परमेश्वरम् ।।
ततः सर्वे यन्त्रजालैर्विहरेयुः समन्ततः ।
रात्रिचूर्णैश्च लाजैश्च विकीर्य च विनोदयेत् ।।
एवं मध्याह्नकालं तु नीत्वा सायाह्नके परम् ।

कृतनित्यः प्रविश्याथ [65]मण्डपं तत्र पूजयेत् ।।१७।।
कुम्भयोर्गन्धपुष्पाद्यै[66]र्देवं देवीं समाहितः ।
[67]दान्तं चापि यथापूर्वं ब्रह्मभिः संस्पृशेत्तदा ।।१८।।
ततो नित्यावसाने तु शङ्खदुन्दुभिनिस्वनैः ।
लिङ्गमूर्ध्नि न्यसेन्मन्त्री सर्वात्मानं समुच्चरन् ।।१९।।
ताम्बूलं मुखवासेन दत्त्वा पश्चात्स देशिकः ।
[68]व्यक्तलिङ्गेषु [69]तद्दान्तं [70]तन्मूलेन तु दापयेत् ।।२०।।

[उत्सवः]

[71]उत्सवं च ततः कुर्याद्दान्ताद्यैर्गन्धपुष्पकैः ।
वस्त्रैराभरणैरन्यै[72]रुत्सवार्चामतन्द्रितः ।।२१।।
अलङ्कृत्य [73]ततः प्रोक्ष्य गन्धोदेन समन्ततः ।
गीतनृत्तसमायुक्तं शङ्खदुन्दुभिनिस्वनैः ।।२२।।
धूपामोदसमायुक्तं [74]संगमे रजनीमुखे ।
ततश्च गीतनृत्ताद्यैः कुर्यादास्थानमण्डपे[75] ।।२३।।

शिबिकोर्ध्वे शिवं स्थाप्य प्रपामध्ये समाविशेत् ।।
पुष्पपुष्करिणीमध्ये तीर्थकुम्भजलं क्षिपेत् ।
वेदिकायां विकीर्याथ चूर्णलाजान्समन्ततः ।।
देवाग्रे स्थण्डिलं कृत्वा पञ्चकोष्ठेषु विन्यसेत् ।
मध्यमे विन्यसेच्छृङ्गं प्रस्थार्धजलपूरितम् ।।
तैलमामलकं गन्धं रजनीचूर्णविष्टरम् ।
शृङ्गस्थजलमध्ये तु हिमं चन्द्रं विनिक्षिपेत् ।
गन्धद्रव्यं मृगमदं संपूर्य मन्त्रयेच्छिवम् ।
पुष्पपुष्करिणीमध्ये हिमचन्दनपङ्क्तिते ।।
मज्जनं कारयित्वेशं पुनस्तीरे निवेश्य च ।'
'वंशस्थलाजतोयेन देवीमाप्लावयेत्सुधीः ।
शृङ्गस्थगन्धतोयेन शिवमेवाभिषेचयेत् ।
स्नपनं कारयेत्पश्चात्स्वस्तिवाचनपूर्वकम् ।।
नानास्वादुजलोपेतं बहुनैवेद्यमर्पयेत् ।
ताम्बूलं क्रमुकं चैव सकर्पूरं निवेदयेत् ।।
सर्वोपचारैः सम्पूज्य दीपनीराजनादिभिः ।
ब्राह्मणान्भोजयित्वाथ देवं धाम प्रवेशयेत् ।।
वंशादिद्रव्यशेषं च आचार्याय प्रदापयेत् ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्' ।।
(*योगजे* (टि० १००९) पृ. १५९—१६०)

[65] धूपदीपविचक्षणः—ऋ
[66] दैवदेवीं—आ, इ, उ. 'उ' पाठान्तरम् ।
[67] दान्तश्चापि—आ; दानं चापि—ऋ
[68] वृत्तलिङ्गेषु—आ, उ
[69] तद्दत्तां—आ
[70] दत्तं मूलेन दापयेत्—ऋ
[71] उत्सवं तु—ऋ
[72] रुत्सवार्चान्तमन्त्रितः—आ; रुत्सवाच्चाथ मन्त्रतः—इ; रुत्सवं चातन्द्रितः—उ; रुत्सवार्चात मन्त्रतः—'उ' पाठान्तरम्
[73] ततो वक्ष्ये—आ, इ, उ
[74] सुखतो—आ; सुखदे—इ, 'उ' पाठान्तरम्; सुखते—उ
[75] मण्टपम्—उ

विनोदं च [56]विशेषार्चामुत्सवान्ते प्रकल्पयेत् ।
प्रतिवर्षमिदं [57]यस्तु कारये[58]दुत्सवं ततः ।।
अश्वमेधफलं [59]भुक्त्वा [60]शिवलोकं ततो व्रजेत् ।।२४।।

[61]इत्यजिताख्ये महातन्त्रे [क्रियापादे] [62]वसन्तोत्सव[63]विधिः
[अष्टषष्टितमः] पटलः ।।

---

[56]विशेषाच्च उत्सवान्ते —आ; विशेषाद्यैरुत्सवान्ते —इ
[57]वस्तु कामये —इ
[58]दुत्सवान्ततः —आ
[59]प्राप्य —इ, उ
[60]शिवलोके —उ
[61]इत्यजिते वसन्तोत्सवविधिपटलः —उ
[62]वसन्तोत्सवपटलः —इ, 'उ' पाठान्तरम् ।
[63]विधिपटलः समाप्तः —आ

[एकोनसप्ततितमः पटलः]

[नवनैवेद्यविधिः[1]]

नैवेद्यस्य विधिं वक्ष्ये नूतनस्य सुरोत्तम ।

[नवनैवेद्यफलम्]

[2]पूर्वपक्वं तु यद्धान्यं फलपुष्पादिकं भुवि ॥१॥
तच्छिवाय ततो दद्याद्भक्त्या तस्मै च देहि तत् ।
तस्य दाने फलं चापि[3] केवलस्य शतोत्तरम् ॥२॥
तस्मात्सर्वप्रयत्नेन पूर्वपक्वं निवेदयेत् ।

[नवनैवेद्यकालः][4]

नवनैवेद्यकालस्तु भवेन्मासत्रयेऽपि च ॥३॥
[5]न च माघे तु [6]चेष्टं [7]स्यादस्ते च गुरुशुक्रयोः ।
चैत्रफाल्गुनयोश्चापि पूर्वपक्षे शुभे दिने ॥४॥
शुभर्क्षे शुभयोगे च शुभलग्ने सुरोत्तम ।

[देवक्षेत्रं प्रविश्य धान्यमाहृत्य शिवालयानयनम्][8]

तस्यारम्भे पुरो गत्वा देवक्षेत्रं सुवृद्धिमत् ॥५॥

---

[1]अयं पटलः 'आ, ई, उ, ऋ मातृकासु दृश्यते, एतद्विषये *उत्तरकामिके* १९, *रौरवे* क्रियापादे १३, *सिद्धतन्त्रे* ५, *सुप्रभेदे* क्रियापादे १७ पटला द्रष्टव्याः । 'ऋ' मातृकायां १३०, ३पू०, ४पू०, १७पू० श्लोकाः परमुपलभ्यन्ते ।

[2]पूर्वे पक्वं—आ; पूर्वपक्षं—ऋ; पूर्वपक्वमित्यस्य प्रथमतः जातमित्यर्थः ।

[3]केवलं स्या—आ; केवल स्या—'उ' पाठान्तरम्; केवलेन—ऋ

[4]'मार्गशीर्षमथाषाढं माघमासं विवर्ज्य च ।
अन्येषु सर्वमासेषु नवनैवेद्यमाचरेत् ॥
(*उत्तरकामिके* १९.१३०, २पू०);
एतद्विषये *रौरवे* क्रियापादे १३.१ श्लोको द्रष्टव्यः ।

[5]न तन्माघे—आ, उ; न तन्मासे—ऋ

[6]श्रेष्ठं—ऋ

[7]स्यादस्तं तु— आ, उ; स्यादस्तं च—ऋ

[8]'निश्चित्य शुभनक्षत्रं तत्पूर्वेऽङ्कुरमाचरेत् ।
विना वाङ्कुरमात्रं तु सुमुहूर्ते सुलग्नके ॥
शङ्खदुन्दुभिनादैश्च गीतनृत्तादिमङ्गलैः ।
नानाध्वजवितानैश्च धूपदीपाङ्कुरैर्युतम् ॥
मम भक्तजनैः सार्धं त्रिशूलेन समन्वितम् ।
चण्डेश्वरसमायुक्तं देवं क्षेत्रं प्रवेशयेत् ॥
चण्डेशास्त्रं विना वापि क्षेत्रं गत्वा विचक्षणः ।
हविषा दधियुक्तेन भूतानां तु बलिं क्षिपेत् ॥
पूर्वाद्यष्टदिशास्वेवं गन्धपुष्पादिसंयुतम् ।
सलक्षणेन दात्रेण पूजितेनैव हेतिना ॥
प्राङ्मुखोदङ्मुखो भूत्वा शस्त्रमन्त्रमनुस्मरन् ।
शूकं लूत्वा तु युग्मे तु स्थलिकोर्ध्वे निवेशयेत् ॥

पक्वव्रीहिसमोपेतं चण्डेशेन वृषेण च ।
तस्य [९]सौम्येऽथवैशान्ये[१०] देशे तत्क्षेत्रतीरके[११] ॥६॥
गन्धपुष्पादिसंयुक्तं पायसं तु बलिं क्षिपेत्[१२] ।
क्षेत्राधिपतये स्वाहेत्यथ [१३]तत्सस्यमूलके ॥७॥
सर्वसस्याधिपतये सोमायेति बलिं क्षिपेत् ।
ततो हेतिं समुच्चार्य दात्रं संप्रोक्ष्य देशिकः ॥८॥
सस्यं वामेन संप्रोक्ष्य सस्यमूले निकृन्तनम् ।
हेतिनाथावतार्यैतद्विन्यसेत्प्रणवेन तु ॥९॥
हेमादिनिर्मिते पात्रे ततस्तच्छिरसा तदा ।
वाहयित्वाथ तत्क्षेत्रात्सर्वातोद्यसमन्वितम् ॥१०॥
सर्वालङ्कारसंयुक्तं चण्डेशवृषसंयुतम् ।
प्रतिमासहितं वापि बहुधान्यफलादिभिः ॥११॥
सर्वोपदंशैरन्यैश्च युक्तं दध्याज्यभाण्डकैः ।
शनैः प्रदक्षिणं कृत्वा ग्रामादौ तु [१४]शिवालयम् ॥१२॥

[तण्डुलैर्नैवेद्यसंपादनं, तन्निवेदनं च[१५]]

प्रविश्य [१६]मन्त्रलूनं तु धान्यं संशोध्य तण्डुलम् ।

तच्छूकेन समायुक्तं नवव्रीहिसमायुतम् ।
तण्डुलैश्च समोपेतं नानाव्यञ्जनसंयुतम् ॥
नालिकेरफलोपेतं नवपूगफलान्वितम् ।
मरीचगुलखण्डाद्यैरिक्षुभिश्च समन्वितम् ॥
नानाशाकसमायुक्तं नानाव्यञ्जनसंयुतम् ।
पृथक् कन्दफलोपेतैः पूजाद्रव्यैस्तथाविधैः ॥
आश्चर्यकारकैरन्यैः सर्वातोद्यसमन्वितम् ।
नृत्तगानसमायुक्तं नानाध्वजसमन्वितम् ॥
नानाछत्रसमायुक्तं प्रविश्य नगरादिकम् ।
ग्रामप्रदक्षिणं कृत्वा प्रविशेदालयं प्रति ॥'
(*उत्तरकामिके* १९.२ उ० —१३ पू०);
एतद्विषये *रौरवे* क्रियापादे १३.२ —७ श्लोका द्रष्टव्याः ।

[९]सोमेऽथ —आ, ई
[१०]चैशान्ये —उ० पाठान्तरम् ।
[११]तीरगे —आ, ई, उ
[१२]हरेत् —आ, ई, उ
[१३]वत्तस्य —आ, उ; तत्तस्य —ई, उ पाठान्तरम् ।
[१४]शिवालये —आ
[१५]'प्रविश्य भवनं मन्त्री शूकभारान्निवेश्य वै ।
आदित्यकरसन्तप्तान्व्रीहीन्संक्षिप्य लूखले ॥
तुर्याश्रमण्डलं कृत्वा पिष्टचूर्णैर्विचित्रितैः ।
शालिभिः स्थण्डिलं कृत्वा लूखलं तत्र विन्यसेत् ॥
वस्त्रेण लूखलं बध्वा मुसलं च ततोऽर्चयेत् ।
संक्षुभ्य बीजमुख्येन तण्डुलं ग्राह्य यत्नतः ॥
नालिकेरगुलोपेतं मरीचिजीरकान्वितम् ।
हृदयेन तु मन्त्रेण दद्याद्देवस्य भक्तितः ॥
अन्येषां प्रतिमानां तु दापयित्वा हृदा पुनः ।
परिवारबलिं दत्त्वा चण्डेशाय निवेदयेत् ॥
ताम्बूलं तु विशेषेण दत्त्वा तत्र हृदाणुना ।
प्रभूतहविषं दत्त्वा पूर्वोक्तविधिनान्वितः ॥
ततो भक्तजनान्सर्वान्नवान्नेन तु भोजयेत् ।
प्रोक्तं तु नवनैवेद्यम्'
(*सुप्रभेदे* क्रियापादे १७.९ उ० —१६ पू०);
एतद्विषये *रौरवे* क्रियापादे १३.८ —१५ श्लोका द्रष्टव्याः ।
[१६]मन्त्रलूनां-आ, उ, उ पाठान्तरम् ।

कृत्वा तत्तण्डुलं पश्चात्पाषाणादिविवर्जितम् ।।१३।।
[17]षट्कृत्वः क्षालयित्वाथ[18] षडङ्गैस्तान्समाहितः ।
षट्त्रिंशत्प्रस्थमात्रं स्यात्तण्डुलं[19] चोत्तमं भवेत् ।।१४।।
अधमादधमं चापि भवेदाढकसम्मितम् ।
आढकाढकहान्या तु मध्ये सप्तविधं भवेत् ।।१५।।
[20]मरीचजीरकं चैव चूर्णयित्वा [21]तथैव च ।
खण्डेन सह [22]चालोड्य नालिकेरफलेन च ।।१६।।
[23]गुलेन वाथ तत्पात्रे हेमादौ सन्निधाय च ।
निवेदयेद्धृदा मन्त्री सर्वातोद्यसमन्वितम् ।।१७।।
ततो बलिं ततो होमं तण्डुलैस्तत्र कारयेत् ।
बेराणामपि सर्वेषां तण्डुलं हृदयेन तु ।।१८।।
दत्त्वा दत्त्वा च ताम्बूलं मुखवाससमन्वितम् ।
ततश्च नवनैवेद्यं[24] वृत्तं[25] तद् व्यञ्जनैर्युतम् ।।१९।।
निवेदयीत देवाय [26]खण्डाज्यदधिसंयुतम् ।
प्रतिसंवत्सरं ह्येवं [27]कुर्यात्सस्यस्य वृद्धये ।।२०।।

[28]इत्यजिताख्ये महातन्त्रे [क्रियापादे] [29]नवनैवेद्यविधिः,
[एकोनसप्ततितमः] पटलः

---

[17]षट्कृत्वा—आ, ई, उ
[18]'आ, उ' मातृकयोः 'अथ' इति नास्ति ।
[19]पुंलिङ्गस्य तण्डुलशब्दस्यात्र क्लीबे प्रयोगः ।
[20]मरीचि—ई
[21]तथेक्षु च—आ, उ
[22]मालोड्य—आ, ई, उ
[23]गुले नवधा पात्रे तु—ऋ
[24]वृत्तं=निष्पन्नमित्यर्थः
[25]नैवेद्यनैर्युतम्—आ, उ
[26]खण्डाख्यदधि—आ, उ; खण्डाख्ये—ई
[27]कुर्यात्सस्याभिवृद्धये—आ, उ
[28]इत्यजिते नवनैवेद्यविधिपटलः—ई
[29]नवनैवेद्यपटलः—आ

[सप्ततितमः पटलः]

[कृत्तिकादीपविधिः][1]

[दीपारोपणकालः[2]]

अथ वक्ष्ये सुरश्रेष्ठ कृत्तिकादीपमुत्तमम् ।
[3]ऊर्जे मासि सराकायां नक्षत्रे वह्निदैवते[4] ।।१।।
अस्मिन्प्रदोषकाले तु कृत्तिकादीपमाचरेत् ।
[5]केवलं पूर्णमास्यां वा प्रदोषे तु समाचरेत् ।।२।।

[अङ्कुरार्पणम्]

तदर्थमङ्कुरं पूर्वमुक्तकाले समर्पयेत् ।

[अधिवासः]

पूर्वेद्युरधिवासं च रात्रावेवं प्रकल्पयेत् ।।३।।
[6]प्रासादाग्रे[7]ऽथवैशान्यामाग्नेय्यां वापि मण्टपे ।
सर्वालङ्कारसंयुक्तं[8] गोमयेनानुलेपिते ।।४।।

---

[1]अयं पटलः आ, ई, उ, ऋ मातृकासु च दृश्यते; एतद्विषये *अंशुमदागमे* २८, *उत्तरकामिके* ८, *उत्तरकारणे* २७, *पूर्वकारणे* १११, ११२, *मकुटे* ८, *योगजे* (२७८-२८२ पृष्ठानि) *रौरवे* क्रियापादे २६, *वीरे* ८८, *सुप्रभेदे* क्रियापादे १८, *सूक्ष्मे* २२, *स्वायंभुवे* ४४ पटला द्रष्टव्याः। 'ऋ' मातृकायां ४—६, ८ उ०, १५—१७, १९ उ०—२३पू०, ३१उ०, ३२ उ०—३५ पू०, ४० श्लोकाः परमुपलभ्यन्ते।

[2]'दीपावलिं प्रवक्ष्यामि शृणुध्वं द्विजसत्तमाः।
मासे तु कृत्तिकाख्ये तु नक्षत्रे कृत्तिकाह्वये ।।
पूर्णायां वाथ तद्योगे सर्वकामप्रसिद्धये।
रव्यस्तमयवेलायां दीपारोहणमाचरेत् ।।
कर्तुरष्टमराश्यादिलग्नदोषनिरीक्षणम्।
विष्टिवैनाशिकर्क्षादिप्रेक्षणं तत्र सम्मतम् ।।
रवेरस्तमयात्पूर्वं यामपादावसानकम्।
कालस्तदूर्ध्वं यामार्धपर्यन्तः काल एव वा ।।
एवं निश्चित्य कालं तु कारयेद्वाङ्कुरार्पणम्।
दीपारोहणपूर्वेद्युरधिवासनमाचरेत् ।।'
(*उत्तरकामिके* ८. १—५); *रौरवे* क्रियापादे २६. १, २ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः।

[3]ऊर्जे=कार्तिके

[4]देवते—आ, उ पाठान्तरम्।

[5]इदमर्धं 'ई' मातृकायां न दृश्यते।

[6]मण्टपस्यैशदिग्भागे पूर्वे वा चोत्तरेऽपि वा।
गोमयालेपनं कृत्वा दर्भमाल्यैरलङ्कृतम् ।।
पिष्टचूर्णैरलङ्कृत्य प्रोक्षयेत्तु शिवाम्भसा।
तन्मध्ये स्थण्डिलं कृत्वाप्यष्टद्रोणैश्च शालिभिः ।।
तण्डुलैस्तिललाजैश्च दर्भैः पुष्पैः परिस्तरेत्।
आधारं पूजयेत्तत्र पञ्च पात्राणि विन्यसेत् ।।
अव्यक्ताख्यं सुशान्तं च तेजोरूपं कलामयम्।
अमृतोदकपात्रं स्यादेवं पूजा विधीयते ।।
गोघृतेन तु तत्पूर्य विन्यसेत्तन्तुवर्तिकाम्।'
(*पूर्वकारणे* ११२.९ उ०—१३); एतद्विषये *रौरवे* क्रियापादे २६. २१, २२ पू० तदीयटिप्पणी च द्रष्टव्याः।

[7]अथ चैशान्यां—आ, ई; त्वथ चैशान्ये—ऋ

[8]संयुक्तं—ऋ

स्थण्डिलं शालिभिः कृत्वा [९]पद्ममष्टदलं लिखेत् ।
तण्डुलैः सतिलै रेखां पूरयित्वा समन्ततः ॥५॥
परिस्तीर्य ततो लाजान्विकीर्य कुसुमानि च ।
पुण्याहं [१०]वाचयित्वादौ [११]प्रोक्षयित्वा शिवाम्भसा ॥६॥
दीपाधाराणि तत्रैव पञ्च त्रीण्येकमेव वा ।
मध्ये पूर्वे ततश्चापि दक्षिणे पश्चिमोत्तरे ॥७॥
मध्ये पूर्वे प्रतीच्यां तु [१२]मध्यपूर्वे जनार्दन ।
विन्यस्य प्रोक्षयेत्तानि बहुरूपं [१३]समुच्चरन् ॥८॥

[होमः][१४]

तत्पूर्वे पश्चिमे वापि कुण्डे वा स्थण्डिलेऽपि वा ।
शिवाग्निं जनयित्वात्र होमयेद्देशिकोत्तमः ॥९॥
[१५]समिदाज्यचरूँल्लाजान्यवसर्षपवेणुजान्[१६] ।
[१७]व्रीहिं च शतमर्धं वा तदर्धं वा यथेच्छया ॥१०॥
सर्वात्महृदयाद्यैस्तु षडङ्गैरथ [१८]च क्रमात् ।
सद्यो[१९]जातादिभिश्चैव होमयेद्द्रव्यसंचयम् ॥११॥
ततः [२०]सर्वात्मना तत्र [२१]दीपाधारेषु गोघृतम् ।
प्रक्षिप्य पात्रे वा वर्तिं [२२]घृतं तस्मिन्विनिक्षिपेत् ॥१२॥
[२३]ततोऽग्नौ ज्वलिते तत्र [२४]वह्निबीजेन होमयेत् ।

---

[९]पत्रमष्ट—ऋ
[१०]वाचयित्वा तु—ऋ
[११]प्रोक्षयेदम्भसा शिवा—ऋ
[१२]मध्यपूर्वं—आ
[१३]समर्चयेत्—ऋ
[१४]'पुण्याहं वाचयेत्तत्र ततो होमं समाचरेत् ।
नवाग्निं वाथ पञ्चाग्निमेकाग्निं वा प्रकल्प्य च ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तवत्कुरु ।
इन्धनाज्यचरूँल्लाजान्वेणुशालियवं तिलम् ॥
सक्तुसर्षपमुद्गं च पञ्चब्रह्मषडङ्गकैः ।
क्रमाद्द्रव्याणि जुहुयादष्टोत्तरशतं बुधः ॥
तदग्नौ रोपयेद्दीपं मध्यमादि यथाक्रमम् ।
पूर्वादि चोत्तरान्तं तु दीपमारोपयेद्बुधः ॥
सर्वदीपांस्तु तत्रैव प्रधानाभिमुखान्न्यसेत् ।
तत्प्रधानं तु तन्मन्त्रैरीशानाभिमुखं न्यसेत् ॥
पूजयेत्तु यथान्यायं पञ्चब्रह्माङ्गदैवतम् ।
गन्धपुष्पैः समभ्यर्च्य धूपदीपं प्रदापयेत् ॥'
(*पूर्वकारणे* ११२.१४—१९);
एतद्विषये *रौरवे* क्रियापादे २६.२२उ०—२४ श्लोका द्रष्टव्याः ।
[१५]समिधाज्य—ई
[१६]वैणवान्—ई
[१७]यवं च—
[१८]पदक्रमात्—'उ' पाठान्तरम्
[१९]जातेन वामेन—आ
[२०]सर्वात्मानं—आ
[२१]दीपाधारे सोघृतम्—आ; दीपाधारेषु पात्रे वा गोघृतं प्रक्षिप्य तस्मिन् घृते वर्तिं विनिक्षिपेत् इत्यन्वयः ।
[२२]घृते—आ, ई
[२३]ततोऽग्निं प्रज्वलि तत्र—आ; ततोऽग्निं प्रज्वलितं तत्र—ई, 'उ' पाठान्तरम् ।
[२४]चाग्निबीजेन—ई; अग्निबीजेन—'उ' पाठान्तरम् ।

[हुताग्नेर्दीपप्रवर्तनम्]

तस्मादग्नेरघोरेण गृहीत्वा चाथ वर्तिना ॥१३॥
दीपं प्रवर्तयेन्मध्याद्दीपाधारेषु देशिकः ।
[25]सर्वत्राग्निं ततो दीपानाप्रासादाच्च लक्षयेत्[26] ॥१४॥

[दीपारोपणाय कूटकल्पनम्[27]]

आरोपणाय दीपानामालयाग्रे च पृष्ठतः ।
पार्श्वयोरपि [28]कूटांस्तु कृत्वा [29]धामाङ्घ्रि[30]मानतः ॥१५॥
दीपाधाराञ्शरावांस्तु [31]पर्जन्यादि निवेशयेत् ।

[दीपस्तम्भकल्पनम्]

दीपस्तम्भांस्तु [32]चतुरश्चतुर्द्वारेषु [33]सद्मनः ॥१६॥
स्थापयेच्चक्र[34]संयुक्तौ द्वौ वा धामाग्रपृष्ठयोः[35] ।
एकमग्रेऽथवा स्तम्भं [36]स्तम्भवृक्षा भवन्त्यमी ॥१७॥

[दीपस्तम्भयोग्या वृक्षाः[37]]

[38]चम्पकाशोकपुन्नागा [39]वकुलोऽर्जुन एव च ।
[40]तालः सनालिकेरेण क्रमुको वंश एव च ॥१८॥

---

[25] सर्वे अग्निं —आ
[26] लक्षयेत्=दर्शयेत् ।
[27] 'प्रासादाग्रस्य परितश्चाष्टदिक्षु विशेषतः ।
कूटागाराणि कृत्वा तु चतुर्गात्रान्वितानि वै ॥
कूटबन्धेषु सर्वत्र मृदं विन्यस्य तत्र वै ।
दीपानि विन्यसेत्तेषु दीपस्तम्भांस्तु विन्यसेत् ॥'
(*सुप्रभेदे* १.१८.३, ४)
[28] कूटास्तु —ऋ
[29] यन्त्राघ्रि नामता —ऋ
[30] नामतः —ई, 'उ' पाठान्तरम् ।
[31] ते प . . . निवेशयेत् —आ; तानि पङ्क्त्या निवेशयेत् —ई; ते पर्जन्यादि निवेशयेत् —'उ' पाठान्तरम्; तोचत्यादि निवेशयेत् —ऋ
[32] चत्वारः —आ, ई, ऋ
[33] सात्मनः —आ; वात्मनः —ई; सत्मना —ऋ
[34] संयुक्तं —ऋ
[35] पृष्ठके —ऋ
[36] प्राभवृक्षा —आ
[37] 'चम्पकं नालिकेरं वा तालं वा खदिरं तु वा ।
तिलकं चार्जुनं वापि नन्दनं वेणुकं तथा ॥
तिन्त्रिणी किंशुकं चैव मधूकं क्रमुकं तथा ।
देवदारुद्रुमं चैव दीपदण्डं विधीयते ॥'
(*पूर्वकारणे* ११२.२३ उ० —२५ पू०);
एतद्विषये *रौरवे* क्रियापादे ३ श्लोकः, ४ पूर्वार्धं तदीयटिप्पणी च द्रष्टव्याः ।
[38] चम्पकं च . . . कम्रौ —आ; चम्पकं च कद्रौ —'उ' पाठान्तरम् ।
[39] तिलकौ ज्वल एव च —आ; तिलकौज्वल एव च —'उ' पाठान्तरम् ।
[40] तालं —आ

[दीपस्तम्भप्रमाणम्] [६१]

[६२]स्तम्भः प्रासाददैर्घ्यः स्याच्छिखरेण [६३]समोऽथवा ।
नवाष्ट[६४]सप्तहस्तैर्वा श्रेष्ठादिक्रमयोगतः ॥१९॥

[दीपस्तम्भेषु चक्रविन्यासः] [६५]

स्तम्भे चक्राणि [६६]विन्यस्येद्रुद्रनन्दाब्धिसंख्यया ।
श्रेष्ठमध्यकनिष्ठानि तेषां [६७]विस्तार उच्यते ॥२०॥
विकारतालमुत्कृष्टं[६८] रवितालं तु मध्यमम् ।
कन्यसं वसुतालं स्यात्स्तम्भचक्रेषु[६९] विस्तरम् ॥२१॥
एकतालं च [७०]हित्वाथ तथा स्तम्भाग्रमूलयोः ।
तुल्यान्तराणि [७१]चक्राणि स्तम्भेषु परिकल्पयेत् ॥२२॥
[७२]चक्रार्धादरमाकृष्य प्रतिचक्रं चतुष्टयम्[७३] ।

[दीपस्तम्भेषु पुत्तलिकानिक्षेपः] [७४]

ततः स्तम्भं तु संस्थाप्य वृत्तं कुर्यात्तदग्रके ॥२३॥

---

[६१] 'प्रासादस्य समं दीर्घमुक्षस्थलसमं तु वा ।
प्रस्तरान्तं नासिकान्तं कूटान्तं वा गलान्तकम् ॥
महानासिकपोतान्तं शालान्तं गोपुरान्तकम् ।
दण्डमानमिति ख्यातं हस्तमानमथोच्यते ॥
दण्डहस्तं समारभ्य चैकहस्तविवर्धनात् ।
यावत्त्रयोदशान्तं स्यात्तस्योत्सेधमिहोच्यते ॥'
'द्वाविंशदङ्गुलं नाहं कन्यसं त्विति कीर्तितम् ।
मध्यमस्य तु नाहं स्यादष्टाविंशतिकाङ्गुलम् ॥
चतुश्चत्वारिंशकाङ्गुल्यमुत्तमं नाहमुच्यते ।'
(*पूर्वकारणे* ११२.२८—३०; ३६, ३७ पू०); एतद्विषये *रौरवे* क्रियापादे २६.४पूर्वार्धं ५ श्लोकस्तदीयटिप्पणी च द्रष्टव्याः ।

[६२]स्तम्भं प्रासाददैर्घ्यं—आ

[६३]समं तथा—ई

[६४]हस्तसप्तैर्वा—ऋ

[६५] 'दीपकीलानि दण्डे तु योजयेच्चक्रवत्क्रमात् ।
सहस्रदीपसंयुक्तं तस्यार्धेन युतं तु वा ॥
शतदीपयुतं वापि दण्डमूले तथाग्रतः । . . .
मूलचक्रं समाश्रित्य यावच्चक्रान्तकं यथा ।
पूर्वोक्तदीपसंयुक्तं कर्तव्यं युक्तमेव वा ॥
घटिभिर्बन्धयेत्तत्र वृत्तं वृत्तं यथा तथा ।'
(*पूर्वकारणे* ११२.३२ उ०—४०; ४२ उ०, ४३); एतद्विषये *रौरवे* क्रियापादे ८—१२ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[६६]विन्यस्य रुद्र—आ, ई, ऋ

[६७]विस्तारमुच्यते—ऋ

[६८]ताल उत्कृष्टं—आ

[६९]वक्त्रेषु—ई; चक्रेष्ट—ऋ

[७०]षट्तालं नीत्वा स्तम्भा—ऋ

[७१]यकाणी—ऋ

[७२]चक्रार्धमरमा . . . त्य—आ; चक्रार्धमरमादृत्य—ई; चक्रार्धमरमाकृत्य—'उ' पाठान्तरम् ।

[७३]अत्र कल्पयेदिति शेषः ।

[७४] 'पात्रं तु कारयेद्धीमाञ्शातकुम्भमयेन तु ।
रौप्येण वाथ ताम्रेण मृण्मयेनैव बुद्धिमान् ॥
खारित्रयं तु सङ्ग्राह्य तैलैर्वा गोघृतेन वा ।
तस्यार्धं वा तदर्धं वा पात्रमापूर्य देशिकः ।
षट्सप्ताष्टनवाच्छिन्नवस्त्रात्तु कन्यसादयः ॥

तस्योर्ध्वे विन्यसेद्दीपपात्रमाढकपूरितम् ।
तत्र [55]पुत्तलिकां बद्ध्वा [56]कार्पासस्यूतकेन च ।।२४।।
सितवस्त्रेण तां तत्र निक्षिपेत्तैलमध्यमे ।
चक्रे तु [57]परितो वृत्ते दीपाधाराञ्शरावकान् ।।२५।।
प्रत्येकं रुद्र[58]नन्दाब्धिसंख्यातान्विन्यसेत्सुधीः ।
श्रेष्ठमध्य[59]कनिष्ठांस्तांस्तेषु पुत्तलिकां ततः ।।२६।।
निक्षिप्य [60]तैलयुक्तेषु; ततः पुण्याहमाचरेत्[61] ।

[दीपस्तम्भेऽग्नेरर्चनं तमुद्दिश्य होमश्च]

स्तम्भमूलं तु वस्त्रेण नवेन परिवेष्टयेत् ।।२७।।
तस्यासनार्थं तन्मूले स्थण्डिलं शालिभिर्भवेत् ।
परिस्तीर्य कुशैः पश्चाद्दीपस्तम्भेऽग्निमर्चयेत् ।।२८।।
[62]दिक्षु कोणेषु वा तस्य कुर्याद्धोमचतुष्टयम् ।
[63]समिदाज्यचरूणां [64]तु प्रत्येकं विंशसंख्यया ।।२९।।
शिवपाशुपतास्त्राभ्यां वह्निबीजेन चैव हि ।
हुत्वा सर्वत्र पूर्णां तु वह्निबीजेन सर्वतः ।।३०।।

[अधिवासितदीपानां देवाग्रे निक्षेपः, देवाय दीपसमर्पणं च[65]]

[66]प्रविश्य देवदेवेशं [67]नत्वा तानधिवासितान् ।
दीपाञ्शिरसि [68]हस्ते वा धारयित्वा प्रदक्षिणम् ।।३१।।

कार्पासबीजसंयुक्तं पुत्तल्याख्यं तु बन्धयेत् ।
आसमन्ताद्घृतेनैव पुत्तल्याख्यं तु सेचयेत् ।।
पात्रे निक्षिप्य दण्डाग्रे विन्यसेत्कीलमध्यमे ।।'
(*पूर्वकारणे* ११२.६७ उ० —७१ पू०);
एतद्विषये रौरवे क्रियापादे २६.१३ श्लोकः १४ पूर्वार्धं तदीयटिप्पणी च द्रष्टव्याः ।

[55]पुत्तलिका बद्ध्वा —'उ' पाठान्तरम्

[56]कार्पासस्थितयेन च —आ, ई

[57]परिते —आ

[58]नन्दास्थि —ई

[59]कनिष्ठान्तान् तेषु —आ, ई

[60]तैलं युक्तां तत्ततः —आ; तैलयुक्तान्ततः —ई

[61]'पुण्याहं वाचयित्वा तु दण्डं गन्धादिनार्चयेत् ।
वस्त्रयुग्मेन वैकेन वेष्टयेद्दण्डमूलकम् ।।'
(*उत्तरकामिके* ८.४१)

[62]'कूटेषु योजयेद्धीमान्कुण्डेषु स्थण्डिलेषु वा ।
अधिवासनहोमेन समं होमं समाचरेत् ।।
वह्नावीशे तु कूटे वा देशिको होममाचरेत् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।।
अत्र होमाधिपाः प्रोक्ता दीपदण्डे सदाशिवः ।
पलाशवटशम्यर्कान्सर्वे वह्नेरथापि वा ।।'
(*उत्तरकामिके* ८.४३ —४५);
एतद्विषये *रौरवे* क्रियापादे २६.२५ —२७ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[63]समिधाज्य —ई

[64]त्वाहुतिर्विंश —ई

[65]एतद्विषये *रौरवे* क्रियापादे २६.२८ —३६ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[66]अत्र 'प्रासादम्' इति पदमध्याहृत्य व्याख्येयम् ।

[67]दत्वा —आ

[68]हस्तैर्वा —आ

कृत्वा धामनि [६९]देवाग्रे प्रविश्यान्तर्निवेशितान्[७०] ।
हृदयेन तु मन्त्रेण शिवस्यैतान्प्रदापयेत्[७१] ।।३२।।

[तद्दीपाद्धाम्नः सर्वत्र दीपप्रवर्तनम्]

तेषु मध्याद्गृहीत्वाथ [७२]दीपेन करवर्तिना ।
[७३]अन्तर्बहिश्च तद्धाम्नो दीपमालां [७४]प्रवर्तयेत्।।३३।।
[७५]तेषु तेषु च सर्वेषु प्राकारेषु च दीपयेत् ।
[७६]प्रासादोपरि सर्वत्र दीपयेद्दीपमालया ।।३४।।

[उत्सवः]

[७७]उत्सवं च ततः [७८]कुर्यात्प्रदीपैरुज्वलैः सह ।
नृत्तगीतसमायुक्तं सर्वातोद्यसमन्वितम् ।।३५।।

[दीपस्तम्भे दीपारोपणप्रकारः]

तस्मिन्नुत्सवकाले तु स्तम्भ[७९]मूलसमीपके ।
देवताग्रे तु [८०]स्तम्भाग्रमारुह्य परिचारकः ।।३६।।
प्रवर्तितेन दीपेन [८१]दीपिका अधिवासिताः ।
दीपये[८२]त्क्रमशश्चोर्ध्वाच्चक्रेषु परितः क्रमात् ।।३७।।
अधः स्थित्वाथवा [८३]दीपान्वर्तयेद्दण्डवर्तिना ।

[दीपारोपणानन्तरं कर्तव्यो विधिः]

विशेषादर्चनं कुर्याद्रात्रौ स्नपनपूर्वकम् ।।३८।।
चन्दनागरुधूपैश्च [८४]भक्ष्यभोज्यादिभिः शुभैः ।
शिवस्याथ शिवाग्नौ च विशेषाद्धोममाचरेत् ।।३९।।
उत्सव[८५]प्रतिमां चापि विशेषेण समर्चयेत् ।

---

[६९] वेदाश्रे —आ; वेदाग्रे —'उ' पाठान्तरम् ।
[७०] निवेश्य तान् —ई, 'उ' पाठान्तरम् ।
[७१] स्यैतान्निवेदयेत् —ई; स्यैतत्प्रदापयेत् —ऋ
[७२] दीपान्तं —आ, ई, ऋ
[७३] अन्तर्बलिश्च —ऋ
[७४] प्ररोपयेत् —ई
[७५] कृतेष्वेतेषु —आ, ऋ; कृतेषु तेषु —'उ' पाठान्तरम् ।
[७६] प्रासादेऽपि च सर्वत्र —ऋ
[७७] उत्सवं तु —ऋ
[७८] कुर्याद्दीपैरज्वलितैः सह —ऋ
[७९] मूले सदीपके —आ
[८०] स्तम्भाग्रे आरुह्य —आ
[८१] दीपिकादधिवासिता —आ; दीपिकानधिवासितान् —ई
[८२] त्क्रमतश्चोर्ध्वात् —ई, 'उ' पाठान्तरम् ।
[८३] दीपानि दीपयेद्दण्ड —ई
[८४] भक्त्या भोज्या —'उ' पाठान्तरम् ।
[८५] प्रतिमांश्चैव —आ; प्रतिमांश्चापि —'उ' पाठान्तरम् ।

[दीपारोपणफलम्]

प्रतिसंवत्सरं ह्येवं यः कुर्याद्दीपमुत्तमम् ।
सर्वान्कामान् [८६]स संप्राप्य [८७]परमं तु शिवं व्रजेत् ।।४०।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] [८८]कृतिकादीपविधिः
[सप्ततितमः] पटलः।।

---

[८६]सुसम्प्राप्य—आ, ऋ; च सा प्राप्य—ई
[८७]परमां तु—आ; पदमन्ते—ई; चरामे तु—ऋ

[८८]कृत्तिकादीपविधिपटलः समाप्तः—आ; वृत्तिकादीपविधिपटलः—ई; कृत्तिकादीपपटलः—'उ' पाठान्तरम्।

एकसप्ततितमः पटलः

[तुलादिप्रत्ययविधिः[1]]

[दिव्याष्टकम्[2]]

[3]प्रत्ययानां तुलादीनां विधिं वक्ष्ये समासतः ।
[4]अस्मिन्विवादमात्रेऽस्य कर्ताकर्तेति वा तथा ।।१।।
[5]वादेषु संशये जाते [6]जिज्ञासूनां च [7]भूभुजाम् ।
निश्चयार्थमिदं प्रोक्तं दिव्यानामष्टकं क्रमात् ।।२।।
[8]तुलाग्न्यापो विषं [9]कोशस्तप्तमाषस्तथापरः ।
तण्डुलाः [10]शपथश्चेति'

---

[1]अयं पटलः 'इ, ई' मातृकयोः 'उ' मातृकापाठान्तरे च दृश्यते; एतद्विषये *अंशुमदागमे* ३—५; *सन्तान-संहितायां* ५८—६२; *सूक्ष्मे* ३३—३५ पटला द्रष्टव्याः ।

[2]'तत्र दिव्यं नाम तुलारोहणं विषाशनमप्सु प्रवेशो लोहधारणमिष्टापूर्तप्रदानमन्यांश्च शपथान्कारयेत् ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४४४)

'धटोऽग्निरुदकं चैव विषं कोशश्च पञ्चमः ।
पञ्चैतान्याह दिव्यानि दूषितानां विशोधने ।।
संदिग्धेऽर्थेऽभिशस्तानां परीक्षार्थं महात्मना ।
नारदेन पुरा प्रोक्ताः सत्यानृतविभाजिकाः ।।
धटोऽग्निरुदकं चैव विषं कोशश्च पञ्चमम् ।
षष्ठं च तण्डुलाः प्रोक्तं सप्तमं तप्तमाषकः ।।
अष्टमं फालमित्युक्तं नवमं धर्मजं भवेत् ।
दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयम्भुवा ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४५४, ४५५)

'अग्निर्विषं धटस्तोयं धर्माधर्मौ च तण्डुलाः ।
शपथाश्चैव निर्दिष्टा मुनिभिर्दिव्यनिर्णये ।।'
[*शुक्रनीतिः*]
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४७०)

'अर्जुन उवाच—
दिव्यप्रकारमिच्छामि श्रोतुं चाहं मुनीश्वर ।
कथं कार्याणि कानीह स्फुटं यैः पुण्यपापकम् ।।
नारद उवाच—
शपथाः कोशधटकौ विषाग्नी तप्तमाषकः ।
फालं च तण्डुलं चैव दिव्यान्यष्टौ विदुर्बुधाः ।।'
(*स्कान्दमहापुराणे* १.२ अध्याय ४४.१, २)

[3]अयं श्लोकः 'इ' मातृकायां न दृश्यते ।

[4]अस्मिन् स्विपाय मन्त्रस्य कर्ता—; अस्मिन् स्विपाय मत्र स्यात् कर्ता—'उ' पाठान्तरम्; मात्रशब्दोऽत्र कार्त्स्न्यार्थे प्रयुक्तः ।

[5]पादेषु—इ, ई

[6]विज्ञासूनां—इ, ई

[7]हद्भुजाम्—इ, ई

[8]अत्रत्याः '३—५' श्लोकाः *शैवागमपरिभाषामञ्जर्यां* ८.७५ उ० —७८ पू० श्लोकत्वेन दृश्यन्ते ।

[9]कोशसप्तमाष्टस्तथा—इ; कोशसप्तमासस्तथा—ई; कोशसप्तमाषस्तथा—'उ' पाठान्तरम् ।

[10]शपथं चेति—इ, ई

[दिव्यकर्मकरणयोग्यस्थानम्[11]]

[12]तत्कर्मस्थानमुच्यते ।।३।।
शिवालयेषु सर्वेषु दुर्गासूर्यालयेषु च ।
विनायक[13]गुहस्थाने नदीमध्ये च तीरयोः ।।४।।
तटाकतीरे वा कुर्यान्नृपब्राह्मणसंनिधौ ।

[दिव्यकर्मकरणयोग्यकालः[14]]

सर्वेषामपि कालः स्याद्वारः सूर्याधिराजयोः[15] ।।५।।
[16]तुला [17]सर्वेषु योग्या [18]स्यात्प्रवाते सति वर्जयेत् ।

---

[11]'इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम् ।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत् ।।
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे ।
अतोऽन्येषु तु कार्येषु सभामध्ये बिदुर्बुधाः ।।
इन्द्रस्थानमिति प्रख्यातदेवतायतनमुपलक्षयति ।'
(*सरस्वतीविलासे* पृ० १८३)
'इन्द्रस्य परमेश्वरस्य स्थानम् ।'
(*बालम्भट्ट्याम्* २.९९)
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४६०, ४६१)
'कारयेत्सर्वदिव्यानि देवब्राह्मणसन्निधौ ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४४४)
'कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४४६)

[12]तत्क्रमस्थान —इ

[13]शुभस्थाने —ई

[14]'कुजवारेऽर्कवारे वा चण्डिकारुद्रसन्निधौ ।
पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्तितम् ।।'
(*धर्मकोशे* व्यवहारकाण्डे ४६९);
'सत्यासत्यविशुद्ध्यर्थं प्रत्ययं कारयेद्बुधः ।
अङ्गारे सूर्यवारे वा कारयेद्देशिकः सदा ।।'
(*अंशुमदागमे* ३.१३०, २पू०)
'सत्यानृतविशुद्ध्यर्थं प्रत्ययं कारयेद्बुधः ।
अङ्गारे सूर्यवारे च कारयेद्देशिकः सदा ।।'
(*सन्तानसंहितायाम्* ५८. २३०, ३पू०; *सूक्ष्मे* ३३. २३०, ३पू०)
'एतत्सर्वं रवौ वारे कार्यं सम्पूज्य भास्करम् ।'
(*स्कान्दमहापुराणे* १.२.४४.४३ उ०)

[15]स्याद्वारसूर्याधिराजयोः —इ, 'उ' पाठान्तरम्; कुजविषये *शान्तिकुसुमाकरे* १६२ तमपृष्ठे 'ग्रहाणामधिराजः' इति प्रयोगो दृश्यते। यथा —
'कुजप्रीत्यै ददाम्यद्य विप्राय विदितात्मने ।
रक्तभूमिभवो रक्तो रक्तवस्त्रप्रियः कुजः ।।
ग्रहाणामधिराजत्वात्प्रायशः पट्टसंयुतम् ।
तद्ददामि द्विजाग्र्याय अतः शान्तिं प्रयच्छ मे ।।'
(*शान्तिकुसुमाकरे* पृ० १६२)
शब्दकल्पद्रुमे 'ग्रहराजः' इत्यस्य शब्दस्य विवरणे सूर्यः चन्द्रश्च इति मेदिनीकोशे, बृहस्पतिः इति शब्दरत्नावली इति व्याख्यातम्। अथाप्यत्र ग्रन्थान्तरेषु कुजार्कवारयोरेव प्रत्ययविषये निर्देशात् कुज एवाधिराजत्वेन स्वीकृत इति भाति।

[16]'चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च ।
एते साधारणा मासा दिव्यानामविरोधिनः ।।
धटः सर्वर्तुकः प्रोक्तो वाते वाति विवर्जयेत् ।
अग्निः शिशिरहेमन्तवर्षासु परिकीर्तितः ।।
शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम् ।
ग्रीष्मे सलिलमित्युक्तं हिमकाले तु वर्जयेत् ।।
कोशस्तु सर्वदा देयस्तुला स्यात्सार्वकालिकी' ।
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४६४);
'वर्षासु वह्निरित्युक्तः शिशरे तु धटः स्मृतः ।
ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४५०);

[19]शरद्वसन्तयोश्चापि निदाघेऽग्निं विवर्जयेत् ।।६।।
निदाघे सलिलं कार्यं शिशिरे विषमुच्यते ।
हेमन्तेऽपि च कुर्वीत विषमन्येषु वर्जयेत् ।।७।।
शेषाणामिह दिव्यानां सर्वकालो विधीयते ।

[तुलाविधिः, तत्र तुलानिर्माणप्रकारः]

तेषु [20]दिव्येषु सर्वेषु तुलादौ [21]सम्यगुच्यते ।।८।।
[22]अश्वत्थ[23]नृपवृक्षौ च[24] [25]बिल्वः किंशुक एव च ।
[26]शिंशपाखदिरौ चैव शमी [27]ग्राह्यास्तुलाविधौ ।।९।।
मधुयुक्तकुठारेण तस्य च्छेदोऽस्त्रमन्त्रतः ।
तेनैव [28]तरुणा [29]कार्यस्तुलाधारस्तु तोरणः ।।१०।।
[30]स्तम्भयोरुच्छ्रयं तत्र रवितालेन कल्पयेत् ।

'न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम् ।
न प्रावृषि विषं दद्यात्प्रवाते न तुलां नृपः ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४५१);
'न प्रवाते धटं देयं नोष्णकाले हुताशनम् ।'
(*स्कान्दमहापुराणे* १.२.४४.१८ उ०)

[17]सर्वं तु योग्यं—इ

[18]स्यात्तावत्ते सति वर्तयेत्—इ, ई

[19]शरद्वासन्त—इ

[20]सर्वेषु दिव्येषु—ई

[21]सौम्यमुच्यते—ई

[22]'खादिरं कारयेत्तत्र निर्व्रणं शुक्लवर्जितम् ।
शांशपं तदभावे तु शालं वा कोटरैर्विना ।।
अञ्जनं तिन्दुकीसारं तिमिशो रक्तचन्दनम् ।
एवंविधानि काष्ठानि धटार्थं परिकल्पयेत्' ।।
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४७४);
'छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्या मनीषिभिः ।।
मन्त्रः सौम्यो वानस्पत्यश्छेदने जप्य एव च ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४८०);
खदिरार्जुनवृक्षाणां शिंशपशालजं त्वथ ।
तुलाकाष्ठे तु कर्तव्यं तथा वै शिक्यकद्वयम् ।।
(*स्कान्दमहापुराणे* १.२.४४.३१ उ०, ३२ पू०)

[23]नृपवृक्षः=आरग्वधः इति *शब्दकल्पद्रुमः* ।

[24]वृक्षं च—इ, ई

[25]बिल्वकिंशुकमेव च—इ, ई

[26]शिंशुपाखदिरं—इ, ई

[27]ग्राहस्तुलां—इ; ग्राह्यस्तुला—ई, 'उ' पाठान्तरम् ।

[28]करुणा—इ

[29]कार्या तुलाधारं तु तोरणम्—इ, ई

[30]'चतुर्हस्ता तुला कार्या पादौ कार्यौ तथाविधौ ।
अन्तरं तु तयोर्हस्तौ भवेदध्यर्धमेव वा ।।
हस्तद्वयं निखेयं तु पादयोरुभयोरपि ।
चतुरस्रा तुला कार्या दृढा ऋज्वी तथैव च ।
कटकानि च देयानि त्रिषु स्थानेषु यत्नतः ।।
तोरणे तु तथा कार्ये पार्श्वयोरुभयोरपि ।
धटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः ।।
अवलम्बौ च कर्तव्यौ तोरणाभ्यामधोमुखौ ।
मृन्मयौ सूत्रसम्बद्धौ धटमस्तकचुम्बिनौ ।।
शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि ।
प्रागग्रान्कल्पयेद्दर्भांस्तत्र विप्रः समाहितः ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४८१, ४८२);
'सुसमायां पृथिव्यां च दिग्भागे पूर्वदक्षिणे ।
यज्ञियस्य तु वृक्षस्य स्थाप्यं स्यान्मुण्डकद्वयम् ।।
स्तम्भकस्य प्रमाणं च सप्तहस्तं प्रकीर्तितम् ।
द्वौ हस्तौ निखनेत्काष्ठं दृश्यं स्याद्धस्तपञ्चकम् ।।
अन्तरं तु तयोः कार्यं तथा हस्तचतुष्टयम् ।
मुण्डकोपरि काष्ठं च दृढं कुर्याद्विचक्षणः ।।
चतुर्हस्तं तुलाकाष्ठमव्रणं कारयेत् स्थिरम् ।'
'प्राङ्मुखो निश्चलः कार्यः शुचौ देशे धटस्तथा ।'
(*स्कान्दमहापुराणे* १.२.४४.२८—३१पू०, ३२उ०)

विंशाङ्गुलं तयोर्नाहं तोरणं च तथा भवेत् ।।११।।
[31]तुलार्धे तु तुलाकुम्भमायसं परिकल्पयेत् ।
[32]तुलायामं भवेत्तत्र मुनितालेन [33]सम्मितम् ।।१२।।
चतुरश्रा तुला सा [34]स्यादायामाग्न्यंशनाहतः ।
तन्मध्ये जल[35]मार्गः स्यात्खातमङ्गुल[36]मानतः ।।१३।।
तस्य द्व्यङ्गुलविस्तारं सुसमं [37]परिकल्पयेत् ।
अयोमयीं तु लम्बार्थं तुलामध्ये तु शृङ्खलाम् ।।१४।।
[38]आबध्योर्ध्वमुखीं तस्याः शिरसोरप्यधोमुखीम्[39] ।
[40]शृङ्खलां [41]तादृशीं बद्ध्वा [42]द्वयोः शिक्यं निवेशयेत् ।।१५।।
तोरणेऽथ तुलां सम्यग्लम्बयित्वा [43]यथासमम् ।

[तुलया परीक्षाक्रमः]

[तत्र परीक्ष्यस्य शिरसि लिखितश्लोकपत्रबन्धनम्]

[44]अस्त्रमन्त्रेण संप्रोक्ष्य तोरणं च तुलां ततः ।।१६।।
कृतोपवासं सम्यक्तु [45]स्नातं [46]शुद्धाम्बरं तथा ।
[47]आहूयाभ्युक्षितं[48] चापि ततो [49]मन्त्रं समुच्चरन् ।।१७।।
कृताञ्जलिपुटं तत्र प्राङ्मुखं [50]तत्र वेदयेत् ।
तस्य मूर्ध्नि [51]शिरःपत्रं लिखितं स्वप्रतिज्ञया ।।

---

[31]तुलाध्ये तु—इ; तन्मध्ये च तुलालम्ब—ई; तन्मध्ये तु तुलालम्ब— 'उ' पाठान्तरम् ।
[32]तुलायाम भवे—इ
[33]सम्मतम्—इ
[34]स्याद्यामान्यंशना—इ
[35]मार्गं—इ, ई
[36]मात्रतः—इ
[37]परिकल्पितम्—इ
[38]आबोर्ध्वोर्ध्वमुखीं—ई
[39]मुखम्—इ
[40]शृङ्खलं—ई
[41]तादृशां—इ; तादृशं—ई
[42]तयो—ई
[43]समं यथा—'उ' पाठान्तरम् ।
[44]'सचैलं स्नातमाहूय सूर्योदय उपोषितम् ।
कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४४६);
'प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।
श्रुतवृत्तोपसम्पन्नः शान्तचित्तो विमत्सरः ।।
सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः ।
उपोषितः शुद्धवासाः कृतदन्तानुधावनः ।।
सर्वासां देवतानां च पूजां कुर्याद्यथाविधि ।
अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे ।।
पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्तितम् ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४७५)
[45]स्नानं—इ; स्नात्वा—ई; स्नातुं—'उ' पाठान्तरम् ।
[46]शुद्धाम्बरस्तथा—ई
[47]आभूया—इ
[48]भ्युक्षतं—ई; भ्युक्ष्य तं—'उ' पाठान्तरम् ।
[49]होमं—इ, ई; अत्र होमस्य पश्चाद्विधीयमानत्वात् 'समुच्चरन्' इति समनन्तरपदार्थानुसारेण 'मन्त्रं' इति शोधितम् ।
[50]तं निवेदयेत्—इ
[51]शिरापत्रं—ई; शिरापात्रं 'उ' पाठान्तरम् ।

[५२]श्लोकेनानेन संयुक्तं [५३]बन्धयेद्धेतिमुच्चरन् ।।१८।।

'चन्द्रादित्यौ दहनपवनौ भूमिरापोऽम्बरं च
क्षेत्रज्ञोऽयं [५४]यदिह सकलं कर्म [५५]जानन्त्यमुष्य ।
[५६]कालः कर्ता [५७]स च सकलविद्देवनाथो यमश्च
देवाः सर्वे सततमपि नु [५८]संस्थिताश्चात्र देहे ।।१९।।

[तोरणे देवतायजनम्]

[५९]ततस्तत्तोरणस्थानमष्टहस्तेन सम्मितम् ।
गोमयेनोपलिप्याथ[६०] कुट्टिमे परितः सुरान् ।।२०।।

---

[५२]'यं चार्थमभियुक्तः स्याल्लिखित्वा तं तु पत्रके ।
मन्त्रेणानेन सहितं तत्कार्यं तु शिरोगतम् ।।
एवं हवनान्तां देवपूजां विधायानन्तरमभियुक्तमर्थं वक्ष्यमाणमन्त्रसहितं पत्रे लिखित्वा तत्पत्रं शोध्य शिरोगतं कुर्यात् । यथाह—यमिति ।'
'आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये
धर्मश्च जानाति नरस्य वृत्तम् ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४६८);
'मूर्ध्नि पत्रं ततो न्यस्य न्यस्तपत्रं निवेशयेत् ।
पत्रे मन्त्रस्त्वयं लेख्यो यः पुरोक्तः स्वयम्भुवा ।।
ब्रह्मणस्त्वं सुता देवि तुलानाम्नेति कथ्यते ।
तुकारो गौरवे नित्यं लकारो लघुनि स्मृतः ।।
गुरुलाघवसंयोगात्तुला तेन निगद्यसे ।
संशयान्मोचयस्वैनमभिशस्तं नरं शुभे ।।'
(*स्कान्दमहापुराणे* १.२.४४.३८—४०)

[५३]बद्धये—ई

[५४]यदि हर सकलं—ई, 'उ' पाठान्तरम् ।

[५५]जालं त्वमुष्य—ई

[५६]कालं—ई

[५७]स सकलविदे देव—ई

[५८]संस्मिता—इ; सस्मिता—ई

[५९]'वादित्रतूर्यघोषैश्च गन्धमाल्यानुलेपनैः ।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ।।
एह्येहि भगवन्धर्म अस्मिन्दिव्ये समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ।।
आवाह्य तु धटे धर्मं पश्चादङ्गानि विन्यसेत् ।।
इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा ।।
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ।'
'इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः ।।'
'देवेशेशानयोर्मध्ये आदित्यानां तथायनम् ।'
'अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ।।'
'प्रेतेशरक्षोमध्ये च मातृस्थानं प्रकल्पयेत् ।'
'निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ।।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ।'
'धटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः ।।
एतासां देवतानां तु स्वनाम्ना पूजनं विदुः ।'
'भूषावसानं धर्माय दत्त्वा चार्घ्यादिकं क्रमात् ।।
अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् ।
गन्धादिकां निवेद्यान्तां परिचर्यां प्रकल्पयेत् ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४६५—४६७);
'अत्र च तुलां पताकाध्वजालङ्कृतां विधाय तस्याम् "एह्येहि" इति मन्त्रेण धर्ममावाह्य "धर्मायार्घ्यं कल्पयामि नमः" इत्यादिना प्रयोगेणार्घ्यपाद्याचमनीय-मधुपर्काचमनीयस्नानवस्त्रयज्ञोपवीताचमनीयमकुट-कटकादिभूषान्तं दत्त्वा, इन्द्रादीनां दुर्गान्तानां प्रणवाद्यैः स्वनामभिश्चतुर्थ्यन्तैरर्घ्यादिभूषान्तं पदार्थानुसमयेन दत्त्वा, धर्माय गन्धपुष्पधूपदीपनैवेद्यानि दत्त्वा इन्द्रादीनां गन्धादीनि पूर्ववद्दद्यात् ।'
(मिताक्षरायां २.१०२ इति *धर्मकोशे* व्यवहारकाण्डे पृ० ४६७)

[६०]लिप्यात्र—'उ' पाठान्तरम्

[61]तोरणं चार्चयेन्मन्त्री तद्विधानमथोच्यते ।
इन्द्रादीनां दिगीशानामष्टानां च यथास्थिति[62] ॥२१॥
[63]मण्डलं रत्निमात्रेण लिखित्वा तेषु देशिकः ।
व्रीहिभिः [64]पिङ्गलैः [65]सर्वाण्यन्तरालानि पूरयेत् ॥२२॥
पद्ममष्टदलं तेषु[66] कर्णिकाकेसरैर्युतम् ।
वर्तयेदथवा तानि [67]वालुकैर्वा प्रपूरयेत् ॥२३॥
इन्द्रपावकयोर्मध्ये वसूनां स्थानमुच्यते ।
[68]अग्निनाशनयोर्मध्ये रुद्राणां स्थानमुच्यते ॥२४॥
मातॄणां यजनस्थानं मध्ये स्याद्यमरक्षसोः ।
रक्षोवरुणयोर्मध्ये स्थानं गाणेश्वरं भवेत् ॥२५॥
वरुणानिलयोर्मध्ये मरुतां स्थानमुच्यते ।
वायुचन्द्रमसोर्मध्ये [69]दुर्गास्थानमथोच्यते ॥२६॥
ईशानसोमयोर्मध्ये स्थानं विद्याद्गुहस्य च[70] ।
देवेशेशानयोर्मध्ये रवीणां स्थानमुच्यते ॥२७॥
एतेषामपि सर्वेषां मण्डलं तु पृथक् पृथक् ।
कौशिकाङ्गुलमानेन कल्पयेत्कल्पवित्तमः ॥२८॥
पुण्याहं वाचयित्वाथ प्रादक्षिण्यक्रमेण तु ।
इन्द्रादीन्परितो [71]यष्ट्वा देशिकः शान्तमानसः ॥२९॥
अर्घ्यादिहविरन्तैस्तु द्रव्यैः पश्चाद्यजेत्क्रमात् ।
वस्वादीन्परितो देवान्पूर्ववद्देशिकोत्तमः ॥३०॥
[72]धर्मयज्ञौ ततो धीमांस्तोरणस्तम्भयोर्यजेत् ।
[73]तोरणे च चतुर्वक्त्रं तुलायां विष्णुमर्चयेत् ॥३१॥
[74]तुलायन्त्रे तुलामध्ये [75]जलमावर्जयेत्ततः ।
[76]जलेनोत्तानसमतामन्वीक्ष्याथ परीक्षकैः ॥३२॥
धर्मविद्भिर्द्विजेन्द्रैस्तु वणिग्भिर्देशिकैस्तदा[77] ।

---

[61]तोरणाभ्यर्चनं मन्त्री —ई
[62]स्थितिम् —इ; स्थितिः —ई, 'उ' पाठान्तरम् ।
[63]मण्डलं अरत्नि —इ
[64]विमलैः —ई, 'उ' पाठान्तरम् ।
[65]सर्वानन्तरालानि —इ
[66]तस्मिन् —ई
[67]वालुकैर्भूरि पूरयेत् —इ; वालुकैः परिपूरयेत् —ई; अत्र वालुकाशब्दः क्लीबे प्रयुक्तः ।
[68]ईशानाग्नेययोर्मध्ये —ई; नाशनः ण्यन्तात्कर्तरि ल्युट् । चित्तनाशनो वित्तनाशन इतिवत् । यम इत्यर्थः ।
[69]रुद्राणां स्थानमुच्यते —ई, 'उ' पाठान्तरम् ।
[70]गुहस्य तु —ई
[71]'यष्ट्वा' इति पदप्रयोगः *अजिते* २०.१४७, १४९ श्लोकयोरपि दृश्यते ।
[72]यमं यज्ञे —इ; धर्मयज्ञस्ततो —ई; धर्मयज्ञो ततो —'उ' पाठान्तरम् ।
[73]तोरणेषु —ई
[74]तुलयेत्तु —इ; तुलयत्ते —'उ' पाठान्तरम् ।
[75]जलमावर्जयेत् =जलं क्षिपेदित्यर्थः ।
[76]जलेन तानतान्वीक्ष्याथ —इ; जलेन तान्तथान्विक्ष्य —ई
[77]सदा —ई

[७८]तुलामारोपयेत्तं हि [७९]नरं मृत्तिकया तदा ।।३३।।
[८०]तुलितं तु ततो मर्त्यमवतार्याथ होमयेत् ।

[होमः[८१]]

[८२]तदास्यापि चतुर्दिक्षु [८३]स्थण्डिले [८४]सैकतैः कृते ।।३४।।
शिवाग्निं [८५]विधिनाधाय समिदाज्यचरून्क्रमात् ।
मन्त्रैस्तु होमयेद्धी[८६]मानात्मविद्याशिवात्मकैः ।।३५।।
सर्वत्र प्रणवेनाथ दद्यात्पूर्णाहुतिं [८७]स्रुचा ।

---

[७८]तुलायां पापयोस्तस्मिन् —इ

[७९]नरमुक्तिकयत्तथा —इ; नरमृत्तिकया तदा —ई; नरमृत्तिकयत्तदा —'उ' पाठान्तरम्

[८०]कूलितं तु —इ;
'पश्चिमे तोलयेत्कर्तॄनन्यस्मिन्मृत्तिकां शुभाम् ।
इष्टकाभस्मपाषाणकपालास्थिविवर्जिताम् ।।
पिटकं पूरयेत्तस्मिन्निष्टकाग्रावपांसुभिः ।
अत्र च मृत्तिकेष्टकाग्रावपांसूनां विकल्पः ।'
'परीक्षका नियोक्तव्यास्तुलामानविशारदाः ।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च ।।
कार्यः परीक्षकैर्नित्यमवलम्बसमो धटः ।
उदकं च प्रदातव्यं धटस्योपरि पण्डितैः ।।
यस्मिन्न प्लवते तोयं स विज्ञेयः समो धटः ।
तोलयित्वा नरं पूर्वं पश्चात्तमवतार्य तु ।।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४८२);
'मृत्पिण्डमभिशस्तं च तुलायां धारयेत्समम् ।
धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलाम् ।
पिटिकां पूरयेत्तस्मिन्निष्टकालोष्टपांसुभिः ।।
प्रथमारोपणे ग्राह्यं प्रमाणं निपुणैः सह ।
तुलाशिलाभ्यां तुल्यं च तोरणं न्यस्तलक्षणम् ।।
सुवर्णकारा वणिजः कुशलाः कांस्यकारकाः ।
अवेक्षेरन्धटतुलां तुलाधारणकोविदाः ।।
तुलयित्वा नरं पूर्वं चिह्नं कृत्वा धटस्य च ।
कक्षास्थाने यदा तुल्यमवतार्य ततो धटात् ।।
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४७५, ४७६);
'वणिक्सुवर्णकारो वा कुशलः कांस्यकारकः ।
तुलाधारधरः कार्यो रिपौ मित्रे च यः समः ।।
श्रावयेत्प्राड्विवाकोऽपि तुलाधारं विचक्षणः ।
ब्रह्मघ्ने ये स्मृता लोका ये च स्त्रीबालघातके ।।
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा ।
एकस्मिंस्तोलयेच्छिक्ये ज्ञातं सुपोषितं नरम् ।।
द्वितीये मृत्तिकां शुभ्रां गौरां तु तुलयेद्बुधः ।
इष्टिकाभस्मपाषाणकपालास्थीनि वर्जयेत् ।।
तोलयित्वा ततः पूर्वं तस्मात्तमवतारयेत्' ।
(*स्कान्दमहापुराणे* १.२.४४.३३उ० —३७)

[८१]'चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगैः ।
आज्येन हविषा चैव समिद्भिर्होमसाधनैः ।
सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत् ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४६७)

[८२]तदस्यापि —इ; तदाव्यापि —ई

[८३]स्थण्डिलैः —इ

[८४]सैकते —इ, ई, 'उ' पाठान्तरम् ।

[८५]विधिनादाय —इ, ई

[८६]मात्रात्रविद्या —इ

[८७]स्रुचम् —इ; स्रुवा —'उ' पाठान्तरम् ।

[शुद्ध्यशुद्धिनिर्णयः[८८]]

पुनस्तं [८९]धटमारोप्य पठेन्मन्त्रवरं गुरुः ॥३६॥
भगवन्देवदेवेश सर्वभूतहृदि स्थित ।
[९०]सर्वज्ञास्य नरस्याशु ब्रूहि वृत्तं सुरेश्वर[९१] ॥३७॥
इति देवं ततो मन्त्री प्रार्थयित्वा परीक्षयेत् ।
[९२]पूर्ववत्तुलितः [९३]सोऽयमतिक्रान्तो विशुध्यति ॥३८॥
धर्मगौरवमाहात्म्याद्भवेत्तस्यात्मगौरवम् ।

[अग्निविधिस्तत्र मण्डलकल्पनम्[९४]]

[९५]अथाग्नेश्च विधिं वक्ष्ये कृत्वा स्थानं यथा पुरा ॥३९॥

---

[८८]'धटं तु कारयेन्नित्यं पताकाध्वजशोभितम् ।
तत आवाहयेद्देवान्विधिनानेन मन्त्रवित् ॥
धटमामन्त्रयेच्चैव विधिनानेन शास्त्रवित् ।
त्वं धट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ॥
धकाराद्धर्ममूर्त्तिस्त्वं टकारात्कुटिलं नरम् ।
धृतो भावयसे यस्माद्धटस्तेनाभिधीयसे ॥
त्वं वेत्सि सर्वजन्तूनां पापानि सुकृतानि च ।
त्वमेव देव जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषस्तोल्यते त्वया ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ॥
ज्योतिर्विद् ब्राह्मणः श्रेष्ठः कुर्यात्कालपरीक्षणम् ।
विनाड्यः पञ्च विज्ञेयाः परीक्षाकालकोविदैः ॥
साक्षिणो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः ।
ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु ॥
शंसन्ति साक्षिणः श्रेष्ठाः शुद्ध्यशुद्धी नृपे तदा ।
तेषां वचनतो गम्यः शुद्ध्यशुद्धिविनिर्णयः ॥
तुलितो यदि वर्धेत शुद्धो भवति धर्मतः ।
हीयमानो न शुद्धः स्यादेकेषां तु समोऽशुचिः ॥
अल्पदोषः समो ज्ञेयो बहुदोषस्तु हीयते ।
धर्मगौरवमाहात्म्यादतिरिक्तो विशुद्ध्यति ॥'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४८२, ४८३);
'कृत्वा स्वस्य तुलासाम्यं हीनाधिक्यं विशोधयेत्'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४७०)
'भूय आरोपयेत्तं तु नरं तस्मिन्सपत्रकम् ।
तुलितो यदि वर्धेत शुद्धो भवति धर्मतः ॥
हीयमानो न शुद्धः स्यादिति धर्मविदो विदुः ।'
(*स्कान्दमहापुराणे* १.२.४४.४१,४२ पू०)

[८९]पुनरारोप्य—इ, ई

[९०]सर्वज्ञस्य—इ, ई

[९१]सुरेश्वरः—ई

[९२]पूर्ववत्तुलितं—इ; पूर्ववत्तुरितं—ई, 'उ' पाठान्तरम् ।

[९३]सायमति—इ; साये अधिकात्तोपि—ई; सायअधिकात्तो वि—'उ' पाठान्तरम् ।

[९४]'पितामहः—
अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितम् ।
कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा ॥
प्रख्यातदेवतायतनादिविहितदेशे भूशुद्धिमुद्धननावोक्षणाभ्यां कृत्वा तत्र नवमण्डलानि प्रागपवर्गाणि प्राड्विवाकः सोपवासो नृपाज्ञया प्रवृत्तः कुर्यादित्यर्थः ।
'आग्नेयं मण्डलं त्वाद्यं द्वितीयं वारुणं स्मृतम् ।
तृतीयं वायुदैवत्यं चतुर्थं यमदैवतम् ॥
पञ्चमं त्विन्द्रदैवत्यं षष्ठं कौबेरमुच्यते ।
सप्तमं सोमदैवत्यं सावित्रं त्वष्टमं तथा ॥
नवमं सर्वदैवत्यमिति दिव्यविदो विदुः ।
गोमयेन कृतानि स्युरद्भिः पर्युक्षितानि च ॥
द्वात्रिंशदङ्गुलं प्राहुर्मण्डलान्मण्डलान्तकम् ।
अष्टाभिर्मण्डलैरेवमङ्गुलानां शतद्वयम् ॥
षट्पञ्चाशत्समधिकं भूमेस्तु परिकल्पना ।
कर्तुः पदसमं कार्यं मण्डलं तु प्रमाणतः ॥
अग्निरत्र पूज्यत इत्याग्नेयं हविष्ट्वेन सूक्तत्वेन वा

[96]देवतावरणैर्युक्तं मध्ये तस्याथ देशिकः ।
नवकं मण्डलानां तु [97]कुर्यात्पूर्वापरायतम्[98] ।।४०।।
मण्डलानां प्रमाणं स्यात्प्रत्येकं तु दशाङ्गुलम् ।
अन्तरालं तु [99]तेषां च तावदेव प्रकीर्तितम् ।।४१।।
मण्डलेषु च सर्वेषु पूरयेदन्तरालकम् ।
[100]वालुकेन ततो [101]रेखाप्रान्तांस्तांश्चापि पूरयेत् ।।४२।।
पक्वेष्टकासमुद्भूतैश्चूर्णैः [102]सर्वान्समन्ततः ।
आग्नेयमण्डलं चाद्यं द्वितीयं [103]वारुणं स्मृतम् ।।४३।।
तृतीयं [104]वायुदैवत्यं चतुर्थं यमदैवतम् ।
पञ्चमं त्विन्द्रदैवत्यं षष्ठं कौबेरमुच्यते ।।४४।।
सप्तमं [105]सोमदैवत्यमष्टमं सूर्यदैवतम् ।
नवमं वैश्वदैवत्यं[106] मण्डलं परिकीर्तितम् ।।४५।।

[देवतायजनं होमश्च]

बाह्यस्था देवताः सर्वाः पूर्ववत्पूजयेत्क्रमात् ।
होमं चापि यथापूर्वं तत्रापि परिकल्पयेत् ।।४६।।

मण्डलस्याग्नेयत्वासंभवात्। एवं वारुणत्वादिकमपि मण्डलस्य पूजाधिकरणतया द्रष्टव्यम्। तेन 'प्रैतु होतुश्चमस' इत्यादि प्रैषमन्त्रस्थया होतुश्चमस इत्यादि-समाख्यया होत्रादीनां तत्र तत्र चमसो भक्षणप्राप्ति-वदाग्नेयादिसमाख्ययैवाग्न्यादीनां तत्र तत्र मण्डले पूजनं कार्यमित्यस्मादेव वचनात्सिद्धम्। अतो मण्डलानां प्रोक्षणानन्तरं मण्डलाधिदेवतापूजनं कुर्यात्।'

'मण्डले मण्डले देयाः कुशाः शास्त्रप्रचोदिताः।
विन्यसेच्च पदं कर्ता तेषु नित्यमिति स्थितिः ।।
शान्त्यर्थं जुहुयादग्नौ घृतमष्टोत्तरं शतम्।'

(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९४—४९६);

'अग्निदिव्यं यथा प्राह विरिञ्चिस्तच्छृणुष्व मे।
सप्तमण्डलकान्कुर्याद्दिवस्याग्रे रवेस्तथा ।।
मण्डलान्मण्डलं कार्यं पूर्वेणेति विनिश्चयः।
षोडशाङ्गुलकं कार्यं मण्डलात्तावदन्तरम् ।।'
'आदौ पूजां रवेः कृत्वा हुताशस्याथ कारयेत्।
रक्तचन्दनधूपाभ्यां रक्तपुष्पैस्तथैव च ।।'

(*स्कान्दमहापुराणे* १.२.४४, ५०, ५१, ५७ उ०, ५८ पू०)

[95]अथाग्नेश्चविधिं—ई

[96]देवतावरणे युक्ते—इ

[97]कृत्वा पूर्वा—ई

[98]युतम्—इ

[99]तेषांश्च—इ

[100]अत्र 'बालुका' शब्दः क्लीबे प्रयुक्तः।

[101]रेखाप्रातस्ताश्चापि—इ, 'उ' पाठान्तरम्; रेखाप्रान्तास्तां—ई

[102]सर्वास्सम—इ, ई

[103]चारुणं—इ

[104]वासुदैवत्यं—ई

[105]यमदैवत्यं—ई

[106]देवत्यं—इ, ई

[अयःपिण्डकल्पनं तत्संतापनं च[१०७]]

[१०८]पञ्चाशत्पलिकं कुर्यादायसं खण्डमुत्तमम् ।
[१०९]तस्यायामस्समुद्दिष्टः [११०]कौशिकाङ्गुलमेव हि ।।४७।।
तद्रूपं वर्तुलं वा स्यात्सर्वदोषविवर्जितम् ।
देवतावरणाद्बाह्ये कृत्वायस्कारगर्तकम् ।।४८।।
[१११]वह्निबीजं समुच्चार्य [११२]टङ्कमभ्यर्चयेत्ततः ।
प्रदक्षिणक्रमेणैव कृत्वा गर्ते क्षिपेत्ततः ।।४९।।
अयस्कारेण पिण्डं तद् [११३]ध्मापयेत्तत्र [११४]भस्त्रया ।
अग्निवर्णं तु [११५]सन्ताप्य स्थापयित्वा त्वनन्तरम् ।।५०।।

[अग्निना परीक्षाक्रमः][११६]

उपोषितं कृतस्नानमार्द्राम्बरमनाकुलम् ।
[११७]आद्ये मण्डलके तस्य बद्ध्वा शिरसि पत्रकम् ।।५१।।
[११८]सूर्यस्याभिमुखं [११९]मन्त्री [१२०]स्थितस्तस्याञ्जलौ ततः ।

---

[१०७]'जात्यैव लोहकारो यः कुशलश्चाग्निकर्मणि ।
दृष्टप्रयोगश्चान्यत्र तेनायोऽग्नौ प्रतापयेत् ।।
अग्निवर्णमयःपिण्डं सस्फुलिङ्गं सुरञ्जितम् ।
पञ्चाशत्पलिकं भूयः कारयित्वा शुचिर्द्विजः ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९१);
'अस्त्रहीनं समं कृत्वा अष्टाङ्गुलमयोमयम् ।
पिण्डं तु तापयेदग्नौ पञ्चाशत्पलिकं समम् ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९६);
'ततस्तु सुसमं कृत्वा अष्टाङ्गुलमथायसम् ।
पिण्डं हुताशसन्तप्तं पञ्चाशत्पलिकं दृढम् ।।'
(*स्कान्दमहापुराणे* १.२.४४.५६ उ०, ५७ पू०)

[१०८]पञ्चाशत्पलितं —इ; पञ्चाशद्बलितं —ई

[१०९]तस्यायामं समुद्दिष्टं —इ; तस्यायांशं समुद्दिष्टं —ई

[११०]कौशिकाङ्गुलि —इ

[१११]वह्निबील —इ

[११२]अर्कमभ्य —ई, 'उ' पाठान्तरम् ।

[११३]धामयेत् —इ; यामयेत् —ई, 'उ' पाठान्तरम् ।

[११४]हस्तया —इ, ई

[११५]संस्थाप्य —इ

[११६]'पश्चिमे मण्डलं तिष्ठेत्प्राङ्मुखः प्राञ्जलिः शुचिः ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९६);
'प्राङ्मुखस्तु ततस्तिष्ठेत्प्रसारितकराङ्गुलिः ।
आर्द्रवासाः शुचिश्चैव शिरस्यारोप्य पत्रकम् ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९८);
'अभिशस्तस्य पत्रं च बध्नीयाच्चैव मूर्धनि ।
मन्त्रेणानेन संयुक्तं ब्राह्मणाभिहितेन च ।।
त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे ।
पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे ।।
त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम् ।
जठरस्थोऽसि भूतानां ततो वेत्सि शुभाशुभम् ।
पापेषु दर्शयात्मानमर्चिष्मान्भव पावक ।
अथवा शुद्धभावेषु शीतो भव महाबल ।।'
(*स्कान्दमहापुराणे* १.२.४४.५८ उ० —६२ पू०)

[११७]आर्द्रे —इ

[११८]सूर्यस्यापि —इ

[११९]तन्त्री —ई, 'उ' पाठान्तरम् ।

[१२०]स्थितस्यास्याञ्जलौ —ई, 'उ' पाठान्तरम् ।

[१२१]सप्तपिप्पलपत्राणि न्यस्त्वा [१२२]सूत्रेण वेष्टयेत् ।।५२।।
तदूर्ध्वे [१२३]चाक्षतान्मन्त्री शमी[१२४]पत्रं च विन्यसेत् ।
[१२५]ततो मन्त्री पठेन्मन्त्रं तस्याग्रे [१२६]सुस्थितः सुधीः ।।५३
त्वमग्ने सर्वभूतानामन्तश्चरसि पावक[१२७] ।
[१२८]साक्षिवत्पुण्यपापेभ्यो ब्रूहि [१२९]सत्यं [१३०]कवे मम ।।५४।।
[१३१]ततोऽयस्कारगर्तात्तदग्निवर्णमयोमयम् ।
अयस्कारेण [१३२]पिण्डं तद्दापयेदञ्जलौ ततः ।।५५।।

---

[१२१]'अश्वत्थसप्तपत्राणि सप्तसूत्रेण वेष्टयेत् ।
परशुं विन्यसेद्धस्ते इदं मन्त्रं समुच्चरन् ।।
'त्वमग्ने सर्वभूतानामन्तश्चरसि पावक ।
साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ।।'
(*अंशुमति* परशुप्रत्ययविधौ ४.२५, २६);
अश्वत्थसप्तपत्राणि सप्तसूत्रेण वेष्टयेत् ।
परशुं विन्यसेद्धस्ते इदं मन्त्रं समुच्चरन् ।।
'त्वमग्ने सर्वभूतानामन्तश्चरसि पावक ।
साक्षिमान्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ।।'
(*सन्तानसंहितायां* परशुप्रत्यये ५९.२४ उ० —२६पू०);
'अश्वत्थसप्तपत्राणि सप्तसूत्रेण वेष्टयेत् ।
परशुं विन्यसेद्धस्ते इदं मन्त्रं समुच्चरन् ।।
'त्वमग्ने सर्वभूतानामन्तश्चरसि पावक ।
साक्षी यत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ।
(*सूक्ष्मागमे* परशुप्रत्यये ३४.२३ उ० —२५ पू०);
'सप्तपिप्पलपत्राणि अक्षतान्सुमनो दधि ।
हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टनं तथा ।।
(*धर्मकोशे व्यवहारकाण्डे* पृ० ४९६);
'सप्तपिप्पलपत्राणि शमीपत्राण्यथाक्षतान् ।
दूर्वायाः सप्त पत्राणि दध्यक्तांश्चाक्षतान्न्यसेत् ।।
शम्यक्षतं तथा दूर्वां दत्त्वा पत्रेषु विन्यसेत् ।'
(*धर्मकोशे व्यवहारकाण्डे* पृ० ४९८);
'सप्ताश्वत्थपत्राणि बध्नीयुः करयोस्ततः ।
नवेन कृतसूत्रेण कार्पासेन दृढं यथा ।।
(*स्कान्दमहापुराणे* १.२.४४.५५ उ० ५६ पू०)

[१२२]वस्त्रेण —ई, उ० पाठान्तरम् ।

[१२३]चाक्षतं —इ; चाष्टकं —ई

[१२४]पत्रं तु —इ, ई

[१२५]'तापिते तु ततः पश्चादग्निमावाहयेच्छुचिः ।
आवाहनं तु देवानां कृत्वा पूर्वं विधानवत् ।।
त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे
त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम् ।।
जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम् ।
पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे ।।
पापेषु दर्शयात्मानमर्चिष्मान्भव पावक ।
अथवा शुद्धभावेषु शीतो भव हुताशन ।।
त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेव देव जानीषे न विदुर्यानि मानवाः ।।
त्वमग्ने सर्वभूतानामन्तश्चरसि पावक ।
साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ।।
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ।।
ततस्तं समुपादाय राजा धर्मपरायणः ।
संदंशेन नियुक्तो वा हस्तयोस्तस्य निक्षिपेत् ।।
संदंशेन तं लोहपिण्डं समादायेत्यन्वयः । नियुक्तः प्राड्विवाकः ।'
(*धर्मकोशे व्यवहारकाण्डे* पृ० ४९६, ४९७)

[१२६]संस्थितः —ई, 'उ' पाठान्तरम् ।

[१२७]पावकः —इ; पातकः —ई

[१२८]साक्षिमान् सर्वपुण्येषु —इ; साक्षिमत्पुण्यपापेभ्यो —ई, उ० पाठान्तरम् ।

[१२९]सत्यं क्रमे —इ, ई; सत्यक्रमे —उ० पाठान्तरम् ।

[१३०]कविः =अग्निरित्यर्थः 'अग्निर्विप्रशुचिः कविः शुची रोचत आहुतिः' (तै.० संहिता १.३.१४); अंशुमदागमं धर्मकोशं चानुसृत्यात्र 'कवे' इति पाठः शोधितः ।

[१३१]ततोयस्तारगर्तान्तादग्नि —इ

[१३२]पिण्डानाद्दापये —ई

[१३३]**सोऽपि सप्तपदं गच्छेन्मण्डलान्मण्डलं क्रमात् ।**
नवमे मण्डले पश्चात्तृणे [१३४]शुष्केऽपि तं न्यसेत् ॥५६॥
ततः षट् पञ्च वा नीत्वा [१३५]नाडिकास्तत्करद्वयम् ।
तत्परीक्ष्य तदाचार्यो [१३६]दग्धं वादग्धमित्यथ ॥५७॥
दग्धं चेत्स नरः पापी [१३७]भवत्येव न संशयः ।

[तोयपरीक्षाविधिः]

[१३८]**तोयस्याथ विधिं वक्ष्ये**[१३९] [१४०]**शुद्ध्यशुद्धिविनिर्णयम् ॥५८॥**
[१४१]**ह्रदेषु च तटाकेषु** [१४२]**जलूकाझषकीटकैः ।**
वर्जितेषु मनोज्ञेषु स्वच्छतोयेषु देशिकः ॥५९॥
शैवालादिविहीनेषु [१४३]**नोत्तरङ्गेषु कारयेत् ।**
[१४४]**पूर्ववद्देवतार्चां तां होमं चापि प्रकल्पयेत् ॥६०॥**

---

[१३३]'हुताशतप्तं लोहस्य पञ्चाशत्पलिकं समम् ।
हस्ताभ्यां पिण्डमादाय व्रजेत्सप्त शनैः शनैः ॥
न मण्डलमतिक्रामेन्नाप्यर्वाक्स्थापयेत्पदम् ।
न पातयेत्तामप्राप्तो यावद्भूः परिकल्पिता ॥
भयात्पातयते यस्तु दग्धो वा न विभाव्यते ।
पुनस्तं हारयेल्लोहं स्थितिरेवं दृढीकृता ॥
तीर्त्वनिन विधानेन मण्डलानि कृतानि तु ।
न दग्धः सर्वथा यस्तु स विशुद्धो भवेदिह ॥'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९४);
'मण्डलानि तथा सप्त षोडशाङ्गुलमानतः ।
तावदन्तरितो गच्छेद्गत्वा नवतृणे क्षिपेत् ॥
पिण्डस्तु सतृणे नवममण्डले निक्षेप्यः ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९८);
'तप्तायोगोलकं धृत्वा गच्छेन्नवपदं करे ।
तप्ताङ्गारेषु वा गच्छेत्पद्भ्यां सप्तपदानि हि ॥'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४७०);
'ततोऽभिशस्तः शनकैर्मण्डलानि परिक्रमेत् ।
परिक्रम्य शनैर्जह्याल्लोहपिण्डं ततः क्षितौ ॥
विपत्रहस्तं तं पश्चात्कारयेद्व्रीहिमर्दनम् ।
निर्विकारौ करौ दृष्ट्वा शुद्धो भवति धर्मतः ॥
भयाद्वा पातयेद्यस्तु तदधो वा विभाव्यते ।
पुनस्त्वाहारयेल्लोहं विधिरेष प्रकीर्तितः ॥'
(स्कान्दमहापुराणे १.२.४४.६२ उ० — ६५ पू०)
[१३४]शुष्केधितं त्यजेत् — इ
[१३५]नाडिकास्तस्कर — इ
[१३६]दण्डं वादण्डमित्यथा — ई
[१३७]भवत्येवं — ई
[१३८]'पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्जितेऽम्भसि'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९८);
'स्थिरे तोये निमज्जेत्तु न ग्राहिणि न चाल्पके ।
तृणशैवालरहिते जलूकामत्स्यवर्जिते ॥
नदीषु नातिवेगासु तडागेषु सरस्सु च ।
ह्रदेषु स्थिरतोयेषु कुर्यात्पुंसां निमज्जनम्
आविशेत्सलिले नित्यमूर्मिपङ्कविवर्जिते ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५०४)
[१३९]तोयस्याधिदैवत्यं — इ; तोयस्यास्य विधिं वक्ष्ये — ई; तोयस्याधिविधिं वक्ष्ये — उ० पाठान्तरम् ।
[१४०]वक्ष्ये शुद्धिविनिर्णयम् — इ
[१४१]भूतेषु — ई
[१४२]अलिका झष — इ; जम्बूकझष — ई
[१४३]'तरङ्गविहीनेषु' इत्यर्थः । नैकेतिवत् 'नोत्तरङ्गेषु' इति प्रयोगः ।
[१४४]'तत्र प्रयोगः —
उक्तलक्षणजलाशयनिकटे तथा तोरणं विधाय, उक्तदेशे लक्ष्यं कृत्वा, तोरणसमीपे सशरं धनुः सम्पूज्य, जलाशये वरुणमावाह्य, पूजयित्वा, तत्तीरे धर्मादींश्च देवान्हवनान्तमिष्ट्वा, दक्षिणां कृत्वा, शोध्यस्य शिरसि प्रतिज्ञापत्रं बद्ध्वा प्राड्विवाको जलमभिमन्त्रयेत् ।
''ॐ तोयस्त्वं प्राणिनां प्राणः सृष्टेराद्यं तु निर्मितम् ।

[145]मध्ये चापि ततो धीमान्मण्डले हस्तमात्रके ।
धर्मदेवं समभ्यर्च्य तत्र सत्यमनुं न्यसेत् ।।६१।।
शनैः [146]शनैस्तमभ्यर्च्य हेतिना देशिकः सुधीः ।
ततो नरं समाहूय शिरःपत्रं तु [147]बन्धयेत् ।।६२।।
[148]सपत्रं तं जले स्थाप्य प्राङ्मुखं तस्य चाग्रतः ।
स्थापयेन्मर्त्यमन्यं च; चापविद्याकृतश्रमः[149] ।।६३।।
[150]धनुस्तत्र समुद्धृत्य त्रीञ्शरान्प्राङ्मुखः स्थितः ।
प्रक्षिपेत्तेषु [151]मध्यस्थो गच्छेदूर्ध्वं तु मध्यतः ।।६४।।

शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा ।।
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे ।''
इति मन्त्रेण ।

शोध्यस्तु ''ॐ सत्येन माभिरक्षस्व वरुणे''त्यनेन जलमभिमंत्र्य, गृहीतस्थूणस्य शोध्यनाभिमात्रोदकावस्थितस्य बलीयसः प्राङ्मुखस्य पुरुषस्य समीपं जलमध्ये गच्छेत् ।

ततः शरेषु त्रिषु मुक्तेषु मध्यमशरपतनस्थाने मध्यमशरं गृहीत्वा जविन्येकस्मिन्पुरुषे स्थिते अन्यस्मिंश्च तोरणमूले स्थिते, प्राड्विवाकेन तालत्रये दत्ते शोध्यो गृहीतस्थूणप्राङ्मुखपुरुषस्योरू गृहीत्वा निमज्जति ।

तत्समकालमेव तोरणमूलस्थोऽपि मध्यमशरस्थानं द्रुतं गच्छति ।

ततः शरग्राही च तस्मिन्प्राप्ते द्रुतं तोरणमूलं प्राप्य जलान्तःस्थं यदि न पश्यति तदा शुद्धः । कर्णाद्यङ्गं विना शिरोमात्रदर्शनेऽपि शुद्धः । मज्जनस्थानादन्यत्रगमनेप्यशुद्धः । दक्षिणां दद्यादिति ।
(*शब्दकल्पद्रुमे* 'उदकपरीक्षा' शब्दविवरणे 'दिव्यतत्त्वे' इति निर्दिश्योदाहतम् ।);
'जलहस्तं तथा प्राहुर्द्विप्रकारं पुराविदः ।
जलहस्तं स्मृतं चैकं मज्जनं चापरं विदुः ।।
बाणक्षेपस्तथादानं यावद्वीर्यवता कृतम् ।
तावत्तं मज्जयेज्जीवेत्तथा तच्छुद्धिमादिशेत् ।।'
(*स्कान्दमहापुराणे* १.२.४४.८१, ८२);
पूर्ववत्ते यथार्चां तां—इ; पूर्ववत्ते यथेच्छातो—ई; पूर्ववत्ते यथेच्छान्तां—उ० पाठान्तरम् ।
[145]'तोयस्यातः प्रवक्ष्यामि विधिं धर्म्यं सनातनम् ।
शुभाशुभपरीक्षार्थं ब्रह्मणाभिहितं स्वयम् ।।
मण्डलं धूपदीपाभ्यां कारयेच्च विचक्षणः ।
शरान् सम्पूजयेद्भक्त्या वैणवं च धनुस्तथा ।।
मङ्गलैर्धूपदीपैश्च ततः कर्म समाचरेत् ।
धूपदीपाभ्यां शरान् सम्पूजयेदित्यन्वयः । जलसमीपे संस्कृतायां भुवि मण्डलं कृत्वा तत्र शरादिकं सम्पूज्य प्रयोगारम्भः कार्य इत्यर्थः ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५०३)
[146]शनैः समभ्यर्च्य—ई
[147]धारयेत्—ई
[148]तत्पत्रं तु जले —ई, 'उ' पाठान्तरम्;
'स्थापयेत्प्रथमं तोये स्तम्भवत्पुरुषं नृपः ।
आश्रित्य यं निमज्जन्ति मानवाः शुद्धिकाङ्क्षिणः ।'
स्तम्भवत्पुरुषं=स्तम्भसमन्वितं पुरुषम् ।
'उदके प्राङ्मुखस्तिष्ठेद्धर्मस्थूणां प्रगृह्य च' ।
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५०५)
[149]श्रमम्—इ, ई
[150]'मध्यमेन तु चापेन प्रक्षिपेच्च शरत्रयम् ।
हस्तानां तु शते सार्धे लक्ष्यं कृत्वा विचक्षणः ।।
न्यूनाधिके तु दोषः स्यात्क्षिपतः सायकांस्तथा ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ ५०१);
'तत्रानभिमग्नस्यारागद्वेषिणः पुरुषस्यान्यस्य जानुनी गृहीत्वाभिमन्त्रितमम्भः प्रविशेत् । तत्समकालं च नातिक्रूरमृदुना धनुषा पुरुषोऽपरः शरक्षेपं कुर्यात् । तं चापरः पुरुषो जवेन शरमानयेत् । तन्मध्ये यो न दृश्यते स शुद्धः परिकीर्तितः । अन्यथा त्वविशुद्धः स्यादेकाङ्गस्यापि दर्शने ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४९९)
[151]मध्यस्तं—ई; मध्यस्थं—ई, 'उ' पाठान्तरम् ।

[१५२]तस्मिन्नुद्योगकाले तु [१५३]मज्जतः [१५४]स्नानवत् त्रिधा ।
[१५५]उरोदघ्ने जले तत्र गृहीत्वा[१५६]ग्रस्थजानुनी[१५७] ।।६५।।
यथा देहं [१५८]न पश्येत्तु तीरस्था जनता तदा ।
यावच्छरं [१५९]गृहीत्वाशु [१६०]नान्तिकं च न दूरकम् ।।६६।।
आयाति स धनुष्मांस्तु न [१६१]तूर्णं न विलम्बितम् ।
[१६२]तावन्निमज्जतः [१६३]शुद्धिर्नान्यस्य परिकीर्तिता ।।६७।।

[विषविधिः][१६४]

[१६५]विषस्याथ विधिं वक्ष्ये पूर्ववद्देवतार्चनम्[१६६] ।
[१६७]पूजने च कृते होमे तत्र मध्ये विषं सुधीः ।।६८।।
मण्डले विन्यसेत्पात्रे [१६८]पूजिते तु घृतप्लुतम्[१६९] ।
अस्त्रमन्त्रेण संप्रोक्ष्य[१७०] तानि वक्ष्ये समासतः ।।६९।।

---

[१५२]तस्मिन्तु योग—ई

[१५३]मज्जते—इ; मजिते—ई, 'उ' पाठान्तरम् ।

[१५४]स्नानवस्त्रियः—इ; सानवस्त्रियः—इ, 'उ' पाठान्तरम् ।

[१५५]उरे दण्डे—इ; उरदघ्ने—ई; उदरे दग्धे—'उ' पाठान्तरम् ।

[१५६]ग्रस्तजानुनी—इ

[१५७]जानुनि—ई

[१५८]निपश्येत्तु—इ

[१५९]गृहीत्वासौ—इ

[१६०]. . . दूरकम्—इ; नान्तकी स न दूरकम्—ई, 'उ' पाठान्तरम् ।

[१६१]कुण्ठेन विलम्बितम्—इ; तुङ्गं न—ई

[१६२]तावत्रिभज्जतः—इ

[१६३]शुद्धिर्नत्यस्य—इ; शुद्धिर्नान्तस्य—ई, 'उ' पाठान्तरम् ।

[१६४]'अथ विषम् । विषाण्यदेयानि सर्वाणि ऋते हिमाचलोद्भवाच्छार्ङ्गात् । तस्य च यवसप्तकं घृतप्लुतमभिशस्ताय दद्यात् ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५०६);
'दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ ।
धूपोपहारमन्त्रश्च पूजयित्वा महेश्वरम् ।।
द्विजानां सन्निधानेन दक्षिणाभिमुखे स्थिते ।
उदङ्मुखः प्राङ्मुखो वा दद्याद्विप्रः समाहितः' ।।
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५०८);
'प्राड्विवाकः कृतोपवासो महादेवं पूजयित्वा तस्य पुरतो विषं व्यवस्थाप्य धर्मादिपूजां हवनान्तां विधाय प्रतिज्ञापत्रं शोध्यस्य शिरसि निधाय विषमभिमन्त्रयते ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५११);
'अथातः सम्प्रवक्ष्यामि विषदिव्यं शृणुष्व मे ।
द्विप्रकारं च तत्प्रोक्तं घटसर्पविषं तथा ।।
शृङ्गिणो वत्सनाभस्य हिमशैलभवस्य च ।
यवाः सप्त प्रदातव्या अथवा षड् घृतप्लुताः ।।
मूर्ध्नि विन्यस्तपत्रस्य पत्रे चैवं निवेशयेत् ।
त्वं विष ब्रह्मणः पुत्र सत्यधर्मे व्यवस्थितः ।
त्रायसस्वैनं नरं पापात्सत्येनास्य भवामृतम् ।।'
(*स्कान्दमहापुराणे* १.२.४४.४४ उ०—४७)

[१६५]विषस्याधि—इ

[१६६]देवतार्चयेत्—इ; अत्र कुर्यादिति शेषः ।

[१६७]पूजिते च—इ

[१६८]पूरितं—इ; पूर्णितं—ई; 'उ' पाठान्तरम् ।

[१६९]तत्र मध्ये मण्डले पूजिते पात्रे घृतप्लुतं विषं सुधीः विन्यसेत् इत्यन्वयः ।

[१७०]अभिशस्ताय विषं दद्यादिति शेषः ।

[दातव्यानि विषाणि] [१७१]

[१७२]लाङ्गली हयमारं च कारस्करमतः परम् ।
[१७३]धुत्तूरबीजं चैतानि विषाणि स्युः [१७४]सुरोत्तम ।।७०।।
एतेष्वेकतमं [१७५]ग्राह्यं निष्कद्वयसमं ततः ।
तस्य हस्ते ततो दद्यात्संस्थितस्य नरस्य तु ।।७१।।
सोऽपि तद्भक्षयेत्सद्यः सूर्यस्याभिमुखस्थितः ।

[शुद्ध्यशुद्धिनिर्णयः] [१७६]

परीक्षाकालस्तस्यापि याममात्रमिति स्मृतम् ७२।।
निर्विकारो [१७७]यदि भवेच्छुद्धो भवति मानवः ।
[१७८]अन्यथा चेदशुद्धः स्यात्पापे तस्मिन्प्रकाशिते ।।७३।।

[प्रत्यौषधैः प्रशमनम्]

प्रत्यौषधैस्ततश्चापि रक्षयेद्विषपीडितम् ।
[१७९]शुण्ठी [१८०]लाङ्गलिकायै [१८१]स्यात्पथ्या तु करवीरके ।।७४।।
कारस्करे भवेज्जम्बु प्रवालं च ततोऽम्बुजम् ।
धुत्तूरस्याम्बुपिष्टं तच्छमनाय प्रदापयेत् ।।७५।।

---

[१७१] 'यवाः सप्त प्रदातव्याः शुद्धिहेतोरसंशयम् ।
शृङ्गिणो वत्सनाभस्य हिमजस्य विषस्य वा ।।
चारितानि च जीर्णानि कृत्रिमाणि तथैव च ।
भूमिजानि च सर्वाणि विषाणि परिवर्जयेत्' ।।
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५१०);
'अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः ।
गुञ्जाहिफेनो धुस्तूरः सप्तोपविषजातयः ।।
अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका ।
करवीरोऽथ धुस्तूरः पञ्च चोपविषाः स्मृताः' ।।
(*शब्दकल्पद्रुमे* विषशब्दविवरणे)

[१७२] लाङ्गलिं गेयमारं च—इ; लाङ्गलीं हय—ई, 'उ' पाठान्तरम् ।

[१७३] धुर्धूरबीजं—इ, ई

[१७४] सुरोत्तमः—इ

[१७५] ग्राह्य—ई, 'उ' पाठान्तरम् ।

[१७६] 'पञ्चतालशतं कालं निर्विकारो यदा भवेत् ।
तदा भवति संशुद्धस्ततः कुर्याच्चिकित्सितम्' ।।
'छायानिवेशितो रक्ष्यो दिनशेषमभोजनः ।
विषवेगक्लमातीतः शुद्धोऽसौ मनुरब्रवीत् ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५०९)
भक्षिते तु यदा स्वस्थो मूर्छाछर्दिविवर्जितः ।
निर्विकारो दिनस्यान्ते शुद्धं तमिति निर्दिशेत् ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५११);
'येन वेगैर्विना जीर्णं छर्दिमूर्च्छाविवर्जितम् ।
तं तु शुद्धं विजानीयादिति धर्मविदो विदुः ।।
क्षुधितं क्षुधितः सर्पं घटस्थं प्रोच्य पूर्ववत् ।
संस्पृशेत्तालिकाः सप्त न दशेच्छुद्ध्यतीति सः ।
(*स्कान्दमहापुराणे* १.२.४४.४८, ४९)

[१७७] यदिक्भावे शुद्धिः—इ; यदि भावे शुद्धि—ई

[१७८] अन्यदा वेद—इ

[१७९] शूर्णि—इ

[१८०] लाङ्गलिकाय—इ, ई

[१८१] स्यात्पत्या—ई

[कोशविधिः[१८२]]

[१८३]कोशस्याथ विधिं वक्ष्ये देवार्चाहोमपूर्वके ।
कृते कर्मणि सर्वस्मिंस्तस्य कोशं प्रदापयेत् ।।७६।।
[१८४]त्रिविधस्यापि लिङ्गस्य ब्रह्मविष्ण्वोर्गुहेन्द्रयोः ।
विनायकस्य दुर्गायाः [१८५]सूर्यस्याप्यायुधस्य च ।।७७।।
मातृणामपि रूपाणि सर्पिषा पयसाथवा ।
जलेन वाभिषिच्याथ तत्तद्द्रव्यं विगृह्य च ।।७८।।
प्रसृतित्रयमात्रं तु [१८६]पूर्ववत्संस्थितस्य तु ।
[१८७]नरस्य दापयेत्सोऽपि [१८८]प्राङ्मुखस्तत्पिबेत् त्रिधा ।।७९।।
सोऽपि शुद्धो भवेद्यस्य[१८९] विकृतिर्नोपजायते ।
[१९०]अर्वाक् चतुर्दशाहात्तु ततोऽन्यः पापभाग्भवेत् ।।८०।।

---

[१८२]'स्वेष्टदेवस्नपनजमद्यादुदकमुत्तमम् ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४७०);
'उग्रान्देवान्समभ्यर्च्य तत्स्नानोदकात्प्रसृति त्रयं पिबेत् ।
इदं मया न कृतमिति व्यावहरन्देवताभिमुखः ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५११);
'देवानुग्रान्समभ्यर्च्य तत्स्नानोदकमाहरेत् ।
संश्राव्य पाययेत्तस्माज्जलं तु प्रसृतित्रयम् ।।'
'उग्रान्देवान् दुर्गादित्यादीन् समभ्यर्च्य गन्धपुष्पादिभिः पूजयित्वा संस्नाप्य तत्स्नानोदकमाहरेत् । आहत्य च ''तोय त्वं प्राणिनां प्राण'' इत्यादिना तत्तोयं प्राड्विवाकः संश्राव्य शोध्येन च तत्तोयं पात्रान्तरे कृत्वा ''सत्येन माभिरक्ष त्वं वरुणे''त्यनेनाभिमन्त्रितं पाययेत्प्रसृतित्रयम् । एतच्च साधारणधर्मेषु धर्मावाहनादिसकलदेवतापूजाहोमसमन्तकप्रतिज्ञापत्रशिरोनिवेशनान्तेषु सत्सु'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५१२);
'भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् ।
समभावे तु देवानामादित्यस्य तु पाययेत् ।।
दुर्गायाः पाययेच्चौरान्ये च शस्त्रोपजीविनः ।
भास्करस्य तु यत्तोयं ब्राह्मणं तत्र पाययेत् ।।
दुर्गायाः स्नापयेच्छूलमादित्यस्य तु मण्डलम् ।
अन्येषामपि देवानां स्नापयेदायुधानि तु ।।
विस्रम्भे सर्वशङ्कासु सन्धिकार्ये तथैव च ।
एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धये ।।
पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च ।
सशूकस्याव्यसनिनः कोशपानं विधीयते ।।
प्राङ्मुखं कारिणं कृत्वा पाययेत्प्रसृतित्रयम् ।।
पूर्वोक्तेन विधानेन स्नातमार्द्राम्बरं शुचिम् ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५१६, ५१७);
'यो यो यद्देवताभक्तः पाययेत्तस्य तं नरम् ।
समभक्तं च देवानामादित्यस्यैव पाययेत् ।।
सर्वेषां चोग्रदेवानां स्नापयेदायुधास्त्रकम् ।
स्नानोदकं वा संकल्पं गृहीत्वा पाययेन्नवम् ।।'
(*स्कान्दमहापुराणे* १.२२.४४.१३ उ०—१५ पू०)

[१८३]अयं श्लोकः 'इ'मातृकायां न दृश्यते ।

[१८४]त्रिविधलिङ्गविषये अजिते ४.१—४ पू० श्लोका द्रष्टव्याः ।

[१८५]सूर्यस्यापि यतस्य च—इ; प्रकृतविषये धर्मकोशे स्कन्दपुराणे चायुधस्य प्रोक्तत्वादत्रायुधस्य चेति पाठः साधितः ।

[१८६]संस्थितस्य तु दापयेत्—ई

[१८७]सोऽपि प्राङ्मुख तत्रस्थः—ई

[१८८]तद्द्रव्यं तु पिबेत् त्रिधा—ई

[१८९]भवेत्तस्य—ई, 'उ' पाठान्तरम् ।

[१९०]'यस्य पश्येद्द्विसप्ताहात्त्रिसप्ताहादथापि वा ।
रोगोऽग्निर्ज्ञातिमरणं राजदण्डमथापि वा ।।
तमशुद्धं विजानीयात्तथा शुद्धं विपर्यये ।
दिव्ये च शुद्धं पुरुषं सत्कुर्याद्धार्मिको नृपः' ।।
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५११, ५१२);
'अर्वाक् चतुर्दशादह्नो यस्य नो राजदैविकम् ।

[तप्तमाषविधिः[१९१]]

[१९२]तप्तमाषविधिं वक्ष्ये [१९३]शुद्ध्यशुद्धिविनिर्णये ।
[१९४]व्रीहीणां तण्डुलानां वा प्रत्येकं दशभिः समम् ।।८१।।
तुलितं [१९५]माषमित्युक्तं [१९६]तत्तु सौवर्णमुच्यते ।
[१९७]चक्रिकामूर्मिकां[१९८] वापि तेन स्वर्णेन कारयेत् ।।८२।।
पञ्चगव्येन तन्मन्त्री हेतिना क्षालयेत्ततः ।
षोडशाङ्गुलविस्तारं [१९९]तारार्धार्धान्तरालकम् ।।८३।।
यवमात्र[२००]घनोपेतं चषकं परिकल्पयेत् ।
तच्च ताम्रमयं प्रोक्तं पश्चाद्देवान्समर्चयेत् ।।८४।।
होमयेच्च; ततो [२०१]मर्त्यं संदिग्धं पूर्ववत्स्थितम् ।
आहूय तस्य चाग्रे तु[२०२] चषकेऽथ विनिक्षिपेत् ।।८५।।
तैलस्य [२०३]विंशतिपलं घृतस्य च तथा[२०४] भवेत् ।

व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५१२)
'त्रिरात्रात्सप्तरात्राद्वा दशाहाद्वा द्विसप्तकात् ।
वैकृतं यस्य दृश्येत पापकृत्स तु मानवः ।।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५१७);
'त्रिसप्तरात्रमध्ये च फलं कोशस्य निर्दिशेत् ।'
(*स्कान्दमहापुराणे* १.२.४४.१५ उ०)

[१९१]'तप्तमाषविधिः
नारदः —
अतः परं प्रवक्ष्यमि तप्तमाषकलक्षणम् ।
शुभाशुभपरीक्षार्थं ब्रह्मणाऽभिहितं स्वयम् ।।
सौवर्णे राजते पात्रे आयसे मृन्मयेऽपि वा ।
क्षिप्तं घृतमुपादाय तदग्नौ स्थापयेच्छुचिः ।।
सौवर्णीं राजसीं ताम्रीमायसीं वा सुशोभिताम् ।
सलिलेनासकृद्धौतां निक्षिपेत्तत्र मुद्रिकाम् ।।
भ्रमत्पतितायामन्तः स नः स्पर्शसुभीषणः ।
ततस्त्वनेन मन्त्रेण घृतं तदभिमन्त्रयेत् ।
परं पवित्रममृतं घृत त्वं यज्ञकर्मसु ।।
दहाग्रे यद्ययं पापो हिमशीतं शुचौ भव ।
प्रदेशिन्यक्षता यस्य संस्पृष्टायां परीक्षणे ।।
यदि विस्फोटका न स्युः शुद्धोऽसावन्यथा न हि ।
इति माषकविधिः स्पष्ट एव ।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५२०);
'अथातः सम्प्रवक्ष्यामि तप्तमाषविधिं शृणु ।
कारयेदायसं पात्रं ताम्रं वा षोडशाङ्गुलम् ।।
चतुरङ्गुलखातं तु मृन्मयं वापि कारयेत् ।
पूरयेद्घृततैलाभ्यां पलैर्विंशतिभिस्ततः ।।
सुतप्ते निक्षिपेत्तत्र सुवर्णस्य तु माषकम् ।
वह्नयुक्तं विन्यसेन्मन्त्रमभिशस्तस्य मूर्धनि ।।
अङ्गुष्ठाङ्गुलियोगेन तप्तमाषं समुद्धरेत् ।
शुद्धं ज्ञेयमसन्दिग्धं विस्फोटादिविवर्जितम् ।।'
(*स्कान्दमहापुराणे* १.२.४४.६५ उ० — ६९)

[१९२]सप्तमापि विधिं — ई
[१९३]शुद्धाशुद्धवि — ई
[१९४]व्रीहिभिस्तण्डुलानां च — इ
[१९५]पुँल्लिङ्गो माषशब्दोऽत्र क्लीबे प्रयुक्तः ।
[१९६]तन्तु — इ
[१९७]चकिकामूर्मिका — इ; चक्रिकां चक्रवत्कृतामूर्मिकाम् अङ्गुलीयकम् ।
[१९८]मूर्मिका — ई, 'उ' पाठान्तरम् ।
[१९९]तारार्धार्धोन्त्रतोलकम् — इ; तारार्धार्धोन्त्रतो . . . — ई; तारार्धार्धोन्त्रतोष्टं 'उ' पाठान्तरम्; 'तार' इत्यनेनात्र विस्तार एवोच्यत इति भाति ।
[२००]घनोपेतश्चषकं — इ
[२०१]मर्त्यः — इ
[२०२]इतः परं पटलसमाप्तिपर्यन्तं 'इ' मातृका लुप्ता ।
[२०३]विंशतिर्मुलं — ई
[२०४]विंशतिपलं निक्षेपणीयमिति पदद्वयमध्याहार्यम् ।

मध्ये मण्डलमेकं तु [२०५]कृत्वात्र सक्तुनोत्तमम् ॥८६॥
तत्र [२०६]धाम समापाद्य संपूज्य विधिना ततः ।
तत्र न्यस्त्वा ततो मन्त्री[२०७] त्रिपादीं च [२०८]यथाक्रमम् ॥८७॥
संप्रोक्ष्यास्त्रेण [२०९]तस्योर्ध्वे रोपयेच्चषकं[२१०] ततः ।
अग्निबीजेन [२११]तस्याधो वह्निं प्रज्वालयेत्ततः॥८८॥
इन्धनेन [२१२]सुशुष्केण [२१३]पाचयेच्चषके हितम्[२१४] ।
घृततैलं विशेषेण [२१५]वह्निवत्तद्यथा भवेत् ॥८९॥
[२१६]स्वर्णमाषं क्षिपेन्मन्त्री वह्निबीजमनुस्मरन् ।
[ग्रन्थपातः]

[तण्डुलविधिः[२१७]]

[ग्रन्थपातः]

---

[२०५]कृत्वा तं सक्तुमुत्तमम् —ई; कृत्वा ते सक्तमुत्तमम् —'उ' पाठान्तरम् ।

[२०६]यामं —ई; धामं —'उ' पाठान्तरम्; धाम स्थानम् *शब्दकल्पद्रुमे* ।

[२०७]दीपादींश्च —'उ' पाठान्तरम् ।

[२०८]यदी दृढाम् —'उ' पाठान्तरम् ।

[२०९]तस्याः +ऊर्ध्वे =तस्या ऊर्ध्वे, तदनन्तरं सन्धिरार्षः ।

[२१०]रोपयेच्छिवकं —ई, 'उ' पाठान्तरम्

[२११]तस्यायो —'उ' पाठान्तरम्

[२१२]तु शुष्केण —ई

[२१३]पावयेच्चषकं मतम् —ई, 'उ' पाठान्तरम् ।

[२१४]निहितमित्यर्थः ।

[२१५]वह्निमत्तद्यथा —'उ' पाठान्तरम् ।

[२१६]सप्तमं संक्षिपेन्मन्त्री —ई; सप्तमासं क्षिपेन्मन्त्री —'उ' पाठान्तरम् । तत्रेत्यध्याहृत्य व्याख्येयम्

[२१७]तण्डुलविधिः सर्वासु मातृकासु लुप्तः ।;
'प्रणम्य देवदेवेशं देवी वचनमब्रवीत् ।
अक्षतस्याशनं किं तु तत्सर्वं ब्रूहि मे प्रभो ॥
ईश्वर उवाच —
अथातः सम्प्रवक्ष्यामि अक्षतस्याशनं शृणु ।
अङ्गारे सूर्यवारे वा प्रत्ययश्च विधीयते ॥
पूर्वोक्तमण्टपे रम्ये गोमयेनानुलेपिते ।
इष्टकाभिश्च चूर्णैश्च तत्रैवं तु विचित्रयेत् ॥
सौवर्णं राजतं वापि कांस्यं वा मृण्मयं तु वा ।
पात्रं कृत्वा विधानेन तण्डुलं विन्यसेद्धृदा ॥
शालितण्डुलमेवं स्याज्जलेन क्षालयेत्ततः ।
शालिना विकिरेत्तत्र तन्मध्ये विन्यसेत्ततः ॥
वेष्टयेन्नवस्त्रेण प्रासादेन समर्चयेत् ।
अष्टौ देवीर्न्यसेत्पश्चादुग्र्यादीश्च विशेषतः ।
स्वनामपदमन्त्रेण पूजयेत्तु दशाक्षरैः ।
पूर्वादीशानपर्यन्तमक्षतस्य तु बाह्यतः ।
शुद्धाशुद्धपरीक्षार्थं जनानाहूय सर्वशः ।
सोपवासः शुचिर्भूत्वा दर्भशय्यासनश्चरेत् ॥
ततः प्रभाते विमले स्नपनं तु समाचरेत् ।
हविर्निवेदयेत्तत्पश्चात्ताम्बूलं दापयेच्छिवे ॥
तालपत्रे लिखित्वा तु पूर्वरात्रेऽधिवासयेत् ।
तत्पत्रं धार्य शिरसि प्राशयेदक्षतं हृदा ॥
रुधिरास्ये तु दोषः स्यादिति शास्त्रस्य निश्चयः ।
अक्षतस्याशनं प्रोक्तम्'
(*सन्तानसंहितायाम्* ६१.१ —११);
'नारदः —
तण्डुलानां प्रवक्ष्यामि विधिं भक्षणचोदितम् ।
चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः ॥
तण्डुलान्कारयेच्छुक्लाञ्शालेर्नान्यस्य कस्यचित् ।
मृन्मये भाजने कृत्वा भास्करस्याग्रतः शुचिः ॥
स्नानोदकेन सम्पृक्तान्रात्रौ तत्रैव वासयेत् ।
प्रभातायां रजन्यां तु त्रिःकृत्वा प्राङ्मुखाय च ॥
स्नाताय सोपवासाय दद्याद्देवार्चकः स्वयम् ।

[शपथविधिः[२१८]]

[ग्रन्थपातः]

स्वयं कार्यं समुद्दिश्य सत्यासत्यपरीक्षणे ॥
तण्डुलान्भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः ।
अश्वत्थपत्राभावे तु भूर्जपत्रे ततः स्मृतम् ॥
दृश्यते शोणितं यस्य दन्तजालं च सीदति ।
गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् ॥
बृहस्पतिः —
सोपवासः सूर्यगृहे तण्डुलान्भक्षयेच्छुचिः ।
शुद्धः स्याच्छ्लुक्लनिष्ठीवे रक्तमिश्रे तु दोषभाक् ॥
शोणितं दृश्यते यस्य हनुस्तालु च शीर्यति ।
गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् ॥
कात्यायनः —
देवतास्नानपानीयदिग्धतण्डुलभक्षणे ।
शुद्धनिष्ठीवनाच्छुद्धो नियम्योऽशुचिरन्यथा ॥'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ५१८);
'तण्डुलस्याथ वक्ष्यामि विधिधर्मं सनातनम् ।
चौर्ये तु तण्डुला देया न चान्यत्र कथञ्चन ॥
तण्डुलानुदके सिक्त्वा रात्रौ तत्रैव स्थापयेत् ।
प्रभाते कारिणे देया भक्षणाय न संशयः ॥
त्रिकृत्वः प्राङ्मुखश्चैव पत्रे निष्ठीवयेत्ततः ।
पिप्पलस्याथ भूर्जस्य न त्वन्यस्य कथञ्चन ॥
तांस्तु वै कारयेच्छुद्धांस्तण्डुलाञ्शालिसंभवान् ।
मृन्मये भाजने कृत्वा सवितुः पुरतः स्थितः ॥
तण्डुलान्मन्त्रयेच्छुद्धान्मन्त्रेणानेन धर्मतः ।
"दीयसे धर्मतत्त्वज्ञैर्मानुषाणां विशोधनम् ॥
स्तुतस्तण्डुल सत्येन धर्मतस्त्रातुमर्हसि ।"
निष्ठीवने कृते तेषां सवितुः पुरतः स्थिते ॥
शोणितं दृश्यते यस्य तमशुद्धं विनिर्दिशेत् ।'
(*स्कान्दमहापुराणे* १.२.४४.७३ उ० —७९)
[२१८]'अथातः सम्प्रवक्ष्यामि शृणुष्वायतलोचने ।
अङ्गारे सूर्यवारे वा शिवालयसमीपतः ॥
पूर्वेद्युरधिवासः स्यात् कलशान्नवसंयुतान् ।
पूर्वोक्तमण्टपे रम्ये कलशान्स्थापयेत्क्रमात् ॥
गोमयालेपनं कृत्वा पिष्टचूर्णैर्विचित्रयेत् ।
शालिना विकिरेत्तत्र तण्डुलांश्च तिलान्यसेत् ॥
दर्भैश्चैव परिस्तीर्य स्थापयेन्मध्यमे शिवम् ।
प्रासादेन तु मन्त्रेण स्थापयेच्छिवकुम्भकम् ॥
वर्धनीं तस्य वामे तु गौरीबीजेन स्थापयेत् ।
सत्यं शिवं समावाह्य वस्त्रगन्धादिभिर्यजेत् ॥
अभितः कलशानष्टौ विन्यसेत्तु विशेषतः ।
सकूर्चान्सापिधानांश्च सवस्त्रान्हेमसंयुतान् ॥
उग्री चैव उदग्री च सती सत्यानृती तथा ॥
गौमुखी सुमुखी चैव कुलिशी कौशिकी तथा ॥
एता देव्यश्च देवेशि कलशेषु च विन्यसेत् ।
पूजयेत्तु यथान्यायं स्वस्वनाम्ना विशेषतः ।
गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च पूजयेत् ॥
ततो होमं प्रकुर्वीत ईशान्यां स्थण्डिले ततः ।
समिदाज्यचरूंल्लाजान्सर्षपांश्च समायुतान् ॥
पञ्चद्रव्यसमायुक्तं प्रासादेन तु मन्त्रतः ।
जुहुयाद्देवदेवेशि प्रत्येकं पञ्चविंशतिम् ॥
शुद्धाशुद्धपरीक्षार्थं जनानाहूय सर्वशः ।
दन्तधावनपूर्वं तु स्नानं कुर्याद्विशेषतः ॥
तद्दिने चोपवासस्तु शुद्धात्मना समन्वितः ।
दर्भशय्यासनस्थस्तु कलशान्दक्षिणे वसेत् ॥
सत्यं कृतं तु वचनं तालपत्रे तु लेखयेत् ।
कुम्भपार्श्वे न्यसेद्देवि शिवबीजेन मन्त्रतः ॥
ततः प्रभाते विमले संध्यायां पूजयेद्बुधः ।
पूर्वाह्णे चोत्तमं विद्यान्मध्याह्ने मध्यमं भवेत् ॥
मध्याह्नात्परतो देवि वर्जयेत्सत्यमेव तु ।
कलशं स्नापयेत्तत्र प्रासादेन तु मन्त्रतः ॥
वर्धनीं गौरिबीजेन स्नापयेत्पीठ एव च ।
कलशान्स्नापयेत्तत्र स्वस्वनाम्ना विशेषतः ॥
हविर्निवेदयेद्देवि ताम्बूलं दापयेत्ततः ।
जनान्सन्निधावाहूय ततः स्नानं समाचरेत् ॥
न पीडयेत्स्नानवस्त्रमन्यद्वा स न वेष्टयेत् ।
तालपत्रं तु देवेशि शिरसा धारयेत्ततः ॥
पीठं प्रदक्षिणं कुर्यात्सत्यमेतदिति ब्रुवन् ।
षण्मासाभ्यन्तरे देवि मरणं याति तज्जनः ॥
तत्र दोषो भवेत्सर्व इति शास्त्रस्य निश्चयः ।

[219]भार्यासुतानां वा[प्येनं शिरांसि स्पर्शयेत्पृथक्[220]] ॥९०॥
प्रत्यर्थिनं ततश्चापि परीक्षा समुदाहृता[221]।
[222]राजदेवकृता पीडा यदि स्यादाचतुर्दशात् ॥९१॥
दिनान्तस्य मृषा[223]प्रोक्तः शपथस्तेन पापभाक्।
बालवृद्धातुरान्मर्त्यान्धिटादिषु[224] न योजयेत् ॥९२॥
तेषामन्योऽपि [225]कर्तव्यो गात्रस्यापगतिर्भवेत्।
यत्र देशे गृहे कुर्यात्प्रत्ययं विधिना नरः ॥९३॥
तत्र देवस्य पूजार्थं द्रव्यं शक्त्या प्रदापयेत्।
दक्षिणां देशिकादिनां यथोक्तं दापयेत्तदा ॥९४॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे तुलादि] प्रत्ययादि [विधि] पटलः [एकसप्ततितमः]।

सत्यमुद्दिश्य यद्द्रव्यं धर्मार्थाय निवेदयेत् ॥
सत्यं च प्रत्ययः प्रोक्तः।'
(*सन्तानसंहितायाम्* ६०.२.२२);
'बृहस्पतिः—
सत्यं वाहनशस्त्राणि गोबीजकनकानि च।
देवब्राह्मणपादाश्च पुत्रदारशिरांसि च ॥
एते तु शपथाः प्रोक्ताः स्वल्पेऽर्थे सुकराः सदा।
साहसेष्वभिशापे च दिव्यान्याहुर्विशोधनम् ॥
हलायुधेन तु दिव्यशपथयोरभेद एवोक्तः।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४४१);
'असाक्षिकेषु चार्थेषु मिथो विवदमानयोः।
राजद्रोहाभिशापेषु साहसेषु तथैव च ॥
अविन्दंस्तत्त्वतः सत्यं शपथेनाभिलङ्घयेत्।
महर्षिभिश्च देवैश्च सत्यार्थाः शपथाः कृताः ॥
जवनो नृपतिः क्षीणो मिथ्याशपथमाचरेत्।
वसिष्ठाग्रे वर्षमध्ये सान्वयः किल भारत ॥
अन्धः शत्रुग्रहं गच्छेद्यो मिथ्याशपथांश्चरेत्।
रौरवस्य स्वयं द्वारमुद्घाटयति दुर्मतिः ॥
मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः।
तांश्च देवाः प्रपश्यन्ति स्वस्यैवान्तरपौरुषाः ॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मो हि जानाति नरस्य वृत्तम् ॥
एवं तस्मादभिज्ञाय सत्यार्थशपथांश्चरेत्।
वृथा हि शपथान् कुर्वन् प्रेत्य चेह विनश्यति ॥
इदं सत्यं वदामीति ब्रुवन्साक्षी भवान्यतः।
शुभाशुभफलं देहि शुचिः पादौ रवेः स्पृशेत् ॥
अथ शास्त्रस्य विप्रोऽपि शस्त्रस्यापि च क्षत्रियः।
वृत्तिं स्पृशंस्तथा वैश्यः शूद्रः स्वगुरुमेव च ॥
मातरं पितरं पूज्यं स्पृशेत्साधारणं त्विदम्।'
(*स्कान्दमहापुराणे* १.२.४४.३—१२ पू०)

[219]भार्यासुतं तु वा—ई

[220]'अग्निं वाहारयेदेनमप्सु चैनं निमज्जयेत्।
पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत्पृथक् ॥
यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च।
न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः ॥'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४३७, ४३८)

[221]समुदाहृतम्—इ

[222]'आचतुर्दशकादह्नो यस्य नो राजदैविकम्।
व्यसनं जायते घोरं स ज्ञेयः शपथैः शुचिः ॥
व्यसनम् आपत्। घोरम् अतिपीडाकरम्। अल्पस्य शरीरधर्मत्वात्। तच्च प्रागुक्तरोगादि। अत्राह्नो दिवसस्य योऽयं चतुर्दशभागः तस्मादर्वाग् व्यसनं न जायते स शपथे शुचिरित्यर्थः। कर्तव्यस्य शपथस्य स्वल्पविषयत्वेन बह्ववधेरनुचितत्वात्।'
(*धर्मकोशे* व्यवहारकाण्डे पृ० ४४१)

[223]प्रोक्ता शपथं—ई

[224]धरादिषु—ई

[225]कर्तव्यो गात्रस्यापगति—ई

[द्विसप्ततितमः पटलः]

[अद्भुतशान्तिविधिः[१]]

[त्रिविधा अद्भुताः]

[२]अद्भुतानामथो[३] वक्ष्ये [४]शान्तिं दोषनिवृत्तये ।
[५]उत्पातो विकृतिर्दोषसूचकोऽद्भुत इत्यपि ।।१।।
पर्याय[६]वाचकैः शब्दैरद्भुतोऽत्राभिधीयते ।
दिव्यान्तरिक्षभौमास्ते त्रिविधाः परिकीर्तिताः ।।२।।

---

[१]अयं पटलः 'इ' मातृकायामेव दृश्यते।; एतद्विषये *उत्तरकामिके* ३१; *पूर्वकारणे* १४४; *रौरवे* क्रियापादे ४४, ५४; *वीरे* ८७; *सन्तानसंहितायां* ६६; *सुप्रभेदे* क्रियापादे ५५. (श्लो० ४८ उ० —६२) *सूक्ष्मे* ६० पटला द्रष्टव्याः ।

[२]'वक्ष्यतेऽद्भुतशान्तिस्तु राजराष्ट्रहिताय च ।
अद्भुतं द्विविधं प्रोक्तं सामान्यं च महाद्भुतम् ।।
सामान्यं दीर्घफलदं सद्य एव महाद्भुतम्' । . . .
'भास्करस्योदये रात्रावमावास्येन्दुदर्शने ।
भूमिकम्पे नदीक्षोभे कूपक्षोभे तटाकके ।।
प्रतिमारोदने चैव ततः शोणितवर्षके ।
पाषाणपांसुवर्षे च तथैव मधुवर्षके ।।
क्षीरासृग्वर्षसम्भूते वृक्षाच्छोणितवर्षके ।
पतितं पादुकान्तं यद्देवालयमकारणात् ।।
वृक्षस्थानान्तरप्राप्तौ वृक्षेऽन्यफलसम्भवे ।
तदन्यपुष्पसम्भूते रसगन्धान्यसम्भवे ।।
लिङ्गकेऽत्युष्णसम्भूते प्रतिमे तु तथैव च ।
अण्डजाः स्वेदजाश्चैव चतुष्पादा नरास्तथा ।।
स्वजात्यन्यप्रसूते च प्रासादभ्रमणे तथा ।
श्वेतवायससंभूते पर्वतद्वययुद्धके ।।
आर्द्रवृक्षे स्वयंदग्धे प्रतिमाकम्पने तथा ।।
भिन्ने तस्य तु तद्धर्म्ये लिङ्गप्रतिमयोस्तथा ।।
प्रतिमास्वेदसम्भूते लिङ्गस्वेदोद्भवेऽपि च ।
प्रतिमोन्मीलने भ्रष्टे करिणीमदसंसृतौ ।।
अनग्नावुत्थिते धूमे लिङ्गे वर्णान्तरे सति ।
अङ्गाधिकसमुत्पन्ने चतुष्पात्सु तथैव च ।।
भेरीघोषे स्वयंभूते प्रोक्ताश्चैते महाद्भुताः ।
दिने तु प्रतिसूर्यस्य चन्द्रस्य प्रतिदर्शने ।
रात्राविन्द्रधनुर्दृष्टौ त्वह्नि नक्षत्रदर्शने ।।
ग्रहनक्षत्रपाते च सप्तधाशनिसङ्कुले ।
नैरन्तरे च सप्ताहे परिवेषेऽर्कचन्द्रयोः ।।
महावातप्रकोपे च दिशां दाहसमुद्भवे ।
लिङ्गेषु पूजिते पुष्पे प्राप्ते वर्णान्तरे सति ।।' . . .
अतीव शलभोत्पन्ने उन्मत्तोपहते सति ।
शुक्लमूषिकसम्भूते विषसर्पादिकोद्भवे ।।
प्रासादेऽथ सभास्थाने गोपुरे मण्टपेऽपि च ।
परिवारालये चैव मधुनीडे समुद्भवे ।।
अतिवृष्टावनावृष्टौ युद्धोद्योगे नृपस्य तु ।
पतितेऽकारणाद्ग्रामवृक्षके तत्समीपतः ।।
राज्ञां प्रधानमहिषी प्रधानाश्वगजे मृते ।
ऋतुस्त्रीवायसोलूकजम्बूगृध्रं च पिङ्गली ।।
नृपवेश्मप्रविष्टे च प्रविष्टे च सुरालये ।
देवालयोपरिष्टात्तु नृपस्य भवनोपरि ।।
श्वारोहे रुदिते तत्र तत्सजातिक्रियास्वथ ।
लिङ्गे च प्रतिमे चैव खद्योतारोहणे सति ।।
केषाञ्चिद्व्योम्नि केतूनां नानारूपेण दर्शने ।।
लिङ्गमूले तु निबिडे जन्त्वारोहणकेऽपि च ।
व्यतिरिक्तक्रियाकार्ये सामान्यास्त्वद्भुताः स्मृताः' ।।
(*पूर्वकारणे* १४४.१, २ पू० ; ४ उ० —२४);

[३]अद्भुतानामतो —इ

[४]शान्तिदोषं निवर्तयेत् —इ

[५]उत्पाता —इ

[६]वाचकाः —इ

[७]दिव्यास्तु शिवलिङ्गेषु[८] संभूता[९]स्त्रिविधेष्वपि ।
[१०]अन्तरिक्षोद्भवाः सर्वे दृष्टा ये ते नभःस्थले ।।३।।
ज्योतिश्चक्रेऽथवा दृष्टा भौमास्तु पृथिवीतले ।
चरस्थिरभवाः सर्वे शान्तिं सर्वेषु कारयेत्[११] ।।४।।
[१२]दिव्ये महाफला प्रोक्ता [१३]नाधमा मध्यमा मता ।
[१४]कन्यसे तु भवन्त्येते होमास्तेषु यथाक्रमम् ।।५।।
श्रेष्ठमध्यकनिष्ठानि शान्तिकर्माणि कारयेत् ।

---

[७]दिव्यासु—इ
[८]लिङ्गाच्च—इ
[९]त्रिविधलिङ्गविषये *अजिते* ४.१—४ श्लोका द्रष्टव्याः ।
[१०]अन्तरिक्षे भयाः—इ
[११]'मण्डपं तु शुभाशायामग्नौ वा पूर्ववर्त्मना ।
तन्मध्ये कुण्डमापाद्य वृत्तं हस्तमितं तथा ।।
शिल्पिनं च विसृज्याथ पुण्याहप्रोक्षणं नयेत् ।
देवं संशोध्य विधिना स्नपनं प्रत्यहं नयेत् ।।
गन्धाद्यैः पुष्कलैरिष्ट्वा शान्तिकर्म समाचरेत् ।
संस्कृत्य कुण्डं वह्निं च शिवं साङ्गं च तर्पयेत् ।।
अघोरमथवा शैवमस्त्रं पाशुपतं तु वा ।
अघोरास्त्रमथान्यं वा सुसिद्धं देशिकात्मनि ।।
कर्णिकायां समभ्यर्च्य साङ्गं सन्तर्पयेदथ ।
समिदाज्यं च गव्यं च मधुरत्रयसंयुक्तम् ।।
तिलदूर्वाक्षतैर्युक्तं शुद्धान्नं वाथ पायसम् ।
सहस्रं वा तदर्धं वा शतमष्टाधिकं तु वा ।।
प्रत्यहं होमयेदेतैर्मन्त्रमादौ समुच्चरन् ।
स्वाहान्ते भगवन्सर्वक्षोभनाशपदं पुनः ।।
कुरुकुर्वितिसंयुक्तं प्रतिमन्त्रं दशान्तरम् ।
पञ्चाशदन्तरं वापि शतमन्त्रान्तरं तु वा ।।
पठन्होमं समाप्यैवं पूर्णामन्ते समाचरेत् ।
मुखवाससमायुक्तं ताम्बूलं च निवेद्य च ।।
कामिकादिशिवज्ञानं पञ्चदिक्षु व्यवस्थिताः ।
तत्तद्दिङ्मुखसंजातं पठेयुः शास्त्रपारगाः ।।
प्राचि तत्पुरुषं घोरं दक्षिणे वाममुत्तरे ।
पश्चिमेऽजातमीशानं जपेयुस्तत्र दीक्षिताः ।।
ऋगाद्यध्ययनं कुर्युश्चत्वारो वेदपारगाः ।
स्तोतारो बहवो वैकः पठेयुः स्तोत्रसंहतिम् ।।
तदर्थभावनोपेताः संस्कृताः शिवदीक्षया ।
एतत्सर्वं प्रकर्तव्यं स्नातैर्होमप्रवर्तकैः ।।
होमरक्षां च सङ्गृह्य दत्त्वार्घ्यं च पराङ्मुखम् ।
निरोध्य तत्र देवेशं दद्यादन्तर्बहिर्बलिम् ।।
समाचम्य कृतन्यासः प्रविशेद्देवसन्निधिम् ।
होमकर्म निवेद्यास्मै प्रार्थयेद्दुरितक्षयम् ।।
एवं शान्तिः समादिष्टा नवधा सा समीरिता ।
एकत्रिपञ्चसप्ताहैर्नवाहैश्च द्विसप्तकैः ।
पक्षत्रिसप्तनक्षत्रैरविच्छिन्ना यतस्ततः ।।
कुण्डे विसर्जनं नोक्तं देवस्याग्नेः पुरावधेः ।
विसर्जनं तु वा देवे पावकस्य न सर्वधा ।।
शान्तिरेवं समाख्याता'
(*उत्तरकामिके* ३०.५४—७१);
शान्तिं संक्षेपतो वक्ष्ये शृणु तत्त्वं गजानन ।
हविषं द्विगुणं कृत्वा दीपैः पुष्पैर्विशेषतः ।।
शीतकुम्भं तु विधिना शिवस्योर्ध्वं निधापयेत् ।
दिशाहोमं ततः कृत्वा मूर्तिहोमं विशेषतः ।।
चतुर्दिक्षु चतुर्वेदैः पूर्वमध्यापनं तथा ।।
यथावत्स्नपनं नित्यं तथा वित्तानुसारतः ।
घृतैःक्षीरैर्यथाशक्ति अभिषेकं तु नित्यशः ।।
नालिकेरस्य सलिलैरभिषेकं समाचरेत् ।
तदन्ते रात्रिचूर्णैस्तु लिङ्गमुद्वर्त्य शोधयेत् ।।
प्रभूतहविषं नित्यं तदन्ते द्विगुणं स्मृतम् ।
एवं शान्तिस्तु'
(*सुप्रभेदे क्रियापादे* ५५.५६—६१ पू०)
[१२]द्रव्यमहत्फला—इ
[१३]नातया मध्यया स्मृता—इ
[१४]कन्यसे तु भवेत्येते—इ

[लिङ्गे शैवबेरेषु चाकस्माच्चलनादिसंभवे करणीयशान्तिः]

विना निमित्तं [15]यद्राष्ट्रे लिङ्गस्य चलनं भवेत् ॥६॥
[16]खण्डस्फोटौ तु वा[17] सम्यक्स्थाप्य[18] शन्तिमथाचरेत् ।
त्रिसप्ताहं तु कुर्वीत मूर्तिहोमसमन्वितम्[19] ॥७॥
स्नपनं [20]चोत्तमां [21]पूजां विशेषेण [च] पूजयेत् ।
मध्याह्ने तत्समाप्तौ तु शेषमुत्सवमारभेत् ॥८॥
यदि न क्रियते शान्तिः विनाशो राजराष्ट्रयोः ।
जायते सर्वथा तस्माच्छान्तिमाशु प्रयोजयेत् ॥९॥
सप्ताहं मूर्तिहोमेन स्नपनं नित्यमाचरेत् ।

---

[15]यद्राष्ट्रं—इ

[16]घण्टास्फोटं तु वा—इ;
'धामान्तरस्थदेवानां भग्नादौ समुपस्थिते ।
अनुकर्मविधानोक्तं कुर्यात्कर्म गुरुस्तदा ॥'
(*उत्तरकामिके* ३१.२७ उ०, २८ पू०)

[17]अत्र 'संभवेतां तदा तत्' इति पदत्रयमध्याहृत्य व्याख्येयम् ।

[18]स्थाप्यं—इ

[19]'हर्म्याग्रेऽन्यत्र वा कृत्वा स्थण्डिलं कृतमण्डले ।
शिवकुम्भं न्यसेन्मध्ये वर्धनीं तस्य दक्षिणे ॥
अष्टदिक्ष्वष्टकुम्भांस्तु वज्राद्यायुधसंयुतान् ।
ससूत्रान्सापिधानांश्च सवस्त्रान्सहिरण्यकान् ॥
गन्धोदकोदरान्गन्धपुष्पधूपप्रदीपकैः ।
मध्ये कुम्भे शिवं चेष्ट्वा घोरास्त्रं करके यजेत् ॥
यद्वाघोरास्त्रराजानं मध्यकुम्भे शिवं विना ॥
वर्धनीमपि हित्वैवं साङ्गमभ्यर्चयेद्गुरुः ॥
दत्त्वासनमथास्त्रासनाय हुंफण्णमस्त्विति ।
दत्त्वास्त्रमूर्तये हुंफण्णमो मूर्तिं च तामिति ॥
ध्यायेत्सूर्यसहस्राभं प्रलयाम्बुदनिस्वनम् ।
प्रदीप्तदशनं प्रान्तप्रकाशमुखकन्दरम् ॥
त्र्यक्षं तटिल्लताजिह्वादीप्तभ्रूश्मश्रुमूर्धजम् ।
सर्पोपवीतं शूलासिशक्तिमुद्गरधारिणम् ॥
चतुर्भुजं चतुर्वक्त्रं स्फुरच्चन्द्रार्धशेखरम् ।
नृत्यमानं महाकायं नागाभरणभूषितम् ॥
देवदानवदैत्यानां दर्पितानां विमर्दकम् ।
वज्रादिशूलपर्यन्तानभितोऽस्त्राणि संयजेत् ॥
पद्मं चक्रं तथैशाने नैर्ऋते च क्रमाद्यजेत् ।
तदग्रकल्पिते कुण्डे हास्तिके वृत्तसन्निभे ॥
स्थण्डिले संस्कृते वापि वह्निं विन्यस्य देशिकः ।
संस्कृत्य पञ्चसंस्कारैर्वह्निकार्योक्तवर्त्मना ॥
तत्रावाह्य यजेत्साङ्गमघोरास्त्रं शिवानले ।
समिदाज्यतिलक्षीरसिक्तदूर्वामधुत्रयम् ॥
हविष्यान्नं सहस्रं वा तदर्धं शतमेव वा ।
प्रत्येकं जुहुयादेतैरघोरास्त्रं शिवानले ॥
कर्मनिर्देशसंयुक्तमङ्गैरस्त्रैश्च तर्पयेत् ।
पूर्णाहुतिं ततो दत्त्वा प्रायश्चित्तं समाप्य च ॥
पुनः पूर्णां च ताम्बूलं कृत्वा दत्त्वाभिवन्द्य च ।
अध्येष्याभीष्टमाचार्यो होमरक्षां समाचरेत् ॥
स्वार्थं च यजमानार्थं दद्यादर्घ्यं पराङ्मुखम् ।
लयाङ्गं पूजयित्वान्ते शिवव्याहृतिमाचरेत् ॥
तत्रैव रक्षयेन्नित्यं यावत्कर्म समाप्यते ।
प्रत्यहं जनयेद्वाथ स्थण्डिले होमकर्मणि ॥
अन्तर्बहिर्बलिं दत्त्वा समाचम्याणुविग्रहः ।
गत्वा कुम्भान्तिकं कर्म विज्ञाप्येशेऽस्त्ररूपिणि ।
ततस्तत्कुम्भपानीयैः स्नापयेत्परमेश्वरम् ॥
गन्धपुष्पस्रगाद्यैश्च नैवेद्यान्तैः प्रपूजयेत् ।
सम्प्रार्थ्य वाञ्छितं देवाल्लब्धानुज्ञः प्रसादजम् ॥
भस्मापि यजमानाय दातव्यं होमरक्षया ।
अत्राप्यध्ययनं मन्त्रजपं शान्तिवदाचरेत् ॥
मूर्तिहोमः समाख्यातः प्रायश्चित्तार्थमीरितः ।'
(*उत्तरकामिके* ३०.१३८ उ० १५९ पू०)

[20]उत्तमपूजाविषये *अजिते* २०.११ पू०—१४

[21]पूजामविशेषेण पूजयेत्—इ

[22]विशेषादर्चनं चापि शैवेषु परिकल्पयेत् ॥१०॥

[शाक्तबेरेषु तथान्यबेरेषु चाकस्माच्चलनादिसम्भवे करणीयशान्तिः]

शाक्तेष्वथ च [23]पञ्चाहं दिशाहोमसमन्वितम्[24] ।
स्नपनं कारयित्वाथ विशेषाद्यजनं [25]भवेत् ॥११॥
अन्येष्वपि च बेरेषु शान्तिहोमसमन्वितम्[26] ।
स्नपनं कारयेन्नित्यं यावत्सप्तदिनान्तकम्[27] ॥१२॥
एतेषां शान्तिकाले तु पुण्याहं पूर्वमाचरेत् ।
होमकाले प्रयुञ्जीत [28]दिशास्वध्ययनं महत् ॥१३॥
[29]स्तोत्रं मन्त्रजपं चैव गीत[30]नृत्तं तथैव च ।

---

[22]शेषार्चनं चापि—इ; विशेषार्चनविधिः *अजिते* ३०तम-पटलः ।

[23]पञ्चाहदशाहोमं समन्वितः—इ

[24]'दिशाहोमं प्रवक्ष्यामि शृणुष्व चतुरानन ।
प्रासादस्य चतुर्दिक्षु दिशाहोमं तु कारयेत् ॥
अग्निमुखं च सङ्कल्प्य पूर्वोक्तेन विधानतः ।
हस्तमात्रेण विप्रेन्द्र स्थण्डिलं कारयेत्ततः ॥
प्रासादस्य चतुर्दिक्षु पूर्वे तु चतुरश्रकम् ।
दक्षिणे चार्धचन्द्राभं वृत्तं चैव तु वारुणे ॥
पद्मं चैव तु सौम्यायां कुण्डं वा स्थण्डिलं तु वा ।
प्लक्षं चैव तु पूर्वायामुदुम्बरं च दक्षिणे ॥
अश्वत्थं वारुणे चैव वटं चैवोत्तरे दिशि ।
एवंविधसमिद्भिश्च होमयेद्देशिकस्तथा ॥
सहस्रं वा तदर्धं वा अष्टोत्तरशतं तु वा ।
सद्यादीशानपर्यन्तं जुहुयात्तु शताहुतीः ॥
आज्येन चरुणा चैव जुहुयात्तु शताहुतीः ।
तण्डुलैस्तिलमिश्रैश्च ईशानेन शताहुतिः ॥
द्रव्यान्ते चैव द्रव्यान्ते व्याहृतिं जुहुयात्ततः ।
दिशाहोम इति प्रोक्तः'
(*वीरे* ५६.१ उ०—९ पू०)

[25]भवेत्=कर्तव्यं भवेत् । कुर्यादित्यर्थः ।

[26]'अथातः सम्प्रवक्ष्यामि शान्तिहोमविधिक्रमम् ।
सर्वदोषविनाशार्थं सर्वसम्पत्सुखावहम् ॥
भवनस्याग्रतः कुर्यान्मण्टपं चतुरश्रकम् ।
भूमिशुद्धिं पुरा कृत्वा गोमयेनोपलेपयेत् ॥
प्रोक्षयेच्छिवमन्त्रेण शालिपिष्टैर्विचित्रयेत् ।
तन्मध्ये स्थण्डिलं कुर्याच्छुद्धतोयेन पांसुना ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
पलाशसमिधं सद्योजातमन्त्रेण होमयेत् ॥
आज्यं हुत्वा तु वामेन चरुं वै घोरमन्त्रतः ।
पुरुषेण हुनेल्लाजं श्रीपत्रं शिखया हुनेत् ॥
सहस्रं वा तदर्धं वा तदर्धार्धमथापि वा ।
अष्टोत्तरशतं वापि प्रत्येकं जुहुयात्क्रमात् ॥
द्रव्यान्ते व्याहृतिं हुत्वा यदस्येति ततो हुनेत् ।
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ॥
पूर्णाहुतिं ततो दत्त्वा शिवमन्त्रेण देशिकः ।
सद्योजातेन मन्त्रेण पावकं तु विसर्जयेत् ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।
शान्तिहोम इति ख्यातः सर्वदोषनिकृन्तनः' ॥
(*पूर्वकारणे* १४४तमपटलः);
तथा (*अजिते* ३१.१४—१७)

[27]दिवान्तकम्—इ

[28]महद्यध्ययनं भवेत्—इ

[29]स्तोत्रमध्ययनं चैव—इ

[30]नृत्तस्तथैव च—इ

[करकावृष्ट्यादिसंभवे करणीयशान्तिः]

[31]करकावृष्टिसंभूतौ वैवर्ण्ये ज्योतिषामपि ।।१४।।
छायाप्रदीपगमने शान्तिं सम्यक्समाचरेत् ।
शिवालयेषु सर्वेषु कृत्वा [32]गेहं समाहितः ।।१५।।
आशाहोम[33]समायुक्तं स्नपनं कारयेच्छिवे ।
[34]तस्मात्तत्परिहाराय शिवे शान्तिं प्रयोजयेत् ।।१६।।
[ग्रन्थपातः]

इत्यजिताख्ये महातन्त्रे [क्रियापादे] अद्भुतशान्तिविधि-
[द्विसप्ततितमः] पटलः ।

---

[31] 'ततः शोणितवर्षे तु प्राणिनां नाशनं भवेत् ।
प्रासादमण्टपादीनि तोयेन क्षालयेत्ततः ।।
आलयं तु समन्तात्तु गोमयेनोपलेपयेत् ।
पर्यग्निकरणं कृत्वा पुनः पुण्याहमाचरेत् ।।
क्षीरप्रस्थसहस्रैश्च मधुसर्पिःसहस्रकैः ।
संस्नाप्य विधिवन्मन्त्री महाव्योमेति मन्त्रतः ।।
पलाशसमिधा चैव शान्तिहोमं च कारयेत् ।
एवं कुर्यात्तु सप्ताहमन्ते चोत्सवमाचरेत् ।।
पाषाणपांसुवर्षेऽपि कुर्याच्छोणितवर्षवत् ।'
(*कारणे* टि० १६० पृ० १६४)

[32] गोहसमा० —इ;

[33] समावृत्तं —इ

[34] तस्मात्तं परि —इ

त्रिसप्ततितमः पटलः

जीर्णोद्धारविधिः[1]

[विमानजीर्णोद्धारः[2]]

[मण्टपकल्पनं तत्र वेदिकास्थण्डिलकल्पनं च]

उद्धारे तु विमानानां कर्तव्या या [3]कृतिर्भवेत् ।

---

[1]अयं पटलः 'इ' छ मातृकाद्वयोर्दृश्यते। एतद्विषये *अंशुमत्काश्यपे* ९६; *अंशुमदागमे* ५६; *अचिन्त्यविश्वसादाख्ये* ७१; *उत्तरकामिके* ३२; *उत्तरकारणे* २२; *पूर्वकारणे* ३२; *दीप्ते* ५९; *सुप्रभेदे* क्रिया० ५४; *सूक्ष्मे* ६४ पटला द्रष्टव्याः ।

[2]'हीनं कुर्याद्वरद्रव्यैः समं वा तत्र पूर्ववत् ।
जीर्णे विमाने धामाद्यमासनस्थादिभिः समम् ॥
किं तु खड्गमये मन्त्रान्विन्यस्यापरमाहरेत् ।
लिङ्गादौ च घटे पूर्णे पीठे वा प्रत्यहं यजेत् ॥
स्थापयेदपरं यद्वा विसर्जनपुरःसरम् ।
यद्रूपं यत्प्रमाणं च यन्मयं यदनुद्धृतम् ॥
सर्वेषामपि चैतेषामुद्धारविधिरुच्यते ।
तदग्रे मण्डपं कुर्याद्दक्षे वैशानकोणके ॥
पूर्वद्वारसमोपेतमेकतोरणसंयुतम् ।
सर्वालङ्कारसंयुक्तं दर्भमालदिसंयुतम् ॥
तत्रापि द्वारपूजादि स्थण्डिले तु शिवार्चनम् ।
मन्त्रसन्तर्पणं कृत्वा वह्नौ कुण्डादिकल्पिते ॥
समिदाज्यतिलोपेतं हविषा च समन्वितम् ।
वास्त्वन्तर्दिग्बलिं कृत्वा समाचम्य गुरूत्तमः ।
सकलीकरणं कृत्वा भोजयेच्छिवलिङ्गिनः ।
ततो विज्ञापयेद्देवं प्रभो दोषावहं त्विदम् ॥
अस्योद्धारे कृते शान्तिर्भवतीति भवद्वचः ।
अस्योद्धाराय मां तस्मादधितिष्ठ सदाशिव ॥
एवं कर्म किलोक्त्वेशे शान्तिहोमं समाचरेत् ।
क्षीराज्यमधुदूर्वाभिः शिवेनाष्टसहस्रकम् ॥
दत्त्वा तदन्तिकं मन्त्री हृदा ध्यात्वा प्रपूजयेत् ।
व्यापकेश्वरशब्दं तु चतुर्थ्यन्तं प्रयोजयेत् ॥
प्रणवादिनमोऽन्तं तु मूलमन्त्रोऽयमीरितः ।
व्यापकेश्वरशब्दं तु हृदयादिपदं ततः ॥
चतुर्थ्यन्तं प्रयोक्तव्यं प्रणवादिसमन्वितम् ।
नमस्कारान्तसंयुक्तं हृदयाद्यङ्गपञ्चकम् ॥
न बीजं योजयेत्तैस्तु लिङ्गं च प्रणवासने ।
स्थण्डिलस्थं यजेन्मन्त्री गन्धपुष्पस्रगादिभिः ॥
ततस्तदाश्रितं सत्त्वं श्रावयेदस्त्रमुच्चरन् ।
सत्त्वः कोऽपीह यः कश्चिदिदमाश्रित्य तिष्ठति ॥
लिङ्गं त्यक्त्वा शिवाज्ञाभिर्यथेष्टं तत्र गच्छतु ।
विद्याविद्येश्वरैर्युक्तः शम्भुरत्र भविष्यति ॥
एवमुक्त्वा महास्त्रेण दत्त्वार्घ्यं तु पराङ्मुखम् ।
तस्मादेवं समावाह्य कुम्भे संस्थापयेद्गुरुः ॥
अग्रे स्थाण्डिलसंयुक्ते स्वर्णवस्त्रसमन्विते ।
सकूर्चे सापिधाने च ससूत्रे पल्लवान्विते ॥
तथाविधायां वर्धन्यामम्बिकां स्थापयेद्गुरुः ।
सम्पूज्य गन्धपुष्पाद्यैस्त्वनुगुप्तं निधापयेत् ॥
प्रत्यहं चार्चनं कार्यं शान्तिहोमसमन्वितम् ।
ततः पाशुपतास्त्रेण प्रतिभागं सहस्रकम् ॥
हुत्वा शान्त्यम्भसा प्रोक्ष्य कुशैः स्पृष्ट्वा जपेद्गुरुः ।
विलोमार्घ्यं ततो दत्त्वा विसृजेत्तत्त्वतत्त्वपान् ॥
तदन्ते मूर्तिमूर्तीशाँल्लिङ्गपिण्ड्यादिसंस्थितान् ।
सुवर्णान्तरया रज्ज्वा वृषभेण प्रचालयेत् ॥
शिवमस्तु भणँल्लोकैः प्रक्षिपेत्तु जले गुरुः ।
भूयः पुष्ट्यर्थकं कृत्वा दिक्पालानां प्रतर्पणम् ॥
प्रसादवास्तुशुद्ध्यर्थं होतव्यं तु शतं शतम् ।
महापाशुपतास्त्रेण प्रासादं तत्र रक्षयेत् ॥
तन्मानमपरं चात्र स्थापयेद्देशिकोत्तमः'
'एष एव विधिः प्रोक्तः प्रासादादौ शिवद्विजाः ।
किं तु खड्गेऽमले मन्त्रान्विन्यस्यापरमारभेत् ॥'
(*उत्तरकामिके* ३२.४८—७२पू० ; ८२उ०, ८३पू०)
'मन्दिरे चोद्धृते जीर्णे लिङ्गे निर्दोषसंस्थिते ।

सेदानीं कथ्यते तस्य विमानस्य चतुर्दिशि ।।१।।
[4]शाङ्करे चापि संस्थाप्य [मण्टपं वेदिकायुतम्] ।
वालुकेन ततः पञ्च [विधिवद्देशिकोत्तमः] ।।२।।
[स्थण्डिलानि समापाद्य] तेषु [5]होमं प्रकल्पयेत् ।

[कुम्भस्थापनं तत्र देवतायजनं खड्गपूजनं च]

[वेदिकायां स्थापयेत्तु] घटान्पञ्च समाहितः ।।३।।
तेषु कुम्भेषु तान्देवान्गलस्थांश्चतुरो यजेत् ।
ईशान[6]कोणसंस्थे तु स्थूपिस्थं शिवमर्चयेत् ।।४।।
खड्गं तत्पार्श्वके न्यस्य दक्षिणे मुष्टिसंयुतम्[7] ।
हेतिना तं समभ्यर्च्य'

[होमः]

'होमं पश्चात्समाचरेत् ।।५।।
[8]तत्तद्देवाङ्गमूलैश्च विधिवत्स्थापितेऽनले ।

बालहर्म्यं ततः कुर्याद्बालस्थानोक्तमार्गतः ।।
बाललिङ्गं ततः कृत्वा स्थापयेत्तरुणालये ।
प्रतिमाया विमानस्य वृषेणोद्धारणं विना ।।
स्थूप्याद्याद्येष्टकानां तु खात्वा त्यक्त्वा त्वशेषकम् ।
आद्येष्टकां क्षिपेत्प्राग्वद्गर्भन्याससमन्वितम् ।।
धामान्तरालपर्यन्तं तावत्कृत्वा सलक्षणम् ।
यद्द्रव्येणोद्धृतं हर्म्यं यत्प्रमाणं यदाकृति ।।
तद्द्रव्येण पुनः कृत्वा तत्प्रमाणेन बुद्धिमान् ।
सर्वावयवसम्पूर्णं यथाशोभं यथाबलम् ।।
दार्विष्टकशिलाश्चैव जीर्णप्रासादकेऽपि च ।
कर्मयोग्यास्तु सङ्ग्राह्याः शेषान् सम्परिवर्जयेत् ।।
हीनमानोद्धृते धाम्नि शास्त्रोक्तेनाधिकं कुरु ।
तस्माद्धीनं न कर्तव्यमुत्कृष्टं शुभदं स्मृतम् ।।
स्तूपी नासी च शाला च कपोतं कूटपञ्जरम् ।
एतेष्वेकं यदा हीनं कृत्वा तद्वद्यथा पुनः ।।'
(*पूर्वकारणे* १३४.३२उ० –४०पू०)
'प्रासादं प्रथमं लिङ्गं पीठं प्राकारमण्टपम् ।
गोपुरं परिवारं च जीर्णकाले ततोद्धरेत् ।।
स्तूपीं नासीं च शालां च कपोतं कूटपञ्जरम् ।
पादाधिष्ठानसंयुक्तं यद्धीनं तद्विवर्जयेत् ।।
विमानं पूर्ववत्कृत्वा प्रोक्षणं विधिवत्कुरु ।
तेष्वेकाङ्गविहीनं चेत्तत्कुर्यात्पूर्ववद्बुधः ।।'
आलयानामिदं प्रोक्तम्'
(*सुप्रभेदे* १.५४.४ –७पू०)

[3]कृतं भवेत् —इ

[4]'शाङ्करे चापि संस्थाप्य घटान् पञ्च समाहितः ।
वालुकेन ततः पञ्च तेषु होमं प्रकल्पयेत् ।
तेषु कुम्भेषु तान् देवान् गलस्थानं चतुर्यजेत् ।'
'२, ३, ४पू० श्लोकानां स्थाने 'इ' मातृकायामिदमर्धत्रयमेव दृश्यते ।

[5]अत्र 'होमं' इत्यस्य 'पञ्चमषष्ठश्लोकयोर्वक्ष्यमाणं होमम्' इत्यर्थो व्याख्येयः ।

[6]कोणे संस्थे —इ

[7]संयुते —इ

[8]इत आरभ्य '१२' श्लोकस्य पूर्वार्धपर्यन्तश्लोका *जीर्णोद्धारदशकव्याख्याने*। ७८ –८० पृष्ठेषु *'अजिते'* इति निर्दिश्योद्धृताः ।

समिदाज्यचरूणां तु प्रत्येकं तु दशाहुतिम्[९] ।।६।।

[प्रातःकरणीयविधिः]

रात्रिशेषं ततो नीत्वा प्रभाते देशिकोत्तमः[१०] ।
कृतनित्यः समभ्यर्च्य कलशेषु च देवताः ।।७।।
पूर्णाहुतिं तु सर्वत्र शिवास्त्रेण प्रदापयेत् ।
ततश्चैशान[११]कोणे तु [१२]कुम्भे त्वावाहितं [१३]शिवम् ।।८।।
खड्गोर्ध्वे विन्यसेन्मूलमुच्चरन्सुसमाहितः ।
[१४]ततस्तेनाभिषिच्यासिं [१५]ततोऽग्रादिक्रमेण च ।।९।।
कुम्भस्थान्विन्यसेद्देवांश्चतुरः पूर्ववत्सुधीः ।
अथोऽतः क्रमतः सर्वान्कलशैश्चाभिषेचयेत् ।।१०।।
ततस्तं खड्गमेकत्र सुगुप्तं [१६]सन्निधापयेत् ।
एवं कृत्वा क्रियां पश्चात्प्रासादं सुमुहूर्तके ।।११।।
उद्धृत्य कारयेत्पश्चात्प्रासादं विधिना सुधीः ।
[१७] [ग्रन्थपातः]

[लिङ्गजीर्णोद्धारः[१८]]

जीर्णोद्धारे तु लिङ्गानां तद्विधानमथोच्यते ।।१२।।

---

[९] दशसंख्याका आहुतिः दशाहुतिः, ताम् दशाहुतिम् । मध्यमपदलोपिसमासः । अत्र 'जुहुयात्' इति शेषः ।
[१०] देशिकस्ततः —इ
[११] कोणेषु —इ
[१२] कुम्भेष्वावाहितं —इ
[१३] शुभम् —इ
[१४] ततश्चानभिषिच्यासि —इ
[१५] ततोग्राणि —इ
[१६] तं निधापयेत् —इ
[१७] जीर्णप्रासादमुद्धृत्य नूत्नप्रासादकरणानन्तरकरणीय-सम्प्रोक्षणादिप्रतिपादकग्रन्थो लुप्तः ।
[१८] 'आदिशैवकुलोद्भूतः प्रागुक्तलक्षणो गुरुः ।
सुस्नातः सकलीकृत्वा गन्धपुष्पैरलङ्कृतः ।।
नववस्त्रधरोष्णीषो हैमपञ्चाङ्गभूषितः ।
लिङ्गाग्रे स्थण्डिलं कृत्वा हस्तमात्रेण देशिकः ।।
अभ्यर्च्य देवदेवेशं गन्धपुष्पादिभिः क्रमात् ।
जीर्णोद्धारं तु विज्ञाप्य प्राणानायम्य देशिकः ।।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
मूलेन जुहुयाद्धीमान्समिधं ब्रह्मवृक्षजाम् ।।
घृतं मिक्षेति मन्त्रेण घृतं हुत्वा विशेषतः ।
हृदयेन चरुं हुत्वा लाजं वामेन होमयेत् ।।
सर्षपं नेत्रमन्त्रेण क्षीरं सद्येन होमयेम् ।
एकैकं जुहुयाद्धीमानष्टोत्तरशतं क्रमात् ।
द्रव्यान्ते चैव द्रव्यान्ते व्याहृतिं जुहुयात्ततः ।
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।।
पूर्णाहुतिं ततः कृत्वा स्विष्टमग्नेति मन्त्रतः ।
उद्धारयेत्ततो लिङ्गं भुजेन वृषभेण वा ।।
वृषभं श्वेतवर्णं च युवानं च बलं वरम् ।
सुस्नाप्य खुरशृङ्गाणि हेमपट्टं च वेष्टयेत् ।।
मौञ्जीरज्जुं समादाय त्रिवृतं श्लक्ष्णकं परम् ।
रज्वा बध्वा वृषग्रीवे लिङ्गमूले दृढं क्रमात् ।।
उद्धारयेत्ततो लिङ्गं वृषेण हृदिना बुधः ।
गजेनोद्धारणं चेत्तु गोचर्मकृतरज्जुना ।।

[बालगृहकल्पनम्]

[19]भूतवेदाग्निहस्तैस्तु श्रेष्ठमध्यकनिष्ठकैः ।
विस्तृतं कल्पयेद्द्रव्यं शैलं पक्वेष्टकामयम् ।।१३।।
आमेष्टकामयं वापि मुखमण्डपसंयुतम् ।
कौशिकांशे युगांशैस्तु गर्भं तस्य प्रकल्पयेत् ।।१४।।
तत्र तारेऽग्निभागे तु व्योमांशं स्यान्मसूरकम् ।
मसूरद्विगुणां भित्तिमुच्छ्रायेण प्रकल्पयेत् ।।१५।।
तदूर्ध्वे दारुभिः कूटं कल्पयेत्कल्पवित्तमः ।
लिङ्गगेहं समापाद्यं मूलगर्भार्धमानतः ।।१६।।
त्रियंशं वा चतुर्थांशं प्रोक्तं बालगृहं त्विह ।

[बालालये मण्डपकल्पनं तत्र कुण्डवेदिकाकल्पनं च]

बालालयस्य पुरतो दक्षिणोत्तरयोस्तु वा ।।१७।।
वह्निशांकरयोर्वापि देशे कुर्याच्च मण्टपम् ।
सप्तपञ्चत्रिभिर्हस्तैः श्रेष्ठमध्यकनीयसम् ।।१८।।
तन्मध्ये वेदिकां कुर्यान्नवभागैकभागतः ।
कुण्डानि परितः कुर्यात्पूर्ववन्मन्त्रवित्तमः ।।१९।।
अथवा पञ्चपक्षे तु प्रागादिषु यथाक्रमम् ।
चतुरश्रं धनुर्वृत्तं त्रिकोणं च सुपद्मकम् ।।२०।।

[मण्डपसंस्कारः]

गोमयेनोपलिप्याथ ब्राह्मणान्भोजयेत्सुधीः ।
ततो मार्जनद्रव्यैस्तु शुद्धिं कृत्वा समाहितः ।।२१।।
[20] [ग्रन्थपातः]

पिण्डिकां घातयेत्तत्र कुन्दाल्या हैमयापि तु ।
पादशैलादिशैलाश्च जीर्णाश्चालक्षणान्विताः ।।
सन्त्यज्य स्थापनोक्तेन लिङ्गं वै स्थापयेन्नवम् ।
जीर्णरूपं समुद्धृत्य शिबिकायां रथेऽपि वा ।।
आरोप्य नृत्तवाद्यैश्च सर्वालङ्कारसंयुतम् ।
ततो भक्तजनैः सार्धं स्तोत्रमङ्गलवाचकैः ।।
समुद्रे निक्षिपेच्छैलं नमस्कृत्य महाजनः ।
आशोष्ये तु तटाके वा निक्षिपेदथवा पुनः ।
निक्षिपेन्मृण्मयं तोये क्षिपेदग्नौ च दारुजम् ।।
आचार्यं पूजयेत्तत्र गोभूमिकाञ्चनादिभिः ।'
(*पूर्वकारणे* १३४.८ उ० — २४पू०)

[19] १३ श्लोकादारभ्य २३ श्लोकस्य पूर्वार्धपर्यन्तश्लोकाः 'इ' मातृकायां यद्यपि न दृश्यन्ते । तथापि जीर्णोद्धारदशकव्याख्याने 'अजिते' इति शीर्षकेणोद्धृता एते श्लोका औचित्यादत्र मूले सङ्घटिताः ।

[20] अत्र बाललिङ्गलक्षणं तस्य बालगृहे स्थापनप्रकारश्च वक्तव्यः । तादृशा अजितागमश्लोका जीर्णोद्धारदशकव्याख्यानेऽपि न दृश्यन्ते । एतद्विषये *रौरवे* क्रियापादे २७.८ — ५० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[जीर्णलिङ्गान्तिके तदग्रे वा शिवशक्तिकुम्भयोः स्थापनम्]

अधिवासनकाले तु विशेषोऽयं प्रदर्श्यते ।
जीर्णलिङ्गान्तिकेऽग्रे वा स्थण्डिले चोक्तलक्षणे ।।२२।।
विन्यसेत्कलशौ मन्त्री शिवशक्तिसुसङ्गतौ ।

[यात्राहोमकरणं विप्रेन्द्रभोजनम्]

यात्राहोमं तु तत्रैव कृत्वादौ विधिना ततः ।।२३।।
भोजयित्वाथ विप्रेन्द्रान्धर्मव्रतपरायणान् ।

[बालस्थानस्थिते लिङ्गे देवमावाह्य पूजनप्रकारः]

बालस्थानस्थिते लिङ्गे देवमावाह्य मन्त्रवित् ।।२४।।
[21]अर्चनोक्तं समभ्यर्च्य प्रभूतं च हविर्ददेत् ।
नित्योत्सवादिकं सर्वं बालस्थाने च कारयेत् ।।२५।।
पञ्चहोमविधाने तु पुरुषं पूर्वकुण्डके[22] ।
दक्षिणे बहुरूपं[23] तु पश्चिमे सद्य एव[24] च ।।२६।।
उत्तरे [25]वामदेवाख्यमीशाने तु प्रकीर्तितम्[26] ।
उत्सवं तु यथाशक्त्या द्वितीये तरुणालये[27] ।।२७।।

[जीर्णानां मृन्मयशैलजदारुजलिङ्गानां जीर्णोद्धारप्रकारः, नूतनानां तेषां पुनः पूर्वतन्त्रेणैव स्थापनं च]

[28]मार्त्तिकं शैलजं लिङ्गमुद्धृत्य प्रक्षिपेज्जले ।
वामदेवेन मन्त्रेणाघोरेणाथ [च] दारुजम् ।।२८।।
[29][अग्नौ] दहेत्तन्मन्त्रेण तत्तन्त्रात्स्थापयेत्पुनः ।

[पिण्डिकालिङ्गयोः खण्डस्फोटादिसंभवे कर्तव्यो जीर्णोद्धारप्रकारः]

पिण्डिकालिङ्गयोर्यत्र खण्डस्फोटादिसंभवः ।।२९।।
त्याज्यं तदन्तरे तस्माज्जीर्णमेव समुद्धरेत् ।

---

[21]२५—२७ श्लोकाः अजितागममूलमातृकायां न दृश्यन्ते। परंतु जीर्णोद्धारदशकव्याख्याने 'अजिते' इत्युद्धृता एते श्लोका औचित्यादत्र निवेशिताः।

[22]जुहुयादिति शेषः।

[23]जुहुयादिति शेषः।

[24]अत्र होतव्य इति शेषः।

[25]'वामदेवाख्यम्' इत्यस्यानन्तरं जुहुयादिति शेषः।

[26]अत्र ईशानं जुहुयादिति पदद्वयमध्याहृत्य व्याख्येयम्।

[27]अत्र कुर्यादिति शेषः।

[28]मूर्तिजं—इ

[29]दहेन्मन्त्रेण निज ते तन्त्राद्य स्थाप—इ

[बाललिङ्गजीर्णोद्धारः[३०]]

बाललिङ्गे विजीर्णे तु [३१]तत्रैवोत्पाद्य तादृशम्[३२] ।।३०।।
स्थापयेद्विधिना धीमान्बालस्थानं न कारयेत् ।

[खण्डादीनां स्वरूपम्]

यवत्रयप्रमाणोर्ध्वं[३३] खण्डितं खण्डितं भवेत् ।।३१।।
स्फुटितं तु भवेत्तत्र गोवालाग्रप्रवेशने ।
दग्धं तु तद्भवेद्यत्र वैवर्ण्यमुपलक्ष्यते ।।३२।।

[खण्डनं स्फोटनं च स्वायंभुवलिङ्गे न दोषदम्]

खण्डनं स्फोटनं चैव [३४]स्वायंभुवे न दोषदम् ।[३५]

[रत्नजलोहजलिङ्गेषु खण्डादौ संभूते कर्तव्यजीर्णोद्धारप्रकारः]

रत्नजेष्वथ लिङ्गेषु खण्डादौ समुपस्थिते ।।३३।।
तदेवान्येन मानेन कृतहस्तेन शिल्पिना ।
कारयेल्लोहजे लिङ्गे खण्डस्फोटादि[३६]सम्भवे ।।३४।।

---

[३०] 'जीर्णके बाललिङ्गे तूद्धारणं तु तथा कुरु ।
तस्याग्रे स्थण्डिलं कृत्वा निर्दोषैः सिकतैः सितैः ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
समिधा सद्यमन्त्रेण घृतमीशानमन्त्रतः ।।
हृदयेन चरुं हुत्वा येषामीशेति लाजकम् ।
सिताब्जं नेत्रमन्त्रेण बिल्वपत्रं तु वर्मणा ।।
अष्टोत्तरशतं हुत्वा प्रत्येकं तु विशेषतः ।
द्रव्यान्ते व्याहृतिं हुत्वा आहुतिं जुहुयात्ततः ।।
पूर्णाहुतिं ततः कृत्वा शिरोमन्त्रेण देशिकः ।
नवलिङ्गं प्रकुर्वीत पूर्ववत्तेन वस्तुना ।।
तरुणस्थापनं चोक्तमार्गेणैव समाचरेत् ।
स्थापनात्पूर्वकाले तु लिङ्गं हस्तेन चालयेत् ।।
दक्षिणां च गुरोर्दत्त्वा भूसुरान्भोजयेत्ततः ।'
(*पूर्वकारणे* १३४.४०उ० —४६)

[३१] तत्रैवाद्यं तु तादृशम् —इ

[३२] अत्र 'नूतनम्' इत्यध्याहृत्य व्याख्येयम् ।

[३३] प्रमाणोर्ध्वां —इ

[३४] स्वयं तु विन दोषजम् —इ

[३५] 'स्वायम्भुवादिलिङ्गानां शिथिलीभूतसम्भवे ।
लोहपट्टेन तद्बद्ध्वा गोलकाकारवद्बुधः ।।
विधिवत्पूजयेन्नित्यं पञ्चगव्यसमन्वितम् ।
सर्वसिद्धिकरं पुण्यं ग्रामशान्तिकरं भवेत् ।।
आर्षपे गाणपे सिद्धेऽप्येवमेव समाचरेत् ।
(*अंशुमति* ५६.२६ —२८ पू०);
'स्वायम्भुवादिलिङ्गेषु जीर्णोद्धारं न कारयेत् ।
मोहाद्वा यदि वाज्ञानाच्चालनं सर्वनाशनम् ।।
तस्मात्सर्वप्रयत्नेन मूललिङ्गं न शोधयेत् ।'
(*सूक्ष्मे* ६४.२ उ० —३)

[३६] संयुते —इ

[37]तन्मानेनापरं लिङ्गं तेन द्रव्येण कारयेत् ।
[38]अनयोश्चात्र कुर्वीत होमं ब्राह्मणभोजनम् ॥३५॥
[ग्रन्थपातः]
तस्माच्च शतहस्तोर्ध्वे नेतरत्स्थापयेत्सुधीः ।
पूर्ववद्धाम सङ्कल्प्य पूर्ववत्स्थापयेत्सुधीः ॥३६॥
[39]रत्नलोहजलिङ्गानामुद्धारे पूर्ववद्यदि ।
कर्तुं न शक्यते तत्र बाणलिङ्गस्थितिर्मता ॥३७॥

[जीर्णोद्धारानन्तरं बाणलिङ्गस्थापने करणीयो विशेषः]

बाणलिङ्गप्रतिष्ठायां जले नैवाधिवासयेत् ।
शेषं कर्म समं सर्वं तत्रादौ [40]पिण्डिकां हरे[41] ॥३८॥
[42]अचलां स्थाप्य तस्यां तु लिङ्गं संस्थापयेत्ततः ।

[प्रासादाभ्यन्तरस्थले भित्तौ वा शिल्पिकर्मणि सञ्जाते करणीयो विशेषः]

शिल्पिकर्मणि सञ्जाते प्रासादाभ्यन्तरे [43]तले ॥३९॥
भित्तौ वा, लिङ्गमावेष्ट्य वाससा तु सपीठकम् ।
[44]शिल्पिस्पर्शो यथा न स्यात्तथा [45]कृत्वाखिलां क्रियाम् ॥४०॥
शिल्पिकर्म[46] समाख्यातं नित्यपूजाविरोधतः ।
पञ्चगव्येन संप्रोक्ष्य ब्रह्मपञ्चकमुच्चरन् ॥४१॥
स्नपनं शान्तिहोमं च कुर्यात्तद्विधिपूर्वकम् ।

[नित्याग्निकुण्डजीर्णोद्धारः]

नित्याग्निकुण्डे जीर्णे तु [47]तत्पूर्वे वा तथोत्तरे ॥४२॥
[48]सैकतं स्थण्डिलं कृत्वा तत्राग्निं कुण्डतो न्यसेत् ।

---

[37]अस्मिन् श्लोके 'त माने' इत्येतावदेव दृश्यते 'इ' मातृकायाम्। तदनन्तरं पत्रद्वयं लुप्तम्। तथापि जीर्णोद्धरदशकव्याख्यानोद्धृतश्लोकमनुसृत्यात्र '३५' तमश्लोकः पूरितः; तन्मानेन परं लिङ्गं—जीर्णोद्धार-दशकव्याख्यानोद्धृतः पाठः।

[38]अनुयोज्यात्र कुर्वीत—जीर्णोद्धारदशकव्याख्यानपाठः।

[39]रत्नशैलज—इ

[40]पिण्डिका—इ

[41]अत्र 'हरे' इति पदं विष्णुसम्बोधने प्रयुक्तम्।

[42]अचला—इ

[43]जले—इ

[44]स्पर्शो यथा—इ

[45]कृत्वाखिलक्रियाम्—इ

[46]अत्र 'समाप्य' इति पदमध्याहृत्य व्याख्येयमिति भाति।

[47]तस्य पूर्वे च चोत्तरे—इ

[48]'प्रमाणहीनं तत्कुण्डं स्थण्डिलं वारि वृद्धिदम्।
शान्तिहोमं तदा कृत्वा यथावत्पुनराचरेत्॥
कुण्डसंस्कारहीने तु शिवाग्निर्नैव सिद्ध्यति।'
(*उत्तरकामिके* ३०.२६१ उ०, २६२);
'अग्निकुण्डविहीने तु शान्तिहोमं तु कारयेत्।
पूर्ववद्विन्यसेदग्निं तद्दोषशमनाय च॥'
(*वीरे* ५२.७७ उ०, ७८ पू०)

यात्राहोमं तु कृत्वादौ तत्र होमं प्रकल्पयेत् ।।४३।।
यावत्कुण्ड[49]समाप्तिः स्यात्पश्चादग्निनिकेतने[50] ।
[51]स्थापयित्वा ततश्चापि यात्राहोमं तु कारयेत् ।।४४।।
ततश्चापि प्रकुर्वीत नित्यहोमं विधानतः ।

[बलिपीठजीर्णोद्धारः[52]]

बलिपीठेषु जीर्णेषु [तानि] कृत्वा [तु] पूर्ववत् ।।४५।।
प्रोक्षयेद्विधिना मन्त्री बलिं पार्श्वे तु निक्षिपेत् ।

[यात्राहोमविधिः[53]]

यात्राहोमविधिं वक्ष्ये सैकते स्थण्डिले शुभे ।।४६।।
विधिनाग्निं समाधाय समिदाज्यचरून्क्रमात् ।
यवसर्षपलाजांश्च [54]तिलांश्च शतसंख्यया ।।४७।।
प्रत्येकं तु तदर्धं वा तत्तन्मूलाङ्गकैः क्रमात् ।
होमयेच्च [55]तदन्ते तु बीजमुख्येन सर्पिषा ।।४८।।
होमयेद्देशिको धीमान्संख्ययापि पुरोक्तया ।
पूर्णां सर्वात्मना तत्र जुहुयाद्देशिकोत्तमः ।।४९।।

---

[49] समाप्तिस्तु —इ

[50] निकेतनम् —इ

[51] अत्र 'विधिनाग्निं' इत्यध्याहृत्य व्याख्येयमिति भाति ।

[52] 'बलिपीठे विहीने तु सर्वदोषावहं भवेत् ।
सङ्कल्प्य पूर्ववत्पीठं ततस्तत्स्थापनं नयेत् ।।
तज्जीर्णे स्फुटिते दाहे पतनादौ सति द्विजाः ।
शान्तिहोमं तदा कृत्वा सम्प्रोक्षणमथाचरेत् ।।'
(*उत्तरकामिके* ३०.३९३ उ० —३९५ पू०)
'बलिपीठविहीने च गोनाशो भवति ध्रुवम् ।
पूर्ववत्कल्पयेत्पीठं स्थापयेद्विधिना ततः ।
स्नपनं कारयेच्छम्भोः पूजयेत्तु विशेषतः ।।'
(*पूर्वकारणे* १४४.५४ उ०, ५५);
'बलिपीठे विहीने च ग्रामनाशो धनक्षयः ।
पीठं संलक्षणं कृत्वा बलिं तत्र प्रदापयेत् ।।'
(*पूर्वकारणे* १४४.१८१ उ०, १८२ पू०)

[53] 'यात्राहोमं प्रकर्तव्यं बालस्थानस्य चाग्रतः ।
स्थण्डिलं हस्तमात्रेण निर्दोषैः सिकतैः शुभैः ।।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
समिधः सद्यमन्त्रेण घृतमीशानमन्त्रतः ।।
अघोरेण चरुं हुत्वा प्रत्येकं पञ्चविंशतिः ।
प्रासादबीजमुख्यैश्च व्योमव्यापिपदैस्तथा ।।
शिवाङ्गैश्चैव विद्याङ्गैः प्रत्येकं षोडशाहुतिः ।
स्पृष्ट्वा स्पृष्ट्वा तु जुहुयात् त्र्यम्बकेनैव मन्त्रतः' ।
(*पूर्वकारणे* १३७.३७ —४०)

[54] चरूणां —इ

[55] तदन्तेषु —इ

[जीर्णलिङ्गबेरार्चनादनावृष्टिः[५६]]

जीर्णलिङ्गं तु बेरं वा यत्र देशे तु पूज्यते ।
तत्रानावृष्टिजा भीतिर्वर्तते नात्र संशयः ।
तस्मात्सर्वप्रयत्नेन जीर्णमुद्धृत्य [५७]कारयेत् ।।५०।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] जीर्णोद्धारविधि-
[स्त्रिसप्ततितमः] पटलः ।

---

[५६] 'जीर्णोद्धारे कृते कर्तुर्मौलिकं फलमिष्यते ।
जीर्णाद्यं पूजितं हन्ति निहन्ति तदपूजितम् ।।
तस्मात्समुद्धरेज्जीर्णं यथाशास्त्रं सुखाय च ।'
(*उत्तरकामिके* ३२.१३.१४ पू०);
'स्फुटिते खण्डिते भिन्ने नाशितेऽशनिनाग्निना ।
उन्मत्तैरेव चौरैर्वा नाशिते शत्रुभिस्तु वा ।।
सरित्स्रोतः करिभ्यां वा जीर्णकाले विपर्यये ।
क्षेत्रं जीर्णं यथा क्षेत्री त्यक्त्वान्यं प्रतिपद्यते ।।
तथा जीर्णानि वस्त्राणि सद्यो मुञ्चन्ति देवताः ।
तद्दृष्ट्वा भूतवेतालाः पिशाचा ब्रह्मराक्षसाः ।।
प्रेताल्पशून्यसत्त्वाश्च आश्रयन्ति न संशयः ।
राष्ट्रग्रामनृपाणां च स्थापकस्यैव मन्त्रिणः ।।
कुर्वन्ति ते भयं ह्युग्रं दुर्भिक्षं मरणं ध्रुवम् । . . .
तस्मादुद्धारणं चाहुर्विधिदृष्टेन कर्मणा ।'
(*पूर्वकारणे* १३४. ३.८ पू०);
'जीर्णदेही यथा देहं त्यक्त्वान्यं प्रतिपद्यते ।
तथा जीर्णं च चलितं बेरं मुञ्चन्ति देवताः ।।
एवमादिनि सर्वाणि राक्षसाद्या विशन्ति हि ।
राक्षसाश्चासुराश्चापि पिशाचा ब्रह्मराक्षसाः ।।
तस्मात्सर्वप्रयत्नेन जीर्णोद्धारं तु कारयेत् ।'
(*सुप्रभेदे* १.५४.१ उ० —३)

[५७] अत्र 'नूत्नम्' इति शेषः ।

[चतुःसप्ततितमः पटलः]

[¹संप्रोक्षणविधिः²]

[संप्रोक्षणनिमित्तानि, तत्कालश्च]

संप्रोक्षणविधिं वक्ष्ये सर्वदोषनिकृन्तनम् ।
षण्मासादूर्ध्वं लिङ्गस्य पूजाकर्मविहीनके ।।१।।
चण्डालस्पर्शने चैव पुलिन्दैर्धीवरैस्तथा ।
[चोरकैश्च] तथा ³विष्णो ब्रह्मघ्नैर्वापि मद्यपैः ।।२।।
[पातकै]र्गुरु⁴नारीगैस्तत्तत्संसर्गि[भि]स्तु वा⁵ ।
जीर्णोद्धारविधौ वापि प्रायश्चित्तविधौ तु वा ।।३।।
प्रोक्तेष्वपि च सर्वेषु संप्रोक्षणमिदं भवेत् ।
माघभाद्रपदौ त्यक्त्वा प्रोक्षणं ⁶सार्वकालिकम् ।।४।।

---

¹अयं पटलः 'इ, ई, थ' मातृकासु दृश्यते। एतद्विषये *अंशुमदागमे* ६४; *अचिन्त्यविश्वसादाख्ये* ७३; *उत्तरकामिके* ७०; *उत्तरकारणे* ९४, ९८; *दीप्ते* ३०, ६४, ६५; *पूर्वकामिके* ७०, ७५; *पूर्वकारणे* ७३, १३७, १४४ पटला द्रष्टव्याः।

²'दिनानि यानि हीनानि पूजया नित्यसंज्ञया।
तदहःसंख्यया कुर्यात्प्रायश्चित्तं पुरोदितम् ।।
एकमासावधिर्यावत्ततः सम्प्रोक्षणं नयेत्।
नान्यथा देवदेवस्य सन्निधिर्द्विजसत्तमाः ।।'
'अपि कुक्कुटकाद्यैर्वा कापोतैः सूकरैः श्वभिः।
उलूकगृध्रकाकैश्च ऋतुस्त्रीचोरगर्दभैः ।।
पतितैः प्रेतकैर्वापि पातकैः सूतकैरथ।
गूढजैः पापरोगार्तैर्व्रात्यैर्वा प्रतिलोमजैः ।।
गुर्वादिद्रोहसंयुक्तैर्दीक्षाहीनैर्द्विजादिभिः।
चतुष्पादैरथान्यैश्च पक्षिभिर्वा सरीसृपैः ।।
हीनजातिभिरन्यैर्वा नरैर्दीक्षान्तरस्थितैः।
शिल्पिभिः पाणचण्डालरजकाद्यैरथापि वा ।।
स्पृष्टे पीठेऽथ लिङ्गे वा बेरादौ तत्र वासिताः।
राष्ट्रे शत्रुजनैर्मर्त्याः पीड्यन्ते सर्व एव ते ।।
मृद्भाण्डानि त्यजेदेतैः स्पृष्टान्यासन्नकान्यपि।
गोमयालेपनं कृत्वा पुण्याहं च गुरूत्तमः ।।
गव्येन स्नपनं कृत्वा सम्प्रोक्षणमथाचरेत्।'
(*उत्तरकामिके* ३०.२०३उ०—२०५पू०, ३९७उ०—४०३);
'शिल्पिना स्पर्शिते वापि पूजाहीनेऽग्निलीढके।
तस्करस्पर्शने भ्रान्तरोगार्तस्पर्शितेऽथवा ।।
प्रमादाद्भूमिपतिते वर्षसिक्तेऽथवा पुनः।
पूजाहीने तु पक्षार्धं प्रतिष्ठां कारयेद्बुधः ।।
अन्यानि सर्वकार्याणि प्रागुक्तविधिना कुरु।
आषाढे मार्गशीर्षे च माघे प्रोष्ठपदेऽपि वा ।।
दिव्यलिङ्गे विशेषेण संप्रोक्षणमथाचरेत्।
सम्प्रोक्षणं प्रकुर्वीत यजनं सम्यगाचरेत् ।।
सितपक्षे तु पुष्यर्क्षे यजमानानुकूलके।
अङ्कुरार्पणपूर्वं तु कल्पयेत्प्रोक्षणादिकम् ।।
अनङ्कुरं तु यत्कर्म तत्कर्म निष्फलं भवेत्।'
(*पूर्वकारणे* १३७.२२ उ०—२७)

³विष्णोर्ब्रह्मघ्नै—इ

⁴नारीकैस्ते च संसार्गि . . . स्तु वा—इ

⁵अत्र स्पृष्टे इति शेषः।

⁶सर्वकामिकम्—इ

[मण्डपकल्पनं तत्र कुण्डवेदीकल्पनं च]

[७]तदर्थं मण्डपं कुर्याद्धाम्नोऽग्रे शाङ्करेऽपि वा ।
पार्श्वयोरुभयोर्वापि [८]षड्भिः सप्ताष्टभिः क्रमात् ।।५।।
हस्तैः[९] [१०]करकसंपूर्णं विकारस्तम्भसंयुतम् ।
नवभागैकभागेन मध्ये वेदिकया युतम् ।।६।।
चतुर्द्वारसमायुक्तं प्रति[११]द्वारं सतोरणम् ।
वितानध्वजसंयुक्तं दर्भमालासमायुतम् ।।७।।
चतुरश्रैश्चतुर्दिक्षु कुण्डैर्वृत्तैर्विदिक्षु च ।
ईशानशक्रयोर्मध्ये पद्म[१२]कुण्डं प्रकल्पयेत् ।।८।।
पञ्चहोमविधाने तु [१३][कोणकुण्डानि वर्जयेत् ।
ऐशान्यां कल्पयेत्कुण्डं प्रधानं पद्ममेव तत्] ।।९।।

[मण्डपसंस्कारः]

[१४][गोमयेनोपलिप्याथ मण्टपं कुण्डवेदियुक् ।
ब्राह्मणान्भोजयित्वात्र गोमयेनानुलेपयेत् ।।१०।।
पुण्याहं वाचयित्वाथ] वास्तुहोमं च कल्पयेत् ।
तत्र वेद्यां च कुण्डेषु [१५]जीवजप्तेन वारिणा ।।११।।
संप्रोक्ष्य विकिरेत्तत्र सितपुष्पाक्षतैः क्रमात् ।

---

[७]'विंशतीहस्तविस्तारमुत्तमं मण्टपं भवेत् ।
द्वादशस्तम्भसंयुक्तं मण्टपं त्वधमं भवेत् ।।'
'चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ।
वितानोपरिसंछन्नमष्टदिग्ध्वजसंयुतम् ।।
दीपैः पुष्पैः फलैः सार्धमङ्कुरैरष्टमङ्गलैः ।
स्तम्भान्निवेशयेत्तत्र प्रतिपादं हि वस्त्रकैः ।।
मण्टपं तु त्रिधा कृत्वा मध्यभागे तु वेदिकाम् ।
रत्निमात्रसमुत्सेधां दर्पणोदरसन्निभाम् ।।
वेद्यां मूले तु परितश्चोपवेदिं प्रकल्पयेत् ।
युगाङ्गुलसमुत्सेधं द्वियङ्गुलं च विस्तृतम् ।।
कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात् ।
नवाग्निं वाथ पञ्चाग्निमेकाग्निं चैव देशिकः ।
दिशासु चतुरश्राणि विदिशासु कुशेशयम् ।
ईशानशक्रयोर्मध्ये वृत्तं प्राधानिकं कुरु ।।
पञ्चाग्न्यायतनं चेत्तु अब्जकुण्डानि वर्जयेत् ।
मण्टपस्योत्तरे भागे स्नानश्वभ्रं प्रकल्पयेत् ।।
उद्वास्य शिल्पिनं पश्चाद्गोमयेनोपलेपयेत् ।
पुण्याहं वाचयित्वा तु ब्राह्मणान्भोजयेत्ततः ।।
पश्चादुच्छिष्टमुद्वास्य पुनः पुण्याहमाचरेत् ।'
'समर्यकपदे सम्यग्वास्तुहोमं तु कारयेत् ।।
पर्यग्निकरणं कुर्यान्मण्टपं तेन वह्निना ।'
(*पूर्वकारणे* १३७.१३उ०, १४पू०; १५—२३पू०; २४उ०, २५पू०)

[८]षट्सप्ताष्टाभिर्वै—इ

[९]अत्र 'युक्तं' इति पदमध्याहृत्य विस्तारविषये एकविंशतिहस्तैर्युक्तमिति व्याख्येयमिति भाति ।

[१०]करकाः कलशाः द्वारकुम्भादयः तैः सम्पूर्णम् ।

[११]द्वारसतोरणम्—इ

[१२]कुण्डे प्रकल्पिते—इ

[१३]अजिते ५४.१४ उ० , १५ पू० श्लोकमनुसृत्यात्र पाठः साधितः ।

[१४]अजिते ४०.१२ उ० , १३ सार्धश्लोकमनुसृत्यात्र पाठः साधितः ।

[१५]जीवमन्त्रः =आत्मप्रासादमन्त्रः । वातुलशुद्धे पृ० ७३

[लिङ्गपीठशुद्धिः, गर्भगेहप्रोक्षणं च]

[16]ततश्शान्तः [17]प्रविश्याथ पञ्चमृत्पञ्चगव्यकैः ।।१२।।
शिवास्त्रेण [18]विशुद्ध्यर्थमुपलिप्याभिषिच्य च[19] ।
बहुशः शुद्धतोयेन शुद्ध्यर्थमभिषेचयेत् ।।१३।।
ततश्च [20]पिण्डिकायां च शुद्धिं तद्वत्प्रकल्पयेत् ।
ततश्च कुशमिश्रेण बिल्वपत्रेण घर्षयेत् ।।१४।।
पूर्ववत्पुनरेवेशं [21]पिण्डिकां च क्रमेण वै ।
सर्वात्मनाभिषिच्याथ स्थलं प्रक्षाल्य हेतिना ।।१५।।
ततो लिङ्गं च देवीं च चन्द्रनेनानुलिप्य च ।
अर्घ्यं चापि हृदा दत्त्वा मालाभिः सह देशिकः ।।१६।।
वेष्टयेन्नववस्त्रेण लिङ्गं [22]वेदिं च वर्मणा ।
ततश्च गर्भगेहं तद्ब्रह्मपञ्चकमुच्चरन् ।।१७।।
प्रोक्षयेदस्त्रजप्तेन वारिणा देशिकः स्वयम् ।

[कुम्भस्थापनं तत्र देवतायजनं च]

[23]निर्गम्य मण्डपं तस्मात्प्राप्य वेद्यां तु शालिभिः ।।१८।।

---

[16]'गर्भगेहं प्रविश्याथ स्थानशुद्धिं ततः कुरु ।
लिङ्गशुद्धिं ततः कृत्वा स्नपयेद्गन्धतोयकैः ।।
पुण्याहं च ततः कृत्वा शुद्धोदैरभिषेचयेत् ।
पञ्चगव्यैश्च संस्नाप्य बिल्वपत्रेण घर्षयेत् ।
दर्भमूले तु वल्मीके क्षेत्रे चैव मृदं हरेत् ।
यदा मृदा च लिङ्गं तु देशिकेन तु लिप्यते ।।
गन्धोदकेन संस्नाप्य प्रोक्ष्येद्धृदयेन तु ।
चन्दनागरुकुष्ठैश्च कुङ्कुमोशीरकेसरैः ।।
एलालवङ्गकर्पूरैरालोड्यालेपयेच्छिवम् ।
पिण्डिकां च समालिप्य प्रोक्षयेत्पुरुषेण तु ।।
शिरसा बन्धयेल्लिङ्गे हैमकौतुकसूत्रकम् ।
अर्कपङ्कजबिल्वैश्च मयूराशोकपाटलैः ।।
करवीरनन्दिकावर्तपलाशकुसुमैरपि ।
बृहतीद्रोणकुसुमैर्व्याघातजातिचम्पकैः ।।
पुन्नागकर्णिकारादिकुमुदोत्पलमल्लिकैः ।
लिङ्गोमां पूरयेद्धीमानुक्तपुष्पैर्विशेषतः ।।
नववस्त्रेण चावेष्ट्य लिङ्गपीठे क्रमेण तु ।'
(*पूर्वकारणे* १३७.२८—३६ पू०)

[17]प्रविश्ये तु—इ

[18]विशुध्यत्व—इ

[19]अत्र 'लिङ्गम्' इति शेषः ।

[20]पिण्डिका तद्वत्ततस्तद्वत्—इ

[21]पिण्डिकांश्च—इ

[22]अत्र वेदिरित्यनेन पिण्डिका लक्षणया बोध्यत इति भाति ।

[23]'तस्याग्रे स्थण्डिलं कृत्वा शालिभिर्विमलैस्तथा ।
स्थण्डिले विन्यसेत्कुम्भं वर्धनीं तस्य वामके ।।
ससूत्रौ गन्धपुष्पाढ्यौ सवस्त्रौ हेमरत्नकौ ।
सापिधानौ सकूर्चौ तु वर्धनीशिवकुम्भकौ ।।
लिङ्गाद्देवं समावाह्य कुम्भमध्ये तु विन्यसेत् ।
पीठाद्देवीं समावाह्य वर्धनीमध्यमे न्यसेत् ।।
स्थापयेद्वामदेवेनाघोरेणावकुण्ठयेत् ।
सान्निध्यं पुरुषेणैव पञ्चमुद्रां प्रदर्शयेत् ।।
लिङ्गमुद्रां च मुकुलीं पद्ममुद्रां प्रदर्शयेत् ।
नमस्काराख्यमुद्रां च बद्ध्वास्त्रं दिक्षु योजयेत् ।।
सूत्रादिभिः समोपेतानभितोऽष्टघटान्न्यसेत् ।
इन्द्राद्यैशानपर्यन्तमष्टविद्येश्वरान्क्रमात् ।।
कुम्भमध्ये समावाह्य तत्तद्बीजसमन्वितम् ।
पूजयेद्धृदयेनैव गन्धपुष्पादिभिः क्रमात् ।।
नैवेद्यं तु तथा दत्त्वा ताम्बूलं च हृदा ददेत् ।'
(*पूर्वकारणे* १३७.४१—४८ पू०)

स्थण्डिलं पूर्ववत्कृत्वा तत्र कुम्भं दृढं शुभम् ।
[24]द्रोणपूरं सुपक्वं च सितसूत्रविचित्रितम् ।।१९।।
गन्धोदपूरितं हेमपद्मयुक्तं सकूर्चकम् ।
[25]सापिधानं सवस्त्रं च न्यसेन्मध्ये शिवाणुना ।।२०।।
ततस्तस्योत्तरे भागे तादृग्भूतां तु वर्धनीम् ।
तदर्धवारिणापूर्य न्यस्त्वा सर्वासु दिक्षु च ।।२१।।
तादृशान्कलशानष्टौ विन्यसेद् वर्धनीसमान् ।
[26]हेमशस्त्रसमायुक्तान्सर्वलक्षणलक्षितान् ।।२२।।
ततस्तेषु शिवं मध्ये वर्धन्यां शक्तिमेव च ।
विद्येश्वरांश्च देशेषु गन्धपुष्पादिभिः क्रमात् ।।२३।।
संपूज्य च हविर्दद्यात्'

[होमः]

[27]'ततो होमं प्रकल्पयेत् ।
अग्निकुण्डेषु सर्वेषु विधिना स्थाप्य पावकम् ।।२४।।
तेषु सर्वेषु विद्येशान्प्रधाने च शिवं यजेत् ।
समिदाज्यचरूणां तु यवसर्षपयोस्तथा ।।२५।।
लाजस्यापि तिलस्याथ प्रत्येकं शतसंख्यया ।
जुहुयान्मूल[28]मन्त्रेण [29]षडङ्गैश्च यथाक्रमम् ।।२६।।
प्लक्षोदुम्बर[30]काश्वत्थवटाः पूर्वादितः क्रमात् ।
शमीखादिर[31]बिल्वार्काः पावकादिषु च क्रमात् ।।२७।।

---

[24]द्रोणपूर्णम् इत्यर्थे द्रोणपूरमिति प्रयोग इति भाति ।
[25]सपिधानं —इ
[26]हेमशास्त्र —इ
[27]'आचार्यो मूर्तिपैः सार्धं ततो होमं समाचरेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।।
समिदाज्यचरूँल्लाजान्सर्षपांश्च यवांस्तिलान् ।
होमद्रव्याणि सप्तैताञ्जुहुयाद्वै क्रमेण तु ।।
पलाशोदुम्बराश्वत्थबिल्वं चेति दिशासु च ।
शमीखदिरमायूरवटाश्चेति विदिक्षु वै ।।
प्रधानस्य पलाशो हि सर्वेषामिध्ममेव च ।
सद्योजातेतिमन्त्रेण समिदाहुतिमाचरेत् ।।
मूलेन जुहुयादाज्यमघोरेण चरुं हुनेत् ।
लाजं वामेन मन्त्रेण सर्षपं कवचेन तु ।।
यवं हुत्वा तु शिखया तिलमस्त्रेण होमयेत् ।
शतत्रयं शतं वापि तस्यार्धं वार्धमेव हि ।।
प्रत्येकं जुहुयाद्धीमान्द्रव्यान्ते व्याहृतिं हुनेत् ।
समिदाहुतिं विना धीमानुपाहुतिमथाचरेत् ।।
घृतमिक्षे घृतं हुत्वा देवस्य त्वा चरुं हुनेत् ।
यद्देवेति च लाजांश्च कद्रुद्रायेति सर्षपम् ।।
यवं च शन्नोदेवीति एषामीशे तिलं हुनेत् ।
प्रत्येकं दशकं हुत्वा द्रव्यान्ते व्याहृतिं हुनेत् ।।
ब्रह्मजज्ञानमन्त्रेण हुत्वा स्पृष्ट्वा त्वजांशकम् ।
इदं विष्णिवति मन्त्रेण हुत्वा विष्णवंशकं स्पृशेत् ।।
त्रियम्बकेन मन्त्रेण हुत्वा त्वीशांशकं स्पृशेत् ।
सर्वद्रव्यसमायुक्तं हव्यवाहेति होमयेत् ।।
एवं जागरणं रात्रौ'
(*पूर्वकारणे* १३७.६४ उ० —७५)

[28]मन्त्रैश्च —इ
[29]सप्ताङ्गैश्च —इ
[30]माश्वत्थं वटं —इ
[31]बिल्वाख्य पावका —इ

[32]पालाशी स्यात्प्रधानस्य समिदेवं [33]प्रकीर्तिता ।
पञ्चहोमविधाने तु कुण्डेषु ब्रह्मपञ्चकम् ॥२८॥
सद्यादीशानपर्यन्तं यथास्थानं समर्चयेत् ।
प्रतिद्रव्यावसाने तु व्याहृत्यन्ते स्पृशेद्घटम् ॥२९॥
होमकाले प्रयुञ्जीत चतुर्दिक्षु ऋगादिभिः ।
विप्रैरध्ययनं तत्र शाङ्करेऽस्त्रजपान्वितम् ॥३०॥
प्रधाने देशिको धीमाञ्शक्तेर्मूलं[34] समुच्चरन् ।
सर्पिषैकेन हुत्वाथ तदङ्गैश्च यथाक्रमम् ॥३१॥
विद्येशानां गणेशानां दिक्पालानां तथैव च ।
तदस्त्राणां च सर्वेषां दशपञ्चकमेव च ॥३२॥
क्रमेण संख्यया हुत्वा स्पृष्ट्वा लिङ्गं [35]सपिण्डिकम् ।
मन्त्रसंहितया धीमांस्ततः स्विष्टकृदाहुतिम् ॥३३॥
हुत्वाथ परिषिच्याथ होमकर्म समापयेत् ।

[प्रातः करणीयविधिः]

[36]ततः प्रभाते विमले होतृभिः सह देशिकः ॥३४॥
कृतनित्यक्रियो गत्वा मण्डपाभ्यन्तरं ततः ।
कुम्भेषु देवान्संपूज्य कुण्डेष्वपि यथाक्रमम् ॥३५॥
वह्निं प्रज्वाल्य पूर्णां तु सर्वात्महृदयेन च ।
स्त्रुचा सर्वत्र दद्याच्च शङ्खदुन्दुभिनिस्वनैः ॥३६॥
परिषिच्याग्निमुद्वास्य'

---

[32]पलाशस्या —इ
[33]प्रकीर्तितम् —इ
[34]शक्तिं मूलं —इ
[35]सपिण्डकम् —इ
[36] 'प्रभाते प्रोक्षणं कुरु ।
आचार्यो मूर्तिपैः सार्धं स्नानं कृत्वा विशेषतः ॥
अङ्गन्यासकरन्यासं पूर्वोक्तविधिना कुरु ।
व्यपोह्योषितपुष्पाणि कौतुकं वस्त्रसंयुतम् ॥
सद्यादिपञ्चमन्त्रैश्च गव्यैश्चैवाभिषेचनम् ।
मृदाम्भसा तु संस्नाप्य कुशतोयेन सेचयेत् ॥
गन्धोदकेन संस्नाप्य लिङ्गपीठस्थलं क्रमात् ।
गन्धादिभिः समभ्यर्च्य हृदयेनैव मन्त्रतः ॥
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः ॥
कन्यसं दशनिष्कं तु विंशन्निष्कं तु मध्यमम् ।
त्रिंशन्निष्कोत्तमं प्रोक्तं देशिकस्य तु दक्षिणा ।
दक्षिणां दापयेत्तत्र पञ्चाङ्गभूषणैः सह ॥
अध्येतृमूर्तिधारांश्च पूजयेत्पूर्ववद्बुधः ।
पूर्णाहुतिं तु शिरसा हुत्वाग्निं तु विसर्जयेत्' ॥
(*पूर्वकारणे* १३७.७५ उ० —८२)

[कुम्भाभिषेकः]

'[37]गर्भगेहं प्रविश्य च ।
वस्त्रमाल्यादिकं सर्वं हेतिनाथ विसर्जयेत् ।।३७।।
ततो लिङ्गं सपीठं तु सर्वात्मानं समुच्चरन् ।
गन्धाम्बुनाभिषिच्याथ दत्त्वार्घ्यं प्रणवेन च ।।३८।।
ततः कुम्भान्समुद्धृत्य सर्वातोद्यसमन्वितः ।
प्रदक्षिणक्रमादन्तः प्रविश्याग्रे शिवस्य च ।।३९।।
स्थाप्य कुम्भान्यथापूर्वं कृतमन्त्रतनुर्गुरुः ।
गन्धपुष्पादिभिः पूज्य लिङ्गमूले तदासनम् ।।४०।।
[38]कुम्भात्कूर्चाम्भसा मूलमन्त्रमुच्चार्य मन्त्रवित् ।
लिङ्गे देवं समावाह्य [39]देव्यां शक्तिं च मन्त्रवित् ।।४१।।
[40]विद्येशान्परितः पीठं तत्तन्मन्त्रं समुच्चरन् ।
विन्यस्य पूर्ववन्मन्त्री ततस्तैरभिषेचयेत् ।।४२।।
शिवकुम्भाम्भसा देवं वर्धन्याथ च पिण्डिकाम् ।
शेषैश्च [41]लिङ्गं[42] मन्त्रं तु कालात्मानं समुच्चरन् ।।४३।।
ततश्चाभ्यर्च्य देवेशमर्चनोक्तप्रकारतः ।
दत्त्वा [43]हवींषि पञ्चापि शुद्धान्नादीनि देशिकः ।।४४।।
मुखवाससमायुक्तं [44]ताम्बूलं च निवेदयेत् ।

[देशिकादीनां दक्षिणा ब्राह्मणभोजनं च]

ततश्च देशिकादीनां दद्यादुक्तां तु दक्षिणाम्[45] ।।४५।।
मृष्टान्नं ब्राह्मणानां तु दद्यात्तत्र दिनत्रयम् ।

---

[37]'शिवकुम्भं वर्धनीं च उद्धरेन्मूर्तिकुम्भकान् ।
शिरसा वाहयित्वा तु कृत्वा हर्म्यप्रदक्षिणम् ।।
सर्वातोद्यसमायुक्तं सर्वालङ्कारसंयुतम् ।
पुत्रपौत्रकलत्रैश्च यजमानोऽप्यनुव्रजेत् ।।
द्वारदेशं समानीय पूजयेद्गन्धपुष्पकैः ।
गर्भगेहं ततः प्राप्य स्थापयेत्तण्डुलोपरि ।।
मुहूर्तं निरीक्ष्य दैवज्ञो गुरवे सन्निवेदयेत् ।
ध्यात्वा सदाशिवं लिङ्गे त्वष्टत्रिंशत्कलान्वितम् ।।
कुम्भान्मन्त्रं समादाय लिङ्गमध्ये तु योजयेत् ।
शक्तिबीजं तु वर्धन्याः पिण्डिकायां च विन्यसेत् ।
कुम्भोदैः स्नापयेल्लिङ्गं वर्धन्यद्भिस्तु पिण्डिकाम् ।।
अनन्तादिशिखण्ड्यन्तान्क्रमात्पीठे तु विन्यसेत् ।
कुम्भस्थैरुदकैर्लिङ्गं स्नापयेत्तु दशाक्षरैः ।।
गन्धपुष्पादिभिश्चैव पूजयेदीशमन्त्रतः ।
स्नपनं कारयेदन्ते प्रागुक्तविधिना सह ।।
अर्चनोक्तं समभ्यर्च्य प्रभूतहविषं ददेत् ।'
(*पूर्वकारणे* १३७.८३—९०)

[38]कुम्भान्—इ

[39]अत्र 'देव्याम्' इत्यनेन पिण्डिका बोध्यत इति भाति ।

[40]वैद्यैशान्—इ

[41]लिङ्गमन्त्रं—इ

[42]अत्र 'परितः' इति पदमध्याहृत्य व्याख्येयम् ।

[43]पञ्चहविर्विषये *अजिते* २२.१०४—१०९ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[44]ताम्बूलविषये *अजिते* २२.१३६—१४१ श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[45]दक्षिणाविषये *अजिते* ४५.३१—३६ श्लोका द्रष्टव्याः ।

[व्यक्तलिङ्गसंप्रोक्षणम्]

[६६]व्यक्तानामथ लिङ्गानामचलानां जनार्दन ।।४६।।
पञ्चहोमविधानेन कुर्यात्संप्रोक्षणं सुधीः ।
चलानां व्यक्तलिङ्गानां शान्तिहोमसमन्वितम् ।।४७।।
स्नपनं वा यथाशक्त्या प्रयुञ्जीत विशुद्धये ।

[६७] [प्रासादसंप्रोक्षणम्[६८]]

प्रासादप्रोक्षणे [६९]चापि पूर्वादिचतसृष्वपि ।।४८।।

---

[६६]'शिल्पिस्पर्शे तु कार्येषु पूजाहीने तथैव च ।
तस्करस्पर्शने वापि चोरेणोत्थापने तथा ।।
प्रमादात्पतिते भूमौ उत्सवे पतिते तथा ।
पूजाहीने तथा मासे स्नपनं शान्तिहोमकम् ।।
षाण्मासादूर्ध्वहीने तु पूजायास्तु प्रजापते ।
प्रोक्षणं तु प्रकर्तव्यं कुर्याज्जलाधिवासनम् ।।
उत्सवा[वत्सरा ?]दूर्ध्वहीने न कुर्यात्संप्रोक्षणं तथा ।।
तिथिवारं च नक्षत्रं निरपेक्षं तु कारयेत् ।।
रत्नादि शयनान्तं च कुर्यात्सकलकर्मणि ।
पूजाहीने त्रिवर्षोर्ध्वं प्रतिष्ठायां प्रचक्ष्यते ।।
रत्नन्यासाक्षिमोक्षं च जलाधिवासनं विना ।
अन्यानि सर्वकार्याणि पूर्वोक्तलक्षणैर्युतम् ।।
माघे प्रोष्ठपदे चैव आषाढे मार्गशीर्षके ।
पूजयित्वा विशेषेण शेषाणां प्रोक्षणेऽपि च ।।
पूर्वपक्षे तु पुण्यर्क्षे यजमानानुकूलके ।
अङ्कुराण्यर्पयेत्पूर्वं प्रोक्षणादौ विशेषतः ।।
प्रासादस्याग्रके वापि याम्ये वा पावके तथा ।
ऐशान्यां पश्चिमे वापि मण्टपं तु युगाश्रकम् ।।
नवहस्तं पञ्चहस्तं उत्तमं मध्यमाधमम् ।
षोडशस्तम्भसंयुक्तं युगद्वारसमायुतम् ।।
पूर्वोक्तलक्षणैर्युक्तं चतुस्तोरणभूषितम् ।
मण्टपे नवभागे तु मध्ये वेदीं प्रकल्पयेत् ।
रत्निमात्रोच्छ्रयां कुर्यात्षोडशाङ्गुलमेव वा ।।
गोमयालेपनं कृत्वा दर्पणोदरसन्निभम् ।
कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात् ।।
नवाग्निं वाथ पञ्चाग्निमेकाग्निं वा विशेषतः ।
दिशासु चतुरश्राणि विदिशास्वब्जकुण्डकम् ।।
शक्रशाङ्करयोर्मध्ये वृत्तं प्रधानकं कुरु ।
पञ्चाग्न्यायतनं चेत्तु अब्जकुण्डानि वर्जयेत् ।।
प्रत्येकं व्याहृतिं हुत्वा तत्राज्येन प्रकल्पयेत् ।
पूर्णाहुतिं ततो हुत्वा मूलमन्त्रेण होमयेत् ।।
जयादिरभ्यातानं च राष्ट्रभृच्च क्रमाद्धुनेत् ।
स्विष्टमग्नेति मन्त्रेण जुहुयात्तदनन्तरम् ।।
वास्तुहोमं ततः कृत्वा समरीयपदेषु च ।
गन्धं पुष्पं च धूपं च दीपमर्घ्यं हृदाचरेत् ।।
वेद्यास्तु देवतोद्धृत्य स्नानवेद्यां निवेशयेत् ।
सद्योजातेन मन्त्रेण आवाहनं प्रकल्पयेत् ।।
वामदेवेन संस्थाप्य अघोरेण तु सन्निधिम् ।
पाद्यमाचमनं चार्घ्यमेतन्मन्त्रेण दापयेत् ।।
अष्टत्रिंशत्कलायोगं महेशबीजं विन्यसेत् ।
प्राणप्रकृतियोगं तु न्यस्त्वा रूपं विचिन्तयेत् ।।
वेद्याः कुम्भं समुद्धृत्य ईशानेनाभिषेचयेत् ।
घृतं शिरोऽर्पणं कुर्यात् स्नापयेत्तु शिवाम्भसा ।।
विद्येशकुम्भमुद्धृत्य स्वमन्त्रैरभिषेचयेत् ।
प्रोक्षणान्ते तु स्नपनं यथावित्तानुसारतः ।।'
(*पूर्वकारणे* ७३.९ — ३१)

[६७]पञ्चषष्टितमे पटलेऽयं विषयो विशिष्य प्रतिपादितः । सम्प्रोक्षणप्रसङ्गादत्रातीव सङ्ग्रहेण प्रतिपाद्यते ।

[६८]'मन्दिरे पतिते यत्र राजराष्ट्रक्षयो भवेत् ।
बालस्थानं ततः कृत्वा स्थापयेद्विधिपूर्वकम् ।।
पूर्ववद्भवनं कृत्वा सम्प्रोक्षणमथाचरेत् ।'
(*पूर्वकारणे* १४४.२०, २१)

[६९]वापि --इ

दिक्षु शाङ्करदेशेऽपि गोमयेनोपलेपिते ।
[50]कुट्टिमं विधिवत्कृत्वा स्थण्डिलं तत्र विन्यसेत् ।।४९।।
ससूत्रांस्तोयसंपूर्णान्वस्त्रकूर्चसमायुतान् ।
कुम्भान्पञ्च[51] ततस्तेषु दिक्स्थान्दिक्स्थेषु पूजयेत् ।।५०।।
[52]देवाञ्शिवं यजेदीशे तेषामग्रे च होमयेत् ।
समिदाज्यचरूणां तु प्रत्येकं तु शतार्धया ।।५१।।
संख्यया मूलनेत्रास्त्रैर्देवानां तु यथाक्रमम् ।
हुत्वा पूर्णाहुतिं चापि दद्यात्प्रणवमुच्चरन् ।।५२।।
एवं [53]हुत्वा ततः कुर्यात्पुण्याहं विधिवद्बुधे ।
[54]प्रोक्ष्ये धाम्नि, ततः [55]कुम्भैरीशानादि यथाक्रमम् ।।५३।।
[56]प्रोक्षयेत्तत्तदस्त्रेण [57]हेयमुद्धृत्य देशिकः ।
वृषादीनां तु देवानां पीठस्थाने[58] तथैव च ।।५४।।
शान्तिहोमसमायुक्तं स्नपनं विधिना[59] भवेत् ।

[अग्निकार्येऽस्पृश्यस्पर्शदोषे कर्तव्यः]

[60]अग्निकार्येषु संस्पृष्टे[61] वह्निमुद्वास्य तत्र वै ।।५५।।
पञ्चगव्येन संप्रोक्ष्य कुण्डे वाग्निं विधानतः ।
[स्थण्डिले वा] समाधाय शान्तिहोमं विधानतः[62] ।।५६।।
एवं [63]धिष्ण्ये समुद्दिष्टं प्रोक्तं संप्रोक्षणं ततः ।

[मण्डपादिसंप्रोक्षणम्][64]

[65]मण्डपं गोपुरं वापि प्राकारं वा [66]सभां मठम् ।।५७।।

---

[50]कुट्टिमे —इ
[51]अत्र संस्थापयेदिति पदमध्याहृत्य व्याख्येयम् ।
[52]देवच्छिवं —इ
[53]कृत्वा ततः कृत्वा —इ
[54]प्रोक्ष्यं धाम —इ; ततो देशिकः प्रोक्ष्ये धाम्नि हेयं तत्तदस्त्रेणोद्धृत्य कुम्भैरीशानादि यथाक्रमं प्रोक्षयेदित्यन्वयः कर्तव्यः ।
[55]कुम्भानीशानादि —इ
[56]प्रोक्षयेत्तदहस्त्रेण —इ
[57]स्थूप्यमुद्धृत्य —इ
[58]स्थानं —इ
[59]कर्तव्यमित्यध्याहृत्य व्याख्येयम् —इ
[60]'नित्याग्निकार्यहीने तु चुलुकोदकहीनके ।
'सर्वेष्वेतेषु कालेषु विहीनेषु प्रजापते ।
मृद्भाण्डानि विसृज्याथ गोमयालेपनं क्रमात् ।।
पुण्याहं वाचयित्वा तु पर्यग्निकरणं तथा ।
पञ्चगव्येन सम्प्रोक्ष्य स्नपनं कल्पयेद्विभोः ।।
दिशाहोमं समाश्रित्य कारयेत्तु विचक्षणः ।'
(*पूर्वकारणे* १४४.३ उ० ; ९ उ० —११)
[61]अत्र 'अस्पृश्यैः' इति पदमध्याहृत्य व्याख्येयम्
[62]अत्र कुर्यादिति शेषः ।
[63]दिव्य समु —इ
[64]'सभादिमध्यगं रङ्गस्थानं देवासनं तु वा ।
एतेषामपि सर्वेषां प्रोक्षणमधुनोच्यते ।।
कृत्वाङ्कुरार्पणं पूर्वं पुण्याहप्रोक्षणं तथा ।
ब्राह्मणान्भोजयित्वादौ तदुच्छिष्टं विसर्जयेत् ।।

गृहं वा विधिवत्कृत्वा प्रोक्षणं तस्य शुद्धये ।
कुर्यादेवं विधानेन तद्विधानमथोच्यते ।।५८।।

पुण्याहं च पुनः कृत्वा पञ्चगव्येन सेचयेत् ।
वास्तुहोमं ततः कृत्वा पर्यग्निकरणं नयेत् ।।
मण्डपं भूषयित्वा तु गन्धाद्यैरर्चयेद्गुरुः ।
निवृत्यादिकला न्यस्त्वा मध्यस्तम्भचतुष्टये ।।
कौतुकं बन्धयेदग्निकोणभागेऽथ बन्धयेत् ।
वस्त्रैरस्त्रेण चावेष्ट्य मालाद्यैर्भूषयेत्ततः ।।
गन्धाद्यैः पुनरभ्यर्च्य तत्त्वतत्त्वेश्वरान्वितान् ।
मूर्तिमूर्तीश्वरान्न्यस्त्वा मध्यमे मण्डपस्य तु ।।
स्थण्डिलं शालिभिः कृत्वा वसुद्रोणादिमानतः ।
तण्डुलैस्तिललाजैश्च दर्भैः पुष्पैः परिस्तरेत् ।।
मध्यमे शिवकुम्भं तु निवृत्त्यादिकलान्वितम् ।
तद्वामे वर्धनीं तस्यां देवीमावाह्य भक्तितः ।।
चतुष्कुम्भं तु संस्थाप्य हेमवस्त्रादिसंयुतम् ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं तेषु वह्नितः ।।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यान्तैः पृथक् पृथक् ।
ततः शिवाग्निं संस्थाप्य समिदाज्यान्नलाजकैः ।।
शतसंख्यां तदर्धं वा शिवाद्यैर्होममाचरेत् ।
प्रधाने तु शिवेनाग्नौ पूर्वदिक्स्थण्डिले मतः ।।
धर्माद्यैर्हृदयाद्यैर्वा होमः स्यादग्निकोणतः ।
तत्त्वाद्यैश्च ततो हुत्वा पूर्णाहुतिमथाचरेत् ।।
प्रभातेऽथ गुरुः स्नात्वा मूर्तिपैश्च समन्वितः ।
नववस्त्रधृगुष्णीषी सोत्तरीयः समालकः ।।
सम्प्राप्तदक्षिणो मूर्तिधारदैवज्ञशिल्पिभिः ।
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समारभेत् ।।
मण्डपं वेदगात्रं च कुम्भानग्निं च योजयेत् ।
प्रायश्चित्तमघोरेण कृत्वा पूर्णां समाचरेत् ।।
शिवं मण्डपदेहे तु वस्त्वाधारे मनोन्मनीम् ।
न्यस्त्वा तदद्भिः सम्प्रोक्ष्य गन्धपुष्पादिभिर्यजेत् ।।
नैवेद्यान्तैर्गुरुर्मन्त्री हृदयेन तु मन्त्रतः ।
एवमेव सभादीनां विधेयं प्रोक्षणं बुधाः ।।
एवं यः कुरुते मर्त्यः सोऽनिष्टैर्विप्रयुज्यते ।'
(*पूर्वकामिके* ७०.४२ उ० —५९);
'गोपुरस्थापनं कुर्यात्तदग्रे मण्टपे कृते ।
पूर्वोक्तविधिना युक्तकुण्डे वा स्थण्डिलेऽपि वा ।।
नवकुण्डैकसंख्ये वा पुण्याहप्रोक्षणान्विते ।
स्थण्डिले वेदिकोर्ध्वे च अष्टौ च स्थापयेद्घटान् ।।
मध्यमे च महादिक्षु शान्त्यादींस्तत्र पूजयेत् ।
शतसंख्यैस्तदर्धैर्वा तन्मन्त्रैः समिदादिभिः ।।
पूर्णां दत्त्वेष्टिसन्तुष्टो गुरुः पञ्चघटोदके ।
शान्त्यादीनादितो न्यस्त्वा तन्मनूनभिषेचयेत् ।।
क्रियैषा प्रचुरा कार्या प्रधाना देशिकोत्तमाः ।
अन्यत्राप्यनुकल्पं स्यात्प्रचुरा वा प्रकीर्तिता ।
(*पूर्वकामिके* ७५.९२ —९६);
'प्राकारे जीर्णिते तत्र कुर्यादुद्धारणं क्रमात् ।
एकदेशविहीनश्चेत्पुनःसन्धानमाचरेत् ।।
आसमन्तादद्द्वितीयं चेत्तन्मूलं तत्ततोद्धरेत् ।
आद्येष्टकां ततः क्षिप्त्वा प्राकारं तु समारभेत् ।।
तस्माद्धीनं न कर्तव्यं कर्तव्यमधिकं शुभम् ।
जीर्णिते गोपुरे तत्र प्रासादस्योक्तवत्कुरु ।।
अन्येषां मण्टपादीनां प्रासादस्योक्तवत्कुरु ।'
(*पूर्वकारणे* १३४.५१ —५४);
'तीव्रशक्तिनिपातश्च दृढभक्तिरचञ्चलः ।
तेषां मठं प्रकल्प्याथ वास्तुनाथं प्रपूजयेत् ।।
चतुष्षष्टि पदं कृत्वा पूर्ववद्वास्तुपूजनम् ।
लोकधर्मिणि चाञ्चल्यं मासे च शिवपूजकः ।।
तेषां मठानि कृत्वा तु वास्तुपूजापुरःसरम् ।
एकाशीतिपदं कृत्वा मध्ये वास्तुं प्रपूजयेत् ।।
कुम्भमेकं न्यसेच्चैव ब्राह्मणान्भोजत्ततः ।।
मण्टपं प्रोक्षयेच्चैव पर्यग्निकरणं तथा ।
यद्वा कश्चिद्विशेषोऽस्ति पूजास्थाने त्वलङ्कृते ।।
वास्तुपूजां यजेत्पूर्वं दशकुम्भं न्यसेत्ततः ।
भीमरुद्रं यजेन्मध्ये वर्धनीं वामपार्श्वके ।।
पूर्वाद्यष्टघटे पूज्य लोकपालान्समर्चयेत् ।
कुण्डे वा स्थण्डिले वापि वह्निकार्योक्तमार्गतः ।।
रक्षाबन्धनमेवोक्तं मध्ये ऐशान्यदिक्स्थले ।।
स्तम्भे रक्षां प्रकुर्वीत सुमुहूर्ते सुलग्नके ।।
वेदिकामध्यमे पूज्य स्थिरासनं प्रकल्पयेत् ।
वह्निस्थं तु घटे पूज्य घटमादाय देशिकः ।।
वेदिकामध्यदेशात्तु घटाभिषेचनं यजेत् ।
पूर्वाद्यष्टदिशापार्श्वे इन्द्राद्यष्टघटान्न्यसेत् ।।

तस्य [६७]पूर्वे तथा [६८]भौमे मध्ये वा कुट्टिमे कृते ।
गोमयेनोपलिप्यात्र स्थण्डिले विधिना कृते ॥५९॥
मध्ये [६९]कुम्भं न्यसेत्तत्र [७०]गन्धोदपरिपूरितम् ।
सहिरण्यं सवस्त्रं च [७१]सकूर्चं सापिधानकम् ॥६०॥
पुण्याहं तत्र कुर्वीत कुम्भे ब्रह्माणमर्चयेत् ।
वास्तोष्पतिं ततो [७२]होमं तत्पूर्वे वास्तुसंज्ञितम्[७३] ॥६१॥
कृत्वा पूर्वोक्तविधिना [७४]तत्पूर्वे वाथ चोत्तरे ।
[७५]एकाशीतिपदं कृत्वा पूजयेद्वास्तुदेवताः[७६] ॥६२॥
पूर्ववत्स्थापनं कृत्वा[७७] [७८]ताश्च कुम्भे समर्चयेत् ।
वास्तोष्पतिं [७९]च गन्धाद्यैर्हविरन्तैः क्रमेण वै ॥६३॥
[८०]सर्वातोद्यसमायुक्तमुद्धृत्य कलशं ततः ।
तेनाम्भसा [८१]सकूर्चेन प्रोक्षयेच्च समन्ततः ॥६४॥
[८२]प्रदक्षिणक्रमेणैव पवित्रैर्मन्त्रवित्तमः ।
सर्वात्मना ततश्चापि प्रोक्षयेन्मण्डपादिकम् ॥
ब्राह्मणान्भोजयेदत्र शिवव्रतपरायणान् ॥६५॥

[८३]इत्यजिताख्ये महातन्त्रे [क्रियापादे] संप्रोक्षणविधि-
[श्चतुस्सप्ततितमः] पटलः ।

ब्राह्मणान्भोजयेत्तत्र आचार्यं पूजयेत्ततः ।
एवं कृत्वा विशेषेण शिवसायुज्यमाप्नुयात् ॥
(*उत्तरकारणे* ९८.४७ उ० —५७)
'एकाशीतिपदं वापि चतुष्षष्टिपदं तु वा ।
पूर्वोक्तविधिना चैव वास्तुनाथं प्रपूजयेत् ॥
आत्मतत्त्वमधोभागे ब्रह्माण्डपतिं विन्यसेत् ।
विद्यातत्त्वं न्यसेन्मध्ये बुद्धितत्त्वं पदानुगम् ॥
शिवतत्त्वं न्यसेदूर्ध्वे शुद्धविद्यावसानकम् ।
शिवं साङ्गं यजेच्चैव तत्त्वोपस्थापनं स्पृशेत् ।
प्रोक्षणं जपसान्निध्यं मन्दिरान्स्नापयेत्ततः ।
कम्पेषु पार्थिवं तत्र तृणेषु पावकं यजेत् ॥
पावनीं बन्धने पूज्य दण्डकेषु च वायवम् ।
स्थाणौ स्वाकाशं विन्यस्य शिवं साङ्गं प्रपूजयेत् ॥
पूर्वप्रतिष्ठा या वेश्मजीर्णोद्धारे चतुर्गुणम् ।'
(*उत्तरकारणे* ९८.२८ उ० —३५ पू०)

[६५]इत आरभ्य ६५ श्लोकावधि विद्यमानो भागः 'थ' आर्. इ. ८२५५, टि० १०७६, टि० ११३८ कोशेषु च दृश्यते ।

[६६]सभामठम् —इ
[६७]पूर्वं —ई
[६८]भूमौ —इ; भौमे =दक्षिणे इत्यर्थः ।
[६९]कुम्भे —ई
[७०]गन्धतोयेन पूरितम् —ई
[७१]कूर्चाम्रनालिकेरकम् —ई
[७२]होमे तत्पूर्वे वास्तुसम्मितम् —ई
[७३]वास्तुहोमविषये *अजिते* ८.३५ —४३ श्लोका द्रष्टव्याः ।
[७४]पूर्वे वाथ तथोत्तरे —ई
[७५]एकदशीपदं —इ
[७६]देवताम् —इ; वास्तुपूजाविषये *अजिते* ८.११ —३१ श्लोका द्रष्टव्याः ।
[७७]. . . पूर्ववद्दत्त्वा —इ
[७८]तत्तत्कुम्भे —इ
[७९]तु —इ
[८०]सर्ववाद्यसमा —इ
[८१]तु कुर्चेन —इ
[८२]'ई' मातृकायामिदर्धं न दृश्यते ।
[८३]इत्यजिते मण्टपमठादि संप्रोक्षणविधिपटलः —ई

[पञ्चसप्ततितमः पटलः]

[पिण्डिकास्थापनविधिः[1]]

[पिण्डिकास्थापनफलम्]

पिण्डिकास्थापनं वक्ष्ये भोगमोक्षैकसाधनम् ।

[जीर्णपिण्डिकायाः पुनर्निर्माणप्रकारः[2]]

यत्र या पिण्डिका जीर्णा तत्र तां कारयेत्पुनः ।।१।।
उद्धृत्य [3]तत्तदाकारां पिण्डिकां तां विशेषतः ।
अन्यथापि च [4]कर्तव्या चतुरश्रा तु वर्तुला ।।२।।
[5]चतुरश्रां न कुर्वीत वर्तुलां पूर्ववत्स्थिताम् ।
[6]ऐष्टिकां शिलया कुर्याज्जीर्णामपि च पिण्डिकाम् ।।३।।

[जीर्णपिण्डिकोद्धारः, तत्र शिवयोगिनां भोजनं, लिङ्गाग्रे कुम्भस्थापनं तत्पूजा च]

[7]तदुद्धारे पुरा कृत्वा भोजनं शिवयोगिनाम् ।
लिङ्गाग्रे स्थण्डिलं कृत्वा शालिभिर्विधिना सुधीः ।।४।।

---

[1] अयं पटलः 'इ' मातृकायां परं दृश्यते। एतद्विषये *अंशुमत्काश्यपे* ९६; *अंशुमदागमे* ५६; *अचिन्त्यविश्वसादाख्ये* ७१; *उत्तरकामिके* ३२, ३५; *दीप्ते* ५९; *पूर्वकारणे* १३४; *वीरे* ७०; *सुप्रभेदे* १.५४; *सूक्ष्मे* ६४ पटला द्रष्टव्याः ।

[2] 'पिण्डिकायामुमा देवी लिङ्गे स्याच्च सदाशिवः ।
तयोर्यः क्रियते योगः सा प्रतिष्ठेति गद्यते ।।
योगश्च द्विविधो ज्ञेयस्त्वाद्यः पश्चाद्भवस्त्विति ।
आद्यः प्रागेव कथितो लिङ्गस्थापनकर्मणि ।।
द्वितीयः कथ्यते विप्राः पूर्वं तस्या यदाकृतिः ।
तथैव च पुनः कुर्यादन्यथा दोषकारकम् ।।
मानवे पीठसंकल्पविधानं परिकीर्तितम् ।
चतुरश्रेऽथ वृत्ते वा रूपान्तरयुतेऽपि वा ।।
दैविके चार्षके बाणे लिङ्गे स्वायम्भुवे तथा ।
वृत्तं सर्वत्र कर्तव्यं पूर्वाकृतियुतं तु वा ।।
पूर्वद्रव्येण कर्तव्यमुत्कृष्टेनाथवा नयेत् ।'
(*उत्तरकामिके* ३५.९५—१०० पू०)

'शैलपीठस्य चोद्धारं कृत्वा शैलं तु योजयेत् ।
अलाभे चेष्टकाभिश्च तथा पीठं सुयोजयेत् ।।
पश्चाच्छैलं समायोज्यमाकृतिः पूर्ववद्भवेत् ।
चतुरश्रे तु वृत्तं वा न वृत्ते चतुरश्रकम् ।।'
(*उत्तरकामिके* ३२, ३७ उ० —३९ पू०)

[3] तत्तदाकारं —इ

[4] कर्तव्यं —इ

[5] चतुरश्रं —इ

[6] साष्टकिंशलया —इ

[7] 'विशेषयजनं कृत्वा स्तुत्वा नत्वा मुहुर्मुहुः ।
शिवं विज्ञाप्य लब्धाज्ञः क्रियामेनां समारभेत् ।।
लिङ्गाग्रे स्थण्डिलं कृत्वा शिवकुम्भं च वर्धनीम् ।
मध्यमे स्थापयित्वा तु परितोऽष्टौ घटांश्च तु ।
ससूत्रान्सापिधानांश्च सकूर्चाम्बरपल्लवान् ।
गन्धस्त्रग्दामधूपाद्यैरर्चयेत्तदनन्तरम् ।।
पुण्याहं वाचयित्वा तु सासनं मूर्तिसंयुतम् ।
आवाह्य लिङ्गं लिङ्गस्थं शिवकुम्भगतं न्यसेत् ।।

तत्र पद्मं समालिख्य साष्टपत्रं सकर्णिकम् ।
तन्मध्ये शिवकुम्भं तु सितसूत्रविचित्रितम् ॥५॥
गन्धोदपूरितं हेमपद्मयुक्तं सकूर्चकम् ।
सापिधानं सवस्त्रं च विन्यस्यास्याथ चोत्तरे ॥६॥
शक्तिकुम्भं तथाभूतं विन्यस्यावाहयेत्तदा ।
लिङ्गात्कुम्भे शिवं पीठाच्छक्तिं चैव मनोन्मनीम् ॥७॥
आवाहनादिभिस्तत्र गन्धपुष्पादिभिः क्रमात् ।

[यात्राहोमकरणम्]

संपूज्याथ; तदग्रे तु स्थण्डिले सैकते कृते ॥८॥
[८]यात्राहोमविधानेन कृत्वा होममतन्द्रितः ।

[प्रासादस्येशाने सौम्ये वा स्थण्डिले कुम्भार्चनम्]

प्रासादस्येशदिग्भागे सौम्ये वा [९]स्थण्डिले कृते ॥९॥
संस्थाप्याभ्यर्चयेत्तत्र नैवेद्यान्तं विचक्षणः ॥

[जीर्णपिण्डिकोद्धारः]

'ततो लिङ्गं समभ्यर्च्य चन्दनेन च मालया ॥१०॥
वस्त्रेण वेष्टयित्वाथ तनुत्राणं समुच्चरन् ।
उद्धृत्य [१०]पीठकान्सर्वान्मग्नाम्भसि विनिक्षिपेत् ॥११॥
[११]ऐष्टिका यदि सामेति[१२] पक्वाभिस्तां प्रकल्पयेत् ।
इष्टकाभिः सचूर्णेन लोलितेन [१३]कुशाम्भसा ॥१२॥
तां कृत्वा लक्षणोपेतां पिण्डिकां सुमनोरमाम् ।
निष्पाद्यानन्तरं तस्याः प्रतिष्ठां कारयेत्सुधीः ॥१३॥

पीठाद्देवीं समावाह्य वर्धन्या मध्यमे न्यसेत् ।
विद्येशान्परितो न्यस्त्वा गन्धाद्यैरर्चयेत्तु तान् ॥
नैवेद्यान्तैश्च तत्पूर्वे स्थण्डिले होममाचरेत् ।
सहस्रसंख्यां मूलेन समिदाज्यान्नलाजकैः ॥
तिलेनापि समायुक्तं प्रत्येकं तु शतं तु वा ॥
प्रायश्चित्तमघोरेण शतसंख्येन होमयेत् ॥
अन्यत्र स्थण्डिलं कृत्वा ततः संस्थापयेदमून् ।
नित्यपूजा प्रकर्तव्या लिङ्गे कुम्भे च नित्यशः ॥
टङ्केन हैमजातेन पीठं छित्त्वास्त्रमुच्चरन् ।
अगाधेऽम्भसि निक्षिप्य तदुद्भूतसुधादिकम् ॥
शान्तिहोमः प्रकर्तव्यः प्रत्यहं तु शतं तु वा ।
ततः संस्थापनं कुर्यात्तद्विधानमिहोच्यते ॥'
(*उत्तरकामिके* ३५.१०५ उ० —११५ पू०)

[८]यात्राहोमं —इ
[९]स्थण्डिलं कृतम् —इ
[१०]पीठकान् =पीठावयवान् इत्यर्थः ।
[११]ऐषिकं यदि सोमेति —इ
[१२]अत्र इतिशब्दः चेदित्यर्थे प्रयुक्त इति भाति ।
[१३]कुशाम्भसाम् —इ

[[14]मण्डपकल्पनं, तत्र कुण्डवेदीकल्पनं च]

तदर्थं मण्डपं कुर्याल्लिङ्गाग्रे पार्श्वयोस्तु वा ।
ईशपावकयोर्वापि निर्दिष्टं मुनिहस्तकैः[15] ।।१४।।
श्रेष्ठमध्य[16]कनिष्ठं तु पङ्क्तित्रयसमन्वितम् ।
पङ्क्तिमानसमुत्सेधं मध्ये वेदिकया युतम् ।।१५।।
योन्याकाराणि कुण्डानि तस्य दिक्षु प्रकल्पयेत् ।
चतुरश्राणि कोणेषु प्रधानं वृत्तमेव च ।।१६।।
पञ्चहोमविधाने च कोणकुण्डानि [17]वर्जयेत् ।
[18]प्रधानं शाङ्करे कृत्वा [वृत्तकुण्डं सुलक्षणम् ।।१७।।
मण्डपोत्तरदिग्भागे कल्पयेत्स्नानमण्डपम् ।
स्नानवेदिसमायुक्तं'

[मण्डपालङ्कारस्तत्संस्कारश्च]

[19]'वितानाद्यैस्तु पूर्ववत् ।।१८।।
मण्डपं समलङ्कृत्य गोमयेनोपलिप्य च ।
ब्राह्मणान्भोजयित्वात्र शुद्धिं कृत्वा सुधीस्ततः ।।१९।।
कारयेद्वास्तुहोमं तु देवानभ्यर्च्य पूजयेत् ।

[नूतनशैलपिण्डिकाया मण्डपानयनं,[20] तस्याः शुद्धिश्च]

[21]शैलां कृत्वा विधानेन सर्वलक्षणलक्षिताम् ।।२०।।

---

[14]'हर्म्याग्रे सौम्यदेशेऽग्नौ चैशान्यां यागमण्टपम् ।
प्रागुक्तविधिना मानं मण्टपे परिकीर्तितम् ।।
तन्मध्ये वेदिकां कुर्याल्लिङ्गस्थापनवर्त्मना ।
कुण्डानि परितः कुर्यान्नवपञ्चैकसंख्यया ।।
योन्याकाराणि कुण्डानि त्रिमेखलयुतानि च ।
तत्पूर्वे सौम्यदेशे वा स्नानार्थं यागमण्टपम् ।।
एवं निष्पाद्य सर्वं तु पश्चात्कर्म समारभेत् ।'
(*उत्तरकामिके* ३५.१०२—१०५ पू०)

[15]मण्डपत्रयविस्तारमानप्रतिपादको ग्रन्थोऽत्र लुप्तः ।

[16]कनिष्ठैस्तु—इ

[17]वर्तयेत्—इ

[18]१७ श्लोकस्योत्तरार्धप्रभृति २० श्लोकपूर्वार्धपर्यन्तं दृश्यमानानुपूर्वी अनन्विता विद्यते। अतोऽत्रार्थानुगुण्येनानुपूर्वीमन्यथा परिवर्त्य पाठः साधितः ।

[19]'पश्चान्मण्टपमासाद्य चतुस्तोरणसंयुतम् ।
सवितानध्वजं दर्भमुक्तापुष्पजमालया ।
सर्वत्र ज्वलितं दीपैर्ज्वलद्भिः परिवारितम् ।
सर्वलक्षणसंपन्नं सुविसर्जिततक्षकम् ।
ब्राह्मणान् भोजयित्वा तु गोमयेनोपलेपयेत् ।
पुण्याहं वाचयित्वा तु वास्तुहोमं च कारयेत् ।
द्वाराण्यस्त्रेण संप्रोक्ष्य द्वाराणि द्वारपान्यजेत् ।'
(*उत्तरकामिके* ३५.१२५—१२८ पू०)

[20]प्रविश्य सद्यद्वारेण सौम्यास्योर्ध्वस्थितस्थितिः ।
मन्त्रकायः शिवं चान्तरिष्ट्वा हन्नाभिबिन्दुपु ।।
गृहीतखड्गहस्तः सन्पूजितात्मसमन्वितः ।
कृतपञ्चाङ्गभूषस्तु कुम्भास्त्राशाधिपार्चनः ।।
कृतकुण्डाग्निसंस्कारो जलवासान्महेश्वरीम् ।
आनीय स्नपनाख्योक्तमण्टपे स्नपनं नयेत् ।।

[मण्डपं तु समानीय] ततस्तत्रैव पिण्डिकाम् ।
[22]वेद्यां संस्थाप्य चाद्भिस्तु [23]पञ्चमृत्पञ्चगव्यकैः ।।२१।।
ब्रह्मपञ्चकमुच्चार्य शोधयित्वा समन्ततः ।
[24]पश्चाच्च शक्तिगायत्र्या गन्धोदेनाभिषिच्य च ।।२२।।
वस्त्रेण वेष्टयित्वाथ [25]सुकूर्चेनापि पिण्डिकाम् ।
नवेन परिशुद्धेन [26]वेष्टयेद्वै समन्ततः ।।२३।।

[वेदिकायां शयनकल्पनं, तत्र पिण्डिकाया अधिवासश्च]

[27]स्थण्डिलं वेदिकायां च कृत्वा शय्यां च पूर्ववत् ।
पुण्याहं वाचयित्वाथ संप्रोक्ष्य ब्रह्मपञ्चकैः ।।२४।।
सर्वातोद्यसमायुक्तं गीतनृत्तसमन्वितम् ।
तत्र तां [पिण्डिकां वेद्यां] [28]समानीयाधिवासयेत् ।।२५।।
शयने शक्तिगायत्र्या यथा लिङ्गे तु संस्थिता[29] ।

[वेदिकायां कुम्भाधिवासस्तत्पूजा[30] च]

ततस्तौ स्थापितौ कुम्भौ शिवशक्त्यात्मकौ तदा ।।२६।।

मृत्कषायोदगव्याद्यैः पुष्पपत्रफलोदकैः ।
कुशगन्धजलैः पञ्चामृतैः संस्नापयेच्छिवाम् ।।
आच्छाद्य वस्त्रयुग्मेन गन्धाद्यैरर्चयेत्तु ताम् ।
कृत्वा कौतुकबन्धं तु तन्नाले तद्गलेऽपि वा ।।
शालिभिः स्थण्डिलं कृत्वा वसुद्रोणसमन्वितैः ।
तदर्धैस्तण्डुलैर्युक्तं तदर्धतिललाजकम् ।।
दर्भैः पुष्पैः परिस्तीर्य चर्मजाद्यैरनुक्रमात् ।
ततः शय्यां च सङ्कल्प्य तदलाभेऽम्बरैर्नयेत् ।।
आसनं तत्र सङ्कल्प्य पिण्डिकां विन्यसेद्बुदा ।
आच्छाद्य वस्त्रयुग्मेन'
(*उत्तरकामिके* ३५.१२८ उ० –१३६ पू०)

[21]शैलं कृत्वा –इ

[22]विद्या संस्थाप्य मृद्भिस्तु –इ

[23]पञ्चमृद्विषये *रौरवे* क्रियापादे ४८.२६पू० टिप्पणी द्रष्टव्या ।

[24]शक्तिगायत्र्या पश्चाद् –इ; शक्तिगायत्री='गणाम्बिकायै विद्महे उमाशक्त्यै च धीमहि। तन्नो देवी प्रचोदयात्' *नित्यपूजालक्षणसङ्ग्रहे* पृ० १८८

[25]सकूर्चानपि –इ

[26]वेष्टयेद्वा –इ

[27]स्थण्डिलं वेदिकां चैव –इ

[28]समनी वास वास्थयेत् –इ

[29]यथा लिङ्गे संस्थिता तथा शयनेऽधिवासयेदित्यन्वयः कर्तव्यः

[30]बालस्थानस्य चाग्रे तु यात्राहोमं तु कारयेत् ।
तदग्रे स्थापयेद्विद्वाञ्शिवकुम्भं च वर्धनीम् ।।
ससूत्रं सापिधानं च सवस्त्रं हेमसंयुतम् ।।
नवरत्नं क्षिपेन्मध्ये सर्वद्रव्यसमायुतम् ।
अभितः कलशानष्टौ विद्येश्वरसमन्वितान् ।।
तत्तन्मन्त्रमनुस्मृत्य गन्धपुष्पादिनार्चयेत् ।।
आचार्यश्च शुचिर्भूत्वा शिरसा धारयेद्घटम् ।
नववस्त्रपरीधानः सोष्णीषः सोत्तरीयकः ।।
विमानप्रदक्षिणं कुर्याद्वेदिमध्ये न्यसेत्ततः ।
पूर्वादीशानपर्यन्तं विद्येश्वरांश्च विन्यसेत् ।।
गन्धपुष्पादिना पूज्य पायसान्नं निवेदयेत् ।'
(*वीरे* ७०.४१ उ०–४६)

उद्धृत्य वेदिकामध्ये [31]पिण्डिकायास्तु पूर्वतः ।
विन्यस्य पूर्ववस्त्रं च त्यक्त्वा वस्त्रं पुनस्तयोः ॥२७॥
[32]कूर्चादिकं च विन्यस्य [33]विधिनाभ्यर्च्य देशिकः ।
परितश्च ततोऽष्टौ तु घटान्गन्धोदपूरितान् ॥२८॥
वस्त्रकूर्चादिसंयुक्तान्प्रागादिष्वथ विन्यसेत् ।
पुण्याहं तत्र कुर्वीत शिवशक्त्योरनन्तरम् ॥२९॥
विद्येशान्पूजयेन्मन्त्री गन्धपुष्पादिभिः क्रमात् ।

[होमः][34]

ततो होमं प्रकुर्वीत तद्विधानमथोच्यते ॥३०॥
प्रागादिमूर्तयस्तेषु वामाद्याः परिकीर्तिताः ।
कुण्डेषु [35]तत्प्रधाने तु शक्तिः स्यात्सा मनोन्मनी ॥३१॥
पञ्चहोमे निवृत्त्याद्याश्चतुर्दिक्षु च संस्थिताः ।
तत्र तास्तु समभ्यर्च्य विधिनाधाय पावकम् ॥३२॥
होमयेत्क्रमतो मन्त्री समिदाज्यचरूंस्ततः ।
तिलमाषयवांश्चैव सर्षपांश्च समन्ततः ॥३३॥
[36]शक्त्यङ्गैर्मूलपूर्वैस्तु प्रत्येकं तु [37]शताहुतिम् ।
तदर्धं वा प्रतिद्रव्यं, स्पृशेद्व्याहृतिपूर्वकम् ॥३४॥
पिण्डिकां देशिकः पश्चात्पूर्वादिक्रमयोगतः ।
मूर्तिपैश्च तदा स्पर्शं कारयेत्तैस्तु साधकैः ॥३५॥
[38]सर्वत्राथ [च] मन्त्रेण प्रासादेन [39]शताहुतिम् ।
जुहुयान्मूर्तिपैः सार्धं गुरुस्तत्र समाहितः ॥३६॥
विद्येशानां गणेशानां दिक्पतीनां तथैव च ।
अस्त्राणां च तदीयानां क्रमादेकैकमाहुतिम्[40] ॥३७॥

---

[31]पिण्डिकायां तु—इ
[32]कूर्चवस्त्रं—इ; वस्त्रविन्यासस्य पूर्वमुक्तत्वात् 'कूर्च-वस्त्रम्' इत्यत्र कूर्चादिकमिति शोधितम् ।
[33]विधायाभ्यर्च्य—इ
[34]चन्दनाद्यैः समभ्यर्च्य होमकर्म समारभेत् ।
समिदाज्यान्नलाजैश्च तिलैः सर्षपकैर्यवैः ॥
पलाशोदुम्बराश्वत्थन्यग्रोधाः पूर्वतो दिशि ।
शमीखदिरमायूरश्रीवृक्षा वह्निकोणतः ॥
पलाशस्तु प्रधानं स्यात्पलाशो वाखिलो मतः ।
सहस्रं वा तदर्धं वा शतमष्टाधिकं तु वा ॥
देव्या मूलेन होतव्यं तदङ्गैस्तद्दशांशतः ।
शान्त्यम्भःप्रोक्षणं दर्भस्पर्शनं च समाचरेत् ॥
तत्त्वतत्त्वेश्वराद्यैश्च होमयेत्प्रतिकुण्डकम् ।
प्रायश्चित्तमघोरेण शतोच्चारेण होमयेत् ॥
भूतिदर्भदलै रक्षां कृत्वा तत्त्वबलिं तदा ।
अन्तर्बलिं च क्षेत्रेशबलिं च प्रक्षिपेद्गुरुः ॥
(*उत्तरकामिके* ३५.१४३उ० — १४९पू०)
[35]तत्प्रधानेषु—इ
[36]शक्त्याङ्गैर्मूलपूर्णैस्तु—इ
[37], [39]शतसंख्याका आहुतिः शताहुतिः, ताम् । मध्यम-पदलोपिसमासः
[38]सर्वस्याथ—इ
[40]अत्र 'आहुति' शब्दो वृत्तार्थं पुंसि प्रयुक्त इति भाति ।

प्रधाने देशिको हुत्वा शक्तीनां तदनन्तरम् ।
जुहुयात्सर्वकुण्डेषु प्रत्येकं तु [४१]दशाहुतिम् ।।३८।।
ततः सर्वत्र संपूज्य पावकं परिषिच्य च ।
होमकर्म समाप्यैवं शिवादीनामनन्तरम् ।।३९।।
कुम्भस्थानां हविर्दद्यात्ताम्बूलं च निवेदयेत् ।
[४२]होमकाले चतुर्दिक्षु ऋगाद्यध्ययनं भवेत् ।।४०।।
शाङ्करेऽस्त्रजपं कुर्यात्सर्वविघ्ननिवृत्तये ।
समित्सर्वत्र पालाशी भवेदौदुम्बरी [४३]तु वा ।।४१।।
रात्रिशेषं ततो नीत्वा'

[प्रातः करणीयविधिः, पिण्डिकास्थापनं च]

'प्रभाते मूर्तिपैः सह ।
[४४]कृतनित्यो गुरुः पूजां कृत्वा कुम्भेषु पूर्ववत् ।।४२।।
प्रज्वाल्याग्निं च कुण्डेषु दद्यात्पूर्णाहुतिं स्रुचा ।
शक्तिमूलेन सर्वत्र ततश्चोद्धृत्य पिण्डिकाम् ।।४३।।
वस्त्रकूर्चादिकं त्यक्त्वा हेतिनाभ्युत्थितां ततः ।
प्रदक्षिणमुपावृत्य प्रासादान्तः प्रविश्य च ।।४४।।
शिल्पिना देशिकस्तत्र स्थापयेन्मूलमुच्चरन् ।

[रत्नन्यासः[४५]]

[४६]तद्गर्ते परितो धीमान् रत्नानि विधिवन्न्यसेत् ।।४५।।
शक्रशांकरयोर्मध्ये [४७]माणिक्यं चापि विन्यसेत् ।

---

[४१]दश संख्याका आहुतिः दशाहुतिः ताम् दशाहुतिम् । मध्यमपदलोपिसमासः ।

[४२]'चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं ततः ।
श्रीरुद्रं चैव जप्येत पवमानं जपेत्ततः ।
पुरुषसूक्तं जपित्वा च स्तोत्रेणैव समन्वितम्'
(*वीरे* ७०.५७ उ०, ५८)

[४३]यवा—इ

[४४]'ततः प्रभाते विमले मूर्तिमद्भिर्गुरुः शुचिः ।
कृतनित्यविधानस्तु सामान्यार्घ्यकरो गुरुः ।।
द्वाराणि तत्पतीनिष्ट्वा समुत्थाप्य महेश्वरीम् ।
गन्धैः पुष्पैश्च धूपैश्च दीपैर्नैवेद्यकैस्तदा ।।
ताम्बूलान्तैश्च संपूज्य पिण्डिकां वर्धनीमपि ।
अग्नौ होमैश्च संतर्प्य प्रायश्चित्तं विधाय च ।।
दत्त्वा मूलेन पूर्णां तु सर्वदोषनिकृन्तनीम् ।
सर्वातोद्यसमायुक्तं नृत्तगानसमन्वितम् ।।
धामप्रदक्षिणं नीत्वा गर्भगेहे निवेशयेत् ।
लिङ्गसंस्थापनप्रोक्तविधिना तां निवेशयेत् ।।
पिण्डिकास्थापनं बाणलिङ्गस्य यदि वर्तते ।
तदग्रे मण्डपादौ तु तल्लिङ्गं स्थण्डिले न्यसेत् ।।
नववस्त्रपरिच्छन्नं शुभाशासु शिरो यथा ।
पीठं सुधादिकं त्यक्त्वा तस्मिन्नेव प्रदेशके ।।
पीठं संस्थापयित्वा तु तत्र लिङ्गं निवेशयेत् ।'
(*उत्तरकामिके* ३५. १४९ उ०—१५६)

[४५]'रत्नादिसर्वं पीठस्य गर्ते संस्थाप्य सद्गुरुः ।
सुवर्णं वाथ निक्षिप्य प्राग्वत्सर्वं समाचरेत् ।।'
(*उत्तरकामिके* ३५.१५७)

[४६]तद्भूदे—इ

[४७]मणिक्कं—इ

[अष्टबन्धः][४८]

ततो रन्ध्रेऽष्ट[४९]बन्धं तु [५०]त्रिबन्धं वा परिक्षिपेत् ।।४६।।
तेन कुर्वीत नीरन्ध्रं [५१]विश्लेषं लिङ्गपीठयोः ।

[लिङ्गपीठशुद्धिः[५२]]

ततः स्नात्वा गुरुस्तत्र कृतविद्यातनुः सुधीः ।।४७।।
सोष्णीषः सोत्तरीयश्च धृतपञ्चाङ्गभूषणः ।
अन्तः प्रविश्य पुण्याहं कृत्वा [५३]लिङ्गसमीपतः ।।४८।।

---

[४८] 'अष्टबन्धं त्रिबन्धं वा योजयेत्तदनन्तरम् ।'
(*उत्तरकामिके* ३५.१५८ पू०)
'लिङ्गं पीठं समायोज्य सुस्निग्धं कारयेत्ततः ।
अष्टबन्धं प्रकर्तव्यं लक्षणेन समन्वितम् ॥
लाक्षा चैव मधूच्छिष्टं शर्करा सर्जरं तथा ।
वालुकेनेष्टकाचूर्णसदृशं घनतैलकम् ॥
समं कृत्वा तु विप्रेन्द्र तैलमर्धं विधीयते ।
ताम्रपात्रे विशेषेण पाचयेच्छिल्पिना सह ॥
लिङ्गपीठिकयोर्मध्ये पक्वद्रव्यं विनिक्षिपेत् ।
एवं यः कुरुते मर्त्यः शिवलोके महीयते ॥'
(*वीरे* ७०.३१—३४);
'लाक्षासर्जरपाषाणं माहिषं सीसबन्धनम् ।
त्रिबन्धनमिति ख्यातं सर्वसिद्धिकरं शुभम् ॥ . . .
अपक्वं दैविके प्रोक्त पक्वं चैव तु मानुषे ।
स्वायंभुवे त्रिबन्धं स्यादार्षे च पञ्चबन्धनम् ॥
अष्टबन्धनकर्माणि मानुषे लिङ्गसंज्ञके ।
मनोन्मन्यादिशक्तीनां कारयेदष्टबन्धनम् ॥
सर्वेषां परिवाराणां त्रिबन्धं वाष्टबन्धनम् ।
अर्द्रीकृत्याष्टबन्धं तु बन्धयेल्लिङ्गपीठयोः ॥
कार्पासतूलकं चैव माहिषाज्यं तु शर्करा ।
लाक्षाचूर्णं मधूच्छिष्टं कुन्दुरुष्कस्य चूर्णकम् ॥
काषायचूर्णं गौलं च द्रव्यं स्यादष्टबन्धने ।
एकभागं तु कार्पासं माहिषाज्यं तु तत्समम् ॥
शिलाचूर्णं चतुर्भागं लाक्षा च ह्येकभागकम् ।
भागार्धं तु मधूच्छिष्टं कुन्दुरुष्कं द्विभागकम् ॥
काषायचूर्णमेकार्धमेकार्धं गुलमुच्यते ।
द्रव्याण्यन्यानि सर्वाणि भागार्धार्धमिति स्मृतम् ॥
पाषाणशर्कराचूर्णं मधूच्छिष्टं च गुग्गुलु ।
लाक्षा च शङ्खचूर्णं च पञ्चबन्धनमिष्यते ॥
श्रीप्रदं चाष्टबन्धं स्याद्भुक्तिदं पञ्चबन्धनम् ।
मोक्षदं तु त्रिबन्धं स्याद्बन्धयेल्लिङ्गपीठयोः ॥'
(*पूर्वकारणे* १३६ पृ० ४१९, ४२०);
अष्टबन्धः *अजिते* क्रियापादे १८.२१६—२१९)

[४९] बन्धस्तु—इ

[५०] त्रिबन्धं—'लाक्षागुग्गुलुपाषाणं महिषाज्येन बन्धयेत् ।
त्रिबन्धमिति विज्ञेयं'
(*पूर्वकारणे* १३६. पृ० ६१९, ६२०)

[५१] विशेषं—इ

[५२] 'पुण्याहप्रोक्षणं शान्तिकुम्भतोयाभिषेचनम् ।
प्रागुक्तविधिना कृत्वा' (*उत्तरकामिके* ३५.१५८ उ०, १५९ पू०); लिङ्गपीठशुद्धिः=(*अजिते* क्रियापादे १८.२२०—२२३ पू०)

[५३] लिङ्गं समीपतः—इ

[५४] 'आसनाणुं ततो न्यसेत् ।
पीठे क्रियाख्यां विन्यस्य गुरुः प्रागुक्तवर्त्मना ॥
लिङ्गाग्रनिहितं चापि शिवकुम्भं च वर्धनीम् ।
वाामादिवर्धनीयुक्तां वेदिकान्तरसंस्थिताम् ॥
देवाग्रे स्थापयित्वा तु जीवन्यासेन विन्यसेत् ।
संस्थाप्य वर्धनीं वापि वर्धन्यष्टकसंयुतम् ॥
वेदिकामध्यमे न्यस्त्वा जीवन्यासार्थमारभेत् ।
जीवन्यासं त्रिषु स्थानेष्वथ कार्योऽथवासने ॥
लिङ्गादिस्थापितं कुम्भन्यासकाले विशेषतः ।
स्नपनं कारयेदन्ते पञ्चामृतविधिस्तु वा ॥
केवलेनाम्भसा वाथ गन्धाद्यैः सम्यगर्चयेत् ।

विशोध्य लिङ्गं पीठं च पञ्चमृत्पञ्चगव्यकैः ।
अभिषिच्य च मन्त्रैस्तु ब्रह्मभिः पञ्चभिः क्रमात् ।।४९।।

[कुम्भाभिषेकः[५४]]

गन्धतोयेन पश्चात्तु; [५५]कुम्भांस्तानाधिवासितान् ।
उद्धृत्य वाहयित्वांसे कृत्वा धाम्नि प्रदक्षिणम् ।।५०।।
अन्तः प्रविश्य देवाग्रे कल्पिते स्थण्डिले ततः ।
शिवादीन्पूर्ववत्स्थाप्य घटांस्तत्रोपविश्य च ।।५१।।
उदङ्मुखो गुरुः कुर्यात्तत्तन्मन्त्रात्मिकां निजाम् ।
[५६]ततोऽर्घ्यगन्धपुष्पाद्यैः पूजयेत्पूर्ववद्गुरुः ।।५२।।
शिवलिङ्गे शिवं देवं मूलमन्त्रमनुस्मरन् ।
[५७]कुम्भात्कूर्चं समायोज्य[५८] लिङ्गं तेनाभिषेचयेत् ।।५३।।
सर्वात्महृदयेनाथ शक्ति[५९]कुम्भान्मनोन्मनीम् ।
तथा पीठे समावेश्य शक्तिगायत्रिमुच्चरन् ।।५४।।
तेनाभिषेचयेत्पीठं ततश्चाष्टौ घटानपि ।
विद्येश्वरात्मकं मन्त्रं[६०] यथास्थानं तु विन्यसेत् ।।५५।।
तैश्चाभिषिच्य देवेशं [६१]साङ्गमूलेन पूजयेत् ।
पिण्डिकायां ततश्चापि तस्या मूलं तु विन्यसेत् ।।५६।।
षडङ्गानि हृदादीनि पूर्वादिक्रमतो न्यसेत् ।
नेत्रमीशानदेशे स्यादस्त्रमाग्नेयगोचरे ।।५७।।
ततो गन्धोदकेनैव लिङ्गं पीठं च मन्त्रवित् ।
आभिषिच्य [६२]पवित्रैस्तु ततः संवत्सरात्मना ।।५८।।
चन्दनेन ततो लिङ्गं पीठं चाभ्यर्च्य, पूजयेत् ।
मालाभरणवस्त्राद्यैर्देशिकं[६३] च यथाक्रमम् ।।५९।।

यावच्चन्द्रश्च सूर्यश्चेद्यावत्तिष्ठति मेदिनी ।।
तावदत्र त्वया देवि सांनिध्यं कुरु सर्वदा ।
लिङ्गसंस्थापनप्रोक्तदक्षिणार्धं च दापयेत् ।।
चतुर्दिनं त्रयं वापि द्वयमेकं च नित्यशः ।
विशेषपूजा कर्तव्या होमेन च समन्विता ।।
पूर्वोक्तैरणुभिः शाक्तैः पायसैर्होममाचरेत् ।
चतुर्थे प्रथमे वाथ चण्डकल्पो विधीयताम् ।।
बाणादौ स च नेष्टः स्यादथवा परिभाव्यताम् ।
पीठसंस्थापनस्यापि फलं लिङ्गप्रतिष्ठया ।।
समानं कथितं यस्मात्प्रतिष्ठैकोभयत्र च ।
(*उत्तरकामिके* ३५.१५९ पू० १६९ पू०)

[५५]कुम्भस्थानधि —इ

[५६]ततोऽर्घ्यं —इ

[५७]कुम्भान्कूर्चान् —इ

[५८]अत्र लिङ्गे इति शेषः ।

[५९]कुम्भं —इ

[६०]अत्र अनुस्मरन् इति शेषः ।

[६१]साङ्गं मूलेन —इ

[६२]पवित्राणि =पञ्चब्रह्ममन्त्राः
''ब्रह्मणां तावत् पवित्रत्वकथनं प्रायश्चित्तादौ विनियोग प्रदर्शनार्थम् । यदुक्तं श्रीमत्पौष्करे —
सर्वेषामेव पापानां संकरे समुपस्थिते ।
पवित्राणि जपेत्पञ्च एकं वा बहुरूपिणम् ।।''
(*सार्धत्रिशतिकालोत्तरवृत्तौ* पृ० ५९)

[६३]देशिकश्च —इ

प्रभूतं च हविर्दद्यात्ताम्बूलं च प्रदापयेत् ।

[पिण्डिकास्थापनफलम्]

एवं यः कारयेन्मर्त्यः पिण्डिकास्थापनं परम् ।।
इह लोके सुखं प्राप्य स याति परमां गतिम् ।।६०।।

इत्यजिताख्ये महामन्त्रे [क्रियापादे] पिण्डिकास्थापनविधिः
[पञ्चसप्ततितमः] पटलः ।

[षट्सप्ततितमः पटलः[1]]

[प्रायश्चित्तविधिः]

उत्सवादिषु यागेषु प्रायश्चितं वदामि ते ।

[प्रायश्चित्तशब्दार्थः[2]]

प्रमादः प्राय इत्युक्तः कृत्यकर्मसु मन्त्रतः ।।१।।
क्रियया द्रव्यतो वापि कृतस्तस्य प्रतिक्रिया[3] ।
चित्तमित्युच्यते तस्मात्प्रायश्चित्तमिति स्मृतम् ।।२।।

[मन्त्रप्रमादविषये]

मन्त्राणां तु प्रमादः स्यादपशब्दोऽन्यथेरणम् ।
[4]स्वरहानिश्च [वर्णानां] [5]वृद्धिर्ह्रासश्च[6] [दूषि]तान् ।।३।।

---

[1]अयं पटलः 'इ' मातृकायां परं दृश्यते। एतद्विषये *अंशुमदागमे* ३७; *अचिन्त्यविश्वसादाख्ये* ८१; *उत्तरकामिके* ३०; *पूर्वकारणे* १४४; *कालोत्तरे* ३८; *मकुटे* ६; *वीरे* ५२; *संतानसंहितायां* ५६; *सहस्रे* ७; *सुप्रभेदे* १.५५; *सूक्ष्मे* ६३ पटला द्रष्टव्याः ।

[2]'प्रायश्चित्तविधिं वक्ष्ये श्रूयतां द्विजसत्तमाः ।
विधिर्निषेध इत्येवं चोदना स्याद्द्विधा मता ।।
अनुष्ठितायां तस्यां स्याद्यथावद्धर्मसंग्रहः ।
वैपरीत्ये त्वधर्मः स्यात्तेन पापं महद्भवेत् ।।
तेनाधो गमने प्राप्ते कर्तुरूर्ध्वं परं पदम् ।
यत्कर्म नयतीत्युक्तं प्रायश्चित्तमिहागमे ।।
प्रकृष्टायाः समानत्वाद्दोषः प्रायः प्रकीर्तितः ।
चिदात्मा कथितः शास्त्रे तरणं तु तकारतः ।।
सदोषस्यात्मनो यस्मात्तरणं पततो ह्यधः ।
तस्मात्प्रकीर्तितं विप्राः प्रायश्चित्तं शिवाश्रिताः ।।
विधिर्निषेधो वा नास्ति यस्मिन्कर्मण्यनुष्ठिते ।
तस्मिन्पुण्यं च पापं वा नेति शास्त्रार्थनिश्चयः ।।
(*उत्तरकामिके* ३०.१—६)
प्रायश्चित्तविधिं वक्ष्ये सर्वदोषनिकृन्तनम् ।
प्रायो विलय इत्युक्तश्चित्तं राहित्यकृत्ततः ।।
लयराहित्यहेतुत्वात्प्रायश्चित्तमिति स्मृतम् ।
सर्वेषामेव कार्याणां क्रियावैकल्यसंभवे ।।
प्रायश्चित्तं पुरा कुर्यादात्मनः शुद्धिहेतवे ।
अन्यथा पतनं तस्य सर्वशास्त्रेषु निश्चितम् ।
(*पूर्वकारणे* १४४.१—३)
'प्रायो विनाश इत्युक्तश्चित्तं संधानमुच्यते ।
विनाशस्य तु संधानं प्रायश्चित्तमिति स्मृतम् ।।'
(*अंशुमति* ३७.१ उ०, २ पू०)

[3]'शान्तिश्च शान्तिहोमश्च दिशाख्या संहिताहुतिः ।
मूर्तिहोमो घृतक्षौद्रक्षीरस्नानाद्यनेकधा ।।
नवकादिसहस्रान्तकलशस्नपनैर्युतम् ।
एकाहाद्युत्सवः शीतकुम्भो वैशेषिकार्चनम् ।।
एवमादिसमुद्दिष्टं प्रायश्चित्तं सनातनम् ।'
(*उत्तरकामिके* ३०.१३उ०—१५)

[4]'अन्यूनाधिकवर्णं तु सर्वान् मन्त्रान् समुच्चरेत् ।
ऊनवर्णेन मृत्युः स्यादधिके शोकसंभवः ।।
स्वरहीने विपत्तिः स्यात्तस्मान्मन्त्रं सुशोधयेत् ।
(*रौरवे* क्रियापादे १०.११, १२ पू०)
मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः-स्वरतोऽपराधात् ।।
(*यास्कनिरुक्ते*)

[5]वार्द्धान्तेष्वसूया . . . तान् ।—इ

[6]अत्र 'एतैः' इति पदमध्याहत्य व्याख्येयम् ।

मन्त्रांस्तान्सम्यगुच्चार्य कर्म कृत्वा यथा पुनः ।
सर्वात्मानं शतं तत्र जपेद्दोषनिवृत्तये ।।४।।

[क्रियाप्रमादविषये]

व्यत्यासश्च विनाशश्च पौनःपुन्यं च कर्मसु ।
प्रमादास्तेषु जातेषु यथावत्क्रमतः[७] पुनः ।।५।।
कृत्वा तद्दोषशान्त्यर्थं [८]पिङ्गलाख्यं शतं जपेत् ।
बुद्धिपूर्वप्रमादश्चेदनयोर्मन्त्रकर्मणोः[९] ।।६।।
[१०]द्विगुणस्तु प्रयोक्तव्यो मन्त्रयोरनयोर्जपः[११] ।

[द्रव्यप्रमादविषये]

द्रव्याणां तु प्रमादो यः स इदानीं निगद्यते ।।७।।

[अङ्कुरार्पणे[१२]]

पालिकाघटिकादीनां सोमकुम्भव्यये तथा ।
अङ्कुरस्य विधौ दृष्ट्वा [१३]पतनं भेदनादिकम् ।।८।।
[१४]केवले पतने जाते [१५]स्थाप्य तं तु यथा पुरा ।
धेनुमुद्रां तु संयोज्य प्रणवं समुदाहरन् ।।९।।
संपूज्य गन्धपुष्पाद्यैर्बहुरूपं[१६] शतं जपेत् ।
[१७]भेदे जाते तथा [१८]त्यक्त्वा स्थाप्य [तं] पूर्ववत्सुधीः ।।१०।।
संपूज्य च समाप्यैतच्छान्तिहोमं[१९] च कारयेत् ।
अङ्कुराणां विनाशेऽपि शान्तिहोमं च कारयेत् ।।११।।

---

[७]कर्मतः —इ

[८]पिङ्गलमन्त्रः =ओं पिङ्गलादेव्यै नमः

[९]मन्त्रकर्मणे —इ

[१०]निर्गुणं तु —इ

[११]जपम् —इ

[१२]'अङ्कुरार्पणहीने च पालिकादिविहीनके ।
सर्वैर्वा लक्षणैर्युक्ते सस्यनाशो न संशयः ।।
शान्तिहोमं ततः कृत्वा पुण्याहं वाचयेत्ततः ।
अङ्कुरार्पणकं कुर्याल्लक्षणैः पालिकादिभिः ।।'
(*पूर्वकारणे* १४४-५१ उ० —५३ पू०);
'अङ्कुरार्पणहीने च पालिकाभिर्विवर्जिते ।
महाव्याधिसमुत्पत्तिः सस्यनाशो न संशयः ।।
सहस्रं मूलमन्त्रं तु हुत्वा भक्तांस्तु पूजयेत् ।
ततोऽङ्कुरार्पणं कुर्यात्पालिकासु सलक्षणम् ।।'
(*मकुटे* ६.३५, ३६)

[१३]पातनं —इ

[१४]केवलं —इ

[१५]जाप्यं —इ

[१६]बहुरूपशतं —इ

[१७]भेदजाते —इ

[१८]अत्र 'भिन्नं तं' इत्यध्याहृत्य व्याख्येयम् ।

[१९]शान्तिहोमविषये *रौरवे* ४४.३८ उ० —४० श्लोकास्तथा ५३.२४ —३० श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

उक्तकाले[20]ऽङ्कुरश्चैव [21]यत्र वा न हि कल्पितः ।
साङ्कुरं तत्तु तत्रैव कृत्वाघोरं [22]शतं जपेत् ।।१२।।
सद्योऽङ्कुराय [23]चोक्ते स्यात्सद्यः [24]कृता तु मञ्जरी ।
[25]सितवर्णा सुसंश्लिष्टा विन्यस्ता पालिकादिषु ।।१३।।

[वृषयागविषये[26]]

[27]वृषयागे घटादीनां पतने भेदनेऽपि च ।
[28]जपयागौ प्रयोक्तव्यौ यथापूर्वं विचक्षणैः ।।१४।।
देवाग्रे [29]स वृषं तत्र भेदे जातेऽर्चयेत्सुधीः ।
विशेषाद्गन्धपुष्पाद्यैर्मुद्गान्नं च निवेदयेत् ।।१५।।

[ध्वजादीनां पतने[30]]

ध्वजोत्सवे तु संप्राप्ते ध्वजादीनां निपातने ।
आरब्धकर्मनिर्वृत्तौ प्रविश्य भवनं ततः ।।१६।।

---

[20] अङ्कुराश्चैव —इ
[21] यत्रवान् घृतकल्पितः —इ
[22] कृतं —इ
[23] चोक्तस्यात् —इ
[24] कृत्वा —इ
[25] 'सितानि कोमलानीह कीर्तितानि शुभानि वै ।
असितानि च कुब्जानि तथा तिर्यग्गतानि च ।।
तद्दोषशमनार्थं तु शतं हुत्वा शिवं स्मरेत् ।'
(*सुप्रभेदे* १.३५.३०, ३१ पू०)
[26] 'वृषाधिवासने हीने ध्वजे वारोपिते सति ।
गावो नश्यन्त्यतः कुर्याच्छान्तिहोमं तदुक्तवत् ।।
वृषयागं नयेत्तत्र ध्वजदण्डस्य मूलतः ।
किं तूर्ध्वस्थध्वजे मन्त्रन्यासाद्यं मनसाचरेत् ।।'
(*उत्तरकामिके* ३०.७२६ उ० —७२८ पू०)
'वृषयागविहीने तु गावो नश्यन्त्यसंशयः ।
वृषभस्नपनं कृत्वा गन्धपुष्पादिभिर्यजेत् ।।
निवेदयेत्तु मुद्गान्नं शान्तिहोमं तु कारयेत् ।
वृषयागं ततः कुर्यात् प्रागुक्तविधिना सह ।।'
(*पूर्वकारणे* १४४.२२ उ० —२४ पू०)
'वृषयागविहीने तु गावो नश्यन्त्यसंशयः ।
वृषभस्नपनं कृत्वा गन्धपुष्पेण योजयेत् ।।
निवेदयेत्तु मुद्गान्नं शान्तिहोमं तु कारयेत् ।।'
(*मकुटे* ६.३६ उ० , ३७)
[27] वृषयोगे —इ
[28] जपयोगे —इ
[29] संवृषं —इ
[30] 'पताका पतिता भूमौ यदि राष्ट्रस्य दुःस्थितिः ।
शान्तिहोमं तदा कृत्वा विधिनारोपयेद्ध्वजम् ।।
ध्वजे भेदादिसंयुक्ते शान्तिकर्म तदाचरेत् ।
पताकां रोपयेदन्यां सप्ताहाभ्यन्तरे द्विजाः ।।
पूर्वं पूर्वं प्रशस्तं स्यादल्पहानिर्यदि द्विजाः ।
मूर्तिहोमं तदा कुर्याच्छान्तिहोममथापि वा ।।'
(*उत्तरकामिके* ३०.७३८ उ०—७४१ पू०);
'ध्वजारोहणहीने तु ध्वजलक्षणहीनके ।
राजा दुर्जयमाप्नोति राष्ट्रक्षोभो भविष्यति ।।
शान्तिहोमं ततः कृत्वा तद्दोषस्यापनुत्तये ।
ध्वजं सलक्षणं कृत्वा विधिनारोपयेत्ततः ।।'
(*पूर्वकारणे* १४४.२४ उ० —२६ पू०);
'ध्वजारोहणहीने तु राजा दुर्जयमाप्नुयात् ।
शान्तिहोमं ततः कुर्याद्विधिनारोपयेत्ततः ।।'
(*मकुटे* ६.३८);
'ध्वजे वा पतिते भिन्ने छिन्ने नष्टेऽथवा पुनः ।

अक्षतं चेत्तथा बेरं जपेदष्टोत्तरं शतम् ।
छेदनादन्यमापाद्य कृत्वा सद्योऽधिवासनम् ।।१७।।
आरोपयेत्ततो धाम्नि प्रदक्षिणं [समाचरेत्] ।
शान्तिहोमं वृषाग्रे तु कृत्वा कर्म समापयेत् ।।१८।।

[उत्सवे प्रतिमादिपतने[31]]

तत्र च प्रतिमादीनां पतने भेदवर्जिते ।
स्नपनं विधिवत्कृत्वा तस्याग्रे होममाचरेत् ।।१९।।
वैकल्ये सति तस्याशु कृत्वा संधानमुत्तमम् ।
विधिना स्थापयेद्धीमाञ्जीर्णोद्धारोदितेन तु ।।२०।।

[ध्वजदण्डयोर्निपाते भेदादौ[32]]

ध्वजारोहणकाले तु निपाते ध्वजदण्डयोः ।
अक्षतं चेत्पुनर्दण्डं स्थापयित्वा तमेव तु ।।२१।।

स्नपनं तत्र कुर्वीत चण्डयागं तु कारयेत् ।।
मूर्तिहोमं तु कर्तव्यं ध्वजमुत्थापयेत्क्रमात्' ।
(*वीरे* ५२.५८.५९पू०);
'ध्वजे वा पतिते चैव भिन्ने नष्टेऽथवा पुनः ।'
चण्डयागं क्रमात्कृत्वा ध्वजं चैवावरोहयेत् ।।
पूर्ववद्ध्वजमारोप्य लक्षणेन समन्वितम् ।
(*संतानसंहितायाम्* ५६.६५, ६६)
[31]'यानकालेऽन्यकाले वा बेरादौ पतिते सति ।
राजा मरणमाप्नोति सद्यः कुर्यात्प्रतिक्रियाम् ।।
अव्यङ्गे पतिते बेरे पतिते वा करादधः ।
द्विकरात्त्रिकराद्वापि तदूर्ध्वं च क्रमान्नयेत् ।।
संहिताशान्तिहोमौ च शान्तिं मूर्तिं दिशाहुतिम् ।
स्नपनं च जपेद्घोरमन्त्रेण शतसहस्रकम् ।।
नैवेद्यमपि सामान्यमुत्सवं शेषमाचरेत् ।
अङ्गहीनेऽनुकर्मोक्त्या सन्धानाद्यं च निष्कृतिम् ।।
अधिवासादिकं कर्म सद्य एव समाचरेत् ।
मासर्क्षतिथिवारादिप्रेक्षां हित्वैव देशिकः ।
पुनश्च कौतुकं बद्ध्वा उत्सवाद्यं प्रकल्पयेत् ।।
उत्तमाङ्गादिहीने वानुकर्मोक्त्या समाचरेत् ।
तत्राप्यनेन बेरेण सन्धानार्थं हि चोत्सवम् ।।
कारयेद्देशिको धीमान्प्रत्यहं शान्तिहोमयुक् ।
धामान्तरगतेनाथ कर्तव्यो वा द्विजोत्तमाः ।
गर्भद्वारादिमानेष्टमानयुक्तेन नान्यथा ।
ततो बेरं समापाद्यानुकर्मोक्त्या तदेव हि ।।
प्रतिष्ठां च विधायान्ते चाङ्कुरार्पणपूर्वकम् ।
उत्सवं कारयेद्देवे नवाहाद्युत्सवेषु च ।।'
(*उत्तरकामिके* ३०.८१२—८२१);
'प्रतिमायानकाले तु पतिते वाङ्गहीनके ।
वास्तुराज्याधिदेवानां नाशनं सम्भवेत्क्षणात् ।।
स्नपनं तत्र कुर्वीत पुण्याहं वाचयेत्ततः ।
शान्तिहोमं ततः कृत्वा पुनः संयानमाचरेत् ।।
शिरो बाहू च पादौ च भिन्नानि यदि तन्न्यसेत् ।
नखानामङ्गुलीनां च भूषणानां च भेदतः ।।
पद्मबन्धविभेदे च जटाभङ्गे महेश्वर ।
पुनः सन्धानकं कृत्वा तत्र संप्रोक्षणं कुरु ।।'
(*मकुटे* ६.६५ उ०—६९ पू०)
[32]'रज्जुच्छेदे च्युते चैव पटादिपतनेऽपि च ।
धामश्रीस्त्वन्यथा चैव तद्ग्रामे रोगसम्भवः ।।
तद्दोषशमनार्थाय नवकं शान्तिहोमकम् ।
बहुरूपशतं जप्त्वा लिङ्गे चैवाभिषेचनम् ।।
तत्पटं सङ्गृहीत्वा तु वृषमावाहयेत्ततः ।
कुम्भाद्बीजं समादाय शृङ्गमध्ये तु योजयेत् ।।

ध्वजं चापि तथाभूतं सर्वात्मजपपूर्वकम् ।
आरोपणे तयोर्जृम्भे छेदे वा समुपस्थिते ।।२२।।
दण्डमन्यं समापाद्य कृत्वा तं चापि पूर्ववत् ।
[33]ध्वजस्याप्यधिवासादि कृत्वा धाम्नि प्रदक्षिणम् ।।२३।।
आरोपयित्वा [34]तत्राह्नि रात्रौ वापि विधानवित् ।
शान्तिहोमसमायुक्तं वृषं देवं च पूजयेत् ।।२४।।
रज्जुयन्त्रादिभेदेन ध्वजस्य पतने सति ।
विधिवत्पीठ[35]मत्राशु कृत्वा पुण्याहपूर्वकम् ।।२५।।
तदग्रे शान्तिहोमं तु चण्डपूजासमन्वितम् ।
कुर्याद्द्वारादिभिस्तस्मिन्ध्वजेऽ[36]प्येवं हते सति ।।२६।।
ध्वजमन्यं समापाद्य कृत्वा सद्योधिवासनम् ।
धाम्नि प्रदक्षिणं चापि सर्वात्मजपपूर्वकम् ।।२७।।
ध्वजमारोपयित्वाशु तद्दिने वा द्वितीयके ।
देवस्य स्नपनं कार्यं शान्तिहोमसमन्वितम् ।।२८।।

आरोपयेत्पटं शीघ्रं तन्मूले वाभिषेचयेत् ।
पटारोहणकाले तु वलयस्यापि छेदने ।।
तद्ग्रामवासिनां चैव महामारी प्रवर्तते ।
तद्दोषशमनार्थाय नवकं शान्तिहोमकम् ।।
पटमध्ये तदूर्ध्वे तु छेदने पतनेऽपि च ।।
तद्राष्ट्रनाशनं चैव महामारी प्रवर्तते ।
तद्दोषशमनार्थाय स्नपनं पञ्चविंशतिः ।।
तच्छक्तिं योजयेद्धीमांस्तत्पटं त्याज्यमेव तु ।
नवमन्यं परिग्राह्य पूर्ववत्कल्पयेद्बुधः ।।
अधोभागे पटे चैव यदि दोषस्तु सम्भवेत् ।
गोनाशो सस्यनाशश्च नवकं शान्तिहोमकम् ।।'
(*अंशुमति* ३७.३६१ उ०—३६९);
'दण्डोपदण्डस्कन्धादेर्भेदभङ्गादिसम्भवे ।
शान्तिहोमं तदा कुर्याद्भग्ने शान्तिकरं नयेत् ।।
ध्वजो लक्षणहीनश्चेद्राष्ट्रस्यास्य भयङ्करः ।
सलक्षणं ध्वजं चान्यं रोहणार्थं समाहरेत् ।।
शान्तिकर्म नयेद्धीमाँल्लक्षणध्वजरोहणे ।।'
'रज्जुच्छेदेऽरिभिर्बाधा शान्तिहोमं समाचरेत् ।'
(*उत्तरकामिके* ३०.७३३ उ०—७३५, ७३७ उ०);
'ध्वजदण्डादिके हीने ध्वजवेदिविहीनके ।
परचक्राद्भयं भूमौ शिल्पिनं हन्ति देशिकम् ।।
पुनः सलक्षणं दण्डं स्थाप्य शान्तिद्वयं जपेत् ।
सर्वलक्षणसंयुक्तां वेदिं सङ्कल्प्य पूजयेत् ।।
ध्वजदण्डे तु विच्छिन्ने परनृपाद्भयं भवेत् ।
शान्तिहोमं ततः कृत्वा पुनः सन्धानमाचरेत् ।।
रज्जुच्छेदे ध्वजे छिन्ने नष्टे च पतिते तथा ।
ध्वजयष्टिविहीने च ध्वजवेत्रविहीनके ।।
प्रवर्तते महामारी पुण्याहं वाचयेत्ततः ।
शान्तिहोमं ततः कृत्वा पुनः सन्धानमाचरेत् ।।'
(*पूर्वकारणे* १४४.२६ उ०—३१ पू०);
'रज्जुहीने ध्वजच्छिन्ने नष्टे च पतितेऽथवा ।
ध्वजयष्टिविहीने तु राजपत्न्योश्च नाशनम् ।।
पूर्ववत्कल्पयेच्चैव पुण्याहं तत्र वाचयेत् ।
शान्तिहोमं ततः कृत्वा भक्तानां चैव पूजनम् ।।'
(*मकुटे* ६.४०, ४१);
'उत्सवे तु विशेषेण प्रायश्चित्तविधिं शृणु ।
ध्वजस्य ध्वजदण्डस्य घण्टायास्तु विशेषतः ।।
छिन्ने भिन्ने च पतिते चोरग्रस्तादिसम्भवे ।
कृत्वा तत्पूर्ववत्सर्वं पुनरुत्थापनं कुरु ।।
हृदयेन शतं हुत्वा स्नापयेत्पञ्चगव्यकैः ।।'
(*सुप्रभेदे* १.५५.१८ उ०—२०)

[33] ध्वजस्योप्यादि—इ
[34] तत्राग्नि—इ
[35] मात्रांशु—इ
[36] प्येव हृदे सति—इ

ध्वजस्यारोपितस्यापि भेदादौ समुपस्थिते ।
[विधिवत्] कल्पयेद्धीमान्समुत्सृज्य ध्वजं तथा ।।२९।।

[भेरीताडनकाले शूलास्त्रपतने[37]]

भेर्यास्ताडनकाले तु शूलास्त्रपतनं यदि[38] ।
बहुरूपजपं कृत्वा शूलं विधिवदर्चयेत् ।।३०।।
शेषकर्मसमाप्तौ तु शान्तिहोमसमन्वितम् ।
शूलस्य स्नपनं कुर्यात्पतनेऽथ च [39]भङ्गके ।।३१।।
तदा तत्रैव विन्यस्य स्थण्डिलं स्थलिकोपरि ।
[ग्रन्थपातः]

[अष्टबन्धनहीने[40]]

[41]अष्टबन्धनहीने च पार्थिवं जलवर्जितम्[42] ।।३२।।
ततोऽष्टबन्धनं कुर्यात्सुदृढं कारयेद्बुधः ।

---

[37]'शूलास्त्रे पतिते राज्ञो भयं भवति तत्र च ।
धामादौ वा दिशाहोमं नयेदस्त्रार्चनान्वितम् ।
छेदभेदादिके जाते त्वावाह्यैवानुकर्मवत् ।।
उत्सवं पूर्ववत्कुर्यादन्येनास्त्रेण वा द्विजाः ।
समाप्योत्सवकार्यं तु तत्संध्यायानुकर्मवत् ।।
संप्रोक्षणं ततः कुर्यादस्त्रराजप्रतिष्ठया ।।'
(*उत्तरकामिके* ३०.८०९–८११);
'शूलास्त्रे पतिते चैव भिन्ने नष्टे तथैव च ।
तद्ग्रामस्य च राष्ट्रस्य शत्रुभिर्भयमादिशेत् ।।
पतितेऽभिषेचनं कुर्याच्छान्तिहोमं तु कारयेत् ।
अस्त्रमन्त्रेण मतिमाञ्जुहुयाच्छतसंख्यया ।।
शेषस्थाने बलिं दद्यात्प्रविशेद्यागमण्डपम् ।
शूलस्य दण्डे विच्छिन्ने वर्जयेत्तमयत्नतः ।।
अस्त्रमन्यं प्रतिग्राह्य यागशेषं समाचरेन्न् ।
शूलास्त्रं तु पुनः कृत्वा स्थापयेद्विधिपूर्वकम् ।।
अन्याङ्गानां विहीने च पुनः संधानमाचरेत् ।
तदस्त्राब्जं तु लोहेन पूर्ववत्कारयेत्सुधीः ।।
प्रतिष्ठा तु प्रकर्तव्या जलाधिवासनं विना ।'
(*पूर्वकारणे* १४४.६७–७२ पू०)
'शूलास्त्रं पतितं चापि आयुधं चाष्टमङ्गलम् ।
शूलस्य स्नपनं तत्र अन्येषां च शताहुतिः ।।'
(*सुप्रभेदे क्रियापादे* ५५.२३)
'प्रमादात्पतितेऽप्यस्त्रे शान्तिहोमं समाचरेत् ।
स्नपनं तत्र कुर्वीत पूर्वोक्तविधिना सह ।।'
(*संतानसंहितायाम्* ५६.६३ उ०, ६४ पू०)

[38]अत्र भवेदिति शेषः

[39]भङ्गभाक्–इ

[40]'अष्टबन्धविहीने तु अनावृष्टिर्न संशयः ।
पूर्ववद्बन्धनं कुर्यान्मूलमन्त्रं शतं जपेत् ।।'
(*अचिन्त्यविश्वसादाख्ये* ८१.४८ उ०, ४९ पू०)
'अष्टबन्धे तु विश्लिष्टे राष्ट्रे शैथिल्यमादिशेत् ।
अष्टबन्धं त्रिबन्धं वा कृत्वान्ते स्नपनं नयेत् ।।
पुरातनं परित्यज्य शस्त्रेणास्त्रं समुच्चरन् ।
अघोरेण शतं होमं समिदाज्यतिलौदनैः ।।
(*उत्तरकामिके* ३०.३५९ उ०–३६१ पू०)

[41]३२ पू०–३९ श्लोकाः सकलागमप्रायश्चित्ते (टि० १६०) २३१ पृष्ठे '*अजिते*' इति निर्दिश्योद्धृतश्लोकाननुसृत्य सङ्घटिताः ।

[42]अत्र भवेदिति शेषः ।

[पक्वाष्टबन्धनम्[43]]

लाक्षा सर्जरसः सिक्थं कुरुविन्दश्च गुग्गुलुः ।।३३।।
[44]गैरिकं गुलतैलं च[45] अष्टबन्धः स उच्यते[46] ।
ताम्रपात्रे तु निक्षिप्य[46] [47]पाकश्चिक्कणवद्भवेत् ।।३४।।
[48]पक्वाष्टबन्धनं ह्येवम्'

[अपक्वाष्टबन्धनम्]

'अपक्वं चाधुनोच्यते ।
त्रिफलं शङ्खचूर्णं च गुलं च कदलीफलम् ।।३५।।
दधि घृतं दुग्ध[49]सिक्थं पेषयेदष्टबन्धनम् ।
[50]शर्करां कुन्दुरुष्कं च माहिषं नवनीतकम् ।।३६।।
उलूखले तु संस्थाप्य मुसलेनैव मर्दयेत् ।
चिक्कणस्य तु [51]भागेन संबन्धं सुदृढं कुरु ।।३७।।
शर्करासंज्ञचूर्णं च माहिषं नवनीतकम् ।
शङ्खचूर्णं ततो [52]गृह्य [53]द्विगुणां सिकतां तथा ।।३८।।
गुलेन पेषयेत्तत्र [54]रन्ध्रे तु स्थापयेत्स्थले[55] ।

---

[43]प्रमादाद्बन्धहीने तु राजा राष्ट्रं विनश्यति ।
लाक्षाशर्करसंयुक्तं कुरुविन्दं च गुग्गुलुम् ।।
गैरिकं गुलतैलं च कदलीफलसंयुतम् ।
अष्टबन्धनमेवं तु सर्वेषां बन्धयेत्क्रमात् ।।
लाक्षाशर्करपाषाणं मधूच्छिष्टं तु गुग्गुलुम् ।
शङ्खचूर्णसमायुक्तं बन्धयेत्पञ्चबन्धनम् ।।
लाक्षास्फटिकपाषाणं गुग्गुलुं च त्रिबन्धनम् ।
स्वयम्भुदैविके बाणे बन्धयेच्च त्रिबन्धनम् ।।
दिव्ये च गाणपे चैव आर्षे चैव विशेषतः ।
पञ्चबन्धनयोग्यं स्यान्मर्दयित्वा तु बन्धयेत् ।।
मानुषे राक्षसे चैव प्रतिमापीठ एव च ।
अष्टबन्धनं योग्यं स्यात्पक्वापक्वं तु बन्धयेत् ।।
अपक्वं पक्वमेवं तु द्विविधं बन्धनक्रमे ।
पक्वं तु पाकयोग्यं स्यादपक्वं मर्दनं भवेत् ।।
पक्वापक्वपदं ज्ञात्वा बन्धयेत्सुदृढं पुनः ।
अष्टबन्धनहीने तु पूजा नैवेद्यमेव च
बलिर्नित्योत्सवश्चैव नमस्कारः प्रदक्षिणम् ।
नृत्तगीतं च वाद्यं च नित्यनैमित्तिकं तथा ।।
उपचाराणि सर्वाणि निष्फलं तु विधीयते ।'
(पूर्वकारणे १३६.३—१२ पू०)

[44] . . . गिरिकं गुल—इ
[45]अत्र 'एषां पाकेन संपादितः' इति पदत्रयमध्याहृत्य व्याख्येयमिति भाति ।
[46]इतः परं 'इ' मातृकायां टि० १६०.२३१ पृष्ठे सार्धश्लोकोऽधिकतया दृश्यते । तत्र वृत्तभेदः, पुनरुक्तिः ग्रन्थपातश्च वर्तन्त इति स भागो नात्र पाठतया संघटितः । टिप्पण्यां यथावल्लिख्यते ।
'वसुर्मुनी रस शराः वेदा अग्नि पक्षैकः क्रमात् ।
ग्राह्य तं लाक्षपादादि . . . तः क्रमात् ।
पूर्ववल्लक्षणतैलान्तमष्टबन्धं प्रशस्यते ।।'
[47]पाकं—इ
[48]बध्वाष्टबन्धनं—इ
[49]सिक्तं वेदयेष्ट—इ
[50]शर्करा—इ
[51]भागे तु—इ
[52]ग्राह्यं—इ
[53]द्विगुणं सिकतं—इ
[54]रन्ध्रेण—इ
[55]स्थलम्—इ

पूर्ववत्स्नपनं कुर्याच्छान्तिहोमं तु कारयेत् ।।३९।।

[[56]सुधाकर्मविहीने स्थलकर्मविहीने च]

सुधाकर्म[57]विहीने च स्थलकर्मविहीनके ।
प्रवर्तते महामारी पुनः संधानमाचरेत् ।।४०।।
पुण्याहं वाचयेद्देवं गव्यैरेवाभिषेचयेत् ।

[शूलपतनादौ[58]]

[59]शूले च पतिते चैव चलिते चाङ्गहीनके ।।४१।।
दग्धे च वर्णहीने च चर्मच्छेदे तथैव च ।
पीठे बन्धविहीने च ग्रामनाशं विनिर्दिशेत् ।।४२।।
पतिते चलिते चैव बालस्थानं तु कारयेत् ।
शूलं तु स्थापयेत्पश्चात्पूर्वोक्तविधिना सह[60] ।।४३।।
बेरं तु विधिवत्कृत्वा संप्रोक्षणमथाचरेत् ।

[शूलस्याङ्गोपाङ्गप्रत्यङ्गविहीने[61]]

अङ्गोपाङ्गप्रत्यङ्गं च शरीरस्याङ्गमुच्यते ।।४४।।

---

[56]'सुधाकर्मविहीने च स्थलकर्मविहीनके ।
प्रवर्तते महामारी पुनः सन्धानमाचरेत् ।।
पुण्याहं वाचयेत्पश्चाद्गव्यैरेवाभिषेचयेत्' ।
(*पूर्वकारणे* १४४.३९ उ०, ४०);
'स्थलाधो जलनिस्रावे जलेऽधः पतितेऽपि वा ।
तदङ्गं वा निमग्ने तु भूमौ दोषः प्रजायते ।।
शान्तिहोमं तदा कुर्यात्सलिले पतिते त्र्यहम् ।
कुम्भस्थं वाथ देवेशं कृत्वा कुर्यात्स्थलक्रियाम् ।।
प्रोक्षयेद्वास्त्रतोयेन स्नानार्थं प्रतिसंध्यकम् ।।
पुण्याहप्रोक्षणोपेतं शिल्पिभिः कारिते स्थले ।
ततः संप्रोक्षणं कुर्यात्स्थलकर्मावसानके ।।'
(*उत्तरकामिके* ३०.३८६ उ०—३८९); एतद्विषये *रौरवे* क्रियापादे ४४. ४, १९, २० श्लोका द्रष्टव्याः ।

[57]विहीनं—इ

[58]'शूले च पतिते चैव चलिते चाङ्गहीनके ।
भग्ने च वर्णहीने च चर्मच्छेदे विवर्णके ।।
पीठबन्धनहीने च ग्रामनाशं विनिर्दिशेत् ।
पतिते चलिते चैव बालस्थानं तु कारयेत् ।।
शूलं च स्थापयेत्पश्चात्पूर्वोक्तविधिना सह ।
बेरं तु विधिवत्कृत्वा संप्रोक्षणमथाचरेत् ।।'
(*पूर्वकारणे* १४४.४१—४३)
शूले तु पतिते चैव तद्ग्रामस्य क्षयो भवेत् ।
बालस्थानं ततः कृत्वा शूलं पूर्वोक्तवत्कुरु ।।
स्थापयेत्पूर्वदेशे तु बिम्बं कृत्वा सलक्षणम् ।
संप्रोक्षणं ततः कृत्वा पूर्वोक्तविधिना सह ।।
वर्णहीनेऽङ्गहीने च पीठबन्धविहीनके ।
वस्त्राभरणहीने च पुनः संधानमाचरेत् ।।
संप्रोक्षणं ततः कुर्यात्पूर्ववद्देशिकोत्तमः ।
(*सकलागमप्रायश्चित्ते योगजे* (टि० २०३) पृ० ११२)

[59]शूलं च—इ

[60]अत्र पाठः सादृश्याय प्रदर्शितपूर्वकारणागमश्लोकमनुसृत्य साधितः ।

[61]'अङ्गं ह्युपाङ्गं प्रत्यङ्गं शरीराङ्गं त्रिधा मतम् ।
अङ्गं प्रधानं शूलं स्याद्ब्रह्मदण्डं तदुच्यते ।।

अङ्गं प्रधानशूलं स्याद्ब्रह्मदण्डमिहोच्यते ।
वक्षोदण्डं कटीदण्डं बाहुकूर्परकोष्ठकम् ।।४५।।
[६२]ऊरू जानू च जङ्घे च उपाङ्गं चेति कीर्तितम् ।
शेषाणि च विजानीयात्प्रत्यङ्गमिति बुद्धिमान् ।।४६।।
ब्रह्मदण्डविहीने च शूलस्थापनमारभेत् ।
प्रत्यङ्गोपाङ्गहीने च पुनः संधानकं कुरु ।।४७।।
[६३]स्वदारुश्च तदा ग्राह्यो [६४]योजयेत्स्थापने क्रमात् ।
[६५]भिन्नादौ च समुत्पन्ने पुनः संधानमाचरेत् ।।४८।।
आसप्तदिवसात्पूर्वे क्रियते चेद्घटस्थितिः[६६] ।
तदूर्ध्वे बालहर्म्यं तु कृत्वा संप्रोक्षणं कुरु ।।४९।।

[भवने वह्निना दग्धे[६७]]

[६८]भवने चाग्निदग्धे च वह्निना [६९]तु भयं भवेत् ।
व्यपोह्याङ्गारकान्सर्वान्पश्चात्संधानमाचरेत् ।।५०।।

वक्षोदण्डं कटीदण्डं बाहुकोर्परकोष्ठकम् ।
ऊरू च जानुनी जङ्घे ह्युपाङ्गमिति कीर्तितम् ।।
शेषाणि च विजानीयात्प्रत्यङ्गमिति बुद्धिमान् ।
ब्रह्मदण्डविहीने च शूलस्थापनमाचरेत् ।।
प्रत्यङ्गोपाङ्गहीने च शीघ्रं संधानमाचरेत् ।
स्वदारुं च तदा ग्राह्य योजयेत्स्थापनं क्रमात् ।।
भग्नादयः समुत्पन्नाः पुनः संधानमाचरेत् ।
आसप्तदिवसात्पूर्वे क्रियते चेद्घटस्थितम् ।।
तदूर्ध्वे बाललिङ्गं तु कृत्वा संप्रोक्षणं कुरु ।'
(सकलागमप्रायश्चित्ते *योगजे* टि० २०३, पृ० ११३);
'अङ्गोपाङ्गं च प्रत्यङ्गं शरीर[स्याङ्ग]मुच्यते ।
अङ्गं प्रधानशूलं स्याद्ब्रह्मदण्डमिहोच्यते ।।
वक्षोदण्डकटीदण्डबाहुकूर्परकोष्ठकम् ।
ऊर्वस[जानु] जङ्घा [च] ह्युपाङ्गं चेति कीर्तितम् ।।
शेषाणि च विजानीयात्प्रत्यङ्गमिति बुद्धिमान् ।
ब्रह्मदण्डविहीनं चेच्छूलस्थापनमारभेत् ।।
प्रत्यङ्गोपाङ्गहीनं चेत्पुनः संधानकं कुरु ।'
(*पूर्वकारणे* १४४.४४ —४७ पू०)

[६२]ऊरू च जानु जङ्घां च —इ
[६३]सदारुश्च तदा ग्राह्य —इ
[६४]योजयेत्स्वपनक्रिया —इ; अत्र 'तमेव' इति पदमध्याहृत्य व्याख्येयम् ।
[६५]भिन्नादयः समु —इ
[६६]स्थिते —इ; अत्र कर्तव्या इति शेषः ।
[६७]'प्रासादः स्फुटितः पूर्वे यदि राज्ञो भयं भवेत् ।
आग्नेय्यामग्निदाहः स्याद्दक्षिणे कलहो भवेत् ।।
नैर्ऋत्यां धननाशः स्याद्वारुण्यां भृत्यनाशनम् ।
वायव्यां शत्रुवृद्धिः स्यादुत्तरे पुत्रनाशनम् ।।
ऐशान्यां दुःखभाग्राजा क्रमेणैव फलं मतम् ।
उत्तमादिविभेदेन कृत्वा शान्तिं पुरोदिताम् ।।
शान्तिहोमयुतामन्ते संधानं धाम्न आचरेत् ।
प्रासादमनुकर्मोक्त्या कारयेद्वा यथाविधि ।।
स्वल्पभेदादियुवतश्चेच्छान्तिहोमं समाचरेत् ।
प्रासादार्धे त्रिपादे वा पादेऽष्टांशेऽथ भग्नके ।।
कुर्याद्धाम्नोऽथ संधानं षट्पञ्चयुगवह्निकम् ।।
प्रायश्चित्तं प्रकर्तव्यं पूर्वोक्तं भावितात्मभिः ।।
स्थूप्याद्यवयवच्छिन्नेऽप्येतदेकाहमाचरेत् ।'
(*उत्तरकामिके* ३०.३८० —३८६ पू०);
'भवने चाग्निना दग्धे वह्निना तु भयं भवेत् ।
व्यपोह्याङ्गारकान्सर्वान्पश्चात्संधानमाचरेत् ।।
शान्तिहोमं ततः कृत्वा पुण्याहं वाचयेत्ततः ।'
(*क्रियार्णवे* (*स्वायम्भुवे*) टि० ८० पृ० ८९);
'भवने चाग्निदग्धे च पावकेन भयं भवेत् ।

पुण्याहं वाचयित्वाथ [७०]दिशाहोमं तु कारयेत् ।

[लिङ्गप्रतिमयोरग्निना दाहादिसंभवे[७१]]

दग्धे च [७२]प्रतिमे लिङ्गे राजा मरणमाप्नुयात् ।।५१।।
वह्निना स्फुटिते भिन्ने [७३]लिङ्गे वा प्रतिमे तु वा ।
[७४]जीर्णोद्धारविधानोक्तमार्गेणैव समुद्धरेत् ।।५२।।
वह्निना द्रुतबिम्बं चेत्कुर्यात्तेनैव वस्तुना ।
तत्प्रमाणेन तद्रूपं कारयेत्तु विशेषतः ।।५३।।
पूर्वोक्तविधिना धीमान्प्रतिष्ठां कारयेत्ततः ।
प्रत्यङ्गोपाङ्गहीने च वस्त्राभरणहीनके ।।५४।।

[व्यपोह्याङ्गारकान्सर्वान्] पश्चाद्बन्धनमाचरेत् ।।
पुण्याहं वाचयित्वा तु शान्तिहोमं तु कारयेत् ।'
(*पूर्वकारणे* १४४.४७ उ०, ४८)
भवने चाग्निदग्धे वा लोके स्य[ज्जल]वर्जितम् ।
भस्माङ्गारान्विसृज्याथ पूर्ववद्भवनं कुरु ।।
पुण्याहं वाचयित्वा तु प्रोक्षयेत्पञ्चगव्यकैः ।
मूर्तिहोमं ततः कृत्वा मूलेनैव शतं जपेत् ।।
(*सकलागमप्रायश्चित्ते योगजे* टि० १२०, पृ० ४६)

[६८]भवनं—इ

[६९]तूभयं—इ

[७०]दिशाहोमविषये *रौरवे* क्रियापादे ४४.४१—४५ श्लोकास्तथा ५३.३१उ०—४०श्लोकास्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[७१]लिङ्गे वा प्रतिमायां वा अग्निना दूषिते सति ।
तद्ग्रामेऽग्निभयं चैव राजा दुर्भयमाप्नुयात् ।।
गव्येन स्नापयेच्छम्भुं स्नपनं पञ्चविंशतिः ।'
(*अंशुमति* ३७.४७१, ४७२ पू०);
'दग्धे च प्रतिमालिङ्गे राज्ञो मरणमादिशेत् ।
वह्निना स्फुटिते भिन्ने लिङ्गे वा प्रतिमादिके ।।
जीर्णोद्धारविधानोक्तमार्गेणैव समुद्धरेत् ।
वह्निना दूषितं बिम्बं कुर्यात्तेनैव वर्त्मना ।।
तत्प्रमाणेन तद्रूपं कारयेत्तु विशेषतः ।
पूर्वोक्तविधिना धीमान्प्रतिष्ठां कारयेत्ततः ।।
प्रत्यङ्गोपाङ्गहीने च वस्त्राभरणहीनके ।
पुनः संधानकं कृत्वा पूर्वोक्तेनैव मार्गतः ।।'
(*पूर्वकारणे* १४४.४९—५२);
लिङ्गं तु स्फुटितं भिन्नं भग्नं छिन्नं तथैव हि ।
दग्धं जीर्णं परित्यज्य स्थापयेत्तु नवं कृतम् ।।
स्नपनं तत्र कुर्वीत यथाविभवविस्तरम् ।
सर्वदोषप्रशान्त्यर्थं नाममन्त्रं शतं जपेत् ।।'
(*मकुटे* ६.९५ उ०—९७)
'लिङ्गं वा पीठमेवं वा स्फुटितं दग्धमेव वा ।
बालस्थानं प्रकर्तव्यं पूजां कुर्वीत देशिकः ।।
व्यपोह्यैव तु तल्लिङ्गं स्थापयेन्नवलिङ्गकम् ।'
(*वीरे* ५२.१२ उ०, १३)
'अग्निदग्धे तथा लिङ्गे तल्लिङ्गं तु विसर्जयेत् ।
स्थापयेन्नवलिङ्गं तु पूर्वोक्तविधिना सह ।।'
(*संतानसंहितायाम्* ५६.५४)
लिङ्गे वा प्रतिमे वापि दग्धे राष्ट्रविनाशनम् ।
संप्रोक्षणं ततः कुर्यान्मासपक्षादिभिर्विना ।।
वह्निना स्फुटिते लिङ्गे तल्लिङ्गं तु विसर्जयेत् ।
नवलिङ्गं प्रकुर्यात्तु स्थापयेत्तत्र सुव्रत ।।
वह्निना दुष्टबेरं चेत्तेन कुर्यात्तु पूर्ववत् ।
प्रतिष्ठां कारयेद्धीमान्पूर्वोक्तविधिना सह ।।
वह्निना स्फुटिते हीने भूषणादिविहीनके ।
पुनः संधानकं कृत्वा पूर्ववत्प्रोक्षणं कुरु ।।
(*सकलागमप्रायश्चित्ते योगजे* टि० १६०, पृ० ४६)

[७२]प्रतिमाशब्दस्यात्र क्लीबे प्रयोगः ।

[७३]लिङ्गं वा प्रतिमं—इ

[७४]लिङ्गजीर्णोद्धारविषयः ७३.२८-३५ श्लोकेषु सूचितः ।

पुनः संधानकं कृत्वा [पूर्वोक्तेनैव मार्गतः[७५]] ।
संप्रोक्षणं ततः कृत्वा चोत्सवं कारयेत्ततः ॥५५॥

[चोरादिभिर्नदीस्रोतसा च लिङ्गे चलिते[७६]]

[७७]चोराद्यैश्चलिते लिङ्गे नदीस्रोतःप्रचालिते ।
स्थापयेन्निर्व्रणं चेत्तु चोरादाहृत्य पूर्ववत् ॥५६॥

[देवशक्तौ चोरैर्गृहीतायाम्[७८]]

चोरैः [७९]संगृह्यते देवशक्तिश्चेत्क्षयकारिणी ।
तच्छक्ति[८०]मुद्धरेदन्यां नवशक्तिं [८१]क्रमात्कुरु ॥५७॥
[८२]देवे चावाहयेच्छक्तिं नवलोहं तु संग्रहेत् ।
[८३]पूर्वशक्तिं व्यपोह्याथ [८४]समुद्रे दशयोजने ॥५८॥
[८५]देवं देवीं च संगृह्य प्रतिष्ठां कारयेद्बुधः ।
[८६]स्थापनान्ते तु बेराद्यमानीतं चेत्तदन्तिके ॥५९॥

---

[७५] अत्र सादृश्याय प्रदर्शित पूर्वकारणागमश्लोकमनुसृत्य पाठः साधितः ।

[७६] 'तस्करैश्चलिते लिङ्गे नदीस्रोतेन वा पुनः ।
भूपतिस्त्वन्यथा ज्ञेयः स्थापयेन्निर्व्रणं तु तत् ॥'
(*पूर्वकारणे* १४४.२७);
'चलितं पातितं वापि नदीस्रोतोविभेदितम् ।
गजेनोत्थापितं वापि चोरैरुन्मत्तकैरपि ॥
तल्लिङ्गं तत्र संस्थाप्य पूर्ववत्पूजयेच्छुभम् ।
सहस्रकलशं स्थाप्य संप्रोक्षणमथाचरेत् ॥
(*मकुटे* ६.९७—९९ पू०);
'चलितं पतितं वापि नदीस्रोतेन पातितम् ।
गजेनोत्थापितं वापि चोरैरुन्मत्तकैरपि ॥
तल्लिङ्गं तत्र संस्थाप्य पूर्ववच्छेषमाचरेत् ।'
(*सुप्रभेदे* १.५५.३५, ३६ पू०)

[७७] अयं श्लोकः 'इ' मातृकायां न दृश्यते। तथापि '*अजिते*' इति निर्दिश्य जीर्णोद्धारदशकव्याख्याने उद्धृतोऽयं श्लोकः औचित्यादत्र संघटितः ।

[७८] 'चोरैः संगृह्यते देवो राजराष्ट्रं विनश्यति ।
तच्छक्तिं रक्षयित्वा तु अर्चयेत्तु विचक्षणः ॥
एकाब्दं च तथा लब्धे पूर्वशक्तिं त्यजेद्बुधः ।
देवं देवीं यथा ग्राह्य स्थापयेत्तु यथाक्रमम् ॥
(*अंशुमति* ३७.५८९, ५९०);
'देवीं विहाय देवो वा देवी वा केवला यदा ।
शत्रुभिः संगृहीता चेत्स्थितस्यैवानुरूपतः ॥
संपाद्य चेतरं तस्य प्रतिष्ठां च समाप्य च ।
कल्याणं कारयेदन्ते विधिना देशिकोत्तमः ॥
स्थापनान्ते तु बेराद्यमानीतं चेत्तदन्तिके ।
देशे संस्थाप्य विधिना पूजयेन्नित्यमादरात् ।
पीठं चेत्संत्यजेल्लिङ्गेनाथवान्येन योजयेत् ॥
(*उत्तरकामिके* ३०.३७६ उ०—३७९)

[७९] संग्राह्य देवानां शक्तिरक्षय—इ

[८०] मुद्धरेदन्यन्नव—इ

[८१] क्रमं कुरु—इ

[८२] एवमावाहयेच्छक्ति नव—इ

[८३] सर्वशक्तिव्यपो—इ

[८४] समुद्रयोजने दश—इ

[८५] देवदेवी नवं ग्राह्य—इ

[८६] '५९' श्लोकस्य पूर्वार्धं '६०' श्लोकश्च 'इ' मातृकायां न दृश्यते। जीर्णोद्धारदशकव्याख्याने १३८ पृष्ठे '*अजिते*' इति निर्दिश्योद्धृतोऽयं भागः औचित्यादत्र संघटितः ।

देशे संस्थाप्य विधिना पूजयेन्नित्यमादरात् ।
पीठं चेत्संत्यजेल्लिङ्गेनाथवान्येन कारयेत् ।।६०।।

[परिवारविहीने[८७]]

परिवारविहीने च दासीदासविनाशनम् ।
कृत्वा तु पूर्ववत्पश्चात्स्थापयेत्स्थापकोत्तमः ।।६१।।

[परिवाराङ्गवैकल्ये]

परिवाराङ्गवैकल्ये पुनः सन्धानमाचरेत् ।
[८८]तत्तन्मन्त्रेण मतिमान्समिद्भिः सर्पिषा तथा ।।६२।।
चरुणा जुहुयाद्धीमान्प्रत्येकं तु शतं क्रमात् ।
[८९]संप्रोक्ष्याभ्यर्च्य गन्धाद्यैः पुण्याहं वाचयेत्ततः ।।६३।।

[बलिपीठविहीने][९०]

बलिपीठविहीने तु गवां वै नाशनं भवेत् ।
पूर्ववत्कल्पयेत्पीठं स्थापयेद्विधिना बुधः ।।६४।।
[९१]तद्भिन्ने पतिते दग्धे पुनः सन्धानमाचरेत् ।
पुण्याहं वाचयित्वा तु शान्तिहोमं तु कारयेत् ।।६५।।
स्नपनं कारयेच्छम्भोः पूजयेच्च विशेषतः ।

---

[८७]'परिवारविहीने तु भृत्यवर्गस्य नाशनम् ।
परिवारं समापाद्य प्रतिष्ठां कारयेत्ततः ।।'
(*उत्तरकामिके* ३०.३९२ उ०, ३९३ पू०);
'परिवारे तु विच्छिन्ने स्थापयेत्परिवारकान् ।
तन्मन्त्रेण शतं हुत्वा स्नपनं कारयेत्ततः ।।'
(*वीरे* ५२.४२ उ०, ४३ पू०);
'परिवारालये हीने पूर्ववत्परिकल्पयेत् ।
तद्बिम्बे पतिते भिन्ने छिन्ने भेदे तु वर्जयेत् ।।
हुत्वा तु शिवमन्त्रेण कुर्याद् बिम्बानि पूर्ववत् ।
प्रतिष्ठां कारयेत्प्राग्वत्स्वकीयेन विधानतः ।।'
(*सुप्रभेदे* १.५५.४६ उ० — ४८ पू०)

[८८]'६२' श्लोकस्योत्तरार्धं '६३' श्लोकस्य पूर्वार्धं च 'इ' मातृकायां न दृश्यते। सकलागमप्रायश्चित्तमातृकायां (टि० — २०३) ११५ पृष्ठे '*अजिते*' इति निर्दिश्योद्धृतोऽयं भागः औचित्यादत्र सङ्घटितः ।

[८९]संप्रोक्षणमथाभ्यर्च्य पुनः पण्याहमाचरेत् — इ

[९०]'बलिपीठविहीने तु सर्वदोषावहो भवेत् ।
संकल्प्य पूर्ववत्पीठं ततस्तत्स्थापनं नयेत् ।।
तज्जीर्णे स्फुटिते दाहे पतनादौ सति द्विजाः ।
शान्तिहोमं तदा कृत्वा संप्रोक्षणमथाचरेत् ।।'
(*उत्तरकामिके* ३०.३९३ उ० — ३९५ पू०)
'बलिपीठे विहीने च गोनाशो भवति ध्रुवम् ।
पूर्ववत्कल्पयेत्पीठं स्थापयेद्विधिना ततः ।।
स्नपनं कारयेच्छम्भोः पूजयेत्तु विशेषतः ।
(*पूर्वकारणे* १४४.५४ उ० — ५५)
'बलिपीठविनाशे तु स्थापयेद्बलिपीठकम् ।'
(*सुप्रभेदे* १.५५.४६ पू०)

[९१]अयं श्लोकः 'इ' मातृकायां न दृश्यते। *सकलागमप्रायश्चित्त*मातृकायां (टि० — २०३.११५ पृष्ठे) *अजिते* इति निर्दिश्योद्धृतोऽयं श्लोकः औचित्यादत्र संघटितः ।

[92] [लिङ्गबिम्बयोः कुक्कुरादिस्पर्शे कुक्कुरादीनां गर्भगेहप्रवेशे च]

कुक्कुरैः कुक्कुटैश्चैव खरसूकरवानरैः ।।६६।।
स्पर्शिते लिङ्गबिम्बे च प्रविष्टे गर्भगेहके ।
प्रवर्तते महामारी [93]तद्ग्रामश्च विनश्यति ।।६७।।
मृद्भाण्डानि विसृज्याथ [94]स्थानशुद्धिं ततः कुरु ।
गोमयालेपनं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ।।६८।।
स्नपनं कारयेत्तत्र शान्तिहोमं ततः कुरु ।

[[95]लिङ्गप्रतिमयो रजस्वलास्पर्शे, रजस्वलाया गर्भगेहप्रवेशे च]

लिङ्गे रजस्वलास्पृष्टे [96]प्रतिमे वा विशेषतः ।।६९।।

---

[92] 'कुक्कुरैः कुक्कुटैश्चैव खरसूकरवानरैः ।
स्पर्शिते लिङ्गबिम्बे च प्रविष्टे गर्भगेहके ।।
प्रवर्तते महामारी तद्ग्रामश्च विनश्यति ।
मृद्भाण्डानि विसृज्याथ स्थानशुद्धिं ततः कुरु ।।
गोमयालेपनं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ।
स्नपनं कारयित्वा तु शान्तिहोमं ततः कुरु ।।'
(*पूर्वकारणे* १४४.५६—५८);
'खरकुक्कुटकाकैश्च सूकरैर्वानरैस्तथा ।
पाते लिङ्गे तु बिम्बे वा परचक्राद्भयं भवेत् ।
मृद्भाण्डानि विसृज्याथ स्थानशुद्धिं ततः कुरु ।।
पञ्चगव्येन संप्रोक्ष्य अस्त्रमन्त्रं शतं जपेत् ।
संप्रोक्षणं ततः कृत्वा संहिताहोममाचरेत् ।।'
(*अंशुमति* ३७.४६८ उ०—४७०);
'श्वानकाकादिभिः स्पृष्टे लिङ्गे वा प्रतिमेऽपि वा ।
पञ्चगव्येन संप्रोक्ष्य शान्तिहोमं तु कारयेत् ।।'
(*वीरे* ५२.४९ उ०, ५० पू०);
'श्वशृगालवराहैश्च स्पृष्टे यदि च सुव्रते ।
स्नपनं तत्र कर्तव्यं पूर्वोक्तविधिना सह ।।'
(*संतानसंहितायाम्* ५६.३३ उ०, ३४ पू०);
एतद्विषये *रौरवे* ५५.१९—२४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[93] तद्ग्रामं च—इ

[94] स्नानशक्तिं—इ
'खननोद्धारदहनं पूरणं शुद्धवालुकैः ।
गोष्पदस्पर्शनान्तं च पञ्चैताः स्थानशुद्धयः ।।
(*शैवागमपरिभाषामञ्जर्याम्* ५.१९४ उ०, १९५ पू०)

[95] 'लिङ्गे वा प्रतिमे स्पृष्टे ऋतुस्त्रीभेकतस्करैः ।
गर्भगेहप्रविष्टे वा जनानां नाशनं भवेत् ।।
मृद्भाण्डानि विसृज्याथ गोमयेनोपलेपयेत् ।
पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्ततः ।।
स्नपनं कारयेत्पश्चाद्बिल्वपत्रेण घर्षयेत् ।
मूर्तिहोमं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः ।।
अन्तर्मण्डलशालादावभिस्पृष्टे विशेषतः ।
संप्रोक्ष्य पञ्चगव्येन पुण्याहं वाचयेत्ततः ।।'
(*पूर्वकारणे* १४४.५९—६२);
'ऋतुस्त्रीपातकाशौचकारुकैः स्पर्शिते सति ।
शान्तिहोमादिकं कार्यं प्रागुक्तं रजकैरपि ।।'
'ऋतुस्त्रीपातकाद्यैश्चेत्प्रविष्टं गर्भगेहकम् ।
तदा संप्रोक्षणं कुर्यात्केवलं प्राक्प्रचोदितम् ।।'
(*उत्तरकामिके* ३०.४०४, ४०६ उ०, ४०७ पू०);
'प्राकारे मण्टपे वापि प्रासादस्य समीपके ।
धाम्नश्चतुर्दशे दण्डे स्त्रीणां च ऋतुसम्भवे ।।
तत्काले पञ्चगव्यैस्तु तद्देवं प्रोक्षयेत्ततः ।
पुण्याहं कारयेत्तत्र स्नपनं कारयेत्ततः ।। . . .
त्रैवर्णिककुले जातस्त्रीणामार्तवसंयुतम् ।
लिङ्गे वा कौतुके वापि समीपे ऋतुसम्भवे ।।
प्राकारे गोपुरे चैव पञ्चगव्येन शुद्ध्यति ।
पुण्याहं वाचयेत्तत्र शान्तिहोमं तु कारयेत् ।।
स्नपनं तत्र कर्तव्यं तद्दोषशमनाय च ।
स्पृष्टे वापि च विप्रेन्द्र जलसंप्रोक्षणं कुरु ।।'
(*वीरे* ५२.७४ उ०—७६ पू०; ८० उ०—८३ पू०)

[96] प्रतिमां—इ

गर्भगेहे प्रविष्टे वा [97]जायावन्नाशनं भवेत् ।
मृद्भाण्डानि विसृज्याथ गोमयेनोपलिप्य च ।।७०।।
पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्तथा[98] ।
स्नपनं कारयेद्देवं बिल्वपत्रेण घर्षयेत् ।।७१।।
[99]मूर्तिहोमं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः ।

[अन्तर्मण्डलसालादौ रजस्वलास्पर्शे]

अन्तर्मण्डलसालादौ तथा स्पृष्टे विशेषतः ।।७२।।
संप्रोक्ष्य पञ्चगव्येन पुण्याहं वाचयेत्ततः ।

[100] [सूतिकया बिम्बे स्पृष्टे, सूतिकाया गर्भगेहप्रवेशे च]

स्पृष्टे [101]सूतिकया बिम्बे प्रविष्टे गर्भगेहके ।।७३।।
दुर्भिक्षं जायते लोके बालानां नाशनं भवेत् ।
मृद्भाण्डानि विसृज्याथ गोमयेनोपलेपयेत् ।।७४।।
पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्ततः ।
[102]पञ्चशुद्धिक्रमं कृत्वा स्नपनं कारयेत्ततः ।।७५।।
मूर्तिहोमं ततः कृत्वा चास्त्रेणैव शतं [103]हुनेत् ।
ब्राह्मणान्भोजयेत्तत्र पुण्याहं वाचयेत्ततः ।।७६।।

[104] [प्रेतस्पर्शे, प्रेतस्य गर्भगेहप्रवेशने च]

प्रेतकैः स्पर्शने चैव प्रविष्टे गर्भगेहके ।

---

[97] जायावान् —इ

[98] ततः —इ

[99] मूर्तिहोमविषये *रौरवे* ४४.३४उ० —३८उ० श्लोकास्तथा ५३.४१ —४७ श्लोकाश्च तदीयटिप्पण्यश्च द्रष्टव्याः ।

[100] 'स्पृष्टे सूतिकया बिम्बे गर्भगेहे प्रविष्टके ।
दुर्भिक्षं जायते लोके बालानां नाशनं भवेत् ।।
मृद्भाण्डानि विसृज्याथ गोमयेनानुलेपयेत् ।
पर्यग्निकरणं कृत्वा ब्राह्मणान्भोजयेत्ततः ।।
मूर्तिहोमं ततः कृत्वा शस्त्रेणैव शतं जपेत् ।
ब्राह्मणान्भोजयेत्तत्र सावित्रीं च शतं जपेत् ।।'
(*पूर्वकारणे* १४४.६३ —६५)

[101] सूकरं बिम्बं —इ; सूकरशब्दस्य पूर्वं '६६' श्लोकस्य पूर्वार्धे प्रोक्तत्वादत्र तत्स्थाने 'सूतिकैः' इति शब्दः पूर्वकारणश्लोकाधारेण लिखितः । 'सूतकैः' इति वा पाठः वीरागमसंतानसंहितोक्तश्लोकानुसारेण साधयितुं शक्यते ।

[102] पञ्चशुद्धिक्रमः —
'खननोद्धारदहनं पूरणं शुद्धवालुकैः ।
गोष्पदस्पर्शनान्तं च पञ्चैताः स्थानशुद्धयः ।।'
(*शैवागमपरिभाषामञ्जर्याम्* ५.१९४ उ०, १९५ पू०)

[103] भवेत् —इ

[104] 'प्रेतकैः स्पर्शने चैव प्रविष्टे गर्भगेहके ।
पुत्रपौत्रविनाशः स्यात्तद्ग्रामश्च विनश्यति ।।
वर्जयेदत्र मृत्पात्रं गोमयेनोपलेपयेत् ।
पञ्चगव्येन संप्रोक्ष्य पवमानमुदीरयन् ।।

पुत्रपौत्र[105]विनाशः स्यात्तत्र [106]ग्रामश्च नश्यति ।।७७।।
विसृजेन्मृण्मयं पात्रं गोमयेनोपलेपयेत् ।
पञ्चगव्येन संप्रोक्ष्य पवमानमुदीरयन् ।।७८।।
पञ्चशुद्धिक्रमं कृत्वा पुण्याहं वाचयेत्ततः ।
शान्तिहोमं ततः कृत्वा मूलेनैव शतं हुनेत् ।।७९।।
ब्राह्मणान्भोजयित्वाथ [विधिवद्देशिकोत्तमः] ।
[ग्रन्थपातः]

[[107]नित्यपूजाविहीने]

[108]नित्यपूजाविहीने तु स्थानभ्रंशो भवेत्सदा ।।८०।।

पञ्चशुद्धिक्रमं कृत्वा स्नपनं कारयेद्बुधः ।
शान्तिहोमं ततः कृत्वा मूलेनैव शतं हुनेत् ।।
ब्राह्मणान्भोजयेत्तत्र पुण्याहं वाचयेत्ततः ।
अन्तर्मण्डलशालादीन्प्रविशेदविचारतः ।।
पुण्याहं वाचयित्वा तु शान्तिहोमं तु कारयेत् ।'
(*पूर्वकारणे* १४४.६६—७०पू०);
'सूतकैः प्रेतकैश्चैव शर्वैर्वा स्पृश्यते ततः ।
जलसम्प्रोक्षणं कुर्याल्लक्षणेन समन्वितम् ।।'
(*वीरे* ५२.१५);
सूतकैः प्रेतकैः स्पृष्टे मृद्भाण्डादीन्विसर्जयेत् ।
स्नपनं कारयेत्तत्र पुण्याहं वाचयेत्ततः ।।
(*संतानसंहितायाम्*.५६.३१)

[105]विनाशं—इ

[106]ग्रामं च—इ

[107]'स्थानभ्रंशो भवेद्राज्ञो नित्यपूजाविहीनके ।
तस्यां संध्यां विहीनायां द्विगुणं चान्यसंधिके ।
संधिद्वयार्चनाहीने शान्तिहोमं तु कारयेत् ।
पक्षहीने दिशाहोमं स्नपनं तत्र कारयेत् ।।
पञ्चाहे स्नपनं कुर्यान्मूर्तिहोमं तु कारयेत् ।
संधित्रयविहीने च कुर्याद्गव्याभिषेचनम् ।।
अहोरात्रविहीने तु स्नपनं शान्तिहोमयुक् ।
मासादूर्ध्वविहीने तु जलसंप्रोक्षणं कुरु ।।'
(*पूर्वकारणे* १४४.९३—९६);
'नित्यपूजाविहीनं चेत्तद्राष्ट्रं च विनश्यति ।
तद्दोषशमनार्थाय स्नपनं पञ्चविंशतिः ।।
दिवा संध्यार्चनाहीने तद्राष्ट्रे रोगसंभवः ।
मूलमन्त्रं शतं जप्त्वा शर्वर्यां द्विगुणं यजेत् ।।
एकाहस्य विहीने तु तद्राष्ट्रे कलहो भवेत् ।
स्नानमेकोनपञ्चाशच्छान्तिहोमं तु कारयेत् ।।
द्वितीयाहे तृतीयाहे चतुर्थाहे विशेषतः ।
महामार्यः प्रवर्तन्ते तद्राष्ट्रे कलहो भवेत् ।।
तद्दोषशमनार्थाय स्नानमष्टोत्तरं शतम् ।
पञ्चाहादिदशाहान्तं यजने च विहीनके ।।
तद्राष्ट्रस्य विनाशस्तु राजा दुर्भयमाप्नुयात् ।
पञ्चशुद्धिक्रमं कृत्वा स्नानमष्टोत्तरं शतम् ।।
एकादशाहपक्षान्तं यजने च विहीनके ।
महामार्यः प्रवर्तन्ते तद्राष्ट्रे कलहो भवेत् ।।
तद्दोषशमनार्थाय संप्रोक्षणमथाचरेत् ।
द्विमासाद्यष्टमासान्तं नित्यपूजाविहीनके ।।
भूपतिस्त्वन्यथा चैव महामारी प्रवर्तते ।
चतुःशताष्टकलशैः स्नापयेत्परमेश्वरम् ।
नवमासादि वर्षान्तं पूजाहीने तु संभवे ।।
परराष्ट्राद्भयं राज्ञो भूपतिस्त्वन्यथा भवेत् ।
पञ्चशुद्धिक्रमं कृत्वा सहस्रकलशैः क्रमात् ।।'
(*अंशुमति* ३७.३२२—३३२ पू०);
'पूजाकाले परिभ्रंशे तत्संध्या द्विगुणा भवेत् ।
एकसंध्यार्चनाहीने हृन्मन्त्रेणशताहुतिः ।।
नैवेद्यं पायसान्नं तु पुनः कुर्याच्छिवार्चनम् ।
एकाहे त्वर्चनाहीने स्नपनं नवकुम्भकम् ।।
द्व्यहे त्र्यहेऽर्चनाहीने पञ्चविंशतिकुम्भकम् ।।
नैवेद्यं च गुलान्नं तु पूर्ववत्पूजयेच्छुभम् ।
विशेषादर्चनं कुर्याच्छिवमन्त्रशताहुतिम् ।।

एकसंधिविहीने तु चान्यत्र [109]द्विगुणं भवेत् ।
संधिद्वयार्चने हीने शान्तिहोमं तु कारयेत् ।।८१।।
गुणसंधिविहीने च पञ्चगव्येन सेचयेत् ।
एकाहेऽत्र विहीने तु स्नपनं कारयेत्ततः ।।८२।।
अहोरात्रादिपञ्चाहे[110] स्नपनं शान्तिहोमकम् ।
पक्षहीने दिशाहोमं स्नपनं चात्र कारयेत् ।।८३।।
मासादूर्ध्वविहीने तु [111]जलसंप्रोक्षणं कुरु ।

[नित्यहोमविहीने]

[112]नित्यहोम[113]विहीने चेदनावृष्टिर्भविष्यति ।।८४।।

चतुर्थाहे तु पञ्चाहे पूजाहानिसमन्विते ।
पञ्चाशत्संख्यया चैव कलशस्नपनं क्रमात् ।।
षड्दिनादिदशाहान्तं कृत्वैकाशीतिकुम्भकम् ।
एकादशादिपक्षान्तं पूजाहीने तु संभवे ।।
कृत्वा तत्र शिवाग्निं तु स्नपनं च शताष्टकैः ।
पूर्ववत्पूजनं कुर्यान्निवेद्यं द्विगुणं भवेत् ।।
शिखामन्त्रं शतं हुत्वा पायसान्नं निवेदयेत् ।
पूजाहानौ तु मासान्तं कलशानां शतत्रयम् ।।
हृन्मन्त्रैश्च शतं हुत्वा क्षीरान्नं च निवेदयेत् ।
द्विमासमर्चनाहीने सहस्रकलशान्क्रमात् ।।
षण्मासार्चनाहानौ तत्र संप्रोक्षणं चरेत् ।'
(*मकुटे* ६.२ उ० –११ पू०);
'नित्यार्चनाविहीने तु शान्तिहोमं तु कारयेत् ।
संध्यातिक्रमणे चैव द्विगुणं पूजयेत्ततः ।।
संध्याया द्वित्रये हीने पञ्चगव्याभिषेचनम् ।
शान्तिहोमं ततः कुर्यात्संख्यया पूजयेच्छिवम् ।
एकाहे त्रियहे वापि पञ्चाहे वापि हीनके ।।
शान्तिहोमं ततः कुर्यात्स्नपनं तत्र कारयेत् ।
दिशाहोमं चार्धमासे स्नपनं चैव कारयेत् ।।
इत ऊर्ध्वं तु मासे स्याज्जलसम्प्रोक्षणं कुरु ।
स्थिरलिङ्गे इदं प्रोक्तं चललिङ्गे ह्यतः शृणु ।।
एकाहादिविहीने तु द्विगुणं पूजयेत्ततः ।
त्रिंशात्तु दिवसादूर्ध्वं स्नपनं कारयेत्ततः ।।
षण्मासात्परतो विप्र जलसंप्रोक्षणं कुरु ।'
(*वीरे* ५२.३५–४१ पू०);
'नित्यार्चनाविहीने तु प्रायश्चित्तं शृणु प्रिये ।
स्थिरलिङ्गार्चने हीने स्नपनं तत्र कारयेत् ।।
सप्तरात्रात्परं देवि जलसंप्रोक्षणं भवेत् ।
चललिङ्गेऽर्चनाहीने द्विगुणं पूजयेत्ततः ।।
मासादुपरि हीने तु स्नपनं तत्र कारयेत् ।
षण्मासादुपरिष्टात्तु जलसंप्रोक्षणं भवेत् ।।
प्रतिमेष्वेवमेवं स्यात्स्नपनं प्रोक्षणं भवेत् ।
(*संतानसंहिता* ५६.४७ उ० –५०)

[108] ८०उत्तरार्धप्रभृति ८४पूर्वार्धपर्यन्तो भागः *सकलागम-प्रायश्चित्ते* टि० १६०.२१५–२१६ पृष्ठेषु '*अजिते*' इति निर्दिश्योद्धृतः । 'इ' मातृकायां '८३ उ०, ८४ पू० एतदर्धद्वयमेव दृश्यते । अत्र औचित्यात् ८० उ० –८३ पू० श्लोकाः संघटिताः ।

[109] अत्र 'पूजनं' इति शेषः ।

[110] अत्र 'हीने' इति शेषः ।

[111] मूलसंप्रोक्षणं –इ

[112] 'नित्यहोमविहीनं स्यादनावृष्टिर्भविष्यति ।
एकसंधिविहीने तु हुत्वा पाशुपतं शतम् ।।
संधिद्वयविहीने तु मूलेनैव शतं हुनेत् ।
संधित्रयविहीने च घोरेण जुहुयाच्छतम् ।।
तथा त्रियम्बकेनैव शेषं पूर्ववदाचरेत् ।
एकाहं होमहीने च पञ्चब्रह्मषडङ्गकै ।।
अष्टोत्तरशतं हुत्वा मन्त्रैरेतैः पृथक् पृथक् ।
विहीने चैव पञ्चाहे स्नपनं कारयेत्ततः ।।
मूलेनैव शतं हुत्वा शतद्वयं शतं जपेत् ।
दशाहे तु विहीने च पञ्चाग्निमाकलय्य च ।।
तत्र होमो विधातव्यः प्रत्येकं तु शतं क्रमात् ।

एकसंधिविहीने तु [114]हुनेत्पाशुपतं शतम् ।
संधिद्वयविहीने तु मूलेनैव शतं [115]हुनेत् ॥८५॥
तथा त्रियम्बकेनैव होमं पूर्ववदाचरेत् ।
एकाहे तु विहीने च पञ्चब्रह्मषडङ्गकैः ॥८६॥
अष्टोत्तरशतं [116]हुनेन्मन्त्रैरेतैः पृथक् पृथक् ।
पञ्चाहे तु विहीने तु स्नपनं कारयेत्ततः ॥८७॥
मूलेनैव शतं हुत्वा स्नपनं शान्तिहोमकम् ।
हुत्वा पाशुपतेनैव जपेत्पञ्चशतं पुनः ॥८८॥

[[117]सायरक्षाविहीने]

सायरक्षाविहीने तु यजमानाय नाशनम् ।
स्नापयेत्पञ्चगव्यैश्च चार्चनोक्तं समर्चयेत् ॥८९॥
सायरक्षाविधानोक्तं कृत्वा मूलं शतं [118]हुनेत् ।

[[119]नीराजनविहीने]

नीराजनविहीने च दुर्भिक्षं ग्रामवासिनाम् ॥९०॥

ततः पाशुपतेनैव जपेत्पञ्चाशतं परम् ॥
पक्षहोमविहीने तु मूर्तिहोमं तु कारयेत् ।
स्नपनं कारयेदन्ते शस्त्रं पञ्चशतं जपेत् ॥
मासहोमविहीने तु पञ्चब्रह्मषडङ्गकैः ।
क्षुरिकाबीजमुख्यैश्च मन्त्रैश्चैव दशाक्षरैः ॥
प्रत्येकं तु शतं हुत्वा मूलमन्त्रं शतं जपेत् ।
स्नपनं कारयेत्पश्चात्पूजयित्वा विशेषतः ॥
मासादूर्ध्वविहीने तु दिशाहोमं तु कारयेत् ।
कृत्वा स्नपनमभ्यर्च्य प्रभूतं तु हविर्ददेत् ॥'
(*पूर्वकारणे* १४४.९७—१०६)
नित्ये नैमित्तिके काम्ये त्वकृते वह्निकर्मणि ।
अवग्रहो भवेत्तत्र शान्तिहोमं समाप्य च ॥
पुनस्तत् त्रिगुणं कार्यं तन्मात्रं वा द्विजोत्तमाः ।
यदि देशिकसामर्थ्याद् द्विसन्ध्यादौ समाचरेत् ॥
होमद्रव्याणि यावन्ति परित्यक्तानि देशिकैः ।
तत्तद्द्रव्याणि तावन्ति मिलित्वा दिनवृद्धितः ॥
(*उत्तरकामिके* ३०.२५८ पू०—२६१ पू०)

[113]विहीनं स्यादना—इ

[114]हुत्वा पाशु—इ

[115]भवेत्—इ

[116]हुत्वा मन्त्रै—इ

[117]सायरक्षाविहीने च बालानां नाशनं भवेत् ।
स्नापयेत्पञ्चगव्येन ह्यर्चनोक्तं समाचरेत् ॥
मूलमन्त्रं शतं जप्त्वा द्विगुणान्तं समर्चयेत् ।'
(*पूर्वकारणे* १४४.१०८, १०९ पू०)
सायरक्षाविहीने च बालानां नाशनं भवेत् ।
शान्तिहोमसमायुक्तं नवकैरभिषेचयेत् ॥
(*अंशुमति* ३७.२४९ उ०, २५० पू०)

[118]भवेत्—इ

[119]'नीराजने तदङ्गे वा हीनेऽग्निभयमादिशेत् ।
देवं संस्नाप्य गव्येन समभ्यर्च्यादराद्गुरुः ॥
द्विगुणं तु नयेत्पश्चाद्यानि हीनानि तानि च ।
शान्तिहोमस्तु वा कार्यो मूर्तिहोमोऽथवा पुनः ॥'
(*उत्तरकामिके* ३०.३०१, ३०२)
'नीराजनविहीने तु क्षुद्बाधा ग्रामवासिनाम् ।
लिङ्गं वा प्रतिमां वापि स्नापयेत्पञ्चगव्यकैः ॥
अर्चनोक्तं समभ्यर्च्य पुण्याहं वाचयेत्ततः ।
शिवमन्त्रं शतं जप्त्वा पश्चान्नीराजनं कुरु ॥
(*पूर्वकारणे* १४४.१०९ उ०—१११ पू०)

लिंङ्गं वा कौतुकं वापि स्नापयेत्पञ्चगव्यकैः ।
अर्चनोक्तं समभ्यर्च्य पुण्याहं वाचयेत्ततः ।।९१।।
शिवमन्त्रं शतं जप्त्वा नीराजनमतः परम्[120] ।

[द्वारपूजाविहीने[121]]

द्वारपूजाविहीने च सस्यानां नाशनं भवेत् ।।९२।।
द्वारस्थदेवतानां च [122]मन्त्रैरेव पृथक् पृथक्[123] ।
गन्धपुष्पादिभिश्चैव पूर्ववत्संप्रपूजयेत् ।।९३।।

[नित्योत्सवविहीने[124]]

नित्योत्सवविहीने तु धान्यनाशं [125]विनिर्दिशेत् ।

---

[120] अत्र कुर्यादिति शेषः ।

[121] 'द्वारपालार्चने हीने विघ्नबाधा द्विजोत्तमाः ।
तदर्थं संहिताहोमं समाप्य द्वारपान्यजेत् ।।'
(*उत्तरकामिके* ३०.२०५ उ०, २०६ पू०);
'द्वारपूजाविहीने च सस्यानां नाशनं भवेत् ।
द्वारस्थदेवतानां च मन्त्रेणैव शतं जपेत् ।।
गन्धपुष्पादिभिश्चैव पूर्ववत्संप्रपूजयतेत् ।'
(*पूर्वकारणे* १४४.१११ उ०, ११२)

[122] मन्त्रैरेतैः —इ

[123] अत्र 'जपेत्' इत्यध्याहृत्य व्याख्येयम् ।

[124] 'नित्योत्सवविहीने तु धान्यनाशो भवेद्ध्रुवम् ।
संध्यैकेन विहीने तु स्नापयेत्पञ्चगव्यकैः ।।
मूलमन्त्रं शतं जप्त्वा चोत्सवं पूर्ववत्कुरु ।
सन्धिद्वयविहीने तु शान्तिद्वयं जपेद्गुरुः ।।
एकाहोत्सवहीने च स्नपनं कारयेत्प्रभोः ।
पञ्चाहे चोत्सवे हीने मूलनैव शतं हुनेत् ।।
स्नपनं कारयेच्छम्भोः पूजयेद्विधिपूर्वकम् ।
दशाहे स्नपनं कुर्याच्छान्तिहोमं तु कारयेत् ।।
पक्षाहे चोत्सवे हीने मूर्तिहोमं च कारयेत् ।
स्नपनं कारयेच्छम्भोः पूजयित्वा विधानतः ।।
मासे नित्योत्सवे हीने विद्याङ्गैर्ब्रह्मपञ्चकैः ।
मासादूर्ध्वविहीने तु दिशाहोमं तु कारयेत् ।।
कृत्वा संपूज्य देवेशं मूलनैव शतं जपेत् ।।
षण्मासाद्वत्सरान्तं वा नित्योत्सवविहीनकम् ।
चोरबाधा भवेल्लोके दुर्भिक्षं स्यात्प्रजापते ।।
षडङ्गैर्बीजमुख्यैश्च शिवार्णैश्च दशाक्षरैः ।
प्रत्येकं त्रिशतं हुत्वा मूलेनैव शतं हुनेत् ।।
तत्संख्यातैर्जपं कुर्यात्स्नपनं कारयेद्विभोः ।
अष्टोत्तरशतैः कुम्भैः सहस्रकलशैर्यजेत् ।।
(*पूर्वकारणे* १४४.११३—१२२ पू०)
नित्योत्सवविहीनश्चेत्सर्वदोषाकरो नृणाम् ।
तदा देवं समभ्यर्च्याघोरेणैव शतं हुनेत् ।।
संधित्रयेऽपि हीने तु शान्तिहोमं समाचरेत् ।
अहोरात्रे विहीने तु स्नपनं कारयेच्छिव ।।
पञ्चाहात्तु तदेव स्यादघोरशतहोमयुक् ।
दशाहे स्नपनं शान्तिहोमसंयुक्तमाचरेत् ।।
तस्य पक्षकविच्छेदे शान्तिः स्यात्स्नपनेन तु ।
एकमासान्तरे हीने स्नपनं च दिशाहुतिः ।।
शान्तिस्तदूर्ध्वं स्यात्किं तु त्रिदिनं ब्राह्मणोत्तमाः ।
पक्षान्तरे ततोप्यूर्ध्वं यदि निष्कृतिरृक्षकम् ।।
वर्धयेद्युग्मसंख्यातदिनपक्षावसानकम् ।
नित्योत्सवश्च कर्तव्यो निष्कृतेरनु देशिकैः ।।
(*उत्तरकामिके* ३०.२७२—२७७);
नित्योत्सवविहीने तु स्नपनं तत्र कारयेत् ।
पुनर्नित्योत्सवं कुर्यात्
(*संतानसंहिता* ५६.५५);
'नित्योत्सवविहीने च परचक्राद्भयं भवेत् ।
शान्तिहोमं ततः कृत्वा स्नपनैरभिषेचयेत् ।।

[126]सन्ध्यैकेन विहीने तु स्नापयेत्पञ्चगव्यकैः ॥९४॥
मूलमन्त्रं शतं जप्त्वा चोत्सवं पूर्ववत्कुरु ।
सन्धिद्वयविहीने तु शान्तिहोमं तु कारयेत् ॥९५॥
एकाहे चोत्सवे हीने स्नपनं कारयेत्प्रभोः ।
पञ्चाहे चोत्सवे हीने मूलेनैव शतं हुनेत् ॥९६॥
स्नपनं कारयेच्छम्भोः पूजयेद्विधिपूर्वकम् ।
दशाहे[127] स्नपनं कृत्वा शान्तिहोमं तु कारयेत् ॥९७॥
पक्षे चोत्सवहीने च मूर्तिहोमं तु कारयेत् ।
स्नपनं कारयेच्छम्भोः पूजयेत्तु विशेषतः ॥९८॥
मासे नित्योत्सवे हीने विद्याङ्गैर्ब्रह्मपञ्चकैः ।
षडङ्गैर्बीजमुख्यैश्च मन्त्रैश्चैव दशाक्षरैः ॥९९॥
प्रत्येकं तु शतं हुत्वा मूलनैव शतं हुनेत् ।
तत्सङ्ख्याकं जपं कुर्यात्स्नपनं कारयेत्ततः ॥१००॥
मासादूर्ध्वविहीने तु दिशाहोमं तु कारयेत् ।
स्नपनं कारयेच्छम्भोः पूजयेद्विधिपूर्वकम् ॥१०१॥

[[128]सौख्यहीने]

सौख्यहीने विशेषेण महामारी प्रवर्तते ।

त्रियम्बकमनुं जप्त्वा पश्चान्मन्त्रशतं हुनेत् ।'
नित्योत्सवं ततः कृत्वा
(सूक्ष्मे ६३.३३, ३४)

[125]विनिर्भवेत्—इ

[126]संध्यैके तु—इ

[127]अत्र 'नित्योत्सवे हीने' इति शेषः ।

[128]सौख्यसंधिविहीने च महामारी प्रवर्तते ।
संध्येकं सौख्यहीने च पञ्चगव्याभिषेचनम् ॥
कृत्वा संपूज्य देवेशं मूलेनैव शतं जपेत् ।
संधिद्वयविहीने च शान्तिहोमं तु कारयेत् ॥
एकाहे सौख्यहीने च स्नपनं कारयेद्बुधः ।
पञ्चाहे स्नपनं कृत्वा शान्तिहोमं तु कारयेत् ॥
अर्धमासे विहीने च स्नपनं मूर्तिहोमकम् ।
एकमासे विहीने च पञ्चब्रह्मषडङ्गकैः ॥
त्रियम्बकेन मन्त्रेण मूलेनैव तु देशिकः ।
प्रत्येकं तु शतं जप्त्वा तत्संख्यातैर्जपं कुरु ॥
स्नपनं च ततः कृत्वा प्रभूतं च हविर्ददेत् ।
मासादूर्ध्वविहीने तु दिशाहोमं तु कारयेत् ॥
कृत्वा स्नपनमभ्यर्च्य प्रभूतं च हविर्ददेत् ।'
('अंशुमति' इति सकलागमप्रायश्चित्ते टि० २०३; पृ० ३८, ३९);
'सौख्यं चेन्न कृतं विद्यात्तदा तल्लोकदुःस्थितिम् ।
पञ्चविंशतिभिः कुर्यात्स्नपनं कलशैस्तदा ॥
नवभिः कलशैर्वाथ गव्यस्नपनमेव वा ।
सौख्यानि यानि हीनानि तत्सौख्यं द्विगुणं नयेत् ॥
पञ्चाशत्स्नपनाख्यं स्यादनेकदिनलोपने ।
सौख्याङ्गे तु विहीने वा द्विगुणं तु तदा नयेत् ॥'
(उत्तरकामिके ३०.२९१—२९३);
'एकाहे सौख्यहीने तु षोडशस्नपनं नयेत् ।
सन्धिद्वयविहीने तु शान्तिहोमं च कारयेत् ॥
पञ्चाहे स्नपनं कुर्याच्छान्तिहोमपुरस्सरम् ।
दशाहे च विहीने तु स्नपनं मूर्तिहोमयुक् ॥
पक्षाहे च विहीने च स्नपनं मूर्तिहोमकम् ।
एकमासविहीने च पञ्चब्रह्मषडङ्गकैः ॥
त्रियम्बकेन मन्त्रेण मूलेनैव तु देशिकः ।
प्रत्येकं त्रिशतं हुत्वा तत्सौख्यादेर्जपं कुरु ॥

[१२९]सन्ध्यैके सौख्यहीने चेत्पञ्चगव्याभिषेचनम् ।।१०२।।
कृत्वा संपूज्य देवेशं मूलेनैव शतं जपेत् ।
सन्धिद्वयविहीने तु शान्तिहोमं तु कारयेत् ।।१०३।।
अर्धमासे
[ग्रन्थपातः]

इत्यजिताख्ये महातन्त्रे [क्रियापादे] प्रायश्चित्तविधिः
[षट्सप्ततितमः] पटलः ।

स्नपनं तु ततः कृत्वा प्रभूतहविषं ददेत् ।'
(*पूर्वकारणे* १४४.१२२ उ० —१२६) [१२९]संध्येके सौख्यहीनं स्यात् —इ

[सप्तसप्तातितमः पटलः]

[सकलार्चनविधिः[1]]

[2]वक्ष्येऽहं सकलार्चां तु सर्वाभीष्टफलप्रदाम् ।
शौचमाचमनं स्नानं सन्ध्यावन्दनतर्पणे ।।१।।
कृत्वा प्रविश्य हर्म्यं तु पादशौचं विधाय च ।
सम्यगाचम्य सङ्गृह्य भसितं वारिणा सह ।।२।।
त्रिपुण्ड्रं विधिना कृत्वा करन्यासं विधाय च ।
तत्करेण च संयोज्य शिवे ह्यात्मानमादरात् ।।३।।
भूतशुद्धिं सुधाप्लावमात्मावाहनमेव च ।
करन्यासे च विन्यासो ब्रह्मणामीशपूर्वकम् ।।४।।
स्वविग्रहकलान्यासे त्वीशानं मूर्ध्नि विन्यसेत् ।
पुरुषं वदने सर्वं मालामन्त्रमनुस्मरन् ।।५।।
अन्यत्पूर्वसमानं स्यादेकत्रिंशत्कला न्यसेत् ।
अन्तर्यागं ततः कृत्वा स्थानशुद्धिं ततो नयेत् ।।६।।
विशेषार्घ्यं च सङ्कल्प्य गन्धपुष्पाक्षतैर्युतम् ।

---

[1]अयं पटलः 'इ' मातृकायां परं दृश्यते। एतद्विषये *अंशुमदागमे* सकलार्चनपटलः; *उत्तरकामिके* ३; *दीप्ते* ५०; *विजयोत्तरसंहितायां* ३; *वीरे* ५७; *सूक्ष्मे* ८७ पटला द्रष्टव्याः ।

[2]'इ' मातृकायाम् अस्मिन्पटलारम्भे ग्रन्थपातो दृश्यते। 'बेरे सदाशिवे वापि' इत्यारभ्य 'नित्ये प्रवर्तमाने तु यदा' इत्यन्तं एकविंशति श्लोका एव दृश्यन्ते। एते च श्लोका उत्तरकामिकागमे सकलार्चनपटलस्थ २७—४२ श्लोकानां च प्रायेण सादृश्यं दृश्यते। अतः पटलादौ लुप्तः १—२६ श्लोकान्तो भागः उत्तरकामिकश्लोकैः पूरितः ।

'अथ सन्ध्यावसाने तु महेशस्याग्रदेशके।
संशोध्य बहुरूपेण प्रोक्षयेत्पुरुषेण तु ।।
शङ्खं च जलभाण्डं च पात्राधारं च पादुके।
गन्धपुष्पं च धूपं च दीपं छत्रं च दर्पणम् ।।
खण्डवस्त्रं च खड्गं च खेटकं चामरं तथा।
कौपीनं चित्रवस्त्रं च भूषणं चोपवीतकम् ।।
अन्यानि राजोपचारचिह्नानि विविधानि च।
बिम्बाग्रदेशे विन्यस्य प्रोक्षयेदस्त्रवारिणा ।।
पाद्यमाचमनं चार्घ्यं कल्पयेद्विधिपूर्वकम्।
स्नानार्थमुदकं ग्राह्य शुद्धिं कृत्वा विशेषतः ।।
प्रोक्षयेद्बीजमुख्येन शुद्धतोयेन देशिकः।
आवाह्य तत्र देवेशं स्थापनादि तथैव च ।।
स्वागतार्घ्यं ततो दत्त्वा हृन्मन्त्रेण समर्चयेत्।
पाद्यमाचमनं चार्घ्यं दापयेत्तु महेश्वरे।
पूर्वसंध्यार्चितं पुष्पमीशानेन विसर्जयेत् ।।
दर्पणं दर्शयेद्विद्वान्स्नानवेद्युपरि स्थितः।
रुद्रसूक्तजपं कृत्वा दर्पणे स्नानमाचरेत् ।।
गौरीमिमायमन्त्रेण देव्याः स्नानं च पूर्ववत्।
प्रोक्षयेद्बीजमुख्येन शुद्धतोयेन देशिकः ।।
खण्डवस्त्रेण संमृज्य वस्त्रपुष्पस्रगादिभिः।
भूषणाद्यैरलङ्कृत्य कलामन्त्रैः समर्चयेत्।
अङ्गमन्त्रेण चाभ्यर्च्य नैवेद्यादींश्च दर्शयेत् ।।
धूपदीपं ततो दत्त्वा भसितं दापयेद्बुधः।
छत्रं च चामरं खड्गं दापयेन्मूलमन्त्रतः ।।
सर्वोपचारैर्विधिवत्सन्तोषयेन्महेश्वरम्।
महेशप्रतिमादीनि एवमेव प्रपूजयेत् ।।
एककालं द्विकालं वा चार्चयेत्सन्धिपूर्वकम् ।'

(*सूक्ष्मशास्त्रे* टि० ९७ पृ० ३४८, ३४९)

ईक्षणाद्यैश्चतुर्भिस्तु द्रव्यशुद्धिं तु पूर्ववत् ।।७।।
कृत्वात्मानं समभ्यर्च्य मन्त्रशुद्धिं समाचरेत् ।
द्वारं संप्रोक्ष्य चास्त्रेण वृषमग्रे समर्चयेत् ।।८।।
द्वारपार्श्वोभयत्रापि गणपं च सरस्वतीम् ।
नन्दिनं च महाकालं गङ्गाह्वां यमुनामपि ।।९।।
संपूज्योदुम्बरे शस्त्रं प्रविश्यान्तःपुटं पुनः ।
दत्त्वा पुष्पं च वास्त्वीशे दत्त्वार्घ्योदं शिरस्यथ ।।१०।।
शिवस्येशानमन्त्रेण मालाद्यमपनीय च ।
शुद्धिं कृत्वा विधानेन पटाद्यैर्वोदकेन वा ।।११।।
आधाराख्यमनन्तं च धर्माधर्माद्यमेव च ।
अधश्चोर्ध्वच्छदे पद्मकर्णिके शक्तिपुञ्जकम् ।।१२।।
वामाद्यं हृदयोपेतं शिवासनमनुस्मरन् ।
तस्मिन्मूर्तिं समावाह्य विद्यादेहं प्रकल्पयेत् ।।१३।।
सदाशिवो महेशश्च रुद्रश्चेति त्रिधा मतः ।
शिवदेह इति प्रोक्तो विद्यादेहः स उच्यते ।।१४।।
या तस्य विमला शक्तिः शिवस्य समवायिनी ।
सैव मूर्तिः क्रियाभेदात्सदाशिवतनुर्मता ।।१५।।
तथा माहेश्वरी मूर्तिः किं तु सौम्यस्वरूपिणी ।
तद्वद्रौद्री समाख्याता किं तु सोग्रस्वरूपिणी ।।१६।।
आसां कुण्डलिनी शक्तिः क्रियाख्यानां तु कारणम् ।
ब्रह्मा विष्णुश्च रुद्रश्च महेशश्च सदाशिवः ।।१७।।
एते कारणदेवाः स्युः क्षेत्रज्ञाः परिकीर्तिताः ।
ब्रह्मविष्णुवोश्च मूर्तेस्तु माया कारणमिष्यते ।।१८।।
रुद्रेश्वरसदेशानां क्रियाख्या तनुकारिणी ।
इत्येवं त्रिविधाः प्रोक्ता रुद्रेश्वरसदाशिवाः ।।१९।।
तस्माज्ज्ञानमयो देहः शिवस्य परिकीर्तितः ।
तद्देहत्रयसिद्ध्यर्थं मूर्तिमादौ प्रकल्पयेत् ।।२०।।
हृत्संपुटेन संयोज्य तस्यां ब्रह्माणि कल्पयेत् ।
कलान्यासं ततः कुर्यात्तद्विधानमिहोच्यते ।।२१।।
सदेशे देहसिद्ध्यर्थमष्टत्रिंशत्कला मताः ।
रुद्रेशयोः शरीरार्थमेकत्रिंशत्कला मताः ।।२२।।
अष्टत्रिंशत्कलान्यासः प्रागेव प्रतिपादितः ।
एकत्रिंशत्कलान्यासे विशेषः कश्चिदिष्यते ।।२३।।
एकमेव शिरो वक्त्रं महेशे रुद्रविग्रहे ।
तत्रेशानेन वक्त्रेण मनुना सकलेन च ।।२४।।
कलात्मना विशिष्टं तु पूर्ववत्परिकल्पयेत् ।
ध्यात्वा सदाशिवं रूपं तच्चतुर्दशसंयुतम् ।।२५।।
षष्ठस्वरसमोपेतं बिन्दुनादविभूषितम् ।
सान्तं हृत्संपुटं कृत्वा विद्यादेहं प्रकल्पयेत् ।।२६।।

बेरे सदाशिवे वापि लिङ्गेऽप्येवं समाचरेत् ।
महेशनृत्तमूर्त्यादिध्यानं शान्तमनुस्मरन् ॥२७॥
प्रतिमालक्षणोक्तं च महेशमनुना युतम् ।
कालान्तकगजघ्नादिरूपं रौद्रमनुस्मरन् ॥२८॥
तन्मन्त्रेण समोपेतं विद्यादेहं प्रकल्पयेत् ।
महेशरुद्रमूर्तौ च मन्त्रः सदाशिवेऽपि च ॥२९॥
विद्यादेहार्थ[३]मुद्दिष्टः सर्वत्र शिव एव च ।
आवाह्यः स मनुर्मन्त्रोद्धारे[४] प्रागेव कीर्तितः ॥३०॥
तेनावाह्य शिवं [५]देहत्रितये पूर्ववर्त्मना ।
स्थापनाद्यं ततः कुर्यात्पाद्याद्यं च महेश्वरे[६] ॥३१॥
[७]गन्धं पुष्पं च धूपं च दीपं नैवेद्यमप्यथ ।
ताम्बूलसहितं सर्वं निष्कलार्चनवन्नयेत् ॥३२॥
पञ्चावरणसंयुक्तं[८] चतुस्त्रिद्व्येकसंवृतौ[९] ।
इष्टावरणसंयुक्तं प्रागुक्तविधिना गुरुः ॥३३॥
परिवारयुतं चेत्तु बलिं तस्मिन्समाचरेत् ।
होमं नित्योत्सवं चापि [१०]स्वप्रधाने समाचरेत् ॥३४॥
शुद्धनृत्तं च [११]यत्प्रोक्तं सर्वं प्रकृ[ति]वन्नयेत् ।
द्वारपालार्चनोपेतं बलि[१२]होमसमन्वितम् ॥३५॥
शुद्धनृत्तं च [१३]हित्वान्यत्कर्म वा सर्वमाचरेत् ।
प्रदोषादौ [१४]नटेशस्य कुर्यान्नीराजनक्रियाम् ॥३६॥
[१५]उत्सवं स्नपनं चैव दमनारोहणक्रियाम् ।
पवित्रारोहणं सम्यक्कृत्तिकादीपमेव च ॥३७॥
संवत्सरादि[१६]खेलां च वसन्ताख्यं तदुत्सवम् ।
मासोत्सवं तथा मासे नवनैवेद्यकर्म च ॥३८॥
प्रायश्चित्तं च जीर्णानामुद्धारं च गुरूत्तमः ।
देवोक्तमखिलं सर्वं देव्याश्चापि समाचरेत् ॥३९॥
[१७]किं चाषाढेऽश्विनीमासे पूर्वफल्गुनिसंयुते ।
पूरकर्मादि कर्तव्यमादिशक्तेर्द्विजोत्तम[१८] ॥४०॥

---

[३]मुद्दिष्टं —इ
[४]मन्त्रोद्धारः —इ
[५]देवं क्रियये —इ
[६]महेश्वरम् —इ
[७]गन्धपुष्पं —इ
[८]संयुक्तां —इ
[९]संवृतिम् —इ
[१०]सम्प्रधाने —इ
[११]यत्कृत्तं —इ
[१२]होमोत्सवान्वितम् —इ
[१३]हुत्वान्यत् —इ
[१४]न देशस्य —इ
[१५]उत्सवस्नपनं —इ
[१६]लेख्यां वस —इ
[१७]कृत्वाषाढे —इ
[१८]द्विजोत्तमाः —इ

गौरी माहेश्वरी मूर्तिः सदेशे तु मनोन्मनी ।
[१९]मनोन्मन्यणुना [२०]मूर्तिं मनोन्मन्याः प्रकल्पयेत् ।।४१।।
गौरीमन्त्रेण गौर्यास्तु [२१]षड्विंशतिकलान्विताम् ।
आदिशक्त्यणुना तस्यामादिशक्तिं प्रपूजयेत् ।।४२।।
[२२]विशेषपूजा तेनैव [२३]वर्तनीयेष्टसिद्धये ।
[२४]दिनमेकं समारभ्य सप्ताहान्तं समाचरेत् ।।४३।।
द्विगुणं त्रिगुणं वापि चतुःपञ्चगुणं तथा ।
षट्सप्तगुणसङ्ख्यातं कर्मसिद्ध्यन्तमेव च ।।४४।।
पूजा वैशेषिकी[२५] ख्याता पूर्वोक्तफलदायिनी ।
[२६]नैमित्तिकं तु नित्यान्ते कर्तव्यं [२७]चाविरोधतः ।।
नित्ये प्रवर्तमाने तु यदा [नैमित्तिकं भवेत्] ।।४५।।
[ग्रन्थपातः]

इत्यजिताख्ये महातन्त्रे [क्रियापादे] सकलार्चनविधिः
[सप्तसप्ततितमः] पटलः ।

---

[१९]मनोन्मन्यधुना—इ
[२०]मूर्ति—इ
[२१]षड्विंशेति—इ
[२२]४३—४७ श्लोका उत्तरकामिके चतुर्थपटले दृश्यन्ते ।
[२३]वर्तनीयेषु—इ
[२४]वारमेकं समारभ्य सप्ताहान्तं समाचरेत् ।
द्विगुणं त्रिगुणं चापि चतुष्पञ्चगुणं तु वा ।।
षट्सप्तगुणसंख्यातं कर्मसिद्ध्यन्तमेव वा ।
विशेषपूजा चैवोक्ता पूर्वोक्त[फलदायिनी] ।।
नैमित्तिकं च कर्तव्यं नित्यान्तेऽप्यविरोधतः ।
वर्तमाने तु नित्ये तु यदा नैमित्तिकं भवेत् ।।
समाप्य कलिते काले नित्यं नैमित्तिकं चरेत् ।
संध्यापरार्धकाले चेत्पूर्वार्धे विद्यते यदि ।।
कार्यं नैमित्तिकं कालेऽप्यविचार्य विशेषतः ।
अल्पकालेन संध्यां वै अपरार्धे समाचरेत् ।।
तन्त्रेण वाप्युनुष्ठानमुभयत्र समाचरेत् ।।'
(*अचिन्त्यविश्वसादाख्ये* ३९ [विशेषपूजाविधौ] ११—१६ पू०);
'तस्मात्पूजा विधानेन पूजाकर्मविधिं शृणु ।
दिनमेकं समारभ्य सप्ताहान्तं समाचरेत् ।।
द्विगुणं त्रिगुणं वापि चतुष्पञ्चगुणं तथा ।
षट्सप्तगुणसंख्यातं कर्मसिद्ध्यन्तमेव वा ।।
पूजा वैशेषिकी ख्याता पूर्वोक्तफलदायिनी ।
नैमित्तिकं तु नित्यान्ते कर्तव्यं संनिबोधत ।।
नित्ये प्रवर्तमाने तु यदा नैमित्तिकं भवेत् ।
समाल्याद्येन महता नित्यनैमित्तिकं चरेत् ।।
संध्यापरार्धकाले चेत्पूर्वार्धे विद्यते यदि ।
नैमित्तिकं स्वकाले तु कर्तव्यमविचारतः ।।
संध्यामप्यर्धकालेन चापरार्धं समाचरेत् ।
तन्त्रेण चाप्यनुष्ठानं काम्यमेवं विधिं शृणु ।।
स्नानान्तं वाथ नैवेद्यपर्यन्तं नित्यमेव वा ।
विधाय प्राप्तकाले तु काम्यं चैव समाचरेत् ।।
एकमावरणानां तु संध्याशेषं समाप्य च ।
नैमित्तिकं तु नित्यान्ते सायाह्नात्पूर्वमेव हि ।।'
(*स्वायम्भुवे* १५ [विशेषपूजायाम्] ४—११;
[२५]वैशेषिका—इ
[२६]'नैमित्तिकं तु नित्यान्ते कर्तव्यमविरोधतः ।
नित्ये प्रवर्तमाने तु यदा नैमित्तिकं भवेत् ।।
समाप्यैकेन कालेन नित्यं नैमित्तिकं चरेत् ।
सन्ध्यायाः परकाले वा पूर्वे वा विद्यते यदि ।।
नैमित्तिकं स्वकाले तु कृतनित्याविरोधतः ।
एकत्रैव च कालेन उभयं तु समाचरेत् ।।'
(*पूर्वकारणे* १३३.८—१०)
[२७]च विरोधतः—इ

[अष्टसप्ततितमः पटलः]

[विशेषोत्सवविधिः[1]]

अथवान्यप्रकारेण [2]उत्सवं तु विधीयते ।
ध्वजमेकं समारोप्य ध्वजारोहणपूर्वकम् ।।१।।
तस्मिन्नेव दिने विप्रा मन्दीभूते दिवाकरे ।
श्रावयेत्तीर्थदिवसं गजाद्यारोहितेन च ।।२।।
चण्डालेन सदारेण कुर्याद्घोषयुतेन च ।
तद्रात्रावेव कर्तव्यं भेरीताडनपूर्वकम् ।।३।।
बेराग्रे शूलसंयुक्ते देवानावाह्य पूर्ववत् ।
आश्राव्य तीर्थदिवसं ग्रामादिबलिवर्जितम् ।।४।।
धामन्येव विधायैवं तस्माद्गत्वा जलाशयम् ।
स्थण्डिलद्वितयं कृत्वा जलतीरे गुरूत्तमः ।।५।।
एकत्र स्थापयेच्छूलमन्यत्र कलशान्न्यसेत् ।
नवकैः स्नापयेच्छूलं तच्छूलमवगाहयेत् ।।६।।
प्रविश्य देवतास्थानं तद्दिनाद्द्वादशाहके ।
यागारम्भं पुनः कुर्यादङ्कुरार्पणपूर्वकम् ।।७।।
एकहोमसमायुक्तं ग्रामादिबलिमाचरेत् ।
बेरयात्रासमायुक्तं दिवसं प्रत्यहर्निशम् ।।८।।
पञ्चमे दिवसे तत्र सिकता अस्त्रमन्त्रिताः ।
विकिरेत्सदनं सर्वमन्तर्बाह्यविकल्पितम् ।।९।।
अष्टादशदिने प्राप्ते बीजनिर्वापमाचरेत् ।
तीर्थार्थं तन्निशायां तु धाम्नस्त्वष्टदिशास्वपि ।।१०।।
ध्वजानष्टौ समारोप्याङ्किताँल्लोकेशवाहनैः ।
तदस्त्राङ्कान्वृषाङ्कान्वा मूर्तिपैश्च समन्वितम् ।।११।।
ततः प्रभृति कर्तव्यं होमकर्म विशेषतः ।
तदन्ते बलिदानं स्याद् बेरयात्रासमन्वितम् ।।१२।।
एवं नवदिनं कृत्वा दशमे तीर्थमाचरेत् ।
ध्वजानामष्टसङ्ख्यानां तद्रात्राववरोहणम् ।।१३।।
कृत्वा तद्दिनमारभ्य नानावाद्यसमन्वितम् ।
नानागानसमायुक्तं नानानृत्तसमन्वितम् ।।१४।।

---

[1]अयं पटलः 'इ' मातृकायां परं दृश्यते। तत्रापि पटलादौ ग्रन्थपातो दृश्यते। उपलभ्यमानाः १५—२१ श्लोकाः उत्तरकामिकश्लोकसदृशा वर्तन्ते। अतः पटलादौ १—१४ श्लोका महोत्सवविधौ षष्ठे पटले उपलभ्यमानैः उत्तरकामिकश्लोकैः पूरिताः।

[2]उत्सवशब्दः क्लीबे प्रयुक्तः। अत्र 'रौरवे' प्रथमे भागे ६९ पृष्ठे टिप्पणी द्रष्टव्या।

[3]ग्रामप्रदक्षिणं [4]कृत्वा [5]परिवेषं नयेत्क्रमात् ।
[6]सप्ताहमेवं कृत्वान्ते सर्वारम्भं विवर्ज्य च ॥१५॥
स्नापयेन्मौनमास्थाय सप्ताहं तदनन्तरम् ।
[7]चण्डेश्वरं पुरो नीत्वा बेरयात्रामनन्तरम् ॥१६॥
बलिहोमविहीनं तु नयेत्सप्ताहमादरात् ।
चण्डपूजासमायुक्तं होमस्नपनसंयुतम् ॥१७॥
तदन्ते कारयेत्तीर्थं त्रिशूलेन समन्वितम् ।
ध्वजावरोहणं कुर्यात्तद्रात्रौ पूर्ववर्त्मना ॥१८॥
बेरयात्राविहीनं वा विधिमेनं समाचरेत् ।
नवान्नलिङ्गं वा कृत्वा दिक्पालास्त्रार्थमेव वा ॥१९॥
[8]तैस्त्रिशूलेन वा कुर्याद्ग्रामादौ तु बलिक्रियाम् ।
[9]नित्योत्सवान्नलिङ्गादिदश वा परिकल्पयेत् ॥२०॥
[10]द्वादशाब्दावसानान्ते [11]ध्वजस्थापनमेव वा ।
जीर्णादि[12]दोषे तं त्यक्त्वा ध्वजमन्यं निवेशयेत् ॥२१॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे] विशेषोत्सवविधिः
[अष्टसप्ततितमः] पटलः ।

---

[3]कृत्वा तद्दिनमारभ्य परिवेषक्रमं नयेत् ।
सप्ताहं सर्ववाद्यादिसहितं यानहीनकम् ।
मौनं सप्तदिनं पश्चाद्यजनेन समन्वितम् ।
चण्डपूजां तदन्ते तु होमस्नपनसंयुतम् ।
पुरश्चण्डेश्वरं नीत्वा यानं सप्ताहमाचरेत् ॥
तदन्ते पूर्ववत्तीर्थं त्रिशूलसहितं नयेत् ।
ध्वजावरोहणं रात्रौ विदध्याद्विधिपूर्वकम् ॥
विजयाख्योत्सवं प्रोक्तं विशेषाद्येषु गम्यते ।
(*विजयोत्तरसंहितायाम्* ५.३४९ उ० —३५३ पू०)

[4]हित्वा —इ

[5]परिवेषक्रमविषये *अजिते* २७.२६५—२७० श्लोका द्रष्टव्याः ।

[6]सप्ताहमेव —इ

[7]चण्डेश्वरपुरो —इ; चण्डयागविषये *अजिते* २७.३१८ —३२२ श्लोका द्रष्टव्याः ।

[8]एते शूलेन —इ

[9]नित्योत्सवं न लिङ्गादि —इ

[10]द्वादशादावसानान्तं —इ

[11]ध्वजावस्थानमेव वा —इ

[12]दोषये त्यक्त्वा —इ

[एकोनाशीतितमः पटलः]

[दमनपूजाविधिः[1]]

[दमनपूजाकालः]

चैत्रमासे विधेया स्याद्दमनारोहणक्रिया ।
पवित्रं प्रकृतिर्या स्यात्तदनन्तरमुच्यते ।।१।।
[2]सप्तम्यां वा चतुर्दश्यां [3]गत्वा दमनकान्तिकम् ।
[4][शोधयित्वास्त्रमन्त्रेण पू]जयेत्संहिताणुभिः ।।२।।

[दमनमामन्त्र्य गृहानयनम्]

[5]अथ संबोधयेद्दामं[5] भववाक्येन मन्त्रवित् ।
हर[6]प्रसादसंभूत त्वमत्र संनिधीभव ।।३।।
शिवकार्यं समुद्दिश्य नेतव्योऽसि शिवाज्ञया ।
एवं दमनमामन्त्र्य [7]संरक्ष्य भवनं [8]व्रजेत् ।।४।।

---

[1]अयं पटलः 'इ' मातृकायां परं दृश्यते। एतद्विषये *अचिन्त्यविश्वससादाख्ये* ७०; *उत्तरकामिके* १३; *उत्तरकारणे* ३५; *सहस्रे* २३; *स्वायम्भुवे* २६ पटला द्रष्टव्याः ।

[2]सप्तम्यां वा त्रयोदश्यां गत्वा दमनकान्तिकम् ।
शोधयित्वास्त्रमन्त्रेण पूजयेत्संहिताणुभिः ।।
अथ सम्बोधयेद्दामं शिववाक्येन मन्त्रवित् ।
हरप्रसादसंलब्ध त्वमत्र सन्निधीभव ।।
शिवकार्यं समुद्दिश्य नेतव्योऽसि शिवाज्ञया ।
एवं दमनमामंत्र्य संरक्ष्य भवनं व्रजेत् ।।
यदि दूरं समानीय समूलं मृत्तिकान्वितम् ।
पुनरारोप्य मृत्पूर्णे पात्रे संसिच्य वारिणा ।।
गृहेऽप्यामन्त्रणं कार्यं पूर्वोक्तविधिना बुधः ।
सायाह्नसमये प्राप्ते विदध्यादधिवासनम् ।।
आहृत्य यागवस्तूनि कृतस्नानादिसत्क्रियः ।
यथाविधि समभ्यर्च्य भानुशङ्करपावकान् ।।
पश्चिमे देवदेवस्य तस्य मूलं मृदा युतम् ।
सद्योजातेन मनुना दीपितं हृदयेन वा ।
वामेन शिरसा वापि नालं धात्रीमथोत्तरे ।।
दक्षिणे भस्मपात्रं च शिखया रूपिणाथवा ।
पुंसा वा वर्मणा प्राच्यां सपुष्पं दन्तधावनम् ।।
फलं मूलेन गायत्र्या ऐशान्यां गन्धसंयुतम् ।
पञ्चाङ्गमञ्जलौ कृत्वा दामं पुष्पाक्षतान्वितम् ।।
(*उत्तरकामिके* १३.५ उ० — १४);
सप्तम्यां च त्रयोदश्यां गत्वा दमनकान्तिकम् ।
शोधयित्वा तमस्त्रेण पूजयेत्संहिताणुभिः ।।
(*अचिन्त्यविश्वसादाख्ये* ७०.५)

[3]दत्त्वा दमनक . . . तम् — इ

[4]अत्र कोष्ठान्तर्गतः सर्वोऽपि भागः उत्तरकामिकागममनुसृत्य संघटितः ।

[5]'संबोधयेत्तु तद्दान्तं भगवान्येन मन्त्रवित् ।
ईशप्रसादाज्जातोऽसि ममार्थे संनिधीभव ।।
शिवकार्यं समुद्दिश्य नेतव्योऽसि शिवाज्ञया ।
इत्थं दमनमामंत्र्य संरक्ष्य भवनं व्रजेत् ।।'
(*अचिन्त्यविश्वसादाख्ये* ७०.६ — ७)

[6]प्रसादं भूतमन्त्रं सं — इ

[7]संरक्ष्यं — इ

[8]त्यजेत् — इ

[यदि दूरं समानीय समूलं मृत्तिकान्वितम् ।
पुनरारोप्य मृत्पूर्णे पात्रे संसिच्य वारिणा ।।५।।
[9]गृहेऽप्यामन्त्रणं कार्यं पूर्वोक्तविधिना बुधः ।

[दमनाधिवासः]

[सायाह्नसमये प्राप्ते विदध्यादधिवासनम् ।।६।।
आहृत्य यागवस्तूनि कृतस्नानादिसत्क्रियः ।
यथाविधि समभ्यर्च्य भानुशङ्करपावकान्] ।।७।।
पश्चिमे देवदेवस्य तस्य [10]मूलं मृदा युतम् ।
सद्योजातेन मन्त्रेण [11]दीपितं हृदयेन वा ।।८।।
वामेन शिरसा [12]वापि नालं धात्रीमथोत्तरे ।
दक्षिणे भस्म [13]पत्रं च रूपिणा [14]शिखयाथवा ।।९।।

---

[9]'पुरःस्थितं समानीय मृत्स्ना सार्धं विशेषतः ।
मृत्स्ना संपूरिते पात्रे समारोप्याथ पूजयेत् ।।
आमन्त्रितं कुम्भे कुर्यात्तत्पूर्वविधिना पुनः ।
सायंतने तु काले वै विदध्यादधिवासनम् ।।
आहृत्य यागवस्तूनि कृतस्नानादिकक्रियः ।
यथाविधि समभ्यर्च्य सूर्यशंकरपावकान् ।।
देवस्य पश्चिमे भागे तस्य मूलमुदाहृतम् ।
हृदयेनाथ सद्येन मन्त्रेणादाय तत्पुनः ।
वामेन शिरसा वापि नालं धात्रीं तथोत्तरे ।।
दक्षिणे भस्म पत्रं च रूपेण शिखयाथवा ।
प्राच्यां तु वर्मणा चापि सपुष्पं दन्तधावनम् ।।
गायत्र्या फलं मूलेन वैशान्यां गन्धसंयुतम् ।
न्यस्याञ्जलौ च पुष्पाङ्गदामं पुष्पाक्षतान्वितम् ।।
विज्ञापयेच्च देवेशं दमनारोहणं प्रति ।
आमन्त्रितोऽसि देवेश प्रातःकाले मया प्रभो ।।
कर्तव्यं तु यथालाभं दाम सर्वं तवाज्ञया ।
इति विज्ञाप्य देवस्य मस्तके कुसुमाञ्जलिम् ।।
संयोज्य मूलमन्त्रेण जपं कुर्याद्विशेषतः ।
पात्रेऽपि शेषं निक्षिप्य द्वितीयेन पिधाय तम् ।।
पवित्रकविधानेन कवचेनावकुण्ठयेत् ।
इत्थं सुरक्षितं कृत्वा शिवाय विनिवेदयेत् ।।
निराहारोऽथवा चापि हविर्भुञ्जीत देशिकः ।
देवस्य पुरतश्चापि प्रबुद्धो जपगीतिभिः ।।
प्रातः स्नात्वा जगन्नाथ [इष्टपुष्पं] विसर्जयेत् ।
नित्यां नैमित्तिकीं चैव कुर्यात्पूजां विशेषतः ।।
पञ्चाङ्गैः पूजयेद्देवं दमनैरपि खण्डितैः ।
अञ्जलौ शेषमादाय दूर्वागन्धाक्षतान्वितम् ।
शुद्धस्फटिकसङ्काशं पञ्चवक्त्रं सदाशिवम् ।।
ध्यात्वाभिमुखमेवं तु पूजयेन्नन्दिकेश्वर ।
आत्मविद्याशिवैस्तत्त्वैर्मूलाद्यैरीश्वरान्तिके ।।
पवित्रोक्तेन मार्गेण देवेशं सम्यगर्चयेत् ।
ओं हां आत्मतत्त्वेश्वराय शिवाय नमः ।।
ओ हां विद्यातत्त्वेश्वराय शिवाय नमः ।
ओं हां शिवतत्त्वेश्वराय शिवाय नमः ।।
एवं पुष्पाञ्जलिं कृत्वा विधिनाथ च मन्त्रवित् ।
ओं हौं माहेश्वराय मखं पूरय शूलपाणये नमः ।।
वन्दित्वा शिवमभ्यर्च्य पावकं च यथोक्तवत् ।
भक्त्या विज्ञापयेदीशं वाञ्छितार्थफलप्रदम् ।।
भगवन्नतिरिक्तं वा न्यूनं वाथ मया कृतम् ।
सर्वं तदस्तु सम्पूर्णं सर्वं दमनकर्मकम् ।।
एवं दामविधिं कृत्वा कुर्वीत गुरुपूजनम् ।'
(*अचिन्त्यविश्वसादाख्ये* ७०.८—२८ पू०)

[10]मूलमुदायतम्—इ
[11]तदितं—इ
[12]. . . वि नाळं ते तथोत्तरे—इ
[13]पात्रं च—इ
[14]शिवयाथवा—इ

[15]पुंसा वा वर्मणा प्राच्यां सपुष्पं दन्तधावनम् ।
[16]फलं मूलेन गायत्र्या वैशान्यां गन्धसंयुतम् ।।
पञ्चाङ्ग[17]मञ्जलौ कृत्वा दामं पुष्पाक्षतान्वितम् ।।१०।।
[ग्रन्थपातः]

इत्यजिताख्ये महातन्त्रे [क्रियापादे] दमनपूजाविधिः
[एकोनाशीतीतमः] पटलः ।

---

[15]पुरस्सा वर्मणा —इ
[16]फलमूलने —इ
[17]मण्डलं —इ

[अशीतितमः पटलः]

[दीक्षाविधिः[1]]

[2][ज्वलितो] हि यथा वह्निः शुष्कमार्द्रं च निर्दहेत्।
तथा शुभाशुभं कर्म ज्ञानानलेन दग्धवत्[3] ।।१।।

[दीक्षाभेदाः[4]]

चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा
शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा ।।२।।

---

[1]अयं पटलः 'इ' मातृकायां परं दृश्यते। एतद्विषये *अचिन्त्यविश्वसादाख्ये* ११, २३, २५, २६, ३६; *उत्तरकामिके* २०, २३; *पूर्वकारणे* १४५; *कालोत्तरे* १६, १७; *किरणे* विद्यापादे ६, *क्रियापादे* १०; *चिन्त्ये* ३१, ३२, ३३; *निश्वासकारिकायाम्* ४४; *मकुटे* ७; *मतङ्गे* क्रियापादे २७, ३३, ३५; *मृगेन्द्रे* क्रियापादे ८; *योगजे* १८; *रौरवे* क्रियापादे ४७; *वीरे* ९; *सन्तान-संहितायाम्* ६९; *सुप्रभेदे* चर्यापादे ४; *स्वायम्भुवे* २२, २३ पटला द्रष्टव्याः।

[2]'यथेह वह्निसम्पर्कान्मलं त्यजति काञ्चनम्।
तथैव गुरुसम्पर्कात्पापं त्यजति मानवः ।।
यथा वह्निसमीपस्थो घृतकुम्भो विलीयते।
तथा पापं विलीयेत ह्याचार्यस्य समीपतः ।।
यथा प्रज्वलितो वह्निः शुष्कमार्द्रं च निर्दहेत्।
तथायमपि सन्तुष्टो गुरुः पापं क्षणाद्दहेत्।।'
(*शिवपु०* वायुसं० २.१५.२६ उ० — २९ पू०);
'अनेकभविकं कर्म दग्धबीजमिवाणुभिः।
भविष्यदपि संरुद्धं येनारब्धमिदं वपुः
कर्मणा तद्धि भोगेन क्षयमायात्यसंशयः।
देहपाते विमुक्तिः स्यात्सद्यो निर्वाणदापि वा ।।
कार्याणुभिः सदा सिद्धैस्तेन ते शिवयोजकाः'।
(*किरणे* विद्या. ६.१३ उ० — १५);

[3]अत्र भवेदिति शेषः।

[4]'चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा।
शास्त्रीया योगदीक्षा च हौत्रीत्यादिरनेकधा ।।'
(*चिन्त्ये* ३३.४०);
हन्त ते कथयिष्यामि सर्वपापविशोधनम्।
संस्कारं परमं पुण्यं शिवेन परिभाषितम् ।।
सम्यक्कृताधिकारः स्यात्पूजादिषु नरो यतः।
संस्कारः कथ्यते तेन षडध्वपरिशोधनम् ।।
दीयते येन विज्ञानं क्षीयते पाशबन्धनम्।
तस्मात्संस्कार एवायं दीक्षेत्यपि च कथ्यते ।।
शाम्भवी चैव शाक्ती च मान्त्री चैव शिवागमे।
दीक्षोपदिश्यते त्रेधा शिवेन परमात्मना ।।
गुरोरालोकमात्रेण स्पर्शात्सम्भाषणादपि।
सद्यः संज्ञा भवेज्जन्तोः पाशोपक्षयकारिणी ।।
सा दीक्षा शाम्भवी प्रोक्ता सा पुनर्भिद्यते द्विधा।
तीव्रा तीव्रतरा चेति पाशोपक्षयभेदतः ।।
यया स्यान्निर्वृतिः सद्यः सैव तीव्रतरा मता ।।
तीव्रा तु जीवतोऽत्यन्तं पुंसः पापविशोधिका ।।
शाक्ती ज्ञानवती दीक्षा शिष्यदेहं प्रविश्य तु।
गुरुणा योगमार्गेण क्रियते ज्ञानचक्षुषा ।।
मान्त्री क्रियावती दीक्षा कुण्डमण्डलपूर्विका।
मन्दमन्दतरोद्देशात्कर्तव्या गुरुणा बहिः ।।
शक्तिपातानुसारेण शिष्योऽनुग्रहमर्हति।'
(*शैवपु०* वायुसं० २.१५.३ — १२पू०)

[[5]चाक्षुषी दीक्षा]

चक्षुरुन्मील्य [6]यत्तत्त्वं ध्यात्वा[7] शिष्यः समीक्ष्यते ।
पाशबन्धविमोक्षाय[8] दीक्षेयं चाक्षुषी भवेत् ।।३।।

[[9]स्पर्शदीक्षा]

निधाय दक्षिणे हस्ते [10]शिवं ब्रह्माङ्गसंयुतम् ।
संस्पृशेच्छिष्यमूर्धादि[11] स्पर्शदीक्षा भवेदिह ।।४।।

[[12]वाचिकी दीक्षा]

तत्त्वे चित्तं समाधाय बृह्मितान्तरतेजसा ।
उच्चरेत्संहितामन्त्रान्वाग्दीक्षा [13]चेयमिष्यते ।।५।।

[[14]मानसी दीक्षा]

मानसं विधिमाश्रित्य[15] मानसीत्यभिधीयते ।

[[16]शास्त्री दीक्षा]

शास्त्रस्य संप्रदानेन शास्त्रदीक्षा समीरिता ।।६।।

[[17]योगदीक्षा]

[18]योगेन योगदीक्षा [19]स्याच्छिवत्वे सा ह्यवस्थिता ।

---

[5]एतद्विषये *रौरवे* क्रियापादे ४७.१६उ० १७पू० श्लोकस्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[6]यत्तद्वत्ध्यात्वा—इ

[7]शिष्यस्य मूर्धनि—इ

[8]विमोक्षया—इ

[9]स्पर्शदीक्षाविषये *रौरवे* विद्या० ४७.१७ उ०, १८ पू० श्लोकस्तदीयटिप्पण्यश्च द्रष्टव्याः ।

[10]शिवसर्वाङ्ग—इ

[11]संस्पृश्योच्छिष्यमूर्ध्नि—इ

[12]वाचिकीदीक्षाविषये *रौरवे* विद्या० ४७.१८उ०, १९ पू० श्लोकस्तदीयटिप्पण्यौ च द्रष्टव्याः ।

[13]जेतिरिष्यते—इ

[14]मानसदीक्षाविषये *रौरवे* क्रियापादे ४७.१९ श्लोकस्य उत्तरार्धं तस्य टिप्पणी च द्रष्टव्ये ।

[15]'अत्र क्रियमाणा दीक्षा' इति पदद्वयमध्याहृत्य व्याख्येयम् ।

[16]शास्त्रदीक्षाविषये *रौरवे* क्रियापादे ४७.२० श्लोकस्य पूर्वार्धं तस्य टिप्पणी च द्रष्टव्ये ।

[17]योगदीक्षाविषये *रौरवे* क्रियापादे ४७.२० श्लोकस्योत्तरार्धं तस्य टिप्पणी च द्रष्टव्ये ।

[18]'योगदीक्षां प्रवक्ष्यामि शृणु त्वं नन्दिकेश्वर ।
युजिर्योग इति धात्वर्थे यज्जीवशिवयोरपि ।।
संश्लेषो योग इत्युक्तः सहमार्ग इति स्फुटम् ।
असद्भावक्षयत्वं च ज्ञानसद्भावभावकम् ।।
शिवतत्त्वेति संयोगे योगदीक्षेति कथ्यते ।'
(*अचिन्त्यविश्वसादाख्ये* २६.१—३ पू०)

[19]स्याज्जीवत्वे—इ

[[20]हौत्री]

रजःकुण्डवती हौत्री[21] सा [22]द्विभेदा किलोदिता ।।७।।
[23]समासाच्च द्विधैवेयं दीक्षा तज्ज्ञैरिहेष्यते ।
[24]ज्ञानवती भवत्येका [25]क्रियावत्यपरा स्मृता ।।८।।
विनेज्यानल[26]कर्मादि मनोव्यापारमात्रतः ।
दीक्षा ज्ञानवती प्रोक्ता सद्यस्तत्त्वावबोधजा ।।९।।
इज्यानलवती या तु [27]क्रियाकौशलसंभवा ।
[28]क्रियावत्यथ सानेका निर्बीजाथ[29] सबीजका ।।१०।।

[[30]निर्बीजा सबीजा च]

[31]निर्बीजा तु भवेद्दीक्षा समयिपुत्रयोः परम् ।
सबीजा तु भवेद्दीक्षा साधकाचार्ययोरपि ।।११।।
अथ [32]निर्बीजिका दीक्षा प्रोक्ता सा द्विप्रकारिका ।
एका निर्वाणदा सद्यो [33]द्वितीया देहपाततः ।।१२।।
बालबालिशवृद्धस्त्री[34]भोगभुग्व्याधितात्मनाम् ।
भवेन्निर्बीजिका[35] दीक्षा समयाचारवर्जिता[36] ।।१३।।
विदुषां च समर्थानां [37]सबीजा परिकीर्तिता

[[38]शिवधर्मिणी लोकधर्मिणी च]

सबीजा च द्विधा भिन्ना प्रथमा [39]शिवधर्मिणी ।।१४।।

---

[20] हौत्रीदीक्षाविषये *रौरवे* क्रियापादे ४७.२१–२४ पू० श्लोकास्तदीयटिप्पण्यौ च द्रष्टव्याः ।
[21] रजनीकुण्डवन्ती हौ –इ
[22] त्विभेदा त्रिलोकताम् –इ
[23] सरसाच्य –इ
[24] ज्ञानावती –इ
[25] . . . वतीत्यपरा –इ
[26] कर्मेति –इ
[27] क्रिया ते . . . सम्भवा –इ
[28] क्रियावत्यव सा –इ
[29] निर्बीजा या –इ
[30] निर्बीजसबीजदीक्षाविषये *रौरवे* क्रियापादे ४७.२४ उ० –२९ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।
[31] सबीजा तु भवेद्दीक्षा सर्वधी पुत्रयोः –इ
[32] निर्बीजका –इ
[33] द्वितीयो देहपाततः –इ; एतदनन्तरं सार्धश्लोकोऽधिकतया दृश्यते *रौरवे* ४७ तमे पटले। सोऽत्रावश्य इति भाति ।
[34] भोग . . . व्याधितात्मनाम् –इ
[35] बीजका –इ
[36] वर्जितः –इ
[37] सबीजं परिकीर्तितम् –इ
[38] शिवधर्मिणी लोकधर्मिणीविषयमधिकृत्य *रौरवे* क्रियापादे ४७.२९ –३१ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।
[39] वेदमर्मिणी –इ; रौरवागममनुसृत्यात्र पाठः शोधितः ।

साधकाचार्ययोः प्रोक्ता देशकालादिभेदतः ।
धर्माधर्मात्मकं कर्म प्रागागामि विचित्रकम् ।।१५।।
संचिन्त्य शोध्यते यत्र [40]सैवोक्ता शिवधर्मिणी[41] ।
[अधर्ममात्रसंशुद्धौ द्वितीया लोकधर्मिणी[42]] ।।१६।।

[[43]निरधिकारा साधिकारा च]

नित्यमात्राधि[44]कारश्चेत्समयिन्यथ पुत्रके[45] ।
दीक्षा निरधिकारैव[46] नैमित्तिकानधिकारिणी ।।१७।।
साधकाचार्ययोर्नित्य[47]नैमित्तकाम्यकर्मसु ।
सर्वत्रैवाधिकारित्वा[48]त्साधिकारैव सा तयोः ।।१८।।

[[49]समयदीक्षादीनां भेदः]

यत्र रुद्रपदे [50]योगो योगो यत्रैश्वरे पदे ।

---

[40]शैवोक्तशिवमर्मिणि —इ

[41]'अथ साधकविषययोः शिवधर्मिणीलोकधर्मिण्योः किं लक्षणमिति [जिज्ञासायां] शिवधर्मिणीं तावद्वक्ति—
शिवधर्मिण्यणोर्मूलं शिवधर्मफलश्रियः ।
अणोः आत्मनः शिवधर्मिणी दीक्षा। यस्यां कृतायां त्यक्तलौकिकाचारः शिवधर्मानुष्ठानतत्पर एव योऽणुर्भवति सास्य शिवधर्मफलश्रियो मूलं तद्दीक्षया दीक्षितस्य शिवधर्मफलश्रीर्वर्धते। शिवसमसर्वज्ञतादिधर्मविभवो भवतीति यावत्।
अस्या एवान्यं प्रकारमाह—
हितेतरा विना भङ्गं तनोराविलयाद्भुवाम् ।।
इतरा द्वितीया शिवधर्मिण्येव तनोः भङ्गं विना [हिता] विहिता श्रेयःसाधिका। पिण्डस्थैर्ये जाते शिवत्वव्यक्तावुत्पन्नायां स्वेच्छाविहारी यथेष्टभोगकृद्भवतीति भावः। अथ कियदन्तोऽस्य तादृग्भोग इत्याह—आविलयाद् भुवाम् [इति] भुवां भोग भूमिनाम् आविलयाद् आप्रलयात्।भोगभूमयो यावद्विलीना नष्टा आकल्पं तथाविधं भोगं भुङ्क्त्वा शिवसमानमहिमा भवतीत्यर्थः।'
(*मृगेन्द्रे* क्रियापादे ८.६ व्याख्या च पृ० १२१, १२२)

[42]अथ लोकधार्मिण्युच्यते—
भोगभूमिषु सर्वासु दुष्कृतांशे हते सति।
देहोत्तराणिमाद्यर्थं शिष्टेष्टा लोकधर्मिणी ।।
दीक्ष्यस्य [भोगभूमिषु] याः काश्चन भोग्यतया भाविन्यस्तासु [दुष्कृतांशे] यावान्दुष्कृतांशस्तस्मिन् [हते] मन्त्रसामर्थ्याद्व्याहते शुभकर्मांशे चावस्थापिते सति [देहोत्तराणिमाद्यर्थं] शरीरोत्तरकालभाविनामणिमादीनां कृते शिष्टा इति द्वितीया लोकधर्मिणी नाम इष्टा शास्त्रेष्वाम्नाता। यद्वा शिष्टानां तद्विदाम् इष्टा सम्मता शिष्टेष्टा। तदेवं मन्त्रसामर्थ्यतः क्षपितदुष्कृतांशस्येष्टापूर्तादितत्परस्य साधकस्य देहान्ते निरतिशयाणिमदिसिद्धिदा लोकधर्मिणी सतां मतेत्यर्थः।
(*मृगेन्द्रे* क्रियापादे ८.७ व्याख्या च पृ० १२२, १२३)

[43]निरधिकारसाधिकारविषये *रौरवे* क्रियापादे ४७.३२, ३३ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः।

[44]कारं चेत्—इ

[45]पुत्रिके—इ

[46]कारैर्वा—इ

[47]नैमित्तिक . . . —इ

[48]साधका . . . सा तयोः—इ

[49]समयदीक्षादीनां भेदविषये *रौरवे* क्रियापादे ४७.३४-३६ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः।

[50]योगा यत्र योगेश्वरे—इ

शिखाच्छोदो न यत्रास्ति दीक्षा सा समयी द्विधा ॥१९॥
यत्र [51]पाशशिखाच्छेदो योगः शिवपदे भवेत् ।
[52]निर्वाणाख्या तु सा सैव पुत्रके नाभिषेकतः ॥२०॥
साध्यमन्त्राभिषेकाच्च साधके सा प्रकीर्तिता ।
सर्वविद्याभिषेकेण भवेदाचार्यगोचरे ॥२१॥
शिवसंस्कारसंयुक्तं भावयित्वा समर्पणम् ।
क्रियया वाथ शक्त्या वा [53]दीक्षा सा सर्वकामदा ॥२२॥
[54]दीक्षया मुच्यते देही त्रिविधाद् भवबन्धनात् ।
कुण्डमण्डल[55]संयुक्ता क्रियादीक्षा निकथ्यते ॥२३॥
[ग्रन्थपातः]

इत्यजिताख्ये महातन्त्रे [क्रियापादे] दीक्षाविधिः
[अशीतितमः] पटलः ।

---

[51]पादीशिखाच्छेदे — इ
[52]निर्वाणाख्यायिका सैव — इ
[53]दीक्षांशा सर्व — इ
[54]दीक्षाकारिच्यते दीभिस्त्रिविधभव — इ
[55]संयुक्तं — इ

[एकाशीतितमः पटलः]

[भोगाङ्गार्चनविधिः[1]]

[मण्टपालङ्कारस्तत्र शय्याकल्पनं च]

[2]तन्मण्टपमलङ्कृत्य वितानैश्चैव दर्पणैः ।
नानापिञ्छसमायुक्तं नानादीपसमन्वितम् ।।१।।
जातिनीलोत्पलं चैव मल्लिका कनकास्तथा ।

---

[1]अयं पटलः 'ऊ' मातृकायामेव दृश्यते। एतद्विषये *अजिते* क्रियापादे २०.२५०—२६०, *अंशुमदागमे* ६; *उत्तरकारणे* ४३; *दीप्ते* २५; *योगजे* ७, *सहस्रे* ५, *सूक्ष्मे* ४५ पटला द्रष्टव्याः।

अर्धयामपूजा

'सायाह्नान्तं समारभ्य त्रिपादेन त्रिनाडिका।
अर्धयाम इति प्रोक्तः। अर्धयामे द्वारपूजां विना देवं सुगन्धमिश्रिततैलादिना अभिषिच्य, वस्त्रसुगन्धपरिमलपुष्पैरलङ्कृत्य, पञ्चावरणसहितं देवं संपूज्य, अपूपैः सह निवेदनं कृत्वा, सर्वोपचारान्कृत्वा, भोगशक्तिं च संपूज्य, शिबिकायामारोप्येश्वरमान्दोलिकामध्ये संस्थाप्य, दिव्यवस्त्रादिभिरलङ्कृत्य, मूर्तिमूलेन संपूज्य, धूपदीपनैवेद्यादिकं दत्त्वा, ब्रह्माङ्गैरभ्यर्च्य, गीतवाद्यपुरःसरं शिबिकायामारोप्य, शयनालयं गत्वा, देवीदक्षिणे देवं प्रतिष्ठाप्य, देवीसहितं देवदेवं संपूज्य, सुगन्धपरिमलपुष्पैरलङ्कृत्य, क्षीरान्नापूपादिना नैवेद्यनीराजनाद्युपचारान् कृत्वा, फलानि क्षीरं च एला-लवङ्ग-जातीफल-कर्पूरखण्ड-क्रमुकसहितनवनागवल्लीदलानि च संस्थाप्य, आवृतिपटेन प्रसार्य, बहिः प्रविश्य, शयनगीतं रुद्रगणिकाभिरथवा गायकेन गाययित्वा, कवाटबन्धनं कारयेत्।चण्डपूजां परिसमाप्य क्षेत्रपालार्चनं कुर्यात्।।'

(*परार्थपूजायामालयनित्यपूजाक्रमे* टि० ११६ पृ० ७५, ७६);

पादुकाराधनम्

'जगतामसुखनिवृत्त्यर्थं, भोगभाग्याभिवृद्ध्यर्थं, मोक्षसिद्ध्यर्थमालये पादुकाराधनं चरेत्। अर्धयामे देवं पादुकासहितं शिबिकायामारोप्य, भोगशक्त्यालयं नृत्तगीतवाद्यपुरःसरं गत्वा, पादुकापूजापुरःसरं शिवशक्तिं पूजयेत्।

उषःकाले आचार्यः उक्तलक्षणः सन् भोगशक्त्यालयं गत्वा, शिवमुत्थाप्य, दन्तशोधनभावनास्नानधूपदीपनैवेद्यादनन्तरं पादुकामन्त्रेण संपूज्य, संरक्ष्यावकुण्ठ्य, धेन्वस्त्रलिङ्गमहामुद्राः प्रदर्श्य, अर्घ्यादीन्दत्त्वा, धूपदीपनैवेद्यादिकं कृत्वा, देवं पादुकायुक्तं शिबिकायामारोप्य, प्रदक्षिणक्रमेण गर्भगेहे समारोप्य, देवं मूललिङ्गे संयोजयेत्।।

पूजान्ते—

गुह्यातिगुह्य गोप्ता त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे येन त्वत्प्रसादान्मयि स्थिरा।
यत्किञ्चित्कर्म हे देव सदा सुकृतदुष्कृतम्।
तन्मे शिवपदस्थस्य भुङ्क्ष्व क्षपय शङ्कर।।
शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत्।
शिवो यजति सर्वत्र यः शिवः सोऽहमेव तु।।
इति मन्त्रेण चुलुकोदकं पादुके प्रदापयेत्।।'

(*परार्थनित्यपूजायामालयनित्यपूजाक्रमे* टि० ११६ पृ० १७-१८)

[2]'देवाग्रे दक्षिणे भागे मण्टपं संप्रकल्पयेत्।
संमार्ज्य मण्टपे चैव हुंकारं मन्त्रमुच्चरन्।।
गोमयालेपनं कृत्वा भूबीजेन तु मन्त्रतः।
स्थानशुद्धिरिति प्रोक्ता द्रव्यशुद्धिं ततः शृणु।।
तैलेन पिष्टचूर्णेन रजन्या च जलेन तु।
वस्त्रैर्माल्यैश्च धूपैश्च चन्दनैर्हिमतोयकैः।।'

(*अंशुमदागमे* ६.३-५);

कल्हाराम्बुजदान्तं च [3]ह्रीबेरं च तथैव च ॥२॥
एतान्युक्तानि पुष्पाणि मण्टपं भूषयेत्ततः ।
तन्मण्टपस्य मध्ये तु [4]शय्यामेवं प्रकल्पयेत् ॥३॥

[शय्यार्चनम्]

[5]ततस्तामर्चयेद्विद्वान्यथाविधिपुरःसरम् ।
[6]धर्मं ज्ञानं च वैराग्यमैश्वर्यं चार्चयेद्गुरुः ॥४॥
पिनाकं विष्टरेऽभ्यर्च्य वलये कुण्डलीं तथा ।
[7]ज्ञानशक्तिं क्रियाशक्तिमिच्छाशक्तिं तथैव च ॥५॥
डोलायां [8]वलये चैव [9]कुण्डल्याद्यर्चनं तथा ।
शृङ्खलायां वृषं चैव [10]बिन्दुं तद्वलये न्यसेत् ॥६॥
शुद्धविद्यां [11]मनोन्मन्या [12]फलकायां न्यसेत्क्रमात् ।
[13]भोगशक्तिं समभ्यर्च्य पूर्वोक्तविधिना सह ॥७॥
वामादिभिश्च संपूज्य धूपदीपं समर्पयेत् ।

[शय्यायां निक्षेप्याणि गन्धादिद्रव्याणि[14]]

चन्दनं कुङ्कुमं चैव [15]रोचनां शशिमिश्रिताम् ॥८॥
सर्वगन्धसमायुक्तं वामपार्श्वे तु विन्यसेत् ।
ताम्बूलं मुखवासं च हिमतोयं च दक्षिणे ॥९॥
सर्वाभरणमाल्यादि विन्यसेत्पुरतस्तथा[16] ।

---

[3]हरिबेरं तथैव च —ऊ
[4]शय्यामेव —ऊ
[5]ततस्तमर्चये —ऊ
[6]धर्मज्ञानं —ऊ
[7]ज्ञानशक्तिक्रियाशक्तिरिच्छाशक्तिः —ऊ
[8]वलयं —ऊ
[9]कुण्डल्याद्यर्चने —ऊ
[10]. . . तद्वलयं —ऊ
[11]मनोमन्यां —ऊ
[12]फलकशब्दोऽत्र स्त्रीलिङ्गे प्रयुक्तः ।
[13]भोगशक्तिसम —ऊ
[14]'कुङ्कुमं हरिबेरं स्याद् गुग्गुलुर्हरिचन्दनम् ।
गोक्षीरं दीपतैलं स्याद्गुलमाम्रफलैर्युतम् ॥
नैवेद्यं चोपदंशं स्यादपूपं कन्दमूलकम् ।
फलस्य त्रिगुणं पत्रं चूर्णयुक्तं सतैलकम्॥
सुगन्धतोयकैश्चैव शतपुष्पं समल्लिकम् ।
शतपत्रद्विगुणं च दिव्यपुष्पैः सुगन्धकैः ॥
चित्रवस्त्रसमायुक्तं शतदीपद्वयं भवेत् ।
शतार्धसंख्यया चैव अथवा पञ्चविंशतिः ।
दीपज्वालासमायुक्तं चतुस्त्रिद्व्यङ्गुलायतम् ॥
स्थलिकापात्ररहिते तत्तत्पात्रे तु सङ्ग्रहेत् ।
पञ्चामृतेन कर्तव्यमन्नभक्ष्यादिकैर्युतम् ॥
(*अंशुमदागमे* टि॰ ५, ६.६ — ११ पू॰)
[15]रोचनं शशिमिश्रितम् —ऊ
[16]पुरतःस्थिते —ऊ

[देवेशपूजनम्[१७]]

देवेशं पूजयित्वा तु पूर्वोक्तविधिना सह ॥१०॥

[भोगमन्दिरप्रवेशः शय्यामञ्चे देवदेव्योः पूजा च]

धामप्रदक्षिणं कृत्वा प्रविशेद्भोगमन्दिरम् ।
पाद्यमाचमनं चार्घ्यं कर्पूरं दीपवद् भ्रमेत्[१८] ॥११॥
शय्यामञ्चे समारोप्य देवं देवीं समर्चयेत् ।
[१९]तच्छक्त्या परया पूज्य देवेशं परमं शिवम् ॥१२॥
एवं संपूज्य विधिवत्पश्चादाचमनार्घ्यकम् ।
शर्करान्नं च दुग्धान्नं फलापूपं तथैव च ॥१३॥
पानीयादिसमायुक्तं नैवेद्यं च समाचरेत् ।
आचामार्घ्यं ततो दत्त्वा ताम्बूलं तु निवेदयेत् ॥१४॥
पुनराचम्य[२०] विधिवद् धूपदीपं विशेषतः ।
आरात्रिकं ततो दत्त्वा नीराजनमतः परम् ॥१५॥
भस्मादितालवृन्तान्तमुपचारान्प्रदापयेत् ।
वेदध्वनि[२१]समायुक्तं स्तोत्रध्वनिसमन्वितम् ॥१६॥
शङ्खध्वनिसमायुक्तं [२२]काहलैस्तु समन्वितम् ।
दीपं सङ्कुलयेद्धीमान्निक्षिपेद्यवनिकां तदा[२३] ॥१७॥
[२४]मध्यरात्रे तु [२५]शयने शक्तिं देवेन योजयेत् ।

---

[१७]यागोपकरणद्रव्याण्यस्त्रेण प्रोक्ष्य देशिकः ।
पुण्याहं वाचयेत्तत्र प्रोक्षयेच्छिवमस्तकम् ॥
वीरविघ्न जगन्नाथ त्रैलोक्य जगन्नायक ।
भोगाङ्गपूजनं चैव निर्विघ्नं स्यात्प्रसीद मे ॥
देवदेवं नमस्कृत्य द्वारदेवान् प्रपूजयेत् ।
यवनिकां परित्यज्य गर्भद्वारं समर्चयेत् ॥
भीमरुद्रं समभ्यर्च्य धूपं दत्त्वा विशेषतः ।
निर्माल्यं तु विसृज्याथ पुष्पं मूर्ध्नि विनिक्षिपेत् ॥
लिङ्गपीठस्थले चैव जलेनैवाभिषेचयेत् ।
स्नानान्ते मन्त्रपुष्पं च पुष्पान्ते तु निवेदयेत् ॥
वस्त्रखण्डेन संमार्ज्य लिङ्गं पीठस्थलेन च ।
सितवस्त्रैरलंकृत्य गन्धमाल्यैर्विचित्रयेत् ॥
किंचिद्भेदं विशेषेण बलिहोमविवर्जितम् ।
द्वारादिक्षेत्रपर्यन्तं भोगाङ्गमिति विद्यते ॥
भोगाङ्गपूजनं चैव तत्काले भूतनाडिका ।
पूजयेत्तु क्रमेणैव सौभाग्यमिति विद्यते ॥
मूललिङ्गे विशेषेण धूपदीपौ ततः क्रमात् ।
नीराजनं ततो दद्यात्तिलकं दापयेत्ततः
ताम्बूलं दापयेत्पश्चात्'
(*अंशुमदागमे* टि० ५, ६.११ उ० — २०)

[१८]अत्र अन्तर्भावितणिजर्थः । भ्रामयेदित्यर्थः ।

[१९]तच्छक्तिपरया — ऊ

[२०]पुनराचम्य=पुनराचमनं कारयित्वेत्यर्थः । अत्र अन्तर्भावितणिजर्थः ।

[२१]समं प्रोक्तं — ऊ

[२२]धगगालैस्तु — ऊ

[२३]यवनिकान्तकम् — ऊ

[२४]मध्यरात्रम् —
'अर्धयामं समारभ्य यावत्तु दशनाडिका ।
मध्यरात्रमिति प्रोक्तम्'
(*पूर्वकारणे* ३१.२०)

[२५]शयनं दे नां शक्ति योजयेत् — ऊ

[क्षेत्रपालाद्यर्चनम्[26]]

तथान्ते क्षेत्रपालं [27]चाप्यर्चयित्वा विशेषतः।।१८।।
अन्ते शास्ता[रं] संपूज्य जनान्स्वगृहमाविशेत्[28] ।।
[29]रात्र्यन्तके विशेषेण शङ्खसंघोषपूर्वकम् ।।१९।।
भोगाङ्गोद्वासनं कृत्वा गर्भगहे सदाशिवम् ।
भास्करस्योदयात्पूर्वे त्रिपादेन त्रिनाडिकाः ।।
पूर्ववत्परिसंकल्प्य शिवशास्त्रविधानतः ।।२०।।
[ग्रन्थपातः]

इत्यजिताख्ये महातन्त्रे [क्रियापादे] भोगाङ्गार्चनविधिः
[एकाशीतितिमः] पटलः ।

---

[26] 'देशिकः शिष्यसंयुक्तः क्षेत्रपालं समर्चयेत् ।
नैवेद्यं दापयित्वा तु धूपदीपादिकं ददेत् ।।
तिलकं दापयित्वा तु लोकरक्षार्थकं भवेत् ।
क्षेत्रेशं क्षेत्ररक्षार्थं पूजयेदर्धयामके ।।
न्यूनातिरिक्तं विज्ञाप्य क्षमस्वेति प्रणामयेत् ।
देशिकः शिष्यसंयुक्तः स्वगृहं प्रविशेत्ततः ।।'
(*अंशुमदागमे* ६.३३ उ० —३६ पू०);
'कवाटं बन्धयेच्चैव तद्बाह्ये सव्यपार्श्वके ।
नन्दिकुम्भोदरौ पूज्य दक्षिणे भैरवं यजेत् ।।
गोपुरद्वारमाबध्य स्वदेशश्च निगम्यते ।
(*उत्तरकारणे* ४३.२६ उ० , २७);
'क्षेत्रपालार्चनं कृत्वा आधाराख्यमनन्तकम् ।
अभ्यर्च्य गन्धपुष्पाद्यैरसिताङ्गादि पूजयेत् ।।'
(*सहस्रे* ५.४०);
'धूपदीपादिकं दत्त्वा ताम्बूलं दापयेद्धृदा ।
दशास्त्रं परितोऽभ्यर्च्य पादुके विन्यसेत्स्थले ।
वस्त्रेणैव पिधानं कुर्यात्कपाटबन्धनम् ।
चण्डेश्वरं समभ्यर्च्य स्वगृहं प्रविशेद्गुरुः ।'
(*सूक्ष्मागमे* ४५.७—८)

[27] क्षेत्रपालार्चनानन्तरं शास्तुः पूजा उपलभ्यमानेषु शैवागमेषु न दृश्यते ।

[28] आविशेदित्यत्रान्तर्भावितणिजर्थ इति वक्तव्यम् ।

[29] रात्र्यन्तम् —
'भास्करस्योदयात्पूर्वे त्रिपादेन त्रिनाडिका ।
रात्र्यन्तकमिति प्रोक्तम्'
(*पूर्वकारणे* ३१.२१);
'प्रातःसमयतः पूर्वे घटिकापञ्चकोत्थितः ।
वाचा स्तोत्रं मनोध्यानं संप्राप्यावाह्य देशिकः ।।
शौचाचमनशान्तश्च स्नानानुष्ठानपूर्वकम् ।
धौतवस्त्रोत्तरीयश्च शिवधाम प्रवेशयेत् ।।
निश्चित्य नाडिकास्त्रीणि भोगशक्त्यालयं गतः ।
अष्टपुष्पं समभ्यर्च्य दन्तशोधनपूर्वकम् ।।
भावनास्नानकर्मापि नैवेद्यं दापयेत्ततः ।
धूपदीपं ततः कृत्वा पाद्यमाचमनार्घ्यकम् ।
दापयेच्छिवमुत्थाप्य पादुके योजयेत्ततः ।।
शिबिकायां समारोप्य प्रादक्षिण्यक्रमेण च ।
गर्भगेहे समारोप्य मूललिङ्गे सुयोजयेत् ।।
उदयात्पूर्वं निश्चित्य मुहूर्तं न्यूनमुत्तमम् ।'
(*उत्तरकारणे* ४३.२८—३३)

[द्व्यशीतितमः पटलः]

[अर्चकस्याशौचविधिः[1]]

[सूतकदोषाभावकालः[2]]

आरब्धे वरणे यज्ञे श्राद्धे पाक[3]परिक्रमे ।
तन्मध्ये सूतकप्राप्तौ सूतदोषो न विद्यते ।।१।।
उत्सवे होमकाले च प्रतिष्ठार्चनयोस्तथा ।
[4]नाशौचं मध्यमे चैव [5]कर्मान्ताशौचमाचरेत् ।।२।।

[उत्सवे आचार्यस्य रोगसंभवे तत्पुत्रं शिष्यं वा यागकर्मणि नियोजयेत्] ।

[6]रक्षाबद्धस्तु आचार्यो [7]ह्युत्सवे रोगसंभवे[8] ।
पुत्रं वा शिष्यमन्यं वा कारयेद्यागकर्मणि ।।३।।

[पञ्चाशद्धनुःसीमान्ते मृतं शवं शीघ्रमुद्धृत्य पूजनं कर्तव्यम्]

[9]द्वौ तालौ कथितो हस्तस्तच्चतुर्धनुरुच्यते ।
पञ्चाश[10]द्धनुःसीमान्ते चैकवीथ्यां मृतौ[11] यदि ।।४।।
तच्छवं शीघ्रमुद्धृत्य पूजयेत्पुरुषोत्तम[12] ।

---

[1] अयं पटलः (टि० १०८८) मातृकायां परं दृश्यते; एतद्विषये *चन्द्रज्ञाने* टि०१२.२० पटलो द्रष्टव्यः ।

[2] 'स्थापने प्रोक्षणे यागे दीक्षायां च शिवोत्सवे ।
नित्यनैमित्तिके काले न भवेत्सूतकादिकम् ।।
पूजालोपो न कर्तव्यः पद्मपत्रमिवाम्भसा ।'
'यागे प्रारभ्भमाणे च सूतकं प्रेतकं न हि ।
तदन्ते सूतकं प्रोक्तं तत्कर्म विधिनाचरेत् ।।'
(टि० ५३६ *आशौचनिर्णये* पृ० ३)
'पूजालोपो न कर्तव्यः सूतके प्रेतकेऽपि च ।
शिवमन्त्रेण कर्तव्यं स्नानमात्रेण शुध्यति ।।
आशौचं न भवेत्तत्र पद्मपत्रमिवाम्भसा ।'
(टि० २८१ *आशौचदीपिकायां* पृ० ५६);
'भक्तिवैराग्ययुक्तानां लिङ्गार्चाहितचेतसाम् ।
नाशौचं समयस्थानां पूजाकाले मनीषिणाम् ।।'
(टि० २८१ *आशौचदीपिकायां* पृ० ६७)

[3] परिक्रियाम् —ऋ

[4] नाशौचमध्ये —ऋ

[5] कर्मान्ते आशौचं कर्मान्ताशौचम् इति समस्तपदम् ।

[6] रक्षाबन्धस्तु —ऋ

[7] ह्युत्सवो —ऋ

[8] संभवे —ऋ

[9] द्वितालौ कथितौ हस्त तान्यष्टोधनु —ऋ;
'चतुर्विंशाङ्गुलो हस्तस्तच्चतुष्कं धनुः स्मृतम् ।'
(*शब्दकल्पद्रुमे* धनुःशब्दविवरणे)

[10] धनुषीमान्तमेकशुद्ध्यां —ऋ

[11] मृते —ऋ

[12] पुरुषोत्तमः —ऋ; अत्र 'पुरुषोत्तम' इति विष्णु-सम्बोधनम् ।

[ध्वजारोहणे आचार्यमरणसंभवे[13] कर्तव्यविधिः]

ध्वजारोहण[14]बन्धे तु [15]आचार्यमरणे सति ॥५॥
[16]अन्येन देशिकेनैव ध्वजारोहणकं कुरु ।

[ध्वजारोहणमध्ये आशौचसंभवे कर्तव्यविधिः]

ध्वजारोहणमध्ये तु आशौचं संभवेद्यदि ॥६॥
[17]लोकपालान्विसृज्यान्ते आशौचं तु समाचरेत् ।
एकपुत्र[18]पितृमात्रोर्नाशिश्चेद्ध्वजबन्धने ॥७॥
[19]दग्धकर्म[20]समाप्तौ तु रक्षासूत्रेण देशिकः ।
अवरोहादिकं कृत्वा यागान्ते कर्म कारयेत् ॥८॥
[21]दीक्षितो ह्येकपुत्रस्तु [22]मातापित्रोर्मृतिर्यदि ।
संस्कारमेव कुर्वीत यज्ञान्ते सूतकं भवेत् ॥९॥
शिवेन [23]दीक्षितस्यैवं सूतकप्रेतकं न हि ।
न लिप्यते [24]मलेनैव पद्मपत्र[25]मिवाम्भसा ॥१०॥

[गुरोः सूतकाभावः]

[26]गुरुस्तु बन्धोर्मरणं श्रुत्वा [27]गच्छेत्तु तद्गृहम् ।
[28]पुत्रादिकमृतिं दृष्ट्वा स्नात्वा शुद्धिं [29]शिवार्चनम् ॥११॥

---

[13]'उत्सवादेस्तु तीर्थान्तं सूतकप्रेतकं न हि ।
दीक्षितस्यैकपुत्रस्य मातापित्रोर्मृते सति ॥
संस्कुर्याद्यागशालायां यागशेषं समाचरेत् ।
तत्पुत्रस्य विशेषोऽस्ति सद्यःस्नानेन शुध्यति ॥
दीक्षितानां व्रतस्थानां यतीनां ब्रह्मचारिणाम् ।
जन्माशौचं मृताशौचं न कदाचन विद्यते ॥'
(*चन्द्रज्ञाने* टि० १२.२०, २८४-२८६)

[14]बन्धस्तु—ऋ

[15]आचार्यो मरणे च—ऋ

[16]अन्यत्र—ऋ

[17]लोकपालविसृ—ऋ

[18]पितृमातानाशयेद्ध्वज—ऋ; अत्र 'पितृमात्रोः' इति प्रयोग आर्षः । 'मातापित्रोः, पित्रोः, मातरपित्रोः' इत्येतत्त्रयमेव साधु ।

[19]'दहनकर्म' इत्यत्र दग्धकर्मेति प्रयोगः । अत्र भावार्थे क्तप्रत्यय इति भाति ।

[20]समाप्यं तु—ऋ

[21]दीक्षितोऽप्येक—ऋ

[22]माता पिता मृतो यदि—ऋ

[23]दीक्षितश्चैव—ऋ

[24]मले चैव—ऋ

[25]शिवाम्भसा—ऋ

[26]गुरोस्तु बन्धुमरणं—ऋ

[27]गच्छति तद्गृहे—ऋ

[28]पुत्रालिङ्गं मृति—ऋ

[29]अत्र 'प्राप्तः कुर्यात्' इति पदद्वयमध्याहृत्य शुद्धिं प्राप्तः शिवार्चनं कुर्यादिति व्याख्येयम् ।

[30]शिवव्रतधरस्यास्य न मृतं न च सूतकम् ।
क्रियान्ते विद्यते किं तु [31]शेषमन्ते विशुध्यति ।।१२।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] अर्चकस्याशौचविधिः
[द्व्यशीतितमः] पटलः ।

---

[30]'शिवव्रतधरस्यास्य न मृतं न च सूतकम् ।
पूर्वाश्रमानपेक्षत्वादस्तसंस्कारहेतुकः ।।' (*आशौचदीपकायाम्* टि० २८१, पृ० ४५)

[31]शेषान्ते च विशुद्ध्यति—ऋ

[त्र्यशीतितमः पटलः]

[शास्तृप्रतिष्ठोत्सवविधिपटलः]

[प्रतिष्ठाविधिः[1]]

[2] [ग्रन्थपातः]

एवं लक्षणमाख्यातं संक्षेपान्मुनिसत्तम ।

---

[1]अयं पटलः टि ११५ मातृकायां परं दृश्यते ।; एतद्विषये *ईशानशिवाचार्यपद्धतौ* मुद्रिते शास्तृप्रतिष्ठा, शास्त्रुत्सवविधिः; *कुलालशास्त्रे* (टि०-१५सि) शास्त्रुत्सवविधिः; *पद्मसंहितायाम्* (टि०-१६२) शास्तृ-स्थापनम्; *पूर्वकारणे* ५३ पटलः, *भीमसंहितायाम्* (टि०-११५) शास्तृस्थापनम्; *सुप्रभेदे* क्रियापादे ५३ पटलश्च द्रष्टव्याः ।

[2]अस्य पटलस्यारम्भे ग्रन्थपातो दृश्यते। तदनन्तरं 'एवं लक्षणमाख्यातं' इत्यारभ्यते। तस्मादितः पूर्वं कश्चन भागो लुप्त इत्यनुमीयते। अतः ग्रन्थपातस्थले 'शास्त्रुत्पत्तिः, शास्तृमन्त्राः, तत्स्थापनोचितस्थानं, तत्र निर्मीयमाणालयप्रकारः, शास्तृप्रतिमालक्षणमित्यादि भवितव्यमिति समूह्यागमान्तरे दृश्यमाना एतद्विषय-सम्बन्धिश्लोकाः टिप्पण्यां प्रदर्श्यन्ते। एवं प्रतिष्ठा-विध्यन्तेऽपि होमानन्तरं भवितव्यो विषय आगमान्तरतः पूरितः ।

शास्त्रुत्पत्तिः

'समुद्रमथने काले परिगृह्यामृतं तदा ।
हरिर्बभूव स्त्रीरूपा मोहिनी नाम नामतः ॥
तां मोहिनीमहं दृष्ट्वा संगतोऽस्मि कदाचन ।
जातस्तदा महाशास्ता'

(*सुप्रभेदे* क्रियापादे ५३.२उ० —४पू०);

मन्त्राः

'ॐ हां हरिहरपुत्राय नमः । ॐ हां पुत्रलाभाय नमः । ॐ हां शत्रुनाशाय नमः । ॐ हां मदगजवक्त्राय नमः । महाशास्त्रे स्वाहा। ओं हां ह्रीं श्रीं ह्री हरिहरपुत्राय पुत्रलाभाय शत्रुनाशाय मदगजवाहनाय महाशास्त्रे नमः । ॐ हां श्रीं ह्रीं पुष्कलादेव्यै नमः । ॐ हां श्रीं ह्रीं श्रीं पूर्णादेव्यै नमः ॥

(*कुलालशास्त्रे* (टि० १५सि) पृ० ११०);

स्थापनोचितस्थानमाल्यप्रकारश्च

'ग्रामे वा नगरे वापि पत्तने राजधानिके ।
खेटके कुब्जके वापि पैशाचपदके बुधः ॥
ग्रामस्य पार्श्वदेशेषु राक्षसे वायुगोचरे ।
शाङ्करे वाथ कर्तव्यं द्वारं ब्रह्मसमाश्रितम् ॥
शास्त्रालयं प्रकर्तव्यं सर्वलक्षणसंयुतम् ।
त्रिहस्तं पञ्चहस्तं वा सममण्डपसंयुतम् ॥
अन्तर्हारसमायुक्तं गोपुरद्वारसंयुतम् ।
प्रासादं करिपृष्ठं वा गोपुराकृतिमेव वा ॥
मण्डपाकृतिकं वाथ कूटाकारमथापि वा ।

(*भीमसंहितायाम्* (टि० ११५) शास्तृस्थापने ८ उ०—१३पू०);

'प्रासादे नैर्ऋते भागे ग्रामादीनां च नैर्ऋते ।
अष्टदिक्षु च पूर्वादि तद्ग्रामस्य पराङ्मुखम् ॥
प्रासादं कारयेद्धीमान्गजपृष्ठं विशेषतः ।'
अथवा मण्डलं वापि कर्तव्यम्

(*सुप्रभेदे* क्रियापादे ५३.९उ० —११पू०)

प्रतिमालक्षणम्

'तस्य गर्भप्रमाणेन प्रतिमां कारयेत्ततः ।
सर्वलक्षणसंयुक्तं शक्तिद्वयसमायुतम् ॥
मधुकं दक्षिणे भागे नृत्तरूपेण कारयेत् ।
भूतरूपं महाकायं महाकुक्षिसुशीर्षकम् ॥
वामहस्ते घटं रम्यं दक्षहस्ते तु विस्मयम् ।
ब्राह्मीकं वामहस्ते तु दक्षिणे चासिधारिणम् ॥
रक्तवस्त्रपरिच्छन्नं केशवेष्टनसंयुतम् ।
नीलवर्णेन कण्ठेन शिखायज्ञोपवीतयुक् ॥
अर्धकौपीनसंयुक्तं मौञ्जीरज्जुसमायुतम् ।
देवस्य बाहुमानेन कुर्यान्मधुकरं ततः ॥
सर्पं च चित्रगुप्तं च तन्मानेनैव कारयेत् ।

[अङ्कुरार्पणं, रत्नन्यासः, नयनोन्मीलनं च]

[3]प्रतिष्ठादिवसात्पूर्वं कारयेदङ्कुरार्पणम्[4] ।।१।।
मण्डपे स्थण्डिलं कृत्वा [5]बिम्बांस्तस्योपरि न्यसेत् ।
[6]रत्नन्यासं च संश्लेषमोंकाराद्धृदयेन तु ।।२।।
मधु सर्पिर्दृशोर्दद्यान्मधुवातेति मन्त्रतः ।
असुनीतेति मन्त्रेण वैश्यव्यूहं तु दर्शयेत् ।।३।।
पशूनामिति मन्त्रेण [7]सवत्सां गां प्रदर्शयेत् ।
बिम्बशुद्धिं ततः कृत्वा'

[जलाधिवासः]

'जले चैवाधिवासयेत् ।।४।।

पुस्तकं वामहस्ते तु दक्षिणे सूचिधारकम् ।।
रक्तवस्त्रपरिच्छन्नं केशवेष्टनसंयुतम् ।
एवं कुर्यात्तु तद्रूपं सर्वलक्षणसंयुतम् ।।
देवस्य वामभागे तु मेनकारम्भके स्त्रियौ ।
सर्वलक्षणसंयुक्ते सर्वाभरणभूषिते ।।
पीताम्बरधरे शान्ते पिञ्छचामरहस्तके ।।
द्वारस्य दक्षिणे यक्षो वामे गन्धर्व उच्यते ।
अकृतं दक्षिणे पार्श्वे विकृतं वामपार्श्वके ।।
रक्तकृष्णसमप्रख्यौ द्विभुजौ च द्विलोचनौ ।
खड्गखेटकसंयुक्तौ दीप्ताग्निसमलोचनौ ।।
त्रिभङ्गकौ जटायुक्तौ किंचिद्दंष्ट्रासमायुतौ ।।
गजं वै पुरतः स्थाप्य स्थितं वा शयितं तु वा ।
तत्पुरस्तान्महापीठे कृत्वा लक्षणसंयुतम् ।।
गजैश्च तुरगैश्चैव श्वभिश्च सह कुक्कुटैः ।
नानालीलैः समायुक्तं पार्श्वयोः कल्पयेद् दृढम् ।।
स्थापयेत्परिवाराणि पूर्वादिषु गजं प्रति ।'
(*भीमसंहितायाम्* (टि० ११५ सि) शास्तृस्थापने १३उ०—२६);
'प्रतिमां ततः ।
भद्रासने त्वथासीनं तथा वीरासनं तु वा ।।
मृद्दारुशैललोहैश्च कारयेच्छास्त्रवित्तमः ।'
(*सुप्रभेदे* क्रियापादे ५३.११.१२ पू०);
श्यामाभं शरपाणिं च स्थितकुञ्चितपादकम् ।
जटामकुटसंयुक्तं त्रिनेत्रमुग्ररूपिणम् ।।
पार्श्वद्वितये शक्ती च पूर्णामपि च पुष्कलाम् ।
सर्वाभरणसंयुक्तं शास्तारं तमहं भजे ।। . . .
चन्द्रजाता तु पूर्णा सा सूर्यजाता तु पुष्कला ।
उभे च शक्तिरूपे च शास्तृपत्नीस्वरूपके ।।
पीठमध्ये तु शास्तारं पार्श्वे पुष्कलपूर्णके ।
तिस्रो मूर्तीरेकपीठे आसीना वा स्थिताश्च वै ।।
पूर्णापुष्कलयो रूपे कटकमुत्पलं तु वा ।
स्वतन्त्रालयः कर्तव्यः शास्त्राराधनकर्मणि ।।
(*भीमसंहितायां* टि० ११५, शास्तृस्थापने १४);
(एतद्विषये *अजिते* ३६.३२५ उ०, ३२६ श्लोकस्तदीयटिप्पणी च द्रष्टव्यौ ।)

[3]'सुवारे सुमुहूर्ते च शुक्लपक्षे शुभे दिने ।
प्रतिष्ठादिवसात्पूर्वं पञ्चमे सप्तमे दिने ।।
मण्डपस्योत्तरे भागे अङ्कुराण्यर्पयेद्गुरुः ।
वास्तुहोमं ततः कृत्वा पर्यग्निकरणं कुरु ।।
रत्नन्यासं ततः कृत्वा बिम्बं तस्योपरि न्यसेत् ।
नयनोन्मीलनं कुर्यान्नेत्रयुग्मर्क्षके दिने ।
बिम्बशुद्धिं ततः कुर्यात्पञ्चामृतपञ्चगव्यकैः ।।
जलाधिवासनं पश्चात्'
(*पद्मसंहितायां* शास्तृस्थापने (टि० १६२) पृ० ४७)

[4]अङ्कुरार्पणविषये *अजिते* ३५ पटलो द्रष्टव्यः ।

[5]बिम्बं तस्योपरि—ङ

[6]अत्र 'प्रतिमां स्थाप्य निष्कम्पां संश्लेषं कारयेद् दृढम् ।' *अजिते* ४०।२० पू० द्रष्टव्यम् ।

[7]सर्वं साङ्गं—ङ; 'पशूनामिति मन्त्रेण' तै० सं० ३.१.४

[मण्डपस्तत्र कुण्डकल्पनं च[८]]

[९]प्रासादस्याग्रतः कुर्यान्मण्डपं लक्षणान्वितम् ।
[१०]वेदिर्मध्ये तु कर्तव्या, कुण्डानि परितः क्रमात्[११] ॥५॥
पूर्वादिषु चतुर्दिक्षु चतुरश्रं तु कारयेत् ।
शांकरे वृत्तकुण्डं तु पूर्ववल्लक्षणान्वितम् ॥६॥
सर्वलक्षणसंयुक्तं मण्डपं तु प्रपूजयेत्[१२] ।

[शयनाधिवासः[१३]]

[१४]स्थण्डिलं कारयेद्वेद्यां कल्पयेच्छयनं [१५]हृदा ॥७॥
जलादुत्तीर्य बिम्बानि शुद्धिं कृत्वास्त्रमन्त्रतः ।
[१६]कौतुकं बन्धयेद्धीमान्पूर्वोक्तविधिना सह ॥८॥
[१७]कृष्णवस्त्रेण संवेष्ट्य शाययेच्छयनोपरि ।

[कुम्भसंस्थापनं तत्पूजा च][१८]

[१९]कुम्भं स्थाप्य शिरोदेशे वर्धन्यौ द्वे च विन्यसेत् ॥९॥

---

[८]'प्रासादस्याग्रके वापि ईशाने चोक्तदेशके ।
यागशालां प्रकल्प्याथ चतुर्द्वारसमन्वितम् ॥
चतुस्तोरणसंयुक्तं वेदीकुण्डसमन्वितम् ।
वेदाश्रं [पूर्वदेशे तु दक्षिणे] चार्धचन्द्रकम् ॥
त्रिकोणमुत्तरे देशे रसाश्रं पश्चिमे न्यसेत् ।
योनिकुण्डं तथाग्नौ तु नैर्ऋतौ पद्मकुण्डकम् ॥
वायव्यां पञ्चकोणं स्याद्वस्वश्रमीशदेशके ।
इन्द्रईशानयोर्मध्ये वृत्तं कुर्यात्प्रधानकम् ॥
अथवा पञ्चकुण्डं वा एककुण्डमथापि वा ।
इत्येवं कल्पयेद्धीमान्'
(*पद्मसंहितायां* टि० १६२, शास्तृस्थापने ४५, ४६)

[९]प्रासादसभाग्रतः—ङ

[१०]वेदिमध्ये—ङ

[११]अत्र कल्पयेदिति शेषः ।

[१२]प्रपूजयेदित्यस्य अलंकुर्यादित्यर्थो व्याख्येय इति भाति ।

[१३]'वेदघोषसमायुक्तं वाद्यघोषसमन्वितम् ।
ग्रामप्रदक्षिणं कृत्वा यागमण्डपमाविशेत् ॥
रक्षाबन्धं ततः कृत्वा यागपूजां समाचरेत् ।
पुण्याहं वाचयेच्छुद्धिं वितानाद्यैरलंकृते ॥
शयने शाययेद्देवान् प्राक्शिरश्चोर्ध्ववक्त्रकम् ।'

[१४]'तत्र वेद्यां प्रकर्तव्यं स्थण्डिलं तु मनोहरम्' *इत्यजिते* (४०.४९पू०) श्लोकमनुसृत्य मण्डलमित्यत्र स्थण्डिलमिति पाठः संघटितः; मण्डलं—ङ

[१५]अत्र विधिवत् इति पदमध्याहृत्य हृदा विधिवच्छयनं कल्पयेदिति व्याख्येयम् ।

[१६]कौतुकबन्धनविषये *अजिते* २७.१९९—२०८ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[१७]कृष्णवस्त्रेण वेष्टनमत्र विशिष्य प्रोक्तमिति भाति ।

[१८]शालिभिश्च विशेषेण साष्टद्रोणैः प्रपूरयेत् ।
तदर्धैस्तण्डुलैश्चैव तदर्धैश्च तिलैरपि ॥
दलाष्टपद्मं संलिख्य दर्भैश्चैव परिस्तरेत् ।
शास्तृकुम्भं न्यसेन्मध्ये वर्धन्यौ न्यस्य पार्श्वयोः ॥
घटाष्टौ परितः स्थाप्य द्वारादिकलशान् न्यसेत् ।
सकूर्चान् सापिधानांश्च सवस्त्रान् वारिपूरितान् ॥
(*पद्मसंहितायाम्* टि० १६२, शास्तृस्थापने पृ० ४६, ४७)

[१९]कुम्भोऽयं निद्राकुम्भ इति भाति ।

तत्पुरस्तान्महापीठे कुम्भं न्यस्य स्वमन्त्रतः ।
परिवारघटानष्टौ वेदिबाह्ये तु विन्यसेत् ।।१०।।
ससूत्रान्सापिधानांश्च सवस्त्रान्हेमसंयुतान् ।
सकूर्चान्गन्धसंयुक्तान्शुद्धतोयेन पूरितान् ।।११।।
तत्तन्मन्त्रैः समायुक्तान्[20] नैवेद्यान्तं पृथक् पृथक् ।

[होमः[21]]

ततो होमं समारभ्य कुण्डे वा स्थण्डिलेऽपि वा ।।१२।।
[22]आधानादिविसर्गान्तमग्निकार्योक्तमाचरेत् ।
अग्निमध्ये तु तं ध्यात्वा आसनावरणान्वितम् ।।१३।।
[23] [ग्रन्थपातः]

---

[20] अत्र संपूज्येति शेषः ।

[21] 'पश्चाद्धोमं समाचरेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।।
अग्निमध्ये तु तद्रूपं ध्यात्वा होमं सुमन्त्रतः ।
पूर्वादिसर्वकुण्डेषु होमं कुर्यात्क्रमेण तु ।।
समिदाज्यचरूंल्लाजान्मुद्गमाषयवांस्तिलान् ।
शालिधूम्रनीवारान्सक्तुसिद्धार्थकं दधि ।।
रसं क्रमेण विधिवज्जुहुयात्तु पृथक् पृथक् ।
[प्रधाना]ग्नौ पलाशं तु शास्तृमूलेन होमयेत् ।।
वटं चूतं च शुक्लार्कमश्वत्थोदुम्बरं तथा ।
प्लक्षं खादिरबिल्वं च शमी च संप्रकीर्तिताः ।।
अष्टोत्तरशतं वापि प्रत्येकं होमयेत्क्रमात् ।
पूर्णाहुतिं ततो हुत्वा व्याहृतिं च बलिं क्षिपेत् ।।
नृत्तगेयसमायुक्तं रात्रिशेषं व्यपोह्य च ।'
(*पद्मसंहितायाम्* टि० १६२, शास्तृस्थापने पृ० ३३, ३४)

[22] आधानादि विवाहन्तं—ङ;
अजिते अग्निकार्यविधौ 'एवं सुसंस्कृते वह्नौ ततः पित्रोर्विसर्जनम् । हृदयेन प्रयुञ्जीत' इत्युक्तत्वादत्र आधानादिविसर्गान्तमिति पाठः संघटितः ।

[23] 'ततः प्रभाते विमले नित्यकर्म समाप्य च ।
शयनाद्बिम्बमुत्थाप्य निर्माल्यादि विसृज्य च ।।
य [दस्येति च मन्त्रेण] होमकर्म समाप्य च ।
[हुत्वा] स्पृष्ट्वा [तु बिम्बं च] देशिको मूर्तिपैः सह ।।
स्पर्शाहुतिं च विधिवत् प्रायश्चित्ताहुतिं हुनेत् ।
सुमुहूर्ते सुलग्ने तु प्रविशेद्गर्भमन्दिरम् ।।
रत्नन्यासं ततः कृत्वा बन्धयेत्तु विचक्षणः ।
पूर्णाहुतिं ततो हुत्वाऽग्निस्थं योजयेद् घटे ।।
सर्वातोद्यसमायुक्तं सर्वालंकारसंयुतम् ।
शिरसा वाहयित्वा तु कुम्भानुद्धृत्य मूर्तिपैः ।।
[गत्वा तु देशिको] हर्म्यं बिम्बाग्रे स्थापयेद् घटान् ।
[सुमुहूर्ते तु संप्रा]प्ते मन्त्रन्यासं समारभेत् ।।
कुम्भाद्बीजं समादाय बिम्बस्य हृदि विन्यसेत् ।
वर्धन्या बीजमादाय शक्त्योश्च हृदि विन्यसेत् ।।
पीठे पूर्वोदिते न्यस्त्वा स्नापयेत्तत्र कुम्भकैः ।
गन्धपुष्पादिभिः पूज्य महाहविर्निवेदयेत् ।।
उत्सवं कारयेत्पश्चादेकाहं वा त्रियाहकम् ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।।
पुत्रार्थी लभते पुत्रान्धनार्थी धनमाप्नुयात् ।
[विद्यार्थी] लभते वेदं मोक्षार्थी मोक्षमाप्नुयात् ।।'
(*पद्मसंहितायाम्* टि० १६२, शास्तृस्थापने पृ० ३४, ३५)

[शास्त्रुत्सवविधिः]

[उत्सवफलम्]

[24]शास्त्रुत्सवविधिं वक्ष्ये शृणु [25]सम्यग्जनार्दन ।
आयुरारोग्यधनदं राजराष्ट्रविवर्धनम् ।।१४।।
ग्रामशान्तिकरं पुण्यं सर्वसंपत्करं शुभम् ।
[26]परसंहरणकरं स्वरक्षणकरं परम् ।।१५।।
स्वसेनारक्षणकरं परसेनापलायनम्[27] ।

[उत्सवकालः[28]]

माघमासे तु कर्तव्यं सोमवारदिने शुभे ।।१६।।
सर्वमासेषु कर्तव्यं शास्तुः प्रार्थनमुत्सवम्[29] ।

[स्वतन्त्रालये कर्तव्या उत्सवाः]

[30]पक्षाहे वा नवाहे वा एकाहे वा [31]समाचरेत् ।।१७।।
एकाहं [32]कौतुकपूर्वं नवपक्षाहमुत्सवम् ।
स्वतन्त्रे चालये कुर्यादुत्सवं [33]नवकर्मणि ।।१८।।

---

[24]'अथातः संप्रवक्ष्यामि महाशास्त्रुत्सवक्रमम् ।
इह जन्मफलं तस्य सर्वाभीष्टफलप्रदम् ।।
महापातकदोषघ्नं सर्वकार्येषु सिद्धिदम् ।'
(*ईशानशिवाचार्यपद्धत्यां* शास्त्रुत्सवविधौ पृ० ४५);
'आरोग्यं च फलं तत्र पुत्रश्रीकीर्तिवर्धनम् ।'
(*कुलालशास्त्रे* (टि० १५) शास्त्रुत्सवविधौ ४ पू०);
शास्त्रोत्सव—ङ

[25]सत्य जनार्दन—ङ

[26]परसंहारकरणं—ङ

[27]अत्र भवेदिति शेषः ।

[28]'उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।
दिनवारादिसंयुक्ते मासनक्षत्रसंयुते ।।
विवाहयोग्यतारासु आर्द्रायां तु विशेषतः ।
राजनक्षत्रसंयुक्ते ग्रामनक्षत्र एव च ।
इत्यादिशुभनक्षत्रे उत्सवं कारयेद्बुधः ।
(*ईशानशिवाचार्यपद्धतौ* शास्त्रुत्सवविधौ पृ० ८५);
'मार्गशीर्षकमासे तु कर्तव्यं माघ एव तु ।
कारयेत्फाल्गुने मासे कर्तव्यमुत्तरायणे ।।'
(*कुलालशास्त्रे* (टि० १५) शास्त्रुत्सवविधौ १२)

[29]उत्सवशब्दोऽत्र क्लीबे प्रयुक्तः; अत्र विषये *रौरवे* क्रियापादे १८.८ पू० टिप्पणी द्रष्टव्या ।

[30]'एकाहे च त्र्याहे च पञ्चाहे कौतुकं भवेत् ।
सप्ताहं च नवाहं च ध्वजारोहणपूर्वकम् ।।'
(*ईशानशिवाचार्यपद्धतौ* शास्त्रुत्सवविधौ पृ० ८५)

[31]अत्र उत्सवम् इति शेषः ।

[32]कौतुकं पूर्वं—ङ

[33]नूतने कार्ये इत्यर्थः ।

[आदिशैव एव स्वतन्त्रालये नित्यनैमित्तिककाम्योत्सवादिकमाचरेत्]

[34]आदिशैवेन कर्तव्यं वक्ष्यामि शृणु साम्प्रतम् ।
नित्यं नैमित्तिकं काम्यं [35]स्वतन्त्रालय [36]आचरेत् ।।१९।।
[37]मूलादिपञ्च[38]बेराणां शास्तुरुत्सव[39]कर्मवित् ।
तस्मात्सर्वप्रयत्नेन शास्तुरुत्सवमारभेत् ।।२०।।

[उत्सवभेदाः[40]]

एकत्रिपञ्च[41]सप्ताहनवाहेति प्रभेदकम् ।
एकाहं शैवमित्युक्तं त्रियहं गौणमुच्यते ।।२१।।
[42]पञ्चाहं भौतिकं नाम [43]सप्ताहं भौवनं स्मृतम् ।
नवाहं [44]शान्तिकं नाम पञ्चधा परिकल्प्यते ।।२२।।
तत्तन्मासदिने वापि पक्षे नवदिनेऽपि वा ।
आदौ तीर्थं विनिश्चित्य अधिवासनमारभेत् ।।२३।।

[45][उत्सवे प्रकारत्रयम्]

उत्सवं त्रिविधं प्रोक्तं ध्वजारोहणपूर्वकम् ।
भेरीताडनपूर्वं च अङ्कुरार्पणपूर्वकम् ।।२४।।

---

[34]स्वतन्त्रालयः कर्तव्यः शास्त्राराधनकर्मणि ।
आदिशैवस्तु पूजायां मुख्यमेव समाचरेत् ।।
नित्यं नैमित्तिकं काम्यं स्वतन्त्रालय आचरेत् ।
(*शास्त्रृस्थापने* (टि० ११५) पृ० १४, १५)

[35]स्वतन्त्रा ये समाचरेत्—ङ

[36]आदिशैव एव इति पदद्वयमध्याहृत्य व्याख्येयम् ।

[37]पञ्चबेराणि—
'दिने दिने विशेषेण शास्तारं पञ्चबेरकम् ।
मूलबेरं विशेषेण तीर्थनित्योत्सवं क्रमात् ।।
नैमित्तिकविशेषे तु महाशास्तृसमुत्सवे ।
यात्राबेरं तु कर्तव्यं नित्यं ग्रामप्रदक्षिणे ।।
बलिबेरेण शास्तुश्च सायं प्रातर्बलिं ददेत् ।'
(*भीमसंहितायाम्* शास्तृस्थापने (टि० ११५) पृ० ६)

[38]बेराणि—ङ

[39]कर्मवत्—ङ

[40]'उत्सवं पञ्चधा प्रोक्तं विधिना कल्पयेत्सुधीः ।
एकाहं च त्रयाहं च पञ्चाहं च सप्ताहकम् ।।
नवाहं चैव पञ्चैतदुत्स्वस्य पृथक् पृथक् ।'
(ईशानशिवाचार्यपद्धतौ शास्त्रुत्सवविधौ पृ. ८५);
'नवाहं चैव सप्ताहं पञ्चाहं वा विशेषतः ।
त्रयाहमैकमेवोक्तमेवं पञ्चविधं भवेत् ।।'
(*कुलालशास्त्रे* (टि० १५) शास्त्रुत्सवपटले श्लो ५)

[41]सप्ताहन्नवाहातिभेदनम्—ङ

[42]पञ्चाहो भौतिको नाम—ङ

[43]सप्ताहो भौवन—ङ

[44]शान्ति नाम स्यात्पञ्चधा—ङ

[45]एतद्विषये *अजिते* २७.२८—३५ श्लोकास्तदीय-टिप्पण्यश्च द्रष्टव्याः ।

[शास्तृप्रार्थना]

[६६]भो शास्तृदेव देवेश समस्तफलसाधक ।
शास्तारमित्थं [६७]संबोध्य विज्ञापनमथाचरेत् ।।२५।।
महोत्सवं करिष्येऽहं तत्र संनिहितो भव ।
इति विज्ञाप्य देवेशं लब्धानुज्ञस्ततो गुरुः ।।२६।।

[[६८]मृत्संग्रहणम्]

भूतचण्डमलंकृत्य गृह्णीयात्करालास्त्रकम् ।
[६९]मृदां स्थानं च संप्राप्य पूर्ववन्मृदमाहरेत् ।।२७।।

[अङ्कुरार्पणम्]

[७०]मण्डपेशानदेशे तु शालितण्डुलमेव च ।

---

[६६]अत्रार्थसंगत्यै पूर्वार्धोत्तरार्धयोर्विपर्ययः कृतः; शास्तारमित्थं देवेशं समस्तफलसाधकम् —ङ

[६७]संपूज्य —ङ

[६८]मृत्संग्रहणविषये *अजिते* २७.१४१ उ० —१४७ पू० श्लोका द्रष्टव्याः ।

[६९]मृदा —ङ

[७०]'शास्त्रालये यथापूर्वं मण्डपं चतुरश्रकम् ।
चतुर्द्वारसमोपेतं चतुस्तोरणभूषितम् ।।
मण्डपं तु ततो मध्ये वेद्यूर्ध्वे तु विशेषतः ।
स्थण्डिलं कारयेद्धीमानष्टद्रोणैश्च शालिभिः ।
भारार्धमुत्तमं चैव मध्यमं खारिकाद्वयम् ।।
अधमं खारिसंयुक्तं स्थण्डिलं तत्र कारयेत् ।
तदर्धं तण्डुलं प्रोक्तं तदर्धं तिलसंयुतम् ।।
लाजपुष्पैश्च दर्भैश्च विकिरेत्तु विशेषतः ।
तन्तुना वेष्टयेत्तत्र कुम्भादीन्पात्रसर्वशः ।।
प्रधानकुम्भं वर्धन्या अष्टकुम्भं विशेषतः ।
पञ्चसूत्रं त्रिसूत्रं वा वेष्टितानां विशेषतः ।।
पञ्चकं पञ्चवर्णैर्वा त्रयवर्णैस्त्रिसूत्रकम् ।
अलाभ एकवर्णेन सूत्रावेष्टित एव च ।।
गवाक्षसदृशं वापि गजाक्षसदृशान्तरम् ।
सूत्रैश्च वेष्टितं कृत्वा कुम्भादीन्कलशान्क्रमात् ।।
ससूत्रं सापिधानं च सवस्त्रं वारिपूरितम् ।
सकूर्चं पल्लवोपेतं नालिकेरफलान्वितम् ।।
हैमं वा राजतं वापि ताम्रजं मृण्मयं तु वा ।
सलक्षणं समायुक्तं चतुर्द्रोणैस्तदुत्तमम् ।।
द्रोणद्वयं तु मध्यं वा द्रोणपूर्णाधमं भवेत् ।
परिस्तरणं विन्यस्य मध्ये तु नलिनं लिखेत् ।।
सोमकुम्भं तथा प्रोक्तं द्रोणपूर्णं ततः क्रमात् ।
कालं भिन्नं च वर्ज्येत रक्तवर्णेन संभवम् ।।
तन्तुना वेष्टयेत्तत्र जलपूर्णं तु कारयेत् ।
हेम कुम्भे तु विन्यस्य कूर्चं मध्ये तु विन्यसेत् ।।
सोमेश्वराधिदैवत्यं पूजयेत्स्वस्वमन्त्रतः ।
शरावं घटिकां चैव पालिकां च यथाविधि ।।
पालिका दिशि विन्यस्य घटिकाः कोणे विन्यसेत् ।
तयोर्मध्ये शरावाणि विन्यसेत्तु विशेषतः ।।
मातङ्गी मालिनी शान्ता सर्वमोही सलक्षणी ।
विशालाक्षी विडम्बी च विश्वगन्धी विरूपिणी ।।
सुरूपी सुकुमारी च कौमारी चैव शक्तयः ।
द्वादश पालिकाशक्तयः पालिकाधिदेवताः ।।
नीलं कृष्णं हरिद्रं च अतिनीलं च रक्तकम् ।
स्फटिकं शुक्लवर्णं च कुङ्कुमारुणमेव च ।।
अतिरक्तातिशुक्लं च बन्धूककुसुमप्रभा ।
एते वर्णाश्च शक्तीनां सर्वासां च चतुर्भुजाः ।।
अभयं मूरु[वर ?]मूर्ध्वं च पाशाङ्कुशधरास्तथा ।

[51]विकीर्य पालिकाभिश्च आवृतं सोमकुम्भकम् ।।२८।।
[52]प्रतिष्ठाप्य तु तत्पार्श्वे न्यसेद्रोहिणिकुम्भकम् ।
मुद्गमाष[53]कुलुत्थांश्च तिल[54]सर्षपमाढकम् ।।२९।।
यवगोधूम[55]शालींश्च गृह्णीयान्नवबीजकम् ।
शिवमन्त्रेण क्षीरेणाप्लावयेदभि[56]मंत्र्य च ।।३०।।
[57]भूताष्टकं च दैवत्यं भवादयश्च देवताः ।
पालिकादेवताः प्रोक्ता अर्चयेत्तु विशेषतः ।।३१।।
[58]पूजयेन्मूलमन्त्रेण मध्यमं सोमकुम्भकम् ।
[59]अङ्कुरं पूर्ववत्प्रोक्तं'

[ध्वजाधिवासः तत्र ध्वजपटसंपादनम्]

'ध्वजाधिवासमाचरेत्। ।।३२।।
[60]तत्पटं षोडशहस्तमथवा तु चतुर्दश ।

पीताम्बरधराः सर्वा गजारुढास्तु सर्वशः ।।
लम्बितं दक्षिणं पादं वामपादोपरि न्यसेत् ।
मध्यमे सोमकुम्भं तु शक्तयो वामदक्षिणे ।।
द्विभुजं च द्विनेत्रं च श्वेतवर्णेन संयुतम् ।
श्वेतपद्मोपरि स्थाप्य सर्वाभरणभूषितम् ।।
कृत्तिकां दक्षिणे पार्श्वे रोहिणीं वामपार्श्वके ।
सर्वावयवसंयुक्तां सर्वाभरणभूषिताम् ।।
गन्धादिभिः समभ्यर्च्य पायसान्नं निवेदयेत् ।
ताम्बूलं तु निवेद्याथ सर्वप्राणिं तु दापयेत् ।।
ओषधीशं नमस्कृत्य बीजावापं तु कारयेत् ।
मुद्गकुलत्थशालीनां वेणु शिम्बुतिलं तथा ।।
आढकीं सर्षपं चैव माषं निष्पावमेव च ।
अपामार्गं तथा बीजं पयसा क्षालयेत्क्रमात् ।।
आचार्यो यजमानश्च भक्ताश्च परिचारकाः ।
सर्ववाद्यैश्च संयुक्तं सर्वप्राणिसमन्वितम् ।।
पालिकायां तु बध्नीयाद्बिल्वशिरीषपत्रकैः ।
अश्वत्थोदुम्बरैर्दूर्वाशुक्लसूत्रेण बन्धयेत् ।।
पालिकाद्यादिसंयुक्तं शुक्लमृद्भिस्तु पूरयेत् ।।
वालुकैश्च समोपेतं बीजोर्ध्वं परिविन्यसेत् ।
सुमुहूर्ते सुनक्षत्रे बीजनिर्वापमारभेत् ।।'
(*कुलालशास्त्रे* शास्त्रुत्सवविधौ (टि० १५) २१३०–५० पृ०);
एतद्विषये *अजिते* २७.१३७–१५० पृ० श्लोकास्तदीय-टिप्पणी च द्रष्टव्याः ।

[51]विंशत्या पालिका–ङ; अत्र पालिकासंख्या पालिका-देवतासंख्यानुसारेण षोडशेति भवितव्यम् । अतोऽत्र विकीर्येति पाठः संघटितः ।
[52]सोमप्रतिष्ठा कुम्भस्य पार्श्वे रोहिणि–ङ
[53]कुलुत्थानि–ङ
[54]सर्षप आढकम्–ङ
[55]शाल्यश्च–ङ
[56]मन्त्रतः–ङ
[57]भूताष्टकश्च–ङ
[58]वापये–ङ
[59]अङ्कुरार्पणविषये *अजिते* २७, १३७–१५०; ३७.१–३४ श्लोकाश्च द्रष्टव्याः ।
[60]तत्पदं–ङ

ध्वजदण्डसमं दीर्घं द्विगुणं [61]ध्वजरज्जुकम् ।।३३।।
[62]विस्तारेण समं पुच्छं तदर्धं शिखरं ततः ।
तत्पटं पञ्चधा [63]भज्यं मध्ये तु गजवाहनम् ।।३४।।
लेखयेत्तत्र, दण्डे तु बन्धयेच्च विशेषतः ।
[64]भूतांश्च तुरगांश्चैव छत्रचामरस्वस्तिकम् ।।३५।।
धूपदीपं च [65]माल्यं च, तत्पटे पञ्चधा कृते ।
क्रमुकं वेणुदण्डं वा स्कन्धत्रयसमन्वितम् ।।३६।।
यष्टिना संघटित्वा तु वलये मध्यके न्यसेत् ।
शतदर्भकृतं कूर्चं यष्ट्यग्रे विनिवेशयेत् ।।३७।।
दर्भमालासमायुक्तं किङ्किणीमालया युतम् ।
एवं पटं समापाद्य नेत्रोन्मीलनमाचरेत् ।।३८।।
[66]एवं धाम्नि समापाद्यमधिवासविधिं शृणु ।
तस्यैव पुरतः स्थाप्य गजयागाधिवासनम्[67] ।।३९।।
[68]मण्डपादि यथापूर्वं किंचिद्भेदं विशेषतः ।

---

[61]यज्ञरज्जुकम् —ङ

[62] ध्वजे पटं तु कारयेत् ।
पञ्चभागैक भागं तु शिखरं तत्र कारयेत् ।।
अधः पुच्छं तथैकं तु मध्ये तत्तस्य संभ्रमम् ।
कुलालशास्त्रे, शास्त्रुत्सवविधौ, ७०उ० —७१;
'गजं वै लेखयेत्तत्र मध्ये दण्डे तु बन्धयेत् ।
भूतैश्च तुरगैश्चैव छत्रचामरस्वस्तिकैः ।।
धूपदीपैश्च माल्यैश्च तत्पटं पञ्चकांशकम् ।
तस्यैव पुरतः स्थाप्य गजयागं समाचरेत् ।।'
(*भीमसंहितायां* शास्तृस्थापने टि० ११५.४७उ० — ४९पू०)

[63]हर्म्यं —ङ

[64]भूतैश्च तुरगैश्चैव —ङ

[65]प. लैश्च तत्पटं पञ्चधा . . . कम् —ङ

[66]एवं धाम समापाद्य —ङ

[67]अत्र कुर्यादिति शेषः ।

[68]ध्वजदण्डसमीपे देवसंनिधौ व्रीहिस्थण्डिलं कृत्वा तदुत्तरेऽस्त्रदेवं निधाय, स्नपनादिभिरभिषिच्य, नैवेद्यादिकं कृत्वा, स्थण्डिलमध्ये प्रधानकुम्भवर्धनीमष्टकलशं स्थाप्य, महागजमूर्तिमासनमूर्तिमूलेनाभ्यर्च्य, वर्धनीघटे गजेश्वरीं संपूज्य, परितः ॐ ऐरावताय नमः । ॐ पुण्डरीकाय नमः । ॐ वामनाय नमः । ॐ कुमुदाय नमः । ॐ अञ्जनाय नमः । ॐ पुष्पदन्ताय नमः । ॐ सार्वभौमाय नमः । ॐ सुप्रदीपगजाय नमः । मध्ये ॐ श्रां श्रौं महागजाय नमः । ॐ श्रीं ह्रीं गजेश्वर्यै नमः इत्यावाहनाद्युपचारः । पटस्थगजे चलासनं संपूज्य, अधारशक्त्यादिशक्तिपर्यन्तं संपूज्य, तत्पुरतः कुण्डं वा स्थण्डिलं वा विधाय, अग्निकार्यं कृत्वा, पटगजबिम्बशुद्ध्यर्थं कुम्भजलेन प्रोक्ष्य, ध्वजपटगजेसौरचन्द्रमन्त्रेण नेत्रोन्मीलनं कृत्वा, सर्वं प्रदर्श्य, पञ्चगव्येन प्रोक्ष्य, अष्टमृत्कषायोदकेन वा प्रोक्ष्य, दर्पणं निधाय, छायाभिषेकमलंकारं कृत्वा, जलाधिवासनार्थंशुद्धजलेन प्रोक्ष्य, शयनार्थं पञ्चब्रह्ममन्त्रेणाभ्यर्च्य ग्रामप्रदक्षिणं कृत्वा, धान्यासनोपरि संस्थाप्य, पुनः स्थण्डिलोपरि शान्तिकुम्भं संस्थाप्य, अस्त्रमन्त्रेणामन्त्र्य तत्त्वत्रयेण पूज्य, निवेद्य, ॐ श्रां गजात्मतत्त्वाय नमः । ओं श्रां गजात्मतत्त्वाधिपतये ॐ हां ब्रह्मणे नमः । गलान्तम् । ॐ श्रां गजविद्यातत्त्वाय नमः । ॐ श्रां गजविद्यातत्त्वाधिपतये ॐ हां विष्णवे नमः शिरोऽन्तम् । ॐ श्रां गजशिवतत्त्वाय नमःॐ श्रां गजशिवतत्त्वाधिपतये ॐ हां रुद्राय नमः शृङ्गान्तमिति संपूज्य । तदग्रपूर्वभागेऽग्निकार्यं विधायाग्निमध्ये गजेश्वरमावाह्य, आसनमूर्तिमूलपञ्चब्रह्मषडङ्गविद्यादेहान्तं संपूज्य, ओंकारादिनमोऽन्तपूजा । स्वाहान्तं होमं हुत्वा, पूर्णाहुतिं विदध्यात् । आत्मतत्त्वं दर्भमुष्टिमूलेन संस्पृश्य, शान्तिकुम्भाम्भसा प्रोक्ष्य गजमूलमन्त्रं संजप्य, वौषट् स्वाहेति हुत्वा,

[69]गजवाहं प्रतिष्ठाप्य शास्त्राष्टपरिवारकम् ॥४०॥
शक्त्या च संहितं बेरं कुम्भं संस्थाप्य पूर्वतः ।
ध्वजदण्डं दीपदण्डं संनिधौ पुरतः स्थितौ ॥४१॥
यागशालाबलि[70]स्थानपूर्वस्थानेषु पूजयेत् ।

[भेरीपूजा, भेरीताडनं च]

[71]चतुर्धा स्थण्डिलं सम्यक् शास्त्रो[क्तमथ] कल्पयेत् ॥४२॥
न्यस्त्वा कारकभूतास्त्रं तदग्रे तत्पटं न्यसेत् ।
तदग्रे विन्यसेत्कुम्भं [72]शास्त्रेऽष्टपरिकुम्भकान्[73] ॥४३॥
तदग्रे विन्यसेद्भेरीं सर्वलक्षणसंयुताम् ।
क्रमेणैव समभ्यर्च्य गन्धपुष्पादिभिस्ततः ॥४४॥
भेरीकुम्भान्तरे होमं कुण्डे वा स्थण्डिलेऽथवा ।
प्रागुक्तविधिना [कुर्या]च्चोष्णीषा[74]दीन्निवेशयेत् ॥४५॥
अस्त्रं तु देवतामानं कृत्वा प्रागुक्तवर्त्मना ।
भेरीं संताड्य संगृह्य त्रिभिर्मन्त्रैस्तु ताडयेत् ॥४६॥

विद्यातत्त्वं कुशमध्येन संस्पृश्य शान्तिकुम्भाम्भसाप्रोक्ष्य गजमूलमन्त्रं जप्त्वा होमयेत्। शिवतत्त्वं कुशाग्रेण संस्पृश्य शान्तिकुम्भाम्भसा प्रोक्ष्य गजमूलमन्त्रं जप्त्वा होमयेत्। कुण्डेऽपि गजमूलमन्त्रपूजाहोमं तत्त्वतत्त्वेश्वर-मूर्तिमूर्तीश्वरं पूज्य हुत्वा पूर्णाहुतिं विदध्यात्। कुण्डात् पटगजान्तं मूर्तिकुम्भान्तं मूर्तिकुम्भमपि स्थण्डिलोपरि अष्टकलशं नवदशकलशं प्रधानवर्धनीं संपूज्य, पृथिवीमूर्त्यब्वाय्वग्न्याकाशसूर्यसोमयजमानमूर्तिं गजेश्वर-मूर्तिमिति विभाव्य, इति त्रिखण्डतन्तुसंयोजनस्पर्शा-हुतिः। अग्निस्थदेवं कुम्भे संयोज्याग्निं बलिसहितं विसृज्य',

(*ईशानशिवाचार्यपद्धतौ* शास्त्रुत्सवविधौ पृ० ८७, ८८)

[69]'मदनो भीषणो रौद्र उन्मत्तश्चोग्रभाषकः ।
आश्चर्यः सुन्दरो वीर्यः शास्ताष्टपरिवारकाः ॥'

(*पूर्वकारणे* ५३. १६)

[70]स्थानं —ङ

[71]'स्थण्डिलमध्ये भेरीं निधाय, पुण्याहजलेन प्रोक्ष्य, भेरीमध्ये ॐ रुद्राय नमः, दक्षिणभागे ॐ विष्णवे नमः, वामभागे ॐ ब्रह्मणे नमः, कीलायां ॐ सप्तमातृदेव्यै नमः, ॐ अष्टमातृदेव्यै नमः, चर्मणि ॐ अनन्ताद्यष्ट-नागेभ्यो नमः, दक्षिणवृत्ते ॐ सूर्याय नमः, वामभागवृत्ते ॐ चन्द्राय नमः, इत्यावाह्याभ्यर्च्य नैवेद्यताम्बूलगन्ध-पुष्पाक्षतधूपदापोपचारं कृत्वा,
व्योमक्षितिस्वर्गतलस्थितानां हिताय पातालनिवासिनां च
विनाशहेतोः सुविद्विषाणां भेरीमहं संप्रति ताडयामि ॥
ब्रह्मजज्ञानम् इदं विष्णुत्रियम्बकमन्त्रेण त्रिस्ताडनमाचार्य-हस्तेन भेरीमध्ये। वाद्यकदक्षिणहस्ते रक्षाबन्धनम्। वाद्यकस्ताडयेत्। वचनम् —
अन्यथा नैव कर्तव्यं कर्ता भक्तो विनश्यति।
ताडनं पारशैवेन भेरीं भक्तिसमन्वितम् ॥

(*ईशानशिवाचार्यपद्धतौ* शास्त्रुत्सवविधौ पृ० ८९, ९०)

चतुर्धा —ङ

[72]शास्त्राष्ट —ङ

[73]अत्र परिवारकुम्भः 'परिकुम्भक' इति निर्दिश्यत इति भाति।

[74]दीनि निवेश —ङ

[७५]आहूय [७६]दिव्यगान् पश्चाच्छुद्ध[७७]पारशिवस्ततः ।
पुष्पाञ्जलिं समभ्यर्च्य भेरीं निष्पीड्य [७८]पूजयेत् ॥४७॥
उद्धृत्य भेरीं घोषेण [७९]देवताह्वानतः क्रमात् ।
ग्रामप्रदक्षिणं कृत्वा [८०]संध्याह्वानं ततः परम् ॥४८॥
[८१]देवतावाहनं कृत्वा संध्यावाहनमाचरेत् ।
[८२]संधिदेवान्समावाह्य ब्रह्मादीशान्त[८३]मर्चयेत् ॥४९॥
स्वस्वनाम्ना तु पूजायामासनार्चनकर्मणि ।
संध्योप[८४]चारः कर्तव्यः प्रतिसंध्यं प्रपूजयेत् ॥५०॥
[८५]तालो रागश्च नृत्तं च गीतं वाद्यं च पञ्चधा ।
एतैः पञ्चोपचारैश्च सन्धिदेवान्प्रपूजयेत् ॥५१॥

---

[७५]आहूयं . . . म्यगान् —ङ
[७६]'आकाशगान् देवान्' इत्यर्थे 'दिव्यगान्' इति प्रयुक्तमिति भाति ।
[७७]पारशिवलक्षणं भक्तप्रतिष्ठाविधौ द्रष्टव्यम् ।
[७८]पूजनम् —ङ
[७९]देवतावाहनं —ङ
[८०]सन्धावाहनतत्परम् —ङ
[८१]'भेरीं स्कन्धे समारोप्य वादयेत्सर्वतालवित् ।
गान्धारादिस्वरोपेतं समतालादितालकम् ॥
गीतनृत्तसमायुक्तमन्त्रलिङ्गसमायुतम् ।
प्रतिमासहितं वापि चण्डेश्वरयुतं तु वा ॥
संगृहीत्वास्त्रराजानं वितानछत्रसंयुतम् ।
धूपदीपसमायुक्तं घण्टारवसमन्वितम् ॥
प्रविश्य नगराद्यं तु ब्रह्मस्थानादितः क्रमात् ।
इन्द्रस्थानादितो वापि बलिं दद्यात्स्वनामतः ॥
बलिदानावसाने तु तालस्वरसमायुतम् ।
नर्तनेन समायुक्तं कारयेत्स्वस्वदिक्षु च ॥
ब्रह्मणि ब्रह्मतालं स्यान्मेघरागस्वरान्वितम् ।
समतालं च गान्धारं कोल्ली बद्धापणं ततः ॥
भृङ्गिणी कौशिकं नट्टभाषया मल्लतालकम् ।
श्रीकामरं नवाख्येन तक्केश्या बलितालकम् ॥
कोटिकं तक्करागेण शालापाण्या तु ढक्करी ।
पूर्वादिदिक्षु संयुक्तं पूर्वतालं यथा तथा ॥
(*उत्तरकामिके* ६.११०उ० —११८पू०);
'अस्त्रदेवमुत्सवमूर्तिं परिवारसहितं सर्ववाद्यनृत्तगीत-दीपधूपोपचारछत्रचामरव्यजनपुरःसरं ग्रामप्रदक्षिणार्थं सन्धिदेवाराधनम् —
ब्रह्मादिसन्धौ —ॐ हां ब्रह्मणे नमः । ॐ सर्वदेवाय स्वाहा बलिं दद्यात् । ब्रह्मतालश्लोकं पठेत् । ब्रह्मजज्ञानमिति श्रुतिः ।
ॐ हां इन्द्राय नमः । ॐ पूर्वद्वाररक्षकाय स्वाहा बलिं दद्यात् । इन्द्रतालश्लोकं पठेत् । त्रातारमिन्द्रमिति श्रुतिः ।
ॐ हां अग्नये नमः । ॐ बडबानलाय स्वाहा बलिं दद्यात् । अग्नितालश्लोकं पठेत् । त्वन्नो अग्नेति श्रुतिः ।
ॐ हां यमाय नमः । ॐ वीरमुख्याय स्वाहा बलिं दद्यात् । यमतालश्लोकं पठेत् । वेदः सुगन्नःपन्थाम् ।
ॐ हां नेर्ऋतये नमः । ॐ बलमुख्याय स्वाहा बलिं दद्यात् । नैर्ऋतितालश्लोकपठनम् । वेदः असुन्वन्तम् ।
ॐ हां वरुणाय नमः । ॐ मेघबन्धनाय स्वाहा बलिं दद्यात् । वरुणतालश्लोकपठनम् । वेदः तत्त्वायामि ।
ॐ हां वायवे नमः । ॐ खगेशमुख्याय स्वाहा बलिं दद्यात् । वायुतालश्लोकपठनम् । वेदः आनो नियुद्भिः ।
ॐ हां कुबेराय नमः । ॐ आवरणाय स्वाहा बलिं दद्यात् । कुबेरतालश्लोकपठनम् । वेदः वयँ सोमव्रते तव ।
ॐ हां ईशानाय नमः । ॐ भूताय स्वाहा बलिं दद्यात् । ईशानसन्धितालश्लोकपठनम् । वेदः तमीशानम् ।'
(*ईशानशिवाचार्यपद्धतौ* शास्त्रुत्सवविधौ पृ० ९०)
[८२]संध्यादेवतान् समभ्यर्च्य —ङ
[८३]मर्चनम् —ङ
[८४]चारं कर्तव्यं —ङ
[८५]तालं रागं च —ङ

[होमः]

सैकते स्थण्डिले वापि होमं कुर्याद्विचक्षणः ।
होमोपकरणद्रव्यं समिदन्नाज्यमेव च ॥५२॥
पलाशखदिराश्वत्थवटोदुम्बरबिल्वकम् ।
अर्कः शमी च प्लक्षश्च आज्येन समभिप्लुतम् ॥५३॥
[86]शतैर्वाथ तदर्धैर्वा पञ्चविंशतिकेन वा ।
[87]षोडशभिरथवा कुर्यात्संख्यया देशिकोत्तमः ॥५४॥
वेदादिमन्त्रमुच्चार्य शास्तृगायत्रिमन्त्रतः ।
ब्रह्मषडङ्गमन्त्रेण प्रत्येकं जुहुयात्क्रमात् ॥५५॥
[88]आधानादि[89]विसर्गान्तमग्निकार्योक्तमाचरेत् ।
अग्निमध्ये तु तं ध्यात्वा आसनावाहनार्चनम् ॥५६॥
समिदाज्यचरूँल्लाजाँल्लाजचूर्णं यवं तिलम् ।
अपूपं पिप्पलीपत्रं वेणुजं त्वथ माषकम् ॥५७॥
[90]सद्यादीशानपर्यन्तैस्तन्मन्त्रैश्चैव होमयेत् ।
प्रत्येकं शतमर्धं वा हुत्वा स्विष्टान्तमाचरेत् ॥५८॥
अथवा मूर्तिमन्त्रेण मांसहोमं समाचरेत् ।
मांसं प्रत्यामद्रव्येण शुद्धान्नं होमयेच्छतम् ॥५९॥
अथवा मूलमन्त्रेण सहस्रं वा शताष्टकम् ।
तत्तत्स्वनाममन्त्रेण होमयेन्मन्त्रपूर्वकम् ॥६०॥
पूर्वद्रव्यसमायुक्तं [होमं मन्त्री] समाचरेत् ।
वह्नेर्बीजं समादाय कुम्भमध्ये तु योजयेत् ॥६१॥
सौरादिगजपूजान्तं पूर्ववत्पूजयेद्बुधः ।
विशेषमिह कर्तव्यं गजयागवशान्नयेत् ॥६२॥

[ध्वजदण्डार्चनं ध्वजारोपणं च]

[91]ध्वजदण्डादिकं कृत्वा यात्राबेरे[92] समाचरेत् ।
दण्डार्चनक्रमं वक्ष्ये शृणु सम्यग्जनार्दन ॥६३॥

---

[86]शतं वा च तदर्धं वा—ङ
[87]षोडशेनाथवा—ङ
[88]'एवं सुसंस्कृते वह्नौ ततः पित्रोर्विसर्जनम्' 'हृदयेन प्रयुञ्जीत' इति *अजिते* ३१.८४ श्लोके पित्रोर्विसर्जनान्तमेवाग्निकार्ये विहितत्वादत्र विसर्गान्तमिति पाठः साधितः ।
[89]विवाहान्तं—ङ
[90]सत्यादीशानपर्यन्तं—ङ
[91]'ध्वजदण्डवेदिकोर्ध्वे कर्णिकायां शक्तिं मनोन्मनीं संपूज्य ॐ श्रीं आधारशक्तये नमः ।ॐ श्रां धर्माय नमः । ॐ श्रां ज्ञानाय नमः । ॐ श्रां वैराग्याय नमः । ॐ श्रां ऐश्वर्याय नमः । ॐ श्रां पद्मासनाय नमः । दण्डमूले ॐ हां ब्रह्मणे नमः । दण्डमध्ये ॐ हां विष्णवे नमः । दण्डाग्रे ॐ हां रुद्राय नमः । तदग्रे ॐ श्रां महेश्वरशास्त्रे नमः । द्विभागे ॐ श्रीं सलग्न्यै नमः । ॐ श्रीं सुमुख्यै नमः । ॐ अस्त्राय नमः । उपदण्डे ॐ

आहूय सर्वदेवांश्च तत्तत्स्वनाममन्त्रकैः ।
विघ्नेश्वरस्य [93]पूजां च सकलस्य विशेषतः ।।६४।।
पुण्याहं चैव कर्तव्यं मन्त्रैः प्रोक्ष्य शिवाम्भसा[94] ।
करशुद्धिं करन्यासमङ्गन्यासमतः परम् ।।६५।।
प्रोक्षयेद्दण्डमभ्यर्च्य अर्चयेन्मन्त्रपूर्वकम् ।
[95]पूर्वाह्णे वा पराह्णे वा रात्रौ वारोपयेत्ततः ।।६६।।
नैवेद्यं दापयित्वा तु धूपदीपसमायुतम् ।
आस्थानमण्डपं [96]तत्तु यात्राबेरं नयेत्ततः ।।६७।।
नैवेद्यं दापयेत्पश्चादारात्रिकमथाचरेत् ।।

[यागमण्डपः, तत्र वेदीकुण्डकल्पनं च[97]]

यागस्य मण्डपं कृत्वा [98]चैशान्ये वाग्निगोचरे ।।६८।।
वारुण्यां [99]संनिधौ वापि [100]कर्तव्यो यागमण्डपः ।

श्रां अष्टशास्तृभ्यो नमः। सुषिरे ॐ द्वादशादित्याय नमः। फलकायां ॐ ह्रीं इच्छाज्ञानक्रियाशक्त्यै नमः फलकात्रये। दर्भमालायां ॐ हां ब्रह्मणे नमः। दर्भेषु ॐ चतुर्मुखाय नमः। रज्ज्वां ॐ वासुकिने नमः। पटे ॐ श्रां श्रौं श्वेतवर्णगजदेवाय नमः। गन्धकुङ्कुमपुष्पं समर्प्य, नैवेद्यताम्बूलधूपदीपाचमनद्रव्यार्घ्यं समर्प्य, आरात्रिकं दत्त्वा, कुम्भानभ्यर्च्य, पटाभिषेकार्थं प्रोक्ष्य, आचार्यः साधकाचार्यः देवतावाहनगद्यं पद्यं चूर्णिकां पठेत्। पटं रज्जुना बद्ध्वा वलये सुदृढं जय जय शब्दस्वस्तिमङ्गलवाद्यसंघोषणसहितमारोपयेत्। मुद्गान्नं निवेद्य, ध्वजदण्डवेदिकां परितो दलेषु पूर्वादि नवशक्तिमन्त्रेणान्नबलिं दद्यात्। ॐ सुलग्न्यै स्वाहा। ॐ सुमुख्यै स्वाहा। ॐ सुप्रयोजिन्यै स्वाहा। ॐ सुराज्ञ्यै स्वाहा। ॐ सुन्दर्यै स्वाहा। ॐ सुपूर्णायै स्वाहा। ॐ सुपुष्कलायै स्वाहा। ॐ सुमालिन्यै स्वाहा। मध्ये ॐ ह्रीं आधारशक्त्यादिशक्त्यै स्वाहा। ध्वजदण्डमध्ये रक्षाबन्धनम्।'

(*ईशानशिवाचार्यपद्धतौ* शास्तृत्सवविधौ पृ० ८८, ८९)

[92]बेरं—ङ

[93]पूजाया—ङ

[94]शिवांजसा—ङ

[95]'धूपदीपं समभ्यर्च्य कुलालाचार्यो मन्त्रवित्।
मुद्गान्नं तु तथा चैव नैवेद्यं दापयेत्क्रमात्।।
ध्वजकाले बलिं दद्यात्रवशक्त्यात्र मन्त्रतः।
ताम्बूलं दापयेत्तत्र ध्वजदेवे तु मन्त्रकम्।।
आवाहनादिमन्त्रेण सब्रह्मादि कुलालकः।
ध्वजारोहं तथा प्रोक्तम्'

(*कुलालशास्त्रे* शास्तृत्सवविधौ ८० उ०—८३ पू०)

[96]तत्र—ङ

[97] 'यागाशालाक्रमं शृणु।
आलयं पूर्ववत्कृत्वा ऐशान्यां पावके तथा।।
नवहस्तमष्टहस्तं सप्तहस्तमथापि वा।
षोडशस्तम्भसंयुक्तं मण्डपं कारयेत्तदा।।
मध्ये वेदीं तथा कृत्वा पञ्चाग्निं तत्र कारयेत्।
अथवैकाग्निकुण्डं तु पूर्वलक्षणवद्भवेत्।।
कुण्डानां वेदिकानां च दर्पणोदरसंनिभम्।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्।।
दर्भमालाभिरावेष्ट्य वितानध्वजभूषितम्।
फलपल्लवशोभं च पुष्पमालासमायुतम्।।
मुक्तादामैरलंकृत्य स्तम्भवस्त्रादिभूषितम्।
अष्टद्रोणैस्तु शालीनां स्थण्डिलं तत्र कारयेत्।।'

(*कुलालशास्त्रे* शास्तृत्सवविधौ पृ० १०८—११३)

[98]ईशान्ये वाग्नि . . . चरेत्—ङ

[99]'संनिधौ' इत्यस्य 'अग्रे' इत्यर्थो व्याख्येयः।

[100]कर्तव्या यागमण्डपम्—ङ

पञ्चषट्सप्तहस्तैर्वा षोडशस्तम्भसंयुतः[101] ॥६९॥
मध्ये वेदिं ततः कुर्यात्सम्यग्द्वित्रिचतुष्कराम्[102] ।
उपवेदिं ततः कुर्याद्द्वि[103]त्रियङ्गुलकाश्रयाम् ॥७०॥
वेदिबाह्ये तु परितः पञ्च कुण्डानि कारयेत् ।
एकाग्निर्वाथ [104]कर्तव्यो वृत्तकुण्डं महाग्नये ॥७१॥
वेदिमध्ये विशेषेण भारपञ्चकशालिभिः ।
[105]तदर्धैस्तण्डुलैश्चैव तदर्धैश्च तिलैरपि ॥७२॥
लाजैस्तदर्धैः संयुक्तं[106] दर्भैः पुष्पैः परिस्तरेत् ।
तन्मध्ये नलिनं लिख्य साष्टपत्रं सकर्णिकम् ॥७३॥
[107]अर्चयेद्गन्धपुष्पैश्च श्रीं क्लीं बीजेन संयुतम् ।
धूपदीपं ददेत्पश्चाद्यागेशाराधनं क्रमात्[108] ॥७४॥

---

[101] संयुतम् —ङ
[102] चतुष्करम् —ङ
[103] त्रियङ्गुलमाश्रयम् —ङ
[104] कर्तव्यं —ङ
[105] तदर्धैस्थण्डिलै —ङ
[106] अत्र स्थण्डिलं कुर्यादिति शेषः ।
[107] अथाचार्यः यागमण्टपं प्रविश्य, पुण्याहपञ्चगव्य-पञ्चामृतं कृत्वा, सकलीकृत्य, सामान्यार्घ्यं साधयित्वा सूर्यकुम्भे सूर्यं सशक्तिपरिवारतेजश्चण्डपर्यन्तं यथोक्तं पूज्य, प्रार्थ्य, पूर्वद्वारं सामान्यार्घ्यतीर्थेनास्त्रमन्त्रेण संप्रोक्ष्य, कवचेनावकुण्ठ्य, द्वारदक्षिणे ॐ जयाय नमः, द्वारोत्तरे विजयाय नमः, दक्षिणद्वारपश्चिमे ॐ महाकालाय नमः, द्वारपूर्वे ॐ द्वारशास्त्रे नमः, पश्चिमद्वारस्योत्तरे ॐ भृङ्गिणे नमः, दक्षिणे ॐ गणाम्बिकायै नमः, उत्तरद्वारस्य पूर्वे ॐ जयन्ताय नमः, पश्चिमे ॐ सुमित्रायै नमः, प्रतिद्वारे पूजापूर्वं सामान्यार्घ्यतीर्थेन अस्त्रमन्त्रेण प्रोक्षणम् । अङ्गुष्ठरहित-तर्जनीमध्यमानामिकाङ्गुलैः ॐ हैं कवचाय हुं फट् । तर्जन्यावकुण्ठनम् । पूजानैवेद्यताम्बूलधूपदीपाचमनार्घ्यं दत्त्वा, पश्चिमद्वारे नित्यद्वारपूजा दक्षिणवामक्रमेण । ॐ भूताय नमः, ॐ भेतालाय नमः, द्वाराग्रे ॐ गजाय नमः, कपाटद्वये ॐ विमलाय नमः, ॐ सुबाहवे नमः इति संपूज्य, अन्तःप्रविश्य तिरस्करिणीं ॐ श्रीं यवनिकायै नमः, पूर्वद्वारस्य दक्षिणकुम्भे ॐ इन्द्राय नमः ध्यानम् —

ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम् ।
सहस्रनयनं शक्रं वज्रपाणिं विभावयेत् ॥

ॐ अग्नये नमः, ध्यानम् —

सप्तार्चिषं च बिभ्राणमक्षमालां कमण्डलुम् ।
ज्वालामालाङ्कुशं रक्तं शक्तिहस्तमजासनम् ॥

ॐ यमाय नमः —

कृतान्तं महिषारूढं दण्डहस्तं भयानकम् ।
कालपाशधरं कृष्णं ध्यायेद्दक्षिणदिक्पतिम् ॥

ॐ निर्ऋतये नमः —

रक्तनेत्रं शवारूढं नीलोत्पलदलप्रभम् ।
कृपाणपाणिमसृजं पिबन्तं राक्षसेश्वरम् ॥

ॐ वरुणाय नमः —

नागपाशधरं हृष्टं रक्तौघद्युतिविग्रहम् ।
शशाङ्कधवलं ध्यायेद्वरुणं मकरासनम् ॥

ॐ वायवे नमः —

आपीनहरितच्छायं विलोलध्वजधारिणम् ।
प्राणभूतं च भूतानां हरिणस्थं समीरणम् ॥

ॐ कुबेराय नमः —

कुबेरं मनुजासीनं सगर्वं गर्वविग्रहम् ।
स्वर्णच्छायं गदाहस्तमुत्तराशापतिं स्मरेत् ॥

ॐ ईशानाय नमः —

ईशानं वृषभारूढं त्रिशूलं व्यालधारिणम् ।
शरच्चन्द्रनिभं वन्दे चन्द्रमौलिं त्रिलोचनम् ॥

ईशानदक्षिणे ॐ ब्रह्मणे नमः —

ब्रह्मा चतुर्मुखः पीतः कमण्डल्वक्षमालिकः ।
हंसारूढः समायातु भास्वरो द्विभुजान्वितः ॥

तद्दक्षिणे ॐ सरस्वत्यै नमः, तद्दक्षिणे ॐ

[अग्निकार्यविधिः[१०९]]

शृणु कुण्डसमीपस्थं होमोपकरणानि च ।

अखिलवीराय नमः, इन्द्रदक्षिणकुम्भे ॐ गणेश्वराय नमः, वरुणस्य दक्षिणकुम्भे ॐ चण्डकोपाय नमः, नैर्ऋतिपूर्वकुम्भे ॐ वास्त्वधिपतये ब्रह्मणे नमः, तत्पूर्वकुम्भे ॐ शङ्कुकर्णाय नमः, नैर्ऋत्युत्तरतः ॐ विष्णवे नमः, तदुत्तरे ॐ लक्ष्म्यै नमः, ईशानपश्चिमकुम्भे ॐ यमुनायै नमः, वायुपूर्वकुम्भे ॐ गङ्गायै नमः, पूर्वद्वारस्य उत्तरकुम्भे ॐ क्षेत्रपालाय नमः, वायोर्दक्षिणकुम्भे ॐ दुर्गायै नमः, अन्तराले सप्तगुरुकुम्भम्—

सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम् ।
स्कन्दं विष्णुं च धातारं गुरून्सप्त समाश्रयेत् ॥

दर्पणे ॐ स्कन्दाय नमः, पूर्णकुम्भे ॐ लम्बोदराय नमः, गजे ॐ शास्त्रे नमः, युग्मचामरे ॐ गङ्गायै नमः, श्रीवत्से ॐ सरस्वत्यै नमः, स्वस्तिके ॐ लक्ष्म्यै नमः, शङ्खे ॐ चन्द्राय नमः, दीपे ॐ दुर्गायै नमः, वज्रायुधे ॐ प्रसन्नात्मने नमः, कटके ॐ कालात्मने नमः, दण्डे ॐ कोपात्मने नमः । खड्गे ॐ गुणात्मने नमः, पाशे ॐ कोमलात्मने नमः, अङ्कुशे ॐ विषात्मने नमः, ध्वजे ॐ विमलात्मने नमः, शूले ॐ विकृतात्मने नमः, पद्मे ॐ महात्मने नमः, चक्रे ॐ मङ्गलात्मने नमः ॥

अन्तस्तम्भचतुष्टये आग्नेयादि ॐ धर्माय नमः, ॐ ज्ञानाय नमः, ॐ वैराग्याय नमः, ॐ ऐश्वर्याय नमः, पूर्वादिद्वादशस्तम्भेषु द्वादशादित्यान् पूजयेत् । कम्पादिषु ॐ पृथिवीतत्त्वाय नमः, तृणेषु ॐ जलतत्त्वाय नमः, बन्धेषु ॐ अग्नितत्त्वाय नमः, वंशेषु ॐ वायुतत्त्वाय नमः, स्थूणासु ॐ आकाशतत्त्वाय नमः, विताने ॐ चन्द्राय नमः, तरङ्गेषु जलेशाय नमः, दर्भमालायां ॐ वासुकिने नमः, इति संपूज्य, यागगृहं संरक्ष्य, यागेश्वरवर्धनीं आधारशक्त्यादिशक्तिपर्यन्तं संपूज्य, चलासनं विभाव्य, ॐ गजासनाय नमः, ॐ गजमूर्तये नमः, ॐ गजाय नमः, निवेद्य, वर्धनीतीर्थेन ॐ श्लीं पशुं हुं फट् पाशुपतास्त्राय नमः, अविच्छिन्नधारया प्रदक्षिणीकृत्य, स्थाप्य, शास्त्रासनमूर्तिमूलं पञ्चावरणान्तमभ्यर्च्य, नैवेद्यदीपाराधनं कृत्वा, काम्यानि विज्ञाप्य, आसनमूर्तिमूलं स्थिरासनं वर्धनीघटजलधाराप्रदक्षिणं प्रारम्भ एककालमात्रम् । विकिरद्रव्यप्रयोजनमत एव । तिललाजपुष्पकुशभस्मचन्दनसिद्धार्थसप्तकं यागाशालां परितः अन्तराले विकीर्य, प्रधानवेदिकासमीपे नैर्ऋतिभागे उत्तराभिमुखः कूर्मासने स्थित्वा, भूतशुद्धिं विधाय, शिवोऽहमिति भावयेत् ॥

"देहं स्थानं तथा द्रव्यं मन्त्रं लिङ्गं च पञ्चकम् ।" सुप्रभेदे । इति पञ्चशुद्धिप्रकारेण शास्तारं सहशक्तिद्वयं वर्धनीत्रयं विघ्नेश्वराष्टशास्तारं कुम्भानि आधारशक्त्यादि पञ्चासनपञ्चावरणान्तं ध्यानपुरःसरं पूजानैवेद्यादिकं कृत्वा, शिवाग्निकार्यं विधायाग्निमध्ये पञ्चासनशास्त्रावरणान्तं संपूज्य, होमं हुत्वा, द्रव्यहोमं पृथक् पृथक् तत्तन्मन्त्रेण हुत्वा, पूर्णाहुतिमन्तर्बलिबहिर्बलिं न्यस्य, आरात्रिकसर्वोपचारैः कुम्भमूर्तीः संपूजयेत् । इति यागपूजा दिनं प्रति द्विकालम् ।'

(*ईशानशिवाचार्यपद्धतौ* शास्त्रुत्सवविधौ पृ० ९०—९३)

[१०८] अत्र कुर्यादिति शेषः ।

[१०९] 'मथित्वा सूर्यकान्ताद्वा श्रोत्रियागारतोऽपि वा ।
ऋतुस्नातां तु तां ध्यात्वा वागीश्वरीं विशेषतः ॥
ऋतुसंगमनादीनां षोडशक्रिया दापयेत् ।
एकं वै हृदयं चैव त्रिपादं च द्विधा शिरः ॥
चतुःशृङ्गं तु षण्णेत्रं सप्तजिह्वं द्विनासिकम् ।
सप्तहस्तं च कर्तव्यं सर्वाभरणभूषितम् ॥
दक्षिणे तु चतुर्हस्तं वामभागे त्रिहस्तकम् ।
एतदग्निस्वरूपं तु उमा देवी सह प्रिया [स्वाहा देव्या सह प्रियम्] ॥
कुण्डमध्ये चतुर्दिक्षु कूर्चानामुपरि न्यसेत् ।
परिधिं दक्षिणे चैव पश्चिमे चोत्तरे न्यसेत् ॥
उत्तरे तु प्रणीतां च दक्षिणे प्रोक्षणीं तथा ।
आघारसमिधौ चैव ऐशान्यां पावके तथा ॥
ब्रह्माणं दक्षिणे कूर्चे घृतपात्रं तु दक्षिणे ।
ततश्चाग्निमुखं चैव होमयेत्तु विचक्षणः ॥

कुण्डस्य कृत्वा [110]संस्कारान्[111]वीक्षणाद्यान्विधीरितान् ।।७५।।
अष्टा[112]दश च [113]संस्कारानासनं तत्र विन्यसेत् ।
वागीशी[114]वाक्पती [115]प्यर्च्य आवाह्य शास्तृमूर्तिवत् ।।७६।।
अग्निमध्ये समावाह्य तत्परीवारकैः[116] सह ।
समिदाज्यचरूँल्लाजान्सर्षपं च यवं तिलम् ।।७७।।
मुद्गं माषं कुलुत्थं च मूलमन्त्रेण होमयेत् ।
अष्टोत्तरशतं वाथ तदर्धं वा तदर्धकम् ।।७८।।
मेषकुक्कुट[117]मांसं वा होमकर्म समाचरेत् ।
[118]प्रत्याम्नातहविष्यं वा आज्यमिश्रेण होमयेत् ।।७९।।
पञ्चब्रह्म च मूलं च [119]षडङ्गं च हुनेत्क्रमात् ।

[प्रतिसरबन्धः[120]]

होमान्ते प्रतिसरं बद्ध्वा शास्तारं[121]सशक्तिं न्यसेत् ।।८०।।
अस्त्रमूर्तिं न्यसेत्तत्र प्रतिसरं बन्धयेत्ततः ।
तण्डुलं कौतुकं चैव नालिकेरं तथैव च ।।८१।।
[122]स्थलिकोपरि ताम्बूलं सवस्त्राच्छादनं न्यसेत् ।
परिचारमूर्धन्यादाय [123]प्राकारं संपरिक्रमेत् ।।८२।।
शास्तुः संनिधिमागत्य [124]त्रिपाद्युपरि विन्यसेत् ।
विघ्नेशं पूजयेत्तत्र संकल्प्य च स बुद्धिमान् ।।८३।।
पुण्याहं वाचयेत्तत्र प्रोक्षयेच्छास्तृमूर्तिषु ।
प्राणानायम्य मूलेन कराङ्गन्यासमारभेत् ।।८४।।

समिदाज्यचरूँल्लाजान्वेणुबीजयवांस्तिलान् ।
प्रत्येकं तु शतं वापि शतार्धं जुहुयात्क्रमात् ।।
समिधः पञ्चमेनाथ वक्त्रेणाज्यं तथैव च ।
अघोरेण चरुं हुत्वा लाजं वामेन चैव हि ।।
सद्येन वेणुबीजं वै बिल्वपत्रं हृदा तथा ।
नेत्रेणैव यवं हुत्वा प्रत्येकं व्याहृतिं तथा ।।
पूर्णाहुतिं च शिरसा प्रतिद्रव्यं विशेषतः ।
सर्वद्रव्यसमायुक्तं हव्यवाहं समुच्चरन् ।।
द्रव्यान्ते व्याहृतिं हुत्वा परिषेचनमाचरेत् ।'
(*कुलालशास्त्रे* शास्त्रुत्सवविधौ
पृ० १२२—१३३पू०)

[110]संस्कारं—ङ
[111]वीक्षणाद्या विधीयते—ङ
[112]दशं च—ङ
[113]संस्कारमासनं—ङ
[114]वाक्पतीभ्यर्च्य—ङ
[115]अत्र अपिशब्दे 'व्यष्टि भागुरिरल्लोपमवाप्यो-रुपसर्गयोः' इत्यकारलोपः ।
[116]वारणैः—ङ
[117]मासं वा—ङ
[118]प्रत्याम्नायहविषं च—ङ
[119]षडङ्गस्य—ङ
[120]प्रतिसरबन्धविषये *अजिते* २७.१९९—२०८श्लोका-स्तदीयटिप्पणी च द्रष्टव्याः ।
[121]सशक्ति—ङ
[122]स्थण्डिलोपरि—ङ
[123]प्रकारं—ङ
[124]त्रिसादोपरि—ङ

कौतुकं ब्रह्ममन्त्रेणाभ्यर्च्य शास्तृमन्त्रवित् ।
निरीक्षणाव[125]कुण्ठने पद्मधेनू प्रदर्शयेत् ।।८५।।
धूपदीपं ददेत्पश्चाच्छास्तृमूर्तिं समर्चयेत् ।
लय[126]भोगाङ्गं साङ्गं च अर्चयेन्मूर्तिबिम्बवत् ।।८६।।
शास्तृब्रह्माङ्गं विन्यस्य मूर्धादिपदान्तं न्यसेत् ।
आवाहनादिषण्मुद्रास्ततः संदर्शयेत्सुधीः।।८७।।
दत्त्वा धूपं च दीपं च कौतुकं बन्धयेत्ततः ।
[127]त्रियम्बकेन मन्त्रेण बृहत्सामेति मन्त्रतः ।।८८।।
विश्वेत्ताते ऋचा चैव कौतुकं बन्धयेत्क्रमात् ।
अर्घ्यं दद्याद्विशेषेण नैवेद्यं दापयेत्ततः ।।८९।।
आरात्रिकं ततः कुर्यात्षोडशैरुपचारकैः[128] ।
शुद्धं भस्म ततो दत्त्वा भक्तेभ्यो दापयेत्ततः ।।९०।।

[बलिविधिः[129]]

[130]बन्धनान्ते बलिं दद्यात्प्रतिमाबलिमेव च[131] ।
मेषकुक्कुटमहिषमधुमत्स्यांस्तथैव च ।।९१।।

---

[125]कुण्ठं च—ङ

[126]भोगाङ्गसाङ्गं—ङ

[127]त्रियम्बकेन मन्त्रेण—तै० सं० १.८.६ बृहत्सामेति मन्त्रतः—तै० सं० १.८.१३ विश्वेत्ताते ऋचा—*ऋक्संहिता*—२०.४७.११; निश्चित्ताते—ङ

[128]'आवाहनं तु प्रथमं स्थापनं तु द्वितीयकम् ।
तृतीयं पाद्यतोयं स्यादाचमनं चतुर्थकम् ।।
पञ्चमं चार्घ्यविन्यासं षष्ठं चैवाभिषेचनम् ।
सप्तमं वस्त्रगन्धं चाप्यष्टमं पुष्पपूजनम् ।।
नवमं धूपदीपं स्याद्दशमं तु निवेद्यकम् ।
एकादशं बलिं कुर्याद्द्वादशं होमकर्म च ।।
त्रयोदशं श्रीबलिं च गेयवाद्यं चतुर्दशम् ।
नृत्तं पञ्चदशं चैवाप्युद्वासनं तु षोडशम् ।।
(*पूर्वकारणे* ३०.४२२ उ०—४२६पू०)

[129]प्रथमं वैघ्नेश्वरं च द्वितीयं ब्राह्ममुच्यते ।
भूतानां तु तृतीयं स्याद्गन्धर्वाणां चतुर्थकम् ।।
ऐन्द्रं तु पञ्चमं प्रोक्तमृषीणां षष्ठमुच्यते ।
सप्तमं वैष्णवं प्रोक्तमष्टमं गजराजकम् ।।
शास्तुस्तु नवमं प्रोक्तं दिनानां तु स्युर्देवताः ।
लाजका मोदकं चैव मुद्गान्नं गुलसंस्कृतम् ।।
प्रथमेऽहनि दातव्यं विघ्नमन्त्रं समुच्चरन् ।
पद्मपुष्पसुराजादि पायसान्नैश्च संयुतम् ।।
द्वितीयेऽहनि दातव्यं ब्रह्ममन्त्रं समुच्चरन् ।
इन्द्रवल्लीसुखानन्दीत्रिफलं दधिसंयुतम् ।।
तृतीयेऽहनि दातव्यं भूतमन्त्रमनुस्मरन् ।
शुद्धान्नं तु हरिद्राख्यं नालिकेरफलैर्युतम् ।।
चतुर्थेऽहनि दातव्यं गन्धर्वाणां समन्त्रकम् ।
पायसं गुलसंमिश्रं त्रिफलं चाज्यसंयुतम् ।।
पञ्चमेऽहनि दातव्यमिन्द्राणां देवताक्रमात् ।
पद्ममूलफलं चैव वेणुं च दधिसंयुतम् ।।
षष्ठेऽहनि प्रदातव्यमृषीणां तु बलिक्रमात् ।
तिलानां पिष्टचूर्णैस्तु मिश्रकं पायसान्नकम् ।।
सप्तमे पञ्चबल्यं तु विष्णुमन्त्रं समुच्चरन् ।
माषान्नं भूतसंयुक्तं पायसादिफलैर्युतम् ।।
अष्टमेऽहनि देवानां नागमन्त्रादिमन्त्रकम् ।
शुद्धान्नं दधिसंयुक्तं लाजापूपसमायुतम् ।।
नवमेऽहनि दातव्यं शास्तॄणां मूलमन्त्रकैः ।
अस्य देवगणानां च ग्रामसंधिबलिं ददेत् ।।
छत्रध्वजवितानैश्च चामरैश्चैव शोभितम् ।
शङ्खपटहभेरीणां मृदङ्गतालमहास्वनैः ।।

अथवान्यप्रकारेण अपूपं तिलचूर्णयुक् ।
रात्रिचूर्णं च कूश्माण्डं [132]बलिदाने विशेषतः ।।९२।।
चन्दनं रक्तपुष्पं च धूपदीपं प्रदापयेत् ।
मूलमन्त्रेण तृप्त्यर्थं [133]दिनेशानां [यथाविधि] ।।९३।।
यक्षेशं पूर्वतः स्थाप्य राक्षसं वह्निगोचरे ।
[134]याम्ये पैशाचकं स्थाप्य भूतं न्यस्य तु नैर्ऋते ।।९४।।
गन्धर्वं पश्चिमे स्थाप्य वायव्ये किन्नरं तथा ।
दैत्येशं कल्पयेत्सोमे विद्याधरं तु शाङ्करे ।।९५।।
[135] [ग्रन्थपातः]

शुद्धोदकैश्च दीपैश्च सपुष्पान्नबलिं क्रमात् ।
तत्तत्स्वनाममन्त्रेण संधिपूजां सुपूजयेत् ।।'
(*कुलालशास्त्रे* शास्त्रुत्सवविधिः पृ० १३४—१४७))
[130]'बन्धनान्ते च सर्वेषां विधिना बलिरुच्यते ।'
(*अजिते* २७.२०९ पू०)
एतदनुसृत्य पाठोऽत्र साधितः; होमान्ते तु बलिं—ङ
[131]प्रतिमामुद्दिश्य बलिः प्रतिमाबलिः इति व्याख्येयमिति भाति ।
[132]बलिदानं—ङ
[133]दिनं दक्षिणे—ङ
[134]सव्ये पैशाचकीं—ङ
[135]'बल्यन्ते चोत्सवं कुर्याद् ग्रामे तत्र विशेषतः ।
रङ्गे वा शिबिकायां वा रथे वारोप्य भक्तितः ।।
वीथिदोषान्विवर्ज्यादौ मार्जनं तत्र कारयेत् ।
जलशुद्धिं तथा वीथ्यां द्वारे द्वारे तु दीपकान् ।।
पूर्णकुम्भं तथा चैव तोरणध्वजभूषितम् ।
क्रमुकं कदलीं चैव वकुलं द्वार एव च ।।
द्वारे द्वारे तु संभूष्य ग्रामवीथ्यां च कारयेत् ।
गीतवाद्यसमायुक्तं स्तोत्रमङ्गलवाचकैः ।।
ग्रामप्रदक्षिणं कृत्वा शास्तृशक्तिद्वयेन वा ।
परिवेषं तथा कृत्वा गन्धपुष्पं सलक्षणम् ।।
वस्त्रादिगन्धलेपं च सर्वाभरणभूषितम् ।।
ग्रामजनैस्तथा हर्म्ये भक्तैश्च परिविन्यसेत् ।
कुक्कुटानामजानां च मेषयुद्धं निरीक्षयेत् ।।
नानालीलास्तु वै दृश्या आयुधैर्विधिरक्षणम् ।
स्थानं तत्र च कुर्वीत पूर्वदेशे तु शास्तरिः ।।
शास्तॄणां नृत्तमेवं च नाना इत्यभिधीयते ।
षड्दिनाराधनं कृत्वा रक्षासूत्रं तु बन्धयेत् ।।
सप्तदिने तथा चैव अष्टमे वा तु कारयेत् ।
राक्षसे दिवसे चैव युद्धारम्भं प्रभावयेत् ।।
युद्धारम्भं तथा केचित् केचित्खड्गधराश्च ये ।
केचिदश्वाधिरूढाश्च केचिद्युक्ताश्च वाहनैः ।।
केचिद्दण्डं समारोप्य केचित्केचिद्भयंकराः ।
मृगानां गदया केचिच्छास्तृशक्तिं तु वर्जयेत् ।।
तद्दिने तत्र रात्रौ तु रक्षातीर्थं तु कारयेत् ।
नदीतीरे तटाके वा कूपे तीर्थं तु दापयेत् ।।
नवतीर्थक्रमे कुर्यान्महातीर्थं तु कारयेत् ।
नवहस्तमष्टहस्तं वा सप्तहस्तं तु मण्डपम् ।।
मण्डपे तत्र मध्ये तु स्थण्डिलस्य त्रयं भवेत् ।
दर्भैः परिस्तरेत्तत्र अस्त्राङ्कुरं तु विन्यसेत् ।।
तदग्रे स्थण्डिलं कृत्वोलूखलं विन्यसेत्ततः ।
गन्धं पुष्पं समभ्यर्च्य पूजयेत्तु कुलालकः ।।
घृतं शिरोऽर्पणं कृत्वा अस्त्रराजाधिदैवताम् ।
तदन्ते लूखले चैव चूर्ण्यं मध्ये तु विन्यसेत् ।।
कुलालपरिचारैस्तु भक्तैर्मुसलयुद्धकम् ।
पुण्याहं वाचयित्वा तु आवाह्य सर्वदेवताः ।।
आवाह्य वाचयित्वा तु सब्रह्माङ्गं कुलालकः ।
तैलाभ्यङ्गं ततः पूर्वं हृन्मन्त्रैर्मूलबेरके ।
ताम्बूलं दापयेत्पश्चात्प्रतिमाचूर्णं दापयेत् ।।
अष्टचूर्णं तथा चैव दापयेत्तु कुलालकः ।
आचार्यदक्षिणां कुर्याद्वस्त्रहेमाङ्गुलीयकैः ।।
भक्तानां परिचाराणां नववस्त्रं तु दापयेत् ।
संधिदेवान्समभ्यर्च्य चूर्णोत्सवं च कारयेत् ।।
(*कुलालशास्त्रे* शास्त्रुत्सवविधौ
१४८ उ०—१६९पू०)

[अवभृथस्नानम्[१३६]]

पुरुषो वाथवा स्त्री वा तैलं रात्रौ तु [१३७]दापयेत् ।
तत्काले सर्वलीलाश्च[१३८] [१३९]जनैः सर्वैः सहैव तु ॥९६॥
अवभृथस्नानं कर्तव्यं जनानां पापशान्तये ।

[होमः]

प्रविश्य भवनं पश्चात्ततो [१४०]यागगृहे गुरुः ॥९७॥
यागेश्वरं समभ्यर्च्य [१४१]यागहोमं समाचरेत् ।
प्रायश्चित्ते विशेषेण होमं कुर्याद्विचक्षणः ॥९८॥
अष्टोत्तरशतं वापि पञ्चाशत्पञ्चविंशतीः[१४२] ।
द्रव्यान्ते [१४३]व्याहृतीर्हुत्वा सर्वद्रव्यसमायुतम् ॥९९॥
चित्तादिं च जयादिं च होमयेत्तु विशेषतः ।
स्विष्टमग्नेति मन्त्रेण हुनेत्पूर्णाहुतिं तदा[१४४] ॥१००॥

[पूर्णाहुतिः[१४५]]

अभ्युक्ष्य [१४६]स्रुचमस्त्रेण सर्पिषापूर्य तद्बिलम् ।
प्रणवेन ततः पुष्पं साक्षतं सकुशं [१४७]स्रुचि ॥१०१॥

'दिनं प्रति विशेषतः ।
प्रथमे पीठमारोप्य द्वितीये रङ्गमेव च ॥
तृतीये भूतमित्युक्तं चतुर्थे प्रभायानकम् ।
पञ्चमे गजमारोप्य षष्ठे हंसाख्यवाहनम् ॥
सप्तमे पुष्परागं स्यान्नृत्तमूर्त्युत्सवं कुरु ।
अष्टमे मृगयात्रायां वाजियुक्तं समाचरेत् ॥
नवमे रथमारोप्य दशमे तीर्थकर्म च ।
यानमेवं समाख्यातं परिवेषं पुरोक्तवत् ॥
ग्रामप्रदक्षिणं चैव सायं प्रातः समाचरेत् ॥
दिने दिने विशेषेण शास्तारं पञ्चबेरवत् । . . .
सप्तमे श्रीरथे पुण्ये नवाहे वा समाचरेत् ॥
यानान्ते स्नपनं प्रोक्तं शान्तिहोमं समाचरेत् ।
प्रभूतं च हविस्तत्र चोपचाराणि राजवत् ॥
एवं प्रतिदिनं कार्यं महातीर्थबिधिं शृणु ।
यानान्ते तु प्रकर्तव्यं चूर्णोत्सवमथाचरेत् ॥'
(*भीमसंहितायां* शास्तृस्थापने २८ उ० — ३३पू०; ३६उ० — ३८)

[१३६] 'तीर्थस्नानं च संप्राप्य तैलस्नानं समाचरेत् ।'
(*भीमसंहितायां* शास्तृस्थापने ३९पू०)

[१३७] दद्यादित्यर्थेऽत्र दापयेदिति प्रयोगः ।

[१३८] अत्र कारयेदिति शेषः ।

[१३९] स्तनं सैवं सहैव तु — ङ

[१४०] यागगृहं — ङ

[१४१] यागशालायां विधेयो होमोऽत्र विवक्षित इति भाति ।

[१४२] अत्र आहुतीः होमयेदिति शेषः; विंशतिः — ङ

[१४३] व्याहृतिं हुत्वा — ङ

[१४४] स्विष्टमग्नेति मन्त्रेण — तै० ब्रा० २.४.१; हुनेत् — ङ

[१४५] पूर्णाहुतिविषये *अजिते* २७.३०३ — ३०९ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[१४६] श्रुवमन्त्रेण — ङ

[१४७] सृचः — ङ

[१४८]विन्यस्य स्रुवमारोप्य तन्मध्ये [१४९]चाप्यधोमुखम् ।
दण्डमूलाग्रयोः पश्चाद्गृहीत्वा स्रुक्स्रुवौ [१५०]तु तौ ।।१०२।।
सव्येतराभ्यां पाणिभ्यां विन्यस्यास्यं तु शङ्खवत् ।
ऋजुकायः समुत्थाय [१५१]स्थितः समपदान्वितः ।।१०३।।
नाभिदघ्नं तयोः कृत्वा [१५२]मूलं तु करयोस्ततः ।
दक्षिणेतरयोः [१५३]कुर्यादुन्नत्यवनतिं तयोः ।।१०४।।
यथा धाराग्निमध्ये तु [१५४]पततीत्येकधा सुधीः ।
पूर्णां देवाणुना हुत्वा मन्त्री सम्यक्समापयेत् ।।१०५।।
भस्माभिवन्दनं कृत्वा नाडीसंधानमार्गतः ।
वह्निदेवस्य मन्त्रांश्च [१५५]कुम्भस्थान्देवशूलयोः[१५६] ।।१०६।।
शिवाग्निं च विसृज्याथ कुम्भमप्यस्त्र[१५७]वर्धनीम् ।
लोकेशद्वारपालादीन्विसृजेत्सकलानपि ।।१०७।।
पूर्णाहुतिरिति प्रोक्ता दक्षिणादान[१५८]पूर्विका ।

[दक्षिणा[१५९]]

दक्षिणा त्रिविधा प्रोक्ता पञ्चनिष्काधमा भवेत् ।।१०८।।
[१६०]त्रिगुणा दशनिष्का वा [१६१]त्रिगुणा देशिकस्य तु ।
[१६२]वित्तानुसारणं कृत्वा वस्त्रहेमाङ्गुलीयकैः ।।१०९।।
आचार्यं [१६३]मूर्तिपांश्चैव संपूज्य परितोषयेत् ।

[कुम्भाभिषेचनम्]

[१६४]कुम्भाभिषेककाले तु मूलबेराभिषेचनम् ।।११०।।
अथ यागेश[१६५]कुम्भं च [१६६]परितःस्थांश्च कुम्भकान् ।
उत्थाप्य मूलदेवाग्रे स्थापयित्वा यथा[१६७]तलम् ।।१११।।

---

[१४८]चिह्नसस्रुव —ङ
[१४९]वाप्यधो —ङ
[१५०]तु युक् —ङ
[१५१]सितस्सं पञ्चवत् स्रुवत् —ङ
[१५२]तन्मूलं तु न कारयेत् —ङ
[१५३]कार्यमुन्नत्यावनिगन्त्तयोः —ङ
[१५४]पतन्ती —ङ
[१५५]कुम्भस्थन्देवमूलयोः —ङ
[१५६]अत्र अनुस्मरन् इति शेषः ।
[१५७]वर्धिनीम् —ङ
[१५८]पूर्वकम् —ङ
[१५९]दक्षिणाविषये *अजिते* ४५.३१ —३६ श्लोकाद्रष्टव्याः ।
[१६०]द्विगुणा —ङ
[१६१]त्रिगुणं —ङ
[१६२]वित्तानुसरणं —ङ
[१६३]मूर्तिपाश्चैव —ङ
[१६४]'कुम्भाभिषेकं मूले च बेरे योज्यं विशेषतः ।'
(*भीमसंहितायां* शास्तृस्थापने ५३३०)
[१६५]कुम्भाश्च —ङ
[१६६]परितस्थाकुम्भकान् —ङ
[१६७]तनून् —ङ

कुम्भमादाय बेरे तु योजयेद्देशिकोत्तमः ।
परिवारघटान्पीठे पादस्थानेऽभिषेचयेत् ।।११२।।
कुम्भाभिषेचनं प्रोक्तं'

[शुद्धस्नानमर्चनं च]

'शुद्धस्नानार्चनं शृणु ।
कुर्यादिकोनपञ्चाशत्पञ्चपञ्च[१६८]घटांस्तु वा ।।११३।।
षोडशस्नपनं वाथ नवपञ्चैकमेव वा ।
पञ्चामृतादिभिर्गव्यैः[१६९] पूजा वैशेषिकी तथा[१७०] ।।११४।।
[१७१]गन्धं पुष्पं च धूपं च दीपं दद्याद्यथाक्रमम् ।
नैवेद्यं बहुधा कृत्वा उपदंशसमन्वितम् ।।११५।।
ताम्बूलं दापयेत्पश्चाच्छेषं पूर्ववदाचरेत् ।
विज्ञापनं [तथा] कृत्वा [१७२]त्वत्प्रसादात्कृतस्त्वयम् ।।११६।।
[निर]स्ता[खिलविघ्नस्तु म]या निर्वर्तितोत्सवः ।
समाहिताखिलाभीष्टफलदो भवतु ध्रुवम् ।।११७।।
प्रार्थयेदभिसंपूज्य शास्तारं स्वस्ति[१७३]नाथकम् ।
[भवेदभीष्टफलदम्] एवं वैशेषिकार्चनम् ।।११८।।

[ध्वजावरोहणादिकम्]

[१७४]ध्वजावरोहणं कुर्या[१७५]च्चण्डयागमतः परम् ।
[१७६]लोकेशानां ततः पश्चादुक्तस्थाने बलिं क्षिपेत् ।।११९।।
विसृज्य दिक्पतीनन्ते महापीठे बलिं क्षिपेत् ।
पादप्रक्षालनं कृत्वा प्रविशेद्भवनं ततः ।।१२०।।

---

[१६८]पटांस्तु वा—ङ
[१६९]अभिषेचयेदिति शेषः ।
[१७०]अत्र कर्तव्येति शेषः ।
[१७१]गन्धपुष्पं च—ङ
[१७२]त्वत्प्रसादस्तु कृतत्वचा—ङ
[१७३]नारथम्—ङ
[१७४]चण्डयागविषये *अजिते* २७.३१८—३२२ श्लोका द्रष्टव्याः ।
[१७५]लोकेलल्लतं पश्च आत्तस्थाने—ङ
[१७६]'अवरोहं ततः कुर्यात्क्रमात्संध्योत्सवं ततः ।
प्रायश्चित्तादि तत्सर्वमीशस्योक्तवदाचरेत् ।।
मन्त्रभेदो भवेदत्र क्रियाभेदो न विद्यते ।'
(*भीमसंहितायां* शास्तृस्थापने ५४.५५पू०)

[उत्सवविशेषफलम्[१७७]]

इति यः कारयेद्भक्त्या [१७८]शास्त्रुत्सवमनुत्तमम् ।
प्रत्यब्दं च विशेषेण शास्तुरुत्सवमाचरेत् ।।१२१।।
ब्रह्मक्षत्रियविट्शूद्राः पूजयेत्तु विशेषतः ।
[१७९]विष्वादिमकरान्तं वै पूजयेत्सर्वमाचरेत् ।।१२२।।
संवत्सरोत्सवं कुर्यान्मासि मासोत्सवं क्रमात् ।
[१८०]इन्दुवारं समारभ्य संप्रार्थ्योत्सवमाचरेत् ।।१२३।।
सर्वलोकहितं पुण्यं सर्वदेवप्रियार्थकम् ।
सर्वशत्रुक्षयकरं सर्वोपद्रवनाशकम् ।।१२४।।
भूतेभ्यश्च पिशाचेभ्यो राक्षसेभ्यश्च निर्भयम्[१८१] ।
मुच्यते सर्वपापेभ्य इहैव धनवान्भवेत् ।
सर्वान्कामान्स भुक्त्वान्ते शिवलोके चिरं वसेत् ।।१२५।।

[१८२]इत्यजिताख्ये महातन्त्रे [क्रियापादे] शास्तृप्रतिष्ठोत्सवविधिः
[त्र्यशीतितमः] पटलः ।

---

[१७७]एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।
सर्वशत्रुक्षयकारं सर्वोपद्रवनाशनम् ।।
शास्ता तु सुप्रसन्नः स्यात्तस्मादेवं समाचरेत् ।
मुख्यं तु सोमवारे तु शास्तुरारभ्य पूजनम् ।।
(*भीमसंहितायां* शास्तृस्थापने १६, १७)

[१७८]शास्त्रोत्सव —ङ
[१७९]विप्रादिसिकरान्तं वै —ङ
[१८०]इन्दुवारे —ङ
[१८१]अत्र भवेदिति शेषः ।
[१८२]इत्यजिते महाशास्त्रोत्सवपटलः —ङ

[चतुरशीतितमः पटलः]

[आचार्यलक्षणविधिः][1]

[द्विविधमाचार्यलक्षणम्]

आचार्यलक्षणं वक्ष्ये द्विविधं चोच्यते क्रमात् ।
स्थूलसूक्ष्मप्रभेदेन कथयामि समासतः ॥१॥
स्थूलं देहादिकं प्रोक्तं सूक्ष्ममात्मादिकं तथा ।
आत्मना यजनं यत्तन्मुक्तिदं चैव [2]सुव्रत ॥२॥
विदित्वा तु [3]महाप्राज्ञमाचार्यं पूजयेत्सदा ।

[पञ्च महायज्ञाः[4]]

[5]ज्ञानं ध्यानं च स्वाध्यायस्तपः कर्म तथैव च ॥३॥

---

[1]अयं पटलः 'ओ' मातृकायां परं दृश्यते। एतद्विषये *अचिन्त्यविश्वसादाख्ये* २, ३; *उत्तरकामिके* २४; *पूर्वकारणे* २६; *चिन्त्ये* (टि० १४) २७; *मकुटे* (टि० १९) १३; *योगजे* (टि० ६२) २; *वीरे* (टि० ३०) ७; *सन्तानसंहितायां* (टि० ६७) ५७; *सुप्रभेदे* क्रियापादे २१; *सूक्ष्मे* (टि० ३६) आचार्यलक्षण-पटलः; *स्वायम्भुवे* (टि० १३३) आचार्यलक्षण-विधिपटलश्च द्रष्टव्याः ।

[2]सुव्रतम् —ओ

[3]महाप्राज्ञ आचार्यं —ओ

[4]'कर्मयज्ञस्तपोयज्ञो जपश्च ध्यानमेव च ।
ज्ञानयज्ञस्ततः प्रोक्त इति यज्ञस्य पञ्चकम् ॥'
(*शैवागमपरिभाषामञ्जर्याम्* ५.१६३ उ०, १६४ पू०);
'अथ पूजाग्निकार्याद्यैर्भेदैर्बहुविधैस्ततः ।
कर्मयज्ञः समाख्यातस्तपश्चान्द्रायणादिकम् ॥
स्वाध्यायश्च जपः प्रोक्तः शिवमन्त्रस्य स त्रिधा ।
ध्यानयज्ञः समाख्यातः शिवचिन्ता मुहुर्मुहुः ॥
अध्यापनं चाध्ययनं व्याख्याश्रवणचिन्तनम् ।
इति पञ्चप्रकारोऽयं ज्ञानयज्ञः प्रकार्तितः ॥
उत्तरोत्तरतः श्रैष्ठ्यं सर्वेषां परिकीर्तितम् ।
पञ्चानामपि यज्ञानां ज्ञानयज्ञो विमुक्तिदः ॥'
'कर्मयज्ञात्तपोयज्ञो विशिष्टो दशभिर्गुणैः ।
जपयज्ञस्तपोयज्ञाज्ज्ञेयः शतगुणाधिकः ॥
ज्ञानध्यानात्मकः सूक्ष्मः शिवयोगमहामखः ।
वरिष्ठः सर्वयज्ञानामसंख्यातैर्महागुणैः ॥'
(*शिवधर्मोत्तरे* (टि० ७५) ३.१२—१५; ५९, ६०);
'साङ्गानङ्गा च या सेवा सा भक्तिरिति कथ्यते ।
सा पुनर्भिद्यते त्रेधा मनोवाक्कायसाधनैः ॥
शिवरूपादिचिन्ता या सा सेवा मानसी स्मृता ।
जपादिर्वाचिकी सेवा कर्मपूजादि कायिकी ॥
सेयं त्रिसाधना सेवा शिवधर्मश्च कथ्यते ।
स तु पञ्चविधः प्रोक्तः शिवेन परमात्मना ॥
तपः कर्म जपो ध्यानं ज्ञानं चेति समासतः ।
कर्म लिङ्गार्चनाद्यं च तपश्चान्द्रायणादिकम् ॥
जपस्त्रिधा शिवाभ्यासश्चिन्ता ध्यानं शिवस्य तु ।
शिवागमोक्तं यज्ज्ञानं तदत्र ज्ञानमुच्यते ॥
श्रीकण्ठेन शिवेनोक्तं शिवायै च शिवागमः ।
शिवाश्रितानां कारुण्याच्छ्रेयसामेकसाधनम् ॥'
(*शिवमहापुराणे* वायुसंहितायामुत्तरभागे ७.३४-३९);
'कर्मयज्ञस्तपोयज्ञो जपयज्ञस्तदुत्तरः ।
ध्यानयज्ञो ज्ञानयज्ञः पञ्च यज्ञाः प्रकीर्तिताः ॥'
(*शिवमहापुराणे* वायुसंहितायामुत्तरभागे २२.४४)

[5]ज्ञानध्यानं च —ओ

एते पञ्च महायज्ञा मया प्रोक्ता यथाक्रमम् ।
पञ्चानामपि [6]यज्ञानां मयादौ [परि]भाषितौ ।।४।।
द्वौ चैव[7]मुक्तौ तौ ज्ञेयौ गुणावात्मसमुद्भवौ ।
शेषाः क्षुद्रफला ज्ञेया [8]यत्नजास्ते शरीरिणाम् ।।५।।
स्थूलं तस्माच्छरीरं स्यात्सूक्ष्ममात्मेति कीर्तितम् ।
[9]तस्मात्प्राज्ञेन सम्यक्तु नावेक्ष्यं स्थूललक्षणम् ।।६।।
सूक्ष्म[10]लक्षणमेवात्र ह्युपादेयं सुदुर्लभम् ।

[देशजदोषयुक्तः[11]]

[12]काश्मीरः कौसलः काञ्चीकावेरीकोङ्कणोद्भवाः[13] ।।७।।
[14]कालिङ्गः कामरूपश्च काशीदेशसमुद्भवः ।

[अङ्गदोषयुक्तः[15]]

कुनखी वामनः कुब्जः शिपिविष्टश्च [16]काणकः ।।८।।

---

[6]च यज्ञानामादौ च भाषितौ मया—ओ
[7]मुक्तादौ ज्ञेयौ—ओ
[8]शरीरिण—प्रयत्नाम्—ओ
[9]तस्मात् सम्यक् प्राज्ञो नावेक्ष्य—ओ
[10]लक्षणमत्रैवोपादेयं—ओ
[11]अभिषेकमथो वक्ष्ये येन स्याद्देशिको भुवि ।
आर्यावर्तोद्भवः श्रीमान्सर्वलक्षणलक्षितः ।।
यत्र विप्राः सदाचारा यतयश्च तपोधनाः ।।
सन्ति देवास्तथा वेदा आर्यावर्त इति स्मृतः ।
एष देशः समादिष्टो न च विन्ध्याब्धिमध्यगः ।
ककाराष्टकनिर्मुक्तः प्रसङ्गात्सोऽपि कथ्यते ।।
कर्णाटश्च कलिङ्गाख्यः कच्छः काश्मीरसंज्ञकः ।
कोङ्कणः करहाटश्च कूटकः कोक ईरितः ।।
(*उत्तरकामिके* २४.१—४);
देशे पुण्ये इति—सच्छास्त्रविरुद्धाचारप्रत्यन्ताद्यपुण्यदेशनिरासार्थम् । तथा हि स्मृतिः—
''सिन्धुसौवीरसौराष्ट्रांस्तथा प्रत्यन्तवर्षकम् ।
गौडवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति ।।''
इति । न तु काञ्चीकोसलकाश्मीरादिनिषेधार्थम् ।
''काश्मीरमण्डलं पुण्यं सर्वतीर्थमयं शुभम् ।''
इति भारतादौ महापुण्यत्वेन काश्मीरदेशस्य प्रसिद्धेः ।
(*मृगेन्द्रवृत्तौ* क्रियापादे पृ० ८३, ८४);
कुमारीहिमवन्मध्यं पूतं कृष्णमृगोद्भवम् ।
जातश्चात्रादिशैवश्च आचार्यः परमः स्मृतः ।।
(*पूर्वकारणे* २६.१६ उ०, १७ पू०);
कुमारीहिमवन्मध्यं पूतं कृष्णमृगोद्भवम् ।
तत्रजाः स्थापने योज्या आचार्यप्रवराः स्मृताः ।।
(*स्वायम्भुवे* टि० १३३ आचार्यलक्षणपटले पृ० १५);
विन्ध्याद्रेर्दक्षिणे भागे शैवानामुद्भवः स्मृतः ।
(*सुप्रभेदे* चर्यापादे १. ४५ पू०)
[12]काश्मीरकौसलः—ओ
[13]कोङ्कणोद्भवम्—ओ
[14]कलिङ्गकाम—ओ
[15]'पिङ्गाक्षो डाम्भिकः कुब्जो वामनः कुनखी कृशः ।
व्यसनी निर्दयः स्तब्धश्चपलः पारदारिकः ।।
व्रतच्युतः शठः क्लीबो दीनो नैपुण्यवर्जितः ।
संन्यासी तार्किकोऽशुद्धः शिवशास्त्रच्युतोऽवरः ।।
पण्याङ्गनोपजीवी च कृतघ्नो नास्तिकः खलः ।
गुरुदेवद्विजादीनां निन्दको दन्तुरो भिषक् ।।
खल्वाटः श्यावदन्तश्च कुसुमाक्षी च पातकः ।

अकालपलितो[17] यस्तु [18]खर्वाङ्गो दन्तुरस्तथा ।
अङ्गहीनश्च दीर्घश्च स्थूलो ह्रस्वस्तथैव च ॥९॥

[आत्मदोषयुक्तः]

अहंकारसमोपेतः क्रोधेन च समान्वितः ।
अग्निदो [19]गरदश्चैव भूमिहर्ता तथैव च ॥१०॥
[20]लुब्धश्च कन्याहारी च मृषावादी तथैव च ।
गर्वी च [21]शस्त्रपाणिश्च [22]धनुःशास्त्ररतो नरः ॥११॥
अत्याशी [23]व्याधकर्मा च मांसभक्षणतत्परः ।
[24]मद्यादिसेवकश्चैव मानी तार्किक एव च ॥१२॥
[25]काव्येष्वतिरतश्चैव दीनात्मा विप्रनिन्दकः ।
क्रमदीक्षाविहीनश्च युद्धकारी तथैव च ॥१३॥
अ[पू]ज्यो [26]निर्दयश्चैव देहपोषणतत्परः ।
आगमाचाररहितो रागी वार्धुषिकस्तथा ॥१४॥
गणकः साहसी चैव द्यूतकारी तथैव च ।
भिषक्तन्त्रोप[27]जीवी च भूततन्त्रोपजीवकः ॥१५॥
पिशुनश्च कृतघ्नश्च गुरुद्रोही समत्सरी ।
क्रूरः परस्वहारी च पापकर्मरतो नरः ॥१६॥

[आत्मदोषयुक्ता एव त्याज्याः]

[28]एषु सर्वेऽपि न त्याज्या एते दोषसमन्विताः ।
देशजैरपि युक्ता ये शुभलक्षणसंयुताः[29] ॥१७॥

शिपिविष्टोऽधिकाङ्गश्च नास्तिकश्चातिदीर्घकः ॥
हीनाङ्गः पिशुनश्चैव दुःशीलो दन्तहीनकः ।
बालोऽबहुगुणोपेतो वृद्धो विकटदन्तकः ॥
परापवादेऽव्यसनी बधिरश्चिबुकस्तथा ।
अतिस्थूलश्च काणश्च धूर्तो वै रक्तकेशकः ॥
गायको नर्तकश्चैव खञ्जो नग्नो व्रतच्युतः ।
दुराचारी जडः पङ्गुः पतितः पापकर्मभुक् ॥
आलस्यो विकटाङ्गश्च रोमशस्त्वतिभोजकः ॥
एभिस्तु लक्षणैर्युक्तो गर्हितः सर्वकर्मसु ॥'
(*पूर्वकारणे* २६.२७—३४)

[16]कारणः —ओ
[17]वलितो —ओ
[18]खट्वाङ्गो गन्तुरस्तथा —ओ
[19]हरतश्चैव —ओ
[20]लब्धः कन्या च हारी च —ओ
[21]शस्त्रपाणी च —ओ
[22]धनुशास्त्ररतो —ओ
[23]व्यञ्जकर्मा —ओ
[24]मध्यादसेवक —ओ
[25]काव्ये षष्ठिरत —ओ
[26]निद्रवश्चैव —ओ
[27]जीवश्च —ओ
[28]एतेषामपि न व्याजादेते —ओ
[29]अत्र 'ते न त्याज्याः' इत्यध्याहृत्य व्याख्येयम् ।

आत्मदोष[३०]समोपेता ह्यन्ये त्याज्यास्तु सर्वथा ।
काश्मीराद्यास्तु ये दोषाः कुनखाद्यास्तथैव हि ॥१८॥
न त्याज्या [३१]गुणसंपन्नैर्गुरुभिस्तत्त्वविद्वरैः ।
अहंकारादयो दोषा वर्तन्ते यस्य [३२]चात्मनः ॥१९॥
स एव निन्दितः प्रोक्तो गुरुर्देशिककर्मणि ।

[श्रेष्ठो देशिकः[३३]]

कर्मवान्देशकालज्ञः [३४]कृपालुस्तन्त्रपारगः ॥२०॥
कुलीनः सत्यवादी च शिवभक्तो जितेन्द्रियः ।
सर्वभूतहितः शान्तो यतात्मा सत्यसंयुतः ॥२१॥
[३५]दम्भलोभविनिर्मुक्तः शौचाचारसमन्वितः ।
अद्रोही सर्वभूतेषु पुत्रवान्मोहवर्जितः ॥२२॥
यदृच्छालाभसंतुष्टो निपुणो लेख्यकर्मणि ।
[३६]अशठः प्रियवादी च कृतज्ञः प्रीतमानसः ॥२३॥
गुणत्रयविभागज्ञः सर्वभूतहिते रतः ।
श्रीमानगर्वी निपुणः शिवभक्तजनप्रियः ॥२४॥
अलोलुपः शुचिर्धीमान्प्रीति[३७]प्रभृतिसंयुतः[३८] ।
तत्त्वज्ञो ज्ञानवित्प्राज्ञो ह्यध्वलक्षणसंयुतः ॥२५॥
काल[३९]ज्ञानी क्रियायुक्तो वेदवेदाङ्गपारगः ।
[४०]प्रतिष्ठातन्त्रतत्त्वज्ञो वास्तुकर्मकृतश्रमः ॥२६॥
गुरुभक्तो दृढः शूरो ज्ञानचर्याक्रियायुतः ।
अदृष्टार्थी [४१]बहुज्ञानश्चानसूयो[४२] दृढव्रतः ॥२७॥

---

[३०] समोपेतो अन्ये —ओ
[३१] गुणसंपन्ने गुरौ तत्त्वविदां वरे —ओ
[३२] चात्मनि —ओ
[३३] 'शैवसिद्धान्ततत्त्वज्ञो देवाग्निगुरुभक्तिमान् ।
सर्वाचारसमायुक्तस्तपस्वी जनवत्सलः ॥
स हि जिष्णुर्जितश्रीमाञ्जितेन्द्रियो विगतस्पृहः ।
हेयोपादेयतत्त्वज्ञस्तत्त्वार्थे तु व्यवस्थितः ॥
धर्मक्रियादिनिपुणो वीतरागो विमत्सरः ।
परापवादहीनश्च रन्ध्रान्वेषणहीनकः ।
परतत्त्वे सदाध्यायी शिवशासनतत्परः ॥
सर्वशास्त्रार्थकुशलः समयाचारपालकः ।
गृहस्थः सरसो वाग्मी सुशीलः प्रियदर्शनः ॥
शिखी च बद्धकेशो वा श्मश्रुरोमादिवर्जितः ।
अरोगी दीक्षितश्चैव मन्त्रमुद्राक्रियान्वितः ॥
पदवाक्यप्रमाणज्ञः पशुशास्त्रपराङ्मुखः ।
शिवतन्त्रैकचित्तात्मा सर्वप्राणिहिते रतः ॥
वास्तुविद्याकृताभ्यासः शल्योद्धारविशारदः ।
सर्वावयवसंपूर्णः सर्वलक्षणलक्षितः ॥
ईदृग्लक्षणसंपन्नः स्थापकश्रेष्ठ उच्यते ।'
(*पूर्वकारणे* २६.१९—२६)

[३४] क्रियालुः —ओ
[३५] डम्भो लोभ —ओ
[३६] अशठं —ओ
[३७] प्रभृतसंयुतः —ओ
[३८] प्रीतिप्रभृतयो ये श्रेष्ठगुणाः तैः संयुतः ।
[३९] ज्ञानक्रिया —ओ
[४०] प्रतिष्ठां तत्र —ओ
[४१] बहुधा (विस्मृतं) ज्ञानं यस्य सः ।
[४२] सूयुः —ओ

एवंविधो महाप्राज्ञो देशिक[:] श्रेष्ठ उच्यते ।
[४३]अविशेषेण यच्चित्तं सर्वजन्तुषु सद्रवम् ॥२८॥
स एव देशिकः प्रोक्तो मया तत्त्वार्थवेदकः ।

[आचार्यप्रशंसा[४४]]

आचार्यं शिवमेवाहुः [४५]शिवस्त्वाचार्य उच्यते ॥२९॥
अभेदं यो विजानीयात्स वै वेदविदुच्यते ।
[४६]स्थावरं जङ्गमं चैव द्विविधं [४७]शिवमुच्यते ॥३०॥
शिवं तु स्थावरं प्रोक्त[४८]माचार्यं जङ्गमं विदुः ।
प्रतिष्ठाद्यर्चनान्तं तु जङ्गमेनैव कारयेत् ॥३१॥

[ग्राह्या आचार्यपुत्रादयः[४९]]

आचार्यपुत्रः पौत्रो वा दौहित्रो वा विशेषतः ।
लिङ्गस्थापनमुख्यत्वात्तेनैव स्थाप्य पूजयेत्[५०] ॥३२॥
निष्कलात्सकलो [५१]जातस्तथाचार्यात्तु पुत्रकः ।
[५२]स पुत्रो ज्ञानयुक्तश्चेदङ्गदोषं न लक्षयेत्[५३] ॥३३॥

---

[४३]कविशेषेण—ओ

[४४]'आचार्यः शिव एव स्यादनयोरन्तरं न हि ।
यः पश्येदनयोर्भेदं सोऽधोगतिमवाप्नुयात् ॥'
('कामिके' इति *दीक्षादर्शे* (टि० ७६) पृ० २२);
'उभयोरन्तरं नास्ति देशिकस्य शिवस्य तु ।'
('निश्वासे' इति *दीक्षादर्शे* (टि० ७६) पृ० २२);
'आचार्यः शिव एवाहुः शिव आचार्य उच्यते ।
अभेदं यो विजानाति एतद्भेदात्तु मुच्यते ॥'
(*वीरे* ७.२६ उ०, २७ पू०);
'आचार्यं शिवमेवाहुः शिव आचार्य उच्यते ।
अभेदं यो विजानाति स वै वेदविदुच्यते ॥'
(*सन्तानसंहितायाम्* ५७.३)

[४५]शिवमाचार्यमुच्यते—ओ

[४६]'स्थावरं जङ्गमं चैव द्विविधं लिङ्गमुच्यते ।
स्थावरं लिङ्गमित्युक्तं जङ्गमं देशिकः स्मृतः ॥
स्थावराज्जङ्गमं श्रेष्ठं स्थावरं त्वधुनोच्यते ।
जङ्गमस्य प्रसादे हि स्थावरं फलदं भवेत् ॥
आचार्यमनसस्तुष्टिर्देवसांनिध्यकारणम् ।'
(*स्वायम्भुवे* टि० १३३ पृ० १५, १६);
'यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।
गुरुर्वा शिव एवाथ विद्याकारेण संस्थितः ॥
यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः ।
शिवविद्यागुरूणां च पूजया सदृशं फलम् ॥'
(*शिवमहापुराणे* वायुसं० उत्तरभागे १५.२०, २१)

[४७]शिवतत्त्वमित्यर्थः ।

[४८]माचार्यो—ओ

[४९]'निष्कलात्सकलो जातस्तद्वदाचार्यपुत्रकः ।
आचार्यपुत्रः पौत्रो वा दौहित्रो वा विशेषतः ।
तस्य पुत्रो न शास्त्रज्ञः सोऽपि कर्मार्हको भवेत् ।'
(*सूक्ष्मे* (टि० ३६) आचार्यलक्षणपटले ५ उ०, ६ पू०, २० पू०)

[५०]यजमान आचार्यपुत्रेणैव शिवं स्थापयित्वा तेनैव तं पूजयेत् । हेतुमण्णिच् ।

[५१]जात आचार्य यस्य पुत्रकाः—ओ

[५२]सुपुत्रो—ओ

[५३]'सर्वलक्षणहीनोऽपि शिवशास्त्रार्थविद्गुरुः ।
स्थापनादिषु स प्रोक्तः शिवशास्त्रेषु षण्मुख ॥
('कालोत्तरे' इति *दीक्षादर्शे* (टि० ७६) पृ० २१)
'सर्वलक्षणहीनोऽपि ज्ञानवान् गुरुरिष्यते ।'
('देवीकालोत्तरे' इति *दीक्षादर्शे* (टि० ७६) पृ० २१)

[अ]नाचार्यकुले जाताँ[५४]ल्लक्षयेत्तन्त्रवित्तमः ।
अङ्ग[५५]दोषेण युक्ताश्चेद्वर्जयेत्तान्[५६]प्रयत्नतः ॥३४॥
कुर्यादाचार्य[५७]पुत्रश्चेद्राजराष्ट्रसुखाय च ।
[५८]यजमानाभिवृद्ध्यर्थं तद्देशस्याभिवृद्धये ॥३५॥
[५९]अङ्गदोषो न दोषः स्याद्दोषः स्यादात्मदोषकः[६०] ।
[६१]अहङ्कारादयो दोषा वर्तन्ते यस्य [६२]चात्मनः ॥३६॥
[६३]तद्दोषांस्तु परीक्ष्यैव [६४]वर्जयेत्तं प्रयत्नतः ।
आचार्य[६५]पुत्रकस्यैवमन्येषां न विधीयते ॥३७॥

[देवादिविषयेऽङ्गवैकल्यं न दोषाय भवेत्]

शरीरलक्षणं तत्र [६६]नावेक्ष्यं हृदयस्य[६७] तु ।
भूतानां तु विकारेण [६८]ह्यङ्गवैकल्यताययौ ॥३८॥
देवानामपि सर्वेषां प्रसिद्धा त्वङ्गहीनता ।
देवतानां नियोगेन ऋषीणां तु[६९] भवेदिह[७०] ॥३९॥
एकपादोऽ[७१]भवल्लोके [७२]ह्यजाख्यो नाम शाङ्करः ।
सोऽपि [७३]वै दीक्षितः पूर्वमाचार्यत्वमुपागतः ॥४०॥
[७४]सूर्ययन्ता च संपन्नः पादहीनो महाबलः ।
अष्टैश्वर्यसमोपेतो दीक्षायुक्तः पुरातनः ॥४१॥
सोऽपि संतानसंपन्नो मद्भक्तः [७५]काश्यपात्मजः ।
वैनतेयो [७६]महाभक्तः [७७]पाणिहीनो न कुत्सितः ॥४२॥
मद्दीक्षया च संपन्नो देशिको देशिकोत्तम[७८] ।
अहल्याजारदोषेण वृत्रहापि[७९] विरूपवान् ॥४३॥

---

[५४] 'प्रति दोषान्' इति पदद्वयमध्याहृत्य व्याख्येयम् ।
[५५] दोषनियुक्तश्चेद् —ओ
[५६] वर्जयेत्तं —ओ
[५७] पुत्रेण राज —ओ
[५८] यजमानस्यातिवृत्त्यर्थं —ओ; अङ्गदोषयुक्तोऽपि कर्माणि कुर्यादित्यर्थो व्याख्येयः ।
[५९] अङ्गदोषं न —ओ
[६०] दोषकम् —ओ
[६१] 'अहङ्कारादि ये दोषा —ओ
[६२] चात्मनि —ओ
[६३] तद्दोषं तु —ओ
[६४] वर्जयेत्तत् —ओ
[६५] पुत्रकस्येवमन्येषां च —ओ
[६६] नापेक्षहृदयं तु तत् —ओ
[६७] अत्र 'लक्षणमवेक्ष्यं' इत्यध्याहृत्य व्याख्येयम् ।
[६८] अष्टवैकल्यता ययौ —ओ
[६९] अत्र 'अङ्गहीनता' इत्यध्याहृत्य व्याख्येयम् ।
[७०] हयं त्विह —ओ
[७१] भवेल्लोके —ओ
[७२] अजाख्या नाम भास्करः —ओ
[७३] दीक्षितवान् पूर्वं —ओ
[७४] सूर्यन्ता च —ओ; सूर्ययन्ता अरुणः, तस्याख्यानं *महाभारते* आदिपर्वणि १६ अध्याये द्रष्टव्यम् ।
[७५] काश्यपात्मनः —ओ
[७६] महासक्तो —ओ
[७७] प्राणहीनो —ओ
[७८] देशिकोत्तमः —ओ
[७९] इन्द्रस्य विरूपप्राप्तिः —*रामायणे* बालकाण्डे ४८.४८

मया च दीक्षितः सोऽपि आचार्यत्वमुपागतः ।
[80]राजयक्ष्मगृहीतः सञ्[81]शशी पूर्वयुगे तथा ।।४४।।
मत्प्रियत्वान्महाभागो दीक्षासंपन्नतां ययौ ।
पितामहो महाप्राज्ञो मया छिन्नशिराः[82] पुरा ।।४५।।
तस्यापि [83]करुणार्द्रेण मया दीक्षा [84]प्रयोजिता ।
[85]संपन्नाश्च [86]तया देवा [87]वेद्याः सर्वे पुरातनाः ।।४६।।
[88]अथ किं बहुनोक्तेन पुरा शक्रपुरोगमाः ।
हिरण्यकशिपोर्वेगाद्विकलाङ्गा महाबलाः ।।४७।।
भूमिं गता महावीर्याः प्रच्छन्नाकृतयस्तदा ।
काले महति नीते च मद्भक्तत्वमुपागताः ।।४८।।
तेषामनु[89]ग्रहार्थं च आचार्यत्वमुपागतः ।
आचार्यमूर्तिमास्थाय तेषां पाशं [90]व्यदारयम् ।।४९।।
तेन मुक्ता महा[91]घोरान् दिवि दैत्यान्व्यदारयन्[92] ।
इयं तु देवतावस्था मुनीनामपि बोधत[93] ।।५०।।
अष्टावक्रो महा[94]प्राज्ञो ह्यात्मसंपत्समन्वितः ।
भक्तिश्रद्धासमोपेतः सर्वभूतहिते रतः ।।५१।।
तं वीक्ष्य कृपया सम्यग्दीक्षां तस्मै[95] ह्यदामहम् ।
सोऽपि [96]संपत्तियुक्तश्च शिष्यवर्गमथाकरोत् ।।५२।।
पैतामहो महातेजा [97]अगस्त्यो मुनिसत्तमः ।
अङ्गुष्ठमात्रकायोऽपि [98]चेतःसंपत्समृद्धिमान् ।।५३।।
आचार्यकरणे दक्षो दीक्षया च समन्वितः ।
प्रतिष्ठातन्त्रतत्त्वज्ञो मच्छिष्यः शीलवान्स्वयम् ।।५४।।
अन्ये च बहवो मुख्याः, वालखिल्यो महातपाः ।
दीक्षासंपन्नमानी च देशिकत्वमुपागतः ।।५५।।

---

[80]राजा यक्ष्म—ओ; *महाभारते* शल्यपर्वणि ३६ अध्याये।
[81]शशिपूर्व—ओ
[82]शिरः—ओ; स्कान्दे दक्षकाण्डे १३ अध्याये।
[83]चरुणाद्रेण—ओ
[84]प्रयोजितम्—ओ
[85]ते संपन्नवता देवा—ओ
[86]तया=दीक्षया
[87]वेदाः—ओ
[88]कथं किं—ओ
[89]ग्रहार्थाय—ओ
[90]विदारय—ओ
[91]घोरा दिवि—ओ
[92]विदारयन्—ओ
[93]'बुध् बोधने' इति धातोर्लोटि मध्यमपुरुषबहुवचनम्।
[94]प्राज्ञ आत्म—ओ; महाभारते वनपर्वणि १३४, १०
[95]प्रदाम्यहम्—ओ
[96]संपन्नयुक्त—ओ
[97]अगस्त्यश्च मुनि—ओ; भागवते ६, १८
[98]चेतो संपत्समृद्धिना—ओ

अथ किं बहुनोक्तेन नापेक्ष्यं [99]कायलक्षणम् ।
आत्मलक्षणमेवात्र[100] संग्राह्यं तत्त्वकोविदैः ।।५६।।
तस्मात्सर्वप्रयत्नेन आत्मसंपत्समन्वितम् ।
आचार्यं पूजयेन्नित्यं शास्त्रदृष्टेन[101] बुद्धिमान् ।।५७।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] [102]आचार्यलक्षणविधिः [चतुरशीतितमः] पटलः ।

---

[99]काललक्षणम् —ओ
[100]लक्षणमत्रैव —ओ
[101]अत्र मार्गेण इति शेषः ।
[102]आचार्यलक्षणपटल एकोनविंशतिः ।

[पञ्चाशीतितमः पटलः]

[श्रद्धोत्सवविधिः[1]]

[उत्सवभेदास्तल्लक्षणं च]

उत्सवस्य विधिं वक्ष्ये [2]शृणुष्वैकाग्रमानसः[3] ।
सायुज्यं चैव सौभाग्यं [4]सौख्यं मङ्गलमेव च ।।१।।
यजमानेच्छया काले उत्सवं [5]तु समाचरेत् ।
एतत्सायुज्यमित्युक्तं सौभाग्यं च ततः शृणु ।।२।।
ध्वजहोम[6]बलीन्कृत्वा बेरयानं समाचरेत् ।
[7]सौभाग्यं त्विति विख्यातमधुना [8]सौख्यकं शृणु ।।३।।
[9]बलिहोमेन संयुक्तं बेरयानं समाचरेत् ।
सौख्यमेत[10]त्समुद्दिष्टं मङ्गलं त्वधुना शृणु ।।४।।
[11]ध्वजहोमौ बलिर्यानं[12] [13]युक्तं मङ्गलमुच्यते ।

[तीर्थनक्षत्राणि[14]]

आर्द्रापुष्य[15]मघाश्चैव उत्तरा [16]चैत्रमेव च[17] ।।५।।

---

[1]अयं पटलः टि० १८३, टि० ४७१, आर्-इ ३७०१५ मातृकासु विद्यते। एते क्रमेण 'ए, ऐ, द' इति संकेतिताः ।; एतद्विषये सूक्ष्मे (टि० ३६, ३८, ९७, १९१) मातृकासु १४ पटलो द्रष्टव्यः;
'श्रद्धोत्सवविधिं वक्ष्ये शृणुष्व त्वं प्रभञ्जन ।
सावश्यं चैव सौभाग्यं सौख्यं मङ्गलमेव च ।।
यजमानेच्छया काले उत्सवं तु समाचरेत् ।
एतत्सावश्यमित्युक्तं सौभाग्यं च ततः शृणु ।।
ध्वजहोमबलीन्कृत्वा बेरयानं समाचरेत् ।
सौभाग्यं त्विति विख्यातमधुना सौख्यकं शृणु ।।
बलिहोमेन संयुक्तं बेरयानं समाचरेत् ।
सौख्यमेतत्समुद्दिष्टं मङ्गलं त्वधुना शृणु ।।
ध्वजहोमौ बलिर्यानं युक्तं मङ्गलमुच्यते ।'
(*सूक्ष्मे* १४.१ – ५ पू०)

[2]शृणुष्वेकाग्र – ए, ऐ, द

[3]मानसा – द

[4]सौख्यमङ्गल – ए, ऐ

[5]तत्समाचरेत् – ए, ऐ

[6]बलिं हुत्वा – ए, ऐ; बलिं हित्वा – द

[7]सौभाग्या त्विति – ऐ

[8]सार्थकं – ए; साग्यकं – ऐ

[9]बलिं होमेन – ए, ऐ

[10]समुदितमिष्टमङ्गलं – ऐ

[11]ध्वजहोमबलिं यानं –

[12]अत्र 'एतैः' इति पदमध्याहृत्य युक्तमित्यनेनान्वयः कर्तव्यः ।

[13]युक्तमङ्गल – ए, ऐ

[14]'उत्सवं कारयेद्धीमान्पुष्यर्क्षान्तं हि पुष्यके ।
माघमासे मघान्तं वा षष्ठ्यन्तं वा प्रजापते ।।
उत्तरान्तं तु फल्गुन्यां चित्रान्तं चैत्रमासके ।
विशाखान्तं हि वैशाखे ज्येष्ठके मूलभान्तकम् ।।
तन्मासे चैव कर्तव्यं कृष्णाष्टम्यां तु उत्सवम् ।
उत्तराषाढमाषाढे श्रावणे वैष्णवान्तकम् ।।
पूर्वाषाढं हि तन्मासे चाश्वयुङ्मासि चाश्विनी ।
कृत्तिकान्तं हि कार्तिक्यामार्द्रान्तं मार्गशीर्षके ।।
सर्वमासेषु कर्तव्यमार्द्रान्तमुत्सवं परम् ।'
(*पूर्वकारणे* १४१.४ उ० – ८);
एतद्विषये *अजिते* २७.८ – २१पू० श्लोकास्त-

[18]विशाखा मूलमाषाढं [19]श्रवणं पूर्वभाद्रकम् ।
अश्विनी चाग्निनक्षत्रमार्द्रमासादितः क्रमात् ॥६॥
तीर्थाहं [20]पर्वसंयुक्तमयुक्तं वा समाचरेत् ।
द्विवारे त्वेकनक्षत्रे भास्करस्योदये सति ॥७॥
[21]तन्नक्षत्रमहोरात्रं[22] तीर्थकार्यं [23]समाचरेत् ।
यामहीनं यथा ऋक्षं पूर्वर्क्षे तीर्थमाचरेत् ॥८॥
आर्द्रान्तं सर्वमासेषु [24]विषुवे ग्रहणान्तके ।
[25]अन्यपुण्यदिनान्ते[26] च उत्सवं कारयेद्बुधः ॥९॥

[उत्तममध्यमाधमा उत्सवाः[27]]

नवाहमुत्तमं प्रोक्तं सप्ताहं मध्यमं स्मृतम् ।
पञ्चाहमधमं प्रोक्तमुत्सवं[28] संप्रकीर्तितम् ॥१०॥
पञ्चसप्तनवाहे तु सौभाग्यं सौख्यमाचरेत् ।
सप्ताहे च नवाहे च मङ्गलं तु समाचरेत् ॥११॥

[सायुज्याङ्गानि पञ्च[29]]

[30]विशेषात्पूजनं कृत्वा बेरयानं समाचरेत् ।
यात्रार्थस्नपनं कुर्या[31]त्संध्यैकया समाचरेत् ॥१२॥
तदन्ते शान्तिहोमं च भूरि चान्नं निवेदयेत् ।
[32]सायुज्यकमिति प्रोक्तं पञ्चाङ्गमिति कीर्तितम् ॥१३॥

दीयटिप्पणी, तथा *रौरवे* क्रियापादे १८.१—८ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[15]मघा चैव—ए, ऐ; मखा चैव—द

[16]मासवाचकचैत्रशब्दोऽत्र नक्षत्रमात्रे प्रयुक्तः ।

[17]वा—ऐ

[18]वैशाखमूल—ए, ऐ, द

[19]श्रावणं—ए, ऐ, द

[20]सर्वयुक्तमयुक्तं—ए, द; सर्वयुक्तं वामयुक्तं वा—ऐ

[21]नक्षत्रमहोरात्रि—ऐ, द

[22]रात्रि—ए

[23]प्रजापते—ए

[24]'विषुवायनपर्यन्तं ग्रहणान्तं तु तीर्थकम् ।'
(*उत्तरकामिके* ६.५ पू०)

[25]अन्यत्पुण्य—ए

[26]दिनान्तं—ए

[27]'नवाहमुत्तमं प्रोक्तं सप्ताहं मध्यमं स्मृतम् ।
पञ्चाहमधमं प्रोक्तमुत्सवं संप्रकीर्तितम् ॥
पञ्चसप्तनवाहे तु सौभाग्यं सौख्यमाचरेत् ।
सप्ताहे च नवाहे च मङ्गलं तु समाचरेत् ॥'
(*सूक्ष्मे* १४.१०, ११)

[28]उत्सवशब्दोऽत्र क्लीबे प्रयुक्तः । एतद्विषये *रौरवे* क्रियापादे १८.८पू० टिप्पणी द्रष्टव्या ।

[29]'विशेषात्पूजनं कृत्वा बेरयानं समाचरेत् ।
यात्रार्थं स्नपनं कुर्यात्संध्यैकया समाचरेत् ॥
तदन्ते शान्तिहोमं च भूरि चान्नं निवेदयेत् ।
सावश्यकमिदं प्रोक्तं पञ्चाङ्गमिति कीर्तितम् ॥'
(*सूक्ष्मे* १४.१२, १३)

[30]अयं श्लोकः 'ए, ऐ' कोशयोर्न दृश्यते ।

[31]सद्धयैकेन—द; अत्र उत्सवमिति पदमध्याहृत्य व्याख्येयम् ।

[32]सावश्यकमिति—ए, ऐ, द; प्रथमश्लोके सायुज्यमित्येवोत्सवनाम निर्दिष्टम् । तदनुसारेणात्र पाठः साधितः ।

[सौभाग्याङ्गानि षोडश[33]]

ततोऽङ्कुरार्पणं [34]कुर्याद्रक्षाबन्धमतः परम् ।
वास्तु[35]शुद्धिं तृतीयां तु बेरयानं चतुर्थकम् ।।१४।।
पञ्चमं परिवेषं [36]तु षष्ठं नृत्तावलोकनम् ।
यात्रार्थं स्नपनं पश्चाद्विशेषयजनाष्टमम्[37] ।।१५।।
नवमं शान्तिहोमं च [38]तीर्थाधिवासनं परम् ।
एकादशं [39]चूर्णकर्म द्वादशं तीर्थकर्मकम् ।।१६।।
आचार्यपूजनं[40] पश्चाद्दक्षिणां[41] च ततः परम् ।
प्रायश्चित्ताभिषेकं च [42]भूरि चात्रं च[43] षोडशम् ।।१७।।
एवं [44]षोडशकाङ्गं तु सौभाग्यमिति कीर्तितम् ।

[सौख्याङ्गानि विंशतिः[45]]

[46]बीजनिर्वापणं पूर्वं [47]रक्षाबन्धो द्वितीयकः ।।१८।।

---

[33]'ततोऽङ्कुरार्पणं कुर्याद्रक्षाबन्धमतः परम् ।
वास्तुशुद्धिं तृतीयां तु बेरयानं चतुर्थकम् ।।
पञ्चमं परिवेषं च षष्ठं नृत्तावलोकनम् ।
यात्रार्थं स्नपनं पश्चाद्विशेषयजनाष्टमम् ।
नवमं शान्तिहोमं च तीर्थाधिवासनं परम् ।।
एकादशं चूर्णकर्म द्वादशं तीर्थकर्मकम् ।
आचार्यपूजनं पश्चाद्दक्षिणां च ततः परम् ।।
प्रायश्चित्ताभिषेकं च भूरि चात्रं च षोडशम् ।
एवं षोडशकाङ्गं तु सौभाग्यं संप्रकीर्तितम् ।।'
(*सूक्ष्मे* १४.१४—१८ पू०)

[34]कुर्यादृक्षाबन्ध—ए; कुर्यादृक्षबन्ध—ऐ

[35]शुद्धिस्तृतीयं—ए; शुद्धितृतीयं—ऐ

[36]च—द

[37]यजनाष्टकम्—ए, ऐ

[38]तीर्थाधीवास—ए, ऐ

[39]चूर्णकं द्वादशं—ए

[40]अङ्कुरार्पणम् इत्यारभ्य आचार्यपूजनमित्यन्तं विद्यमानानां द्वितीयान्तानां पदानां कुर्यादित्यत्रान्वयः कर्तव्यः ।

[41]अत्र दद्यादिति शेषः ।

[42]भूरिपात्रं च—ए; भूरिपान्तं च—ऐ

[43]अत्र कुर्यादिति शेषः ।

[44]षोडशदङ्गेन—ए, ऐ, द

[45]'बीजनिर्वापणं पूर्वं रक्षाबन्धो द्वितीयकः ।
तृतीयो भेरीघोषश्च चतुर्थं वास्तुशुद्धिदम् ।।
पञ्चमश्चास्त्रयागश्च षष्ठं वै बलिदानकम् ।
त्रियंशं बलिदानं स्यात्सौख्ये विजयपुष्कले ।।
सप्तमं बेरयानं च परिवेषस्तथाष्टमः ।
नृत्तावलोकनं पश्चाद्यानार्थं स्नपनं परम् ।।
विशेषयजनं पश्चाद्द्वादशं मृगयानकम् ।
तीर्थाधिवासनं पश्चाच्चूर्णकर्म ततः परम् ।।
पञ्चदशं तीर्थकर्म षोडशो मौनयागकः ।
यागकुम्भाभिषेकश्च दक्षिणादानकं परम् ।।
सौख्यं विंशतिकाङ्गं च उत्सवं परिकीर्तितम् ।'
(*सूक्ष्मे* १४.१८ उ०—२३);
'मौनयाग' इति मौनोत्सव इत्यर्थे प्रयुक्त इति भाति ।
'ब्रह्मादिलोकपालानां हविर्भागं व्रतान्तके ।
तत्तत्स्वनामभूतानां मौनोत्सवं तु कारयेत् ।।'
'लोकपालविसर्गं च मौनोत्सवं तदन्तके ।'
(*पूर्वकारणे* १४१. पृ० ६७७, ६७९);
'चण्डयागं तु सप्ताहं कृत्वा वा त्र्यहमौनकम्'
(*रौरवे* क्रियापादे १८.१४६ उ०);
'शिवं प्रणम्य विज्ञाप्य अनुज्ञां प्रार्थयेद्गुरुः ।
बद्धाञ्जलिकरो भूत्वा मौनव्रतधरस्ततः ।।
पद्धत्युक्तप्रकारेण विधिना देशिकोत्तमः ।

[48]तृतीयो भेरीघोषश्च चतुर्थं वास्तु[49]शुद्धिकम् ।
[50]पञ्चमश्चास्त्रयागश्च षष्ठं वै बलिदानकम् ॥१९॥
[51]त्रियंशं बलिदानं स्यात्[52]सौख्ये विजयपुष्कले ।
सप्तमं बेरयानं च परिवेष[53]स्तथाष्टमः ॥२०॥
नृत्तावलोकनं [54]पश्चाद्यानार्थस्नपनं परम् ।
विशेषपूजनं पश्चाद्द्वादशं [55]मृगयानकम् ॥२१॥
तीर्थाधिवासनं पश्चाच्चूर्णकर्म ततः परम् ।
[56]पञ्चदशं तीर्थकर्म [57]षोडशो मौनयागकः[58] ॥२२॥
यागकुम्भाभिषेकश्च[59] दक्षिणा[60]दानकं परम् ।
सौख्यं [61]विंशतिकाङ्गं च उत्सवं परिकीर्तितम् ॥२३॥

[मङ्गलं त्रिविधम्[62]]

[63]ध्वजभेर्यङ्कुरपूर्वान्मङ्गलं त्रिविधं स्मृतम् ।
पूर्वोक्तेन विधानेन मङ्गलं तु समाचरेत् ॥२४॥

सर्वालंकारसहितं वाद्यशब्दविवर्जितम् ॥
मौनोत्सवं प्रकर्तव्यं सर्वमङ्गलसंयुतम् ।
शिबिकादौ खेटके वा समारोप्य तु यत्नतः ॥
बेरयात्रासमायुक्तं शिवादीनां यथाक्रमम् ।
दीपिकाभिः समं पूर्वं पुष्पमाल्यादिशोभितम् ॥
प्रदक्षिणक्रमेणैव चालयं परितस्तथा ।
ध्वजस्थानं समानीय नीराजनादिकं ततः ॥
नृत्तगीतादिवाद्यैश्च स्वस्वस्थानं प्रवेशयेत्'
(*महोत्सवविधौ* पृ० ३३२, ३३३)

[46]बीजानिवपनं —ए, ऐ; बीजानिवापनं —द

[47]रक्षाबन्धद्वितीयकम् —ए; रक्षाबन्धं द्वितीयकम् —ऐ, द

[48]तृतीयं भेरीघोषं च —ए, ऐ, द

[49]शुद्धिदम् —ऐ

[50]पञ्चमं चास्त्रगाथं च —ए; पञ्चमं चास्त्रगाथं च —ऐ; पञ्चमं चास्त्रयागं च —द

[51]त्र्यंशं —ए; त्रयंशं —द

[52]सौख्यं विजयपुष्कलम् —ए, ऐ, द

[53]मथाष्टकम् —ए, ऐ; मथाष्टमम् —द

[54]पश्चद्ध्यानार्थ —ऐ

[55]मृगधानकम् —ए, ऐ, द

[56]पञ्चादशं —ए, ऐ

[57]षोडशं मौनयागकम् —ए, ऐ, द

[58]मौनयागकः —मौनोत्सव इत्यर्थः ।

[59]भिषेकं च —ए, ऐ, द

[60]दानतत्परम् —ए, ऐ, द

[61]विंशतिरङ्गेन —ए, ऐ, द; विंशतिकाङ्गं सौख्यमिति अत्र निर्दिष्टम् । परं तु अष्टदशाङ्गान्येव प्रतिपादितानि । पूर्वं षोडशाङ्गेषु निर्दिष्टं 'आचार्यपूजनं, पश्चाद् 'भूरि चान्ननिवेदनम्' इत्यङ्गद्वयमेलनेन विंशत्यङ्गानि पूर्णानि स्युः ।

[62]'आरम्भं त्रिविधं तेषां केतुरोहणपूर्वकम् ।
भेरीताडनपूर्वं स्यादङ्कुरार्पणपूर्वकम् ॥
पूर्वं तु ध्वजमारोप्य भेरीं तु ताडयेत्क्रमात् ।
ततोऽङ्कुरार्पणं चैव केतुरोहणपूर्वकम् ॥
भेरीमादौ समुत्ताड्य ध्वजारोहणमारभेत् ।
अङ्कुराण्यर्पयेत्पश्चाद्भेरीताडनपूर्वकम् ॥
पूर्वेऽङ्कुरार्पणं कुर्यात्पश्चाद्भेरीं तु ताडयेत् ।
ध्वजमारोपयेत्पश्चात्कुर्वेवं प्रथमे निशि ॥
(*पूर्वकारणे* १४१.११ —१४);
एतद्विषये *अजिते* २७.२६ —३५श्लोकास्तथा तदीयटिप्पण्यश्च द्रष्टव्याः ।

[63]ध्वजपूर्वाङ्कुरात्पूर्वं —ए; ध्वजपूर्याङ्कुरान्पूर्वं —ऐ; ध्वजभेर्यङ्कुरात्पूर्वं —द

[प्रकारान्तरेण सौभाग्योत्सवविधानं[64], तत्राङ्कुरार्पणम्]

[65]चतुर्विंशत्युत्सवोर्ध्वे सौभाग्यं वक्ष्यते क्रमात् ।
बेर[66]यात्रादिनात्पूर्वे सप्तपञ्च[67]त्रियाहके ।।२५।।
[68]अङ्कुराण्यर्पयेद्धीमा[69]न्पूर्वोक्तविधिना सह ।
अङ्कुरार्पणकार्यं च वर्जयेत्कारयेत्तु वा ।।२६।।
यागारम्भदिनात्[70]पूर्वनिशायामधिवासयेत् ।
विशेषेण च यात्रार्थं कुर्यात्प्रतिसरक्रियाम् ।।२७।।

[71] [प्रतिसरबन्धः]

सौवर्णं [72]राजतं वापि [73]क्षौमं [74]कार्पासकं तु वा ।
[75]स्थालीं तु तण्डुलैः पूर्य ताम्बूलं [76]सोपदंशकम् ।।२८।।

---

[64] 'चतुर्विंशत्युत्सवे तु सौभाग्यं वक्ष्यते क्रमात् ।
बेरयात्रादिनात्पूर्वे सप्तपञ्चत्रियाहके ।।
अङ्कुराण्यर्पयेद्धीमान्पूर्वोक्तविधिना सह ।
अङ्कुरार्पणकार्यं च वर्जयेत्कारयेत्तु वा ।।
यागारम्भदिनात्पूर्वनिशायामधिवासयेत् ।
विशेषेण च यात्रार्थं कुर्यात्प्रतिसरक्रियाम् ।।'
(*सूक्ष्मे* १४.२५—२७);
अङ्कुरार्पणविषये *अजिते* २७.१३७—१५० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[65] चतुर्विंशोत्सवोर्ध्वेषु—ए, ऐ, द

[66] यात्रदिनात्—ऐ

[67] त्रिधाहके—ऐ; त्रिधा भवेत्—द

[68] अङ्कुरानर्पये—ए

[69] पूर्वोऽन्त—ए

[70] पूर्वं निशाया—ए, ऐ, द

[71] 'कुर्यात्प्रतिसरक्रियाम् ।
सौवर्णं राजतं सूत्रं यद्वा कार्पासनिर्मितम् ।।'
'संशोध्य वारिणा चैव चन्दनेनोपलिप्य च ।
भस्माधारे न्यसेद्भस्ममध्ये नेत्रमनुस्मरन् ।।
प्रत्येकं स्थण्डिलं कृत्वा तदूर्ध्वे यन्त्रिकोपरि ।
पात्रं संस्थाप्य संपूर्य तण्डुलैरुडुसंनिभैः ।।
द्विप्रस्थान्तैर्न तद्धीनैर्द्रोणाद्यैर्हृदयं स्मरन् ।
तन्मध्ये विन्यसेत्सूत्रं भस्माधारसमन्वितम् ।।
अभिन्नयुग्मसुश्लक्ष्णपूगसारसमन्वितम् ।
अछिन्नमूलपूर्वोदग्वक्त्रताम्बूलिकान्वितम् ।।
ताम्बूलं सूत्रसहितं स्थण्डिलोपरि विन्यसेत् ।
पुण्याहं वाचयित्वा तु प्रोक्षयेद्धृदयेन तु ।।
स्थण्डिले पूजयेच्छक्तिं यन्त्रिकायां त्रितत्त्वकम् ।
प्रधानतत्त्वं पात्रे स्याद्दण्डवत्तण्डुले मतम् ।।
भस्माधारे उमाख्या स्याद्भसिते लकुलीश्वरम् ।
अनन्तादींश्च सूत्रे तु गन्धाद्यैरर्चयेत्क्रमात् ।।
पात्रमाच्छाद्य पट्टाद्यैर्मालां तदुपरि न्यसेत् ।
सर्वालंकारसंयुक्तं सर्वातोद्यसमन्वितम् ।।
ग्रामप्रदक्षिणं वाथ प्रासादस्य प्रदक्षिणम् ।
कारयेद्वर्जयेद्वाथ देवेशं पूजयेत्ततः ।।
अङ्गुष्ठानामिकाभ्यां तु गृहीत्वा वामहस्तके ।
अलाभे भस्मसंयुक्तं सूत्रं दक्षाङ्गुलद्वयात् ।।
मन्त्रेणानुष्टुभेनात्र स्मरन्सव्यप्रकोष्ठके ।
देवानां बन्धयेत्तत्र भसितं विनिवेशयेत् ।।
सर्वात्मनाथ देवीनां वामे वा दक्षिणेऽथवा ।
जनेभ्यो भसितं दद्याद्देशिकप्रमुखस्तथा ।।
ताम्बूलं च फलापूपनालिकेरफलान्वितम् ।
दद्याद्देवाय भक्तेभ्यो दापयेद्वर्जयेत्तु वा ।।
स्कन्दोमासहिते स्कन्दहीने वा चन्द्रशेखरे ।
देवीयुक्ते वियुक्ते वा नृत्तरूपे विशेषतः ।।
उमामहेश्वरे वामे सुखासीने महेश्वरे ।
अन्यस्मिन्सौम्यरूपे वा कल्पयेदुत्सवाय च ।।
एकद्वित्रिषु सर्वत्र वाञ्छया कौतुकं मतम् ।

तन्मध्ये विन्यसेत्सूत्रं भस्माधारसमन्वितम् ।
श्वेतताम्बूलसंयुक्तं पूगबीजसमन्वितम् ॥२९॥
नालिकेरफलोपेतं स्थलिकोर्ध्वे तु विन्यसेत् ।
पुण्याहं वाचयित्वाथ प्रोक्षयेद्धृदयेन तु ॥३०॥
आत्म[७७]तत्त्वं न्यसेत्पात्रे विद्या[७८]तत्त्वमथाक्षते ।
भस्माधारे तु मायाख्यं [७९]भसिते लकुलीश्वरम् ॥३१॥
अनन्तं सूत्रके न्यस्त्वा गन्धाद्यैरर्चयेत्क्रमात् ।
पात्रमाच्छाद्य वस्त्रेण[८०] मालां तदुपरि न्यसेत् ॥३२॥
[८१]पर्यष्टिं [८२][च] समाहूय सोष्णीषं [८३]सोत्तरीयकम् ।
शिरसा वाहयित्वा तु सर्वालंकारसंयुतम् ॥३३॥
ग्रामप्रदक्षिणं कृत्वा प्रासादस्य प्रदक्षिणम् ।
कारये[८४]द्वर्जयेद्वाथ महेशं पूजयेत्ततः ॥३४॥

कौतुकं चेत्कृतं कार्यं ग्रामादीनां प्रदक्षिणम् ॥
यागारम्भदिने त्वेतद्द्विधानं परिकीर्तितम् ।
अन्यस्मिन्दिवसे कार्यं मध्यमे चोत्सवस्य वा ॥
कौतुकं वाञ्छिते बिम्बे तद्दिनात्पूर्वरात्रके ।
रौद्रे शान्तेऽपि वा बेरे शिवभक्ते विधिर्मतः ॥
त्रिशूले मध्यपत्रे वा तत्स्थदेवकरेऽपि वा ॥
दशायुधानां सर्वेषां सूत्रबन्धनमिष्यते ॥
यागारम्भस्य पूर्वेद्युस्तद्दिने वा समाचरेत् ।'
(*उत्तरकामिके* ६.१५३उ० — १५४पू०,
१६० — १७९पू०);
'सौवर्णं राजतं वापि क्षौमं कार्पासकं तु वा ।
स्थालीं तु तण्डुलैः पूर्य ताम्बूलं सोपदंशकम् ॥
तन्मध्ये विन्यसेत्सूत्रं भस्माधारसमन्वितम् ।
श्वेतताम्बूलसंयुक्तं पूगबीजसमन्वितम् ॥
नालिकेरफलोपेतं स्थलिकोर्ध्वे तु विन्यसेत् ।
पुण्याहं वाचयित्वाथ प्रोक्षयेद्धृदयेन तु ॥
आत्मतत्त्वं न्यसेत्पात्रे विद्यातत्त्वमथाक्षते ।
भस्माधारे तु मायाख्यं भसिते लकुलीश्वरम् ॥
अनन्तं सूत्रके न्यस्त्वा गन्धाद्यैरर्चयेत्क्रमात् ।
पात्रमाच्छाद्य वस्त्रेण मालां तदुपरि न्यसेत् ।
पर्यष्टिं [च] समाहूय सोष्णीषं सोत्तरीयकम् ॥
शिरसा वाहयित्वा तु सर्वालंकारसंयुतम् ।
ग्रामप्रदक्षिणं कुर्यात्पासादस्य पदक्षिणम् ॥
कारयेद्वर्जयेद्वाथ महेशं पूजयेत्ततः ।
पुण्याहं वाचयेद्विद्वान् रक्षासूत्रमनुं जपन् ॥
त्रियम्बकेन मन्त्रेण कौतुकं बन्धयेत्ततः ।
भसितं विन्यसेत्तत्र जनेभ्यो भसितं ददेत् ॥
ताम्बूलं क्रमुकफलं दापयेत्तु सभासदाम् ।
उत्सवे देवानुद्दिश्य कौतुकं बन्धयेद्बुधः ॥'
(*सूक्ष्मे* १४.२८ — ३७ पू०);
एतद्विषये *अजिते* २७.१९९ — २०८ श्लोकास्तदीय-टिप्पणी च द्रष्टव्याः ।

[७२]रजतं — ए, ऐ, द
[७३]क्षौमकार्पासकं — द
[७४]कार्पासिकं — द
[७५]स्थलिकातण्डुलीर्भूष्य — ए; सण्डिलिकर्भूष्या — ऐ; स्थलिकातण्डुलैर्भूष्य — द
[७६]चोपदंशकम् — ऐ
[७७]तत्त्वन्यसे — ए
[७८]तत्त्वाक्षतं न्यसेत् — ए; तत्त्वाक्षतान् न्यसेत् — ऐ; तत्त्वाक्षतन्यसेत् — द
[७९]भसितैलकुलैश्वरीम् — ए; भसिते लकुलेश्वरीम् — ऐ;
[८०]माला तदुपरि — ए, द
[८१]'पर्यष्टिपरिचारांश्च पूजयेतु यथार्हकम्'
(*पूर्वकारणे* ५९.१८८ उ०)
[८२]स महाह्वय — ए; स महाहूय — ऐ
[८३]चोत्तरीयकम् — ए, ऐ, द
[८४]'द्विजवेद्याथ — ए; दुद्विजवेद्याथ — ऐ; द्विजयेद्याथ — द

पुण्याहं वाचयेद्वि[85]द्वान् रक्षासूत्रमनुं जपन् ।
[86]त्रियम्बकेन मन्त्रेण कौतुकं बन्धयेत्ततः ॥३५॥
भसितं [87]विन्यसेत्तत्र [88]जनेभ्यो भसितं ददेत् ।
[89]ताम्बूलं च पूगफलं [90]दापयेत्तु [91]सभासदाम् ॥३६॥
[92]उत्सवोद्दिष्टदेवानां कौतुकं बन्धयेद्बुधः ।

[आस्थानमण्डपप्रवेशनम्[93]]

सर्ववाद्यसमायुक्तं सर्वालंकारसंयुतम् ॥३७॥
नववस्त्रैरलंकृत्य गन्धमाल्यादिभूषणैः ।
हर्म्यप्रदक्षिणं कृत्वा [94]विशेदास्थानमण्डपम् ॥३८॥

[तत्र नीराजनादिकरणम्]

[95]नीराजनं ततो दद्याद्भस्मानि दापयेत्ततः ।
परिवेषं विनोदं च नृत्ताद्यालोकनं कुरु ॥३९॥
तत्स्थानेषु तरङ्गेण वेष्टयेद्देशिकोत्तमः ।

[अपरे दिवसे प्रातःकरणीयविधिः[96]]

अपरे दिवसे धीमान्प्रातः[97]संध्यार्चनात्पुरा ॥४०॥
महेश्वरं समानीय [98]पूर्वस्थानं प्रवेशयेत् ।
वास्तुहोमं ततः कृत्वा पर्यग्निकरणं कुरु ॥४१॥
तद्वास्तु[99]शोभनार्थाय भक्तानामुत्सवं कुरु ।

---

[85]द्वान् नृक्षासूत्र—ए; द्वान् ऋक्षासूत्र—ऐ
[86]त्र्यम्बकेन—ऐ, द
[87]व्यन्यसे—ऐ, द
[88]जनोन्यो—ए
[89]ताम्बूलफलपूगं च—ए, ऐ
[90]दापयेत्त सहा सदा—ए, ऐ
[91]सभासदा—द
[92]उत्सवोद्दिश्य—ए, ऐ, द
[93]'सर्ववाद्यसमायुक्तं सर्वालंकारसंयुतम् ।
नववस्त्रैरलंकृत्य गन्धमाल्यादिभूषणैः ॥
हर्म्यप्रदक्षिणं कृत्वा विशेदास्थानमण्डपम् ।'
(*सूक्ष्मे* १४.३६, ३७ पू०)
[94]विशेषास्थानमण्डपे—ए, ऐ
[95]नीराञ्जनं—ए;
'नीराजनं ततो दद्याद्भस्मानि दापयेत्ततः ।
परिवेषं विनोदं च नृत्ताद्यालोकनं कुरु ॥
तत्स्थानेषु तरङ्गेण वेष्टयेद्देशिकोत्तमः ।'
(*सूक्ष्मे०* १४.३७ उ; ३८);
नीराजनविषये *अजिते* २४ पटलो द्रष्टव्यः ।
[96]'अपरे दिवसे धीमान्प्रातः संध्यार्चनात्पुरा ।
महेश्वरं समानीय पूर्वस्थाने प्रवेशयेत् ॥
वास्तुहोमं ततः कृत्वा पर्यग्निकरणं कुरु ।
तद्वास्तुशोभनार्थाय भक्तानामुत्सवं कुरु ॥'
(*सूक्ष्मे* १४.३९, ४०)
[97]सद्ध्यानार्चनात्परा—द
[98]पूर्वस्थाने—ए, ऐ, द
[99]शोभनास्थाय—ए; शोभनं स्थाप्य—ऐ

[यानक्रमः[100]]

तद्रात्रावेव कर्तव्यं [101]यानमेकं समाचरेत् ।।४२।।
[102]प्रथमे [103]सोमधारी च [104]उमार्धं च [105]द्वितीयके ।
[106]तृतीये वृषभारूढं [107]संवादं च [108]चतुर्थके ।।४३।।
[109]पञ्चमे [110]गजहारी च [111]षष्ठे शाम्भवमेव च ।
[112]सप्तमे चैव [113]वैवाह्यं त्रिपुरघ्न[114]मथाष्टमे ।।४४।।
[115]नवमे कालहारी च [116]प्रथमादिदिनं प्रति ।
देवानामप्यलाभे तु सोमास्कन्देश्वरं नयेत् ।।४५।।
अन्येषामपि देवानां भक्तानामुत्सवं कुरु ।

[तत्तद्देवयोग्यवाहनानि[117]]

तत्तद्देवेषु योग्यानां वाहनं संप्रकीर्तितम् ।।४६।।

---

[100] 'तद्रात्रावेव कर्तव्यं यानमेकं समाचरेत् ।
प्रथमे सोमधारी च उमार्धं च द्वितीयके ।।
तृतीये वृषभारूढं संवादं च चतुर्थके ।
पञ्चमे गजहारी च षष्ठे शाम्भवमेव च ।।
सप्तमे चैव वैवाह्यं त्रिपुरघ्नमथाष्टमे ।
नवमे कालहारी च प्रथमादिदिनं प्रति ।।
देवानामप्यलाभे तु सोमास्कन्देश्वरं नयेत् ।'
(*सूक्ष्मे* १४.४१ — ४४ पू०)
'आद्यं सुखासनं प्रोक्तं द्वितीयमुमया सह ।
वृषारूढं तृतीयं तु त्रिपुरघ्नं चतुर्थकम् ।।
नृत्ताख्यं पञ्चमं प्रोक्तं षष्ठं वै चन्द्रशेखरम् ।
सप्तमं त्वर्धनारीशं हर्यर्धकं तु चाष्टमम् ।।
भिक्षाटनं च नवमं दशमं कालनाशनम् ।
दशैकं कामदहनं ततो लिङ्गपुराणकम् ।।
द्वादशप्रतिमास्त्वेताः सर्वालंकारसंयुताः ।
(*सुप्रभेदे* क्रियापादे १४.१०९ उ० — ११२)

[101] यन्नमेकं — ए; अत्र 'यानक्रमम्' इति पाठः स्थातव्य इति भाति ।

[102] प्रथमं — ए, ऐ, द

[103] सोमधारु — ए

[104] उमार्थं च — ए

[105] द्वितीयकम् — ए, ऐ, द

[106] तृतीयकम् — ए, ऐ, द

[107] संपातं च — ऐ

[108] चतुर्थकम् — ए, ऐ, द

[109] पञ्चमं — ए, ऐ, द

[110] कामहारि च — द

[111] षष्ठं — ए, ऐ, द

[112] सप्तमं — ए, ऐ, द

[113] वाण्यानां — ए; वाह्यानां — ऐ

[114] मथाष्टकम् — ए, ऐ; मथाष्टमम् — द

[115] नवमं — ए, ऐ, द

[116] प्रतिमादि — ए, ऐ

[117] 'प्रथमे शिबिकां चैव द्वितीये कल्पपादपम् ।
भूतरूपं तृतीये तु चतुर्थे गजवाहनम् ।।
पञ्चमे वृषभं प्रोक्तं कैलासं चैव षष्ठके ।
सप्तमे रथमारोप्य अष्टमे तुरगो भवेत् ।।
नवमे तु विमानं च दशमे तीर्थमाचरेत् ।'
(*पूर्वकारणे* १४१.७८ — ८० पू०);
'कल्पकुण्डोदरौ चैव वृषभो मौक्तिकप्रभा ।
गजश्च पुष्पधामं च स्यन्दनस्तुरगस्तथा ।।
शिबिका च तथा प्रोक्ता वाहनानि दिनं प्रति ।
वाहनानामभावे तु शिबिकायानमाचरेत् ।।'
(*सूक्ष्मे* १४.४५ उ० — ४७ पू०)

[118]कल्पकुण्डोदरौ चैव [119]वृषभो मौक्तिकप्रभा ।
[120]गजश्च पुष्पधामं[121] च [122]स्यन्दनस्तुरगस्तथा ॥४७॥
[123]शिबिका च [124]तथा प्रोक्ता [125]वाहनानि दिनं प्रति ।
वाहनानामभावे तु [126]शिबिकायानमाचरेत् ॥४८॥

[भूषणादीनि][127]

मौक्तिकं च प्रवालं च इन्द्रनीलं तथैव च ।
संकीर्णं पुष्परागं च रुद्राक्षं स्वर्णमेव च ॥४९॥
[128]माणिक्यभूषणं चैव [129]मरकताभरणं तथा ।
तद्वर्णाभानि पुष्पाणि वस्त्राणि तु[130]नियोजयेत् ॥५०॥
[131]तत्तद्वर्णविभेदेन गन्धादिग्रहणं [132]च वा ।
कृष्ण[133]गन्धं विशेषेण [134]अष्टमेऽह्नि प्रदापयेत् ॥५१॥

---

[118]पूर्वकारणागममनुसृत्यात्र पाठः साधितः; गल्पि कुण्डोदरं—ए; गब्लिकुण्डोदरं—ऐ; गब्धिकुण्डोदकं—द

[119]वृषभं मौक्तिकं—ए; वृषभं मौक्तिकप्रभम्—ऐ; वृषभं मौ—द

[120]गन्धं च—ए; गजं च—द

[121]धामशब्दोऽत्राकारान्ते प्रयुक्तः ।

[122]स्यन्दनं तुरगं तथा—ए, ऐ, द

[123]शिबिकार्चा तथा—ऐ

[124]ततः—द

[125]वाहनानादिकं—ए; वाहनानां दिनं—ऐ, द

[126]'गल्लिके यान—ए; गब्लिके यान—ऐ; गब्धिके यान—द; सूक्ष्मागममनुसृत्यात्र पाठः साधितः ।

[127]'मौक्तिकं च प्रवालं च इन्द्रनीलं तथैव च ।
संकीर्णं पुष्परागं च रुद्राक्षं स्वर्णमेव च ॥
माणिक्यभूषणं चैव मरकताभरणं तथा ।
तद्वर्णाभानि पुष्पाणि वस्त्राणि च नियोजयेत् ॥'
(*सूक्ष्मे* १४.४७ उ०—४९ पू०)

[128]माणिक्कभूषणं—ए; माणिक्यं भूषणं—ऐ, द

[129]मरतकर्षभं तथा—ए; मरतकं ऋषभं—ऐ; मरतकाभरणं—द

[130]वियोजयेत्—ए, ऐ, द; सूक्ष्मागममनुसृत्यात्र पाठः साधितः ।

[131]'तत्तद्वर्णविभेदेन गन्धादिग्रहणं न वा ।
कृष्णगन्धं विशेषेण चाष्टमेऽहनि दापयेत् ॥
तद्वर्णाभं च नैवेद्यं दिनं प्रति दिनं प्रति ।
सप्तपञ्चत्रियाहे वा एकाहे वा विशेषतः ॥
पूर्वे त्यक्त्वा परे प्रोक्तं देवतावाहनादिकम् ।
भूषणानामभावे तु स्वर्णेनैव समाचरेत् ॥
पुष्पाणामप्यभावे तु करवीरमिति स्मृतम् ।
वस्त्राणामप्यभावे तु श्वेतवस्त्रमिति स्मृतम् ॥
तत्तद्वर्णाभनैवेद्याभावे तु शुद्धमोदनम् ।'
(*सूक्ष्मे* १४.४९ उ०—५३);
तद्वर्णां च विभेदेन—ए; तद्वर्णं च विभेदेन—ऐ, द

[132]न वा—ए, ऐ

[133]गन्धे—ए, ऐ, द

[134]षष्ठेऽहनि—ए, ऐ, द; अत्र सूक्ष्मागममनुसृत्य पाठः साधितः ।

तत्तद्वर्णाभनैवेद्यं दिनं प्रति दिनं प्रति ।
[135]सप्तपञ्चत्र्यहे वापि [136]एकाहे वा विशेषतः ।।५२।।
[137]पूर्वे [138]त्यक्त्वा [139]परे प्रोक्तं [140]देवतावाहनादिकम् ।
भूषणानामभावे तु स्वर्णेनैव समाचरेत् ।।५३।।
पुष्पाणामप्यभावे तु करवीरमिति स्मृतम् ।
वस्त्राणामप्यभावे तु श्वेत[141]वस्त्रमिति स्मृतम् ।।५४।।
[142]तत्तद्वर्णाभनैवेद्याभावे तु शुद्धमोदनम् ।

[उत्सवक्रमः[143]]

महेश्वरं समभ्यर्च्य वाहनस्योपरि न्यसेत् ।।५५।।

---

[135]सप्तपञ्चम्यहे—ए; सप्तपञ्चत्रयाहे—द;
अत्र पटले पञ्चसप्तनवाहोत्सवत्रयमेव दशमश्लोके निर्दिष्टम्। त्र्यहोत्सवो नैव निर्दिष्टः। एकाहोत्सवस्तु सायुज्योत्सवविषये द्वादशश्लोके एकसंध्यायां विधेयत्वेन सूचितः। उत्सवप्रस्तावादयं श्लोकोऽत्रोक्त इति भाति। *अजिते* २७ ३—७; २१—३५ श्लोकेषु नवविधोत्सवप्रकारो वर्णितः। तत्र एकाहत्र्यह पञ्चसप्ताहोत्सवाः प्रतिपादिताः।

[136]एकाहेऽपि—ए; एकाहोत्सवस्तु *अजिते* ३० ५३ उ०, ५४ सार्धश्लोके
'ध्वजभेर्यङ्कुरैर्हीनो बलिदानादिवर्जितः।
एकाहश्च दिवारात्रं बेरेणेष्टेन वा न वा ॥
केवलोत्सव इत्युक्तो भक्त्या भक्तैः प्रकल्पितः।'
इति प्रतिपादितः।

[137]पूर्वं—ए, ऐ, द; अत्र एकाहोत्सवो देवतावाहनादिकं विना कर्तव्यः। अन्ये उत्सवा देवतावाहनसहिता एव कार्या इत्यर्थः।

[138]कृत्वा—द

[139]परं—ए, ऐ, द

[140]देवतावाहनन्दिनम्—ए; देवतावाहनं दिनम्—ऐ

[141]वस्त्रमिदं—ए, ऐ

[142]तद्वर्णाभं तु नैवेद्यमभावे—ए, ऐ, द

[143]'नानावाद्यसमायुक्तं गजाश्वाद्युष्ट्रसंयुतम्।
वीथिसंमार्जनोपेतं जलसेकसमन्वितम् ॥
गृहं प्रति कृतालेपचूर्णचित्रसमन्वितम्।
मङ्गलाङ्कुरसद्दीपवर्धनीकुम्भवारियुक् ॥
कदलीपूगसंयुक्तं पट्टवस्त्रादिशोभितम्।
दर्भमालासमायुक्तं मुक्तादामविभूषितम् ॥
उपरिष्टादधस्तात्तु तलं प्रति तलं प्रति।
विन्यसेद्दीपदण्डांश्च रात्रौ चेद्दीपमालया ॥
गृहालंकार उद्दिष्टो गृहहीनस्थलेऽपि च।
नानाध्वजसमोपेतं नानावाद्यसमन्वितम् ॥
नानागानसमोपेतं नानानृत्तसमन्वितम्।
नानाछत्रसमोपेतं पिञ्छचामरसंयुतम् ॥
तालवृन्तसमोपेतं धूपदीपसमन्वितम्।
यानं प्रतिदिनं कुर्यादह्नि रात्रौ महोत्सवे ॥
रथादौ शिबिकादौ वा परिचारकमूर्धसु।
यानकाले तु ताम्बूलं देयं नानाफलानि च ॥
भक्ष्यापूपादिकं देयं दत्त्वा काण्डपटादिकम्।
योग्यायोग्यविभागेन दग्धार्द्रविषये क्रमात् ॥
दग्धं सर्वं द्विजैः सिद्धमार्द्रं शूद्रैस्तु वा मतम्।
विल्वक् सत्वक् कृतं युक्त्या वीक्षणादिविशोधितम् ॥
शङ्खध्वनिसमायुक्तं पाद्याचमनसंयुतम्।
प्रच्छन्नपटमावर्ज्य निर्माल्यापनये कृते ॥
दत्त्वोपहारान्सर्वेभ्यो मद्भक्तेभ्यः क्रमेण तु।
आगन्तुकेभ्यस्त्वन्येभ्यस्तत्तद्भक्त्यनुसारतः ॥
प्रवेश्यास्थानकूटाद्यमासनस्थाय शंभवे।
दत्त्वा पाद्यादिकं नित्यं स्नपनं शान्तिहोमयुक् ॥
कार्यं तक्षादिसंस्पृष्टरथादिस्पर्शशान्तये।
चण्डालपाणदृग्दोषनिवृत्त्यर्थं विशेषतः ॥
आवश्यकमिदं ज्ञेयं प्रतियानं गुरूत्तमाः।
शान्तिहोमं विना वाथ अशक्तौ स्नपनं नयेत् ॥
(*उत्तरकामिके* ६:२५५—२६९);
'महेश्वरं समभ्यर्च्य वाहनस्योपरि न्यसेत्।

चलासनं तु संकल्प्य धूपदीपादिकं ददेत् ।
[144]वीथीसंमार्जनोपेतं [145]जलसेकसमन्वितम् ।।५६।।
नानागान[146]स्वरोपेतं नानानृत्त[147]समन्वितम् ।
नानाध्वजसमोपेतं [148]पिञ्छचामरसंयुतम् ।।५७।।
नानादीपसमायुक्तं गणिकादिभिरावृतम् ।
नानाभक्तजनैः [149]सार्धं यानमेवं समाचरेत् ।।५८।।
यानकाले तु ताम्बूलं ददेन्नानाफलानि च ।
भक्ष्यापूपादिकं दद्यात्पाद्यादिक[150]विवर्जितम् ।।५९।।
शनैः [151]प्रदक्षिणं कृत्वा सभास्थानं प्रविश्य च ।
स्थिरासनं तु संकल्प्य भक्ष्यादीनि निवेदयेत् ।।६०।।
नीराजनं ततो दद्यात्ताम्बूलं च निवेदयेत् ।
[152]परिवेष[153]क्रमं चैव नृत्तावलोकनं क्रमात् ।।६१।।
[154]यानं प्रतिदिनं कुर्या[155]दहर्निशं महोत्सवे ।
[156]प्रतिसंध्यार्चनं [157]नित्यमुत्सवेश्वरपूजनम् ।।६२।।

चलासनं तु संकल्प्य धूपदीपादिकं ददेत् ।।
वीथीसंमार्जनोपेतं जलसेकसमन्वितम् ।
नानाध्वजसमोपेतं नानावाद्यसमन्वितम् ।।
नानागानस्वरोपेतं नानानृत्तसमाकुलम् ।'
'नानादीपसमायुक्तं गणिकादिभिरावृतम् ।
नानाभक्तजनैः सार्धं यानमेवं समाचरेत् ।।
यानकाले तु ताम्बूलं ददेन्नानाफलानि च ।
भक्ष्यापूपादिकं दद्यात्पाद्यादिकविवर्जितम् ।।
शनैः प्रदक्षिणं कृत्वा सभास्थानं प्रविश्य च ।
स्थिरासनं तु संकल्प्य भक्ष्यादीनि निवेदयेत् ।।
नीराजनं ततो दद्यात्ताम्बूलं च निवेदयेत् ।
परिवेषक्रमेणैव नृत्तावलोकनं क्रमात् ।।
वारं [यानं ?] प्रतिदिनं कुर्यादहर्निशि महोत्सवे ।'
(*सूक्ष्मे* १४.५३ उ० —५५; ५६ उ० —६०)

[144]विधिसंमार्जनोपेतजलेस्त्वेक —ए, ऐ

[145]कलेस्सेकसम —ऐ; जले स्वेक —द

[146]समोपेतं —द

[147]समाकुलम् —ए, ऐ

[148]पिञ्चाचामर —ए

[149]साध्यं —ए

[150]विवर्जितः —द; अत्र 'समन्वितम्' इति पाठो भवितव्य इति भाति ।

[151]प्रदक्षणं —ए

[152]परिषेकक्रमेणैव —द

[153]क्रमेणैव —ए, ऐ

[154]वारं —ए, ऐ, द; उत्तरकामिकश्लोकमनुसृत्यात्र 'यानं' इति पाठः साधितः ।
'यानं प्रतिदिनं कुर्यादह्नि रात्रौ महोत्सवे ।'
(*उत्तरकामिके* ६.२६१ उ०)

[155]दहर्निशि —ए, ऐ

[156]'प्रातःसंध्यार्चनं नित्यं यागमण्डपवेशनम् ।
रथाद्यारोहणं यानं ततो मध्याह्नपूजनम् ।।
रथे चेद्धूपदानान्तं नैवेद्यान्तं शिवालये ।
यात्रार्थस्नपनं पश्चात्ततो नेमित्तिकार्चनम् ।।
विनोददर्शनं चान्ते प्रदोषे पूजनं ततः ।
पुनर्होमनिवेशश्च ततो ग्रामप्रदक्षिणम् ।।
यात्रार्थस्नपनं पूजा नृत्तगेयादिदर्शनम् ।
ततो धामनिवेशश्च देव्या सह निवेशनम् ।।
काले षोडशसंख्याते यामार्धपरिनिष्ठिते ।
कृतप्रतिसरस्यैता देवस्य विहिताः क्रियाः ।
स्वकालेऽनुष्ठितास्त्वेताः क्रियाः सर्वार्थसाधकाः ।।
पूर्वपूर्वग्रहे पुष्टिः पृष्ठपृष्ठग्रहेऽशुभः ।
तस्मात्सर्वप्रयत्नेन पूर्वकाले समाचरेत् ।।
स्वकाले वाथ दोषः स्यात्पृष्ठकाले समाचरेत् ।'
(*उत्तरकामिके* ६.२७३ —२७९);
'प्रतिमायामर्चनं नित्यमुत्सवेश्वरपूजनम् ।

तत्परं शान्तिहोमं च नित्योत्सवमतः परम् ।
ततो यानक्रमं चैव परिवेषक्रमं तथा ॥६३॥
नृत्तावलोकनं पश्चाद्यात्रार्थं स्नपनं परम् ।
[158]विशेषयजनं पश्चात्ततो मध्याह्नपूजनम् ॥६४॥
[159]पश्चात्प्रदोषयजनमलंकारमतः परम् ।
उत्सवेश्वर[160]पूजां च तत्परं शान्तिहोमकम् ॥६५॥
पश्चान्नित्योत्सवं कुर्यात्ततो ग्रामप्रदक्षिणम् ।
शक्तिस्थाने निवेद्यं च [161]रात्र्यां तु यानमाचरेत् ॥६६॥
त्रिपादेन त्रिनाडी [162]च क्रियां प्रति क्रियां प्रति ।
[163]निशि यानावसाने तु स्नानवर्जितपूजनम् ॥६७॥
गन्ध[164]माल्यं विसृज्याथ पाद्यमाचमनं ददेत् ।
गन्धमाल्यैश्च संतोष्य पूर्वयानक्रमेण तु ॥६८॥
[165]रात्र्यन्ते यानि [166]कर्माणि दिनं प्रति दिनं प्रति[167] ।
तीर्थाधिवासनं कुर्याच्चूर्णोत्सवमतः परम् ॥६९॥
देवाग्रे च सभास्थाने तीर्थतीरे मनोरमे ।
[168]चूर्णोत्सवं तु कर्तव्यं [169]जलक्रीडां समाचरेत् ॥७०॥

तत्परं शान्तिहोमं च नित्योत्सवमतः परम् ॥
ततो यानक्रमं चैव परिवेषक्रमं तथा ॥
नृत्तावलोकनं पश्चात्ततो मध्याह्नपूजनम् ॥'
'पश्चात्प्रदोषयजनमलंकारमतः परम् ।
उत्सवेश्वरपूजा च तत्परं शान्तिहोमकम् ॥
पश्चान्नित्योत्सवं कुर्यात्ततो ग्रामप्रदक्षिणम् ।
शक्तिस्थाने निवेद्यं च रात्र्यां तु यानमाचरेत् ॥
त्रिपादेन त्रिनाडी च क्रियां प्रति क्रियां प्रति ।
निशि यानावसाने तु स्नानवर्जितपूजनम् ॥
गन्धमाल्यं विसृज्याथ पाद्यमाचमनं ददेत् ॥
गन्धमाल्यैश्च संतोष्य पूर्वयानक्रमेण जु ।
रात्र्यन्ते यानि सर्वाणि दिनं प्रति दिनं प्रति ॥
तार्थादिवासनं कुर्याच्चूर्णोत्सवमतः परम् ।
देवाग्रे च सभास्थाने तीर्थतीरे मनोरमे ॥
चूर्णोत्सवं तु कर्तव्यं जलक्रीडां समाचरेत् ।
प्रायश्चित्तार्थहोमं च स्नपनैरभिषेयचेत् ॥
आचार्यं पूजयेत्पश्चाद् भक्तांश्चैव प्रपूजयेत् ।'
'एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।

(*सूक्ष्मे* १४.६१, ६२; ६३उ०—६९; ७०उ०—७१पू०)

[157]तीर्थमुत्सवेश्वर—द

[158]यात्रार्थं स्नपनं पश्चात्—ए, ऐ, द; अत्र षोडशाङ्ग-सौभाग्योत्सवप्रोक्तवत् पाठः शोधितः । एतद्विषये १५ श्लोकस्योत्तरार्धं द्रष्टव्यम् ।

[159]पश्चात्प्रत्यक्षयजनं—द

[160]पूजा च—ए, ऐ, द

[161]रात्र्यान्ते—ए; रात्र्य—ऐ, द

[162]चाक्रियां प्रति—द

[163]निशा यानावसाने—द

[164]माल्यां—ए

[165]रात्र्यान्ते—ए

[166]सर्वाणि—ए

[167]अत्र 'तानि कुर्यात्' इति शेषः

[168]चूर्णोत्सवविषये *अजिते* २७.२८६—२९२पू०श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[169]जलक्रीडां इत्यत्र 'तीर्थकर्म' इति पाठश्चेत्सुष्ठु ।

प्रायश्चित्तार्थहोमं च स्नपनैरभिषेचयेत् ।
आचार्यं पूजयेत्पश्चाद्भक्तांश्चैव प्रपूजयेत् ।।७१।।
प्रायश्चित्तार्थकलशैर्भूरि चान्नं निवेदयेत् ।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।।७२।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] श्रद्धोत्सवविधिपटलः
[पञ्चाशीतितमः] ।

[षडशीतितमः पटलः]

[पञ्चगव्यविधिः[१]]

[पञ्चगव्यशब्दार्थविवरणम्]

[२]अतः परं प्रवक्ष्यामि पञ्चगव्यविधिक्रमम्[३] ।
[४]पकारः पापनाशः स्याद्[५]ञ्चकारः पुत्रवर्धनः ।।१।।
[६]गकारो मोक्षदः प्रोक्तो [७]व्यकारो व्याधिनाशनः ।
सर्वसिद्धिकरं पुण्यं पञ्चगव्यमिति स्मृतम् ।।२।।

[नवकोष्ठकल्पनम्[८]]

शिवाग्रे मण्डपे शुद्धे गोमयालेपनं कुरु ।
[९]परिस्तरेत्तु शालींश्च द्वात्रिंशत्प्रस्थपूरितान्[१०] ।।३।।
प्राक्सूत्रं युगसूत्रं स्यादुदक्सूत्रं तथैव च ।
सूत्रात्सूत्रान्तरं तालं नवकोष्ठं प्रकल्पयेत् ।।४।।

---

[१]अयं पटलः 'औ, ज, झ, ञ' मातृकासु दृश्यते।
एतद्विषये *अंशुमदागमे* पञ्चगव्यविधिपटलः; *पूर्वकारणे* ३५; *चिन्त्ये* १२; *मकुटे* पञ्चगव्यविधिपटलः; *सूक्ष्मे* २ पटलश्च द्रष्टव्याः।

[२]अथातः संप्रवक्ष्यामि—ञ

[३]'पञ्चगव्यविधिं वक्ष्ये श्रूयतां रविसत्तम।
पकारं पापनाशं स्याच्चकारं पुत्रवर्धनम् ॥
गकारं मोक्षसिद्धिः स्याद्व्यकारं व्याधिनाशनम्।
सर्वसिद्ध्यर्थमेवोक्तं पञ्चगव्यं विधीयते ॥'
(*अंशुमदागमे* पञ्चगव्यविधिपटले १, २);
'पकारं पापनाशं स्याच्चकारमात्मशुद्धिदम्।
गकारं जन्मनाशं स्याद्व्यकारं मोक्षहेतुकम् ॥
पञ्चगव्यस्य शब्दस्य प्रोक्तं निर्वचनाक्षरम्।'
(*पूर्वकारणे* ३५.३९—४० पू०)

[४]पकारं पापनाशं—औ, ज, ञ; पंकारं पापनाशं—झ

[५]चकारं पुत्रवर्धनम्—औ, झ; ञ्चकारं पुत्रवर्धनम्—ज, ञ

[६]गकारं मोक्षदं प्रोक्तं—औ, ज, झ, ञ

[७]व्यकारं व्याधिनाशनम्—औ, ज, झ, ञ

[८]'अथ वक्ष्ये विशेषेण पञ्चगव्यविधिं शृणु।
शिवाग्रे भूतले रम्ये गोमयालेपनं कुरु ॥
तन्मध्यतः परिस्तीर्य ताराभैर्द्रोणतण्डुलैः।
प्राक्सूत्रं युगसूत्रं स्यादुदक्सूत्रं तथैव च ॥
सूत्रात्सूत्रान्तरं तालं नवकोष्ठं तु लेखयेत्।
लाजैर्दर्भैरक्षतैश्च तिलैः पुष्पैः परिस्तरेत् ॥
दिग्दलं च चतुर्वेदं विदिग्दलं कृतादयः।
पुण्याहप्रोक्षणं कृत्वा शोधयेन्नवकोष्ठकम् ॥'
(*पूर्वकारणे* ३५.१—४);
'शालिभिः स्थण्डिलं कृत्वा नवप्रस्थं तु कन्यसम्।
द्विगुणं मध्यमं शालि त्रिगुणं चोत्तमं भवेत् ॥
तस्मिन् नवपदं लिख्य प्रत्येकं तालमात्रतः।
तण्डुलैश्च तिलैर्लाजैः दर्भैः पुष्पैः परिस्तरेत् ॥'
(*चिन्त्ये* १२.५ उ०—७ पू०);
'मण्डपे त्विष्टदेशे वा स्थण्डिलं शालिना कुरु।
दर्भैः पुष्पैः परिस्तीर्य नवकोष्ठं तु लेखयेत् ॥'
(*सूक्ष्मे* २.३)

[९]परिस्तरणशालीनां—औ, ज, झ, ञ

[१०]पूरितम्—औ, ज, झ, ञ

चतुरश्रं ततः कृत्वा [11]साष्टपत्रं सकर्णिकम् ।
[12]चतुर्वेदाश्च दिक्पात्रे [13]विदिक्पात्रे कृतादयः ।।५।।
अक्षतैस्तिललाजैश्च दर्भैः पुष्पैः परिस्तरेत् ।
पुण्याहं वाचयेत्तत्र कोष्ठं तत्र [14]क्रमाद्यजेत् ६।।

[कोष्ठपूजा[15]]

मध्यमे शिवतत्त्वं तु पूर्वकोष्ठे सदाशिवम् ।
ईश्वरं तु तथाग्नेय्यां विद्यातत्त्वं तु दक्षिणे ।।७।।
मायातत्त्वं तु नैर्ऋत्यां पश्चिमे कालतत्त्वकम् ।
वायौ नियतितत्त्वं [16]च सोमे पुरुषतत्त्वकम् ।।८।।
ईशे प्रकृतितत्त्वं तु कोष्ठपूजा विधीयते ।

[पात्रपूजा[17]]

सुप्रतिष्ठं तु तन्मध्ये सुशान्तं [18]पूर्वपात्रके ।।९।।
तेजःपात्रं ततो याम्ये प्रतीच्याममृतं तथा ।
सौम्ये रत्नोदकं चैव [19]अव्यक्तं चैशपात्रकम् ।।१०।।

---

[11]चाष्टपत्रं—औ, ज, झ, ञ
[12]चतुर्वेदं च दिक्पात्रं—औ, ज, झ, ञ
[13]विदिक्पात्रं—औ, ज, झ; विदिक्पत्रं—ञ
[14]क्रमादधः—ज
[15]'मध्यमे शिवतत्त्वं तु पूर्वे तत्त्वं सदाशिवम् ।
विद्यातत्त्वं दक्षिणतः सौम्ये पुरुषतत्त्वकम् ।।
पश्चिमे कालतत्त्वं तु वह्नौ नियतितत्त्वकम् ।
अप्तत्वं राक्षसे देशे मायातत्त्वं तथानिले ।।
ईशे प्रकृतितत्त्वं तु कोष्ठपूजा विधीयते ।'
(*पूर्वकारणे* ३५.५—७ पू०);
'शिवं सदाशिवं विद्यां कालं च पुरुषं तथा ।
कालनियतिरागांश्च ईशं कोष्ठे प्रपूजयेत् ।।'
(*सूक्ष्मे* २.४)
[16]वै—ज, ञ
[17]'पात्रं सलक्षणं ग्राह्यं क्षालयेदस्त्रवारिणा ।
पुरुषमन्त्रेण संप्रोक्ष्य कवचेनावकुण्ठयेत् ।।
मध्यमे सुप्रतिष्ठं तु सुशान्तं पूर्वमेव च ।
तेजोवद्दक्षिणे पात्रं रत्नोदकं तथोत्तरे ।।
अमृतपात्रं पश्चिमायामव्यक्तं चैशकोणके ।
आग्नेय्यां व्यक्तपात्रं स्यान्नैर्ऋते सूर्यपात्रकम् ।।
वायौ संयोगपात्रं स्यात्पात्रपूजा विधीयते ।'
(*वातुले* इति शैवसिद्धान्तसंग्रहे पृ० २२८, २२९);
'मध्यमे सुप्रतिष्ठं च पूर्वे सुशान्तपात्रकम् ।
तेजःपात्रं तु याम्यायां सौम्ये चामृतपात्रकम् ।।
पश्चिमे रत्नपात्रं च ईशे चाव्यक्तपात्रकम् ।
इति पात्रान् समभ्यर्च्य धूपदीपसमन्वितम् ।।'
(*चिन्त्ये* १२.१५, १६);
'तन्मध्ये सुप्रतिष्ठं च पूर्वपात्रे सुशान्तकम् ।
तेजोरूपं दक्षिणतो रत्नोदकं तथोत्तरे ।।
अमृतोदं प्रतीच्यां तु सुव्यक्तमीशकोणके ।
पूर्वादिशानपर्यन्तं ज्योतीरूपं तु पात्रकम् ।।'
(*पूर्वकारणे* ३५.७ उ०—९ पू०)
'सुप्रतिष्ठं सुशान्तं च तेजोवदमृतं तथा ।
रत्नोदकं च पात्राणि तत्तन्नाम्नाभिपूजयेत् ।।'
(*सूक्ष्मे* २.७)
[18]पूर्वके दिशि—औ, झ
[19]अव्यक्ते च तथेशकम्—ज

अग्नौ सुव्यक्तपात्रं च नैर्ऋत्यां सूर्यपात्रके ।
वायौ संयुक्तपात्रं [20]स्यादित्येतत्पात्रपूजनम् ।।११।।

[कुम्भेषु द्रव्यन्यासः[21]]

[22]क्षीरं कुम्भे तु तन्मध्ये दधि [23]पूर्वे तु विन्यसेत् ।
दक्षिणे तु घृतं न्यस्य गोमूत्रं चोत्तरे न्यसेत् ।।१२।।
पश्चिमे गोमयं चैव आग्नेय्यां [24]पिष्टचूर्णकम् ।
नैर्ऋत्यां रजनीं स्थाप्य [25]वायौ चामलकं तथा ।।१३।।
ऐशान्यां दर्भतोयं [26]च कुर्यात्तत्पञ्चगव्यकैः[27] ।

[पञ्चगव्यऋषयः[28]]

[29]कौशिकः क्षीर[30]मित्युक्तः काश्यपो दधि चोच्यते ।।१४।।
[31]भारद्वाजो घृतं चैव [32]गौतमो गोमयं तथा ।
[33]आत्रेयश्चैव गोमूत्रमृषयश्च प्रकीर्तिताः ।।१५।।

[द्रव्याधिदेवताः[34]]

क्षीरं तु शुक्रदैवत्यं दधि वै सोमदैवतम् ।

---

[20]स्यादित्येते पात्र—औ, ञ; च इत्येते पात्र—ज, झ
[21]'ससूत्रान् सापिधानांश्च सकूर्चान् हेमसंयुतान् ।
सवस्त्रान् पल्लवोपेतान् स्थापयेन्नवकुम्भकान् ।।
क्षीरं तु मध्यमे स्थाप्य पूर्वे तु दधि चोच्यते ।
दक्षिणे तु घृतं स्थाप्य पश्चिमे गोजलं ततः ।।
उत्तरे गोमयं स्थाप्य शालिपिष्टं तु चाग्निके ।
आमलीं निर्ऋतौ चैव वायव्यां रजनीं तथा ।।
गोरोचनां तु ऐशान्यां षडङ्गं तु विधीयते ।
गोरोचनां विना चैव पञ्चगव्यं विधीयते ।।
कुशोदकयुतं चैव षडङ्गमिति कीर्तितम् ।'
(*पूर्वकारणे* ३५.२५—२९ पू०)
[22]क्षीरकुम्भं तु—औ, ज, झ, ञ
[23]पूर्वं तु—औ, ज, झ, ञ; पूर्वे तद्दधिरुच्यते;—झ
[24]पिष्टसंयुतम्—औ, ज, ञ
[25]वायव्यामलकं—औ, ज, झ, ञ
[26]तु कुरुते पञ्च—ज; तु कुर्यात्तत्पञ्च—झ
[27]गव्यके—औ, झ
[28]'कौशिकं क्षीरकुम्भं तु काश्यपं दधि कीर्तितम् ।
भारद्वाजं घृतं चैव मूत्रमात्रेयकं तथा ।।
गौतमं गोमयं चैव'
(*अंशुमदागमे* पञ्चगव्यपटले १६ उ०, १७);
'काश्यपं घृतमेवं तु कौशिकं दधि चोच्यते ।
क्षीरं तु भारद्वाजस्य गौतमो गोमये तथा ।।
अगस्त्यश्चैव गोमूत्रं ऋषयः पञ्च कीर्तिताः ।'
(*पूर्वकारणे* ३५.१४.१५ पू०)
[29]कौशिकं—औ, ज, झ, ञ
[30]मित्युक्तं काश्यपं—औ, ज, झ, ञ
[31]भारद्वाजं—औ, ज, झ, ञ
[32]गौतमं—ज; गोमूत्रं—औ, झ
[33]आत्रेयं च गवो मूत्रं—औ, झ; आत्रेयं चैव—ञ; 'ज' मातृकायां १५ उ०, १६ श्लोकश्च न स्तः ।
[34]'क्षीरं वै रुद्रदैवत्यं दधि वै सोमदैवतम् ।
घृतमीश्वरदैवत्यं गोमूत्रं वायुदैवतम् ।।
गोमयं वह्निदैवत्यं कुशोदं ब्रह्मदैवतम् ।
पिष्टं वै विष्णुदैवत्यं रजनी चन्द्रदैवतम् ।।
श्रियममलके विद्यादधिदेवाः प्रकीर्तिताः ।'
(*पूर्वकारणे* ३५.२० उ०—२२)

घृतं वै रुद्रदैवत्यं गोमयं चार्कदैवतम् ।।१६।।
[३५]गोमूत्रमग्निदैवत्यं पञ्चगव्याधिदेवताः ।
शालि[३६]पिष्ट उमादेवी रजन्यां च सरस्वती ।।१७।।
[३७]श्रीदेव्यामलके चैव पार्वती [३८]दर्भतोयके ।

[द्रव्याभिमन्त्रणं पञ्चगव्ययोजनं[३९] च]

आप्यायस्व समे क्षीरं दधिक्रावृणो हि वै दधि ।।१८।।
शुक्रमसि घृतं चैव [४०]गन्धद्वारेति गोमयम् ।
[४१]गायत्र्या चैव गोमूत्रमभिमन्त्र्य यथाक्रमम् ।।१९।।
[४२]ईशानादि च सद्यान्तं पूजयेत्तु यथाक्रमम्[४३] ।
[४४]मध्ये क्रमेण संयोज्यं मूलमन्त्रं समुच्चरन् ।।२०।।

[[४५]उत्तममध्यमाधमभेदेन त्रिविधपञ्चगव्यम्]

उत्तमं द्रोणमित्युक्तं मध्यमं तु तदर्धकम् ।
तदर्धमधमं ज्ञेयं त्रिविधं परिकल्पयेत् ।।२१।।

---

[३५]गोमूत्रानलदैवत्यं—औ, ज

[३६]पिष्टौमुमा—औ; पिष्टौ उमा—ज, झ; पिष्टमुमा—ञ

[३७]श्रीदेव्यामलकं—औ, ·ज, झ, ञ

[३८]दर्भतोयकम्—ओ, ज, झ, ञ

[३९]'आप्यायस्वेति च क्षीरं दधिक्रावृण्णेति वै दधि ।
शुक्रमसीति मन्त्रेण घृतं चैवाभिमन्त्रयेत् ।।
गायत्रिया तु गोमूत्रं गन्धद्वारेति गोमयम् ।
कुशोदकं तु गायत्र्या रोचनां ब्रह्मपञ्चकैः ।।
पिष्टं च हृदयेनैव आमलं शिरसैव तु ।
रजनीं कवचमन्त्रेण अभिमंत्र्य सकृद्गुरुः ।।
पुण्याहं वाचयेद्धीमान् प्रोक्षयेत्पुरुषेण तु ।
पूजयेद्गन्धपुष्पाद्यैर्देशिकेन विचक्षणः ।।
गोमयं गोजले क्षिप्य गोजलं घृत एव च ।
घृतं दध्नि तु संक्षिप्य दधि क्षीरे तु निक्षिपेत् ।।
गोरोचनं च संयुक्तं कुशोदकसमन्वितम् ।
षड्गव्यं पञ्चगव्यं च'
(*पूर्वकारणे* ३५.२९ उ०—३५ पू०);
'आप्यायस्वेति च क्षीरं दधि मन्त्रेण विन्यसेत् ।
शुक्रमसीति चाज्यं स्याद्गायत्र्या मूत्रकं न्यसेत् ।।
गोमयं गन्धद्वारेति देवस्य त्वा कुशोदकम् ।
मूलमन्त्रेण संस्पृश्य अमृतीकरणं कुरु ।।
मध्यादि ब्रह्ममन्त्रेण योजयेत्तु क्रमेण तु ।
शिवगायत्रिमन्त्रेण योजयेत्तु कुशोदकम् ।।'
(*सूक्ष्मे* २.९—११)

[४०]सावित्रेन च गोमयम्—औ, झ; गन्धद्वारेण गोमयम्—ज, ञ

[४१]गायत्रीं चैव—औ, झ

[४२]ईशानादीनि—ज; 'झ' मातृकायामिदमर्धं लुप्तम् ।

[४३]अत्र पञ्चगव्ययोजनप्रस्तावे कुशोदयोजनविषयकग्रन्थो लुप्त इति भाति ।

[४४]मध्ये दध्यादि संयोज्य—औ; मध्यक्रमेण संयोज्य—ज; मध्ये दध्यादि संयोज्य—झ; मध्ये नद्यादि संयोज्य—ञ

[४५]'उत्तमं द्रोणमेवोक्तं मध्यमं तु तदर्धकम् ।
अधमं चाढकं प्रोक्तं यथालाभमथापि वा ।।'
'त्रिप्रस्थं क्षीरमित्युक्तं द्विप्रस्थं दधि चोच्यते ।
'आज्यं प्रस्थेन कर्तव्यं षट्प्रस्थं गोजलं भवेत् ।।
गोमयं तु चतुः प्रस्थमुत्तमं तु प्रकीर्तितम् ।
सार्धप्रस्थं तु गोक्षीरं प्रस्थं दधि समुच्यते ।।
द्विपादं घृतसंयुक्तं त्रिप्रस्थं गोजलं भवेत् ।

त्रिप्रस्थं क्षीरमित्युक्तं द्विप्रस्थं [४६]दधि चोच्यते।
घृतं वै प्रस्थमेकं [४७]तु चतुष्प्रस्थं तु गोमयम् ॥२२॥
[४८]षट्प्रस्थं चैव गोमूत्रमुत्तमं तु विधीयते।
प्रस्थार्धं क्षीरमित्युक्तं [४९]प्रस्थं वै दधि चोच्यते ॥२३॥
[५०]प्रस्थार्धं घृतमित्युक्तं द्विप्रस्थं चैव गोमयम्।
त्रिप्रस्थं चैव गोमूत्र[५१]मित्येतन्मध्यमं तथा ॥२४॥
प्रस्थपादं घृतं प्रोक्तं द्विपादं दधि चोच्यते।
[५२]त्रिपादं क्षीरमित्युक्तं चतुष्पादं तु गोमयम् ॥२५॥
षट्पादं चैव गोमूत्र[५३]मित्येतत्कन्यसं तथा।

[पञ्चगव्ययोग्यगवां वर्णः[५४]]

[५५]कपिलायास्तु गोमूत्रं [५६]रक्ताया गोमयं भवेत् ॥२६॥
[५७]कृष्णायाः क्षीरमित्युक्तं सितायां [५८]दधि चोच्यते।

द्विप्रस्थं गोमयं प्रोक्तं मध्यमं तु प्रकीर्तितम् ॥
त्रिपादं क्षीरमित्युक्तं द्विपादं दधि चोच्यते।
एकपादं घृतं चैव षट्पादं चैव गोजलम् ॥
गोमयं तु चतुष्पादं कन्यसं तु प्रकीर्तितम्।
उतमे मध्यमे चैव गोमयं कुक्कुटाण्डवत् ॥
अधमे चाक्षमात्रे स्याज्जलेनैव प्रपूरयेत्।
वस्त्रपूतं प्रकर्तव्यं स्थापयेद्विधिपूर्वकम् ॥
अलाभे दधिनि क्षीरं क्षीरालाभे भवेद्दधि।
गोमूत्रं गोमयालाभे तदभावे तु गोमयम् ॥
पञ्चगव्ये तु यस्य स्यादलाभस्तद्घृतं भवेत्।'
(*अंशुमदागमे* पञ्चगव्यपटले ३, ७—१३ पू०);
'उत्तमं द्रोणमेवं तु मध्यमं तु तदर्धकम्।
तदधर्मधमं ज्ञेयं त्रिविधं परिकल्पयेत् ॥
घृतं वै प्रस्थमेवं तु दधि द्विप्रस्थमेव च।
क्षीरं त्रिप्रस्थमित्युक्तं चतुःप्रस्थं तु गोमयम् ॥
षट्प्रस्थं चैव गोमूत्रमुत्तमं तु प्रशस्यते।
प्रस्थार्धं तु घृतं चैव प्रस्थं तु दधि चोच्यते ॥
प्रस्थं प्रस्थार्धकं क्षीरं द्विप्रस्थं गोमयं भवेत्।
त्रिप्रस्थं चैव गोमूत्रं मध्यमं तु प्रशस्यते ॥
कुडवं च घृतं चैव दधि स्यात्कुडवद्वयम्।
क्षीरं चैव त्रिपादं तु प्रस्थं गोमयमुच्यते ॥
प्रस्थं प्रस्थार्धं गोमूत्रमधमं तु प्रशस्यते।
नित्यमेवं समाख्यातं नैमित्तिकमथोच्यते ॥
प्रत्येकं द्रोणसंपूर्णान्कुम्भान्बिम्बिसमप्रभान्।
उत्तमं त्विति विख्यातं प्रत्येकं शिवपूरितम् ॥
मध्यमं त्विति विख्यातं प्रत्येकं चाढकं तथा।
कन्यसं त्विति विख्यातं पञ्चगव्यं त्रिधा भवेत् ॥'
(*पूर्वकारणे* ३५.१७—२४)

[४६]दधिरुच्यते—ज, झ, ञ
[४७]च—ज
[४८]षट्पादं चैव—ञ
[४९]द्विप्रस्थं दधिरुच्यते—ज, ञ
[५०]'औ' मातृकायां २४ श्लोकः २५ श्लोकस्य पूर्वार्धं च न दृश्यते।
[५१]मित्येते मध्यमं तथा—ज, झ, ञ
[५२]त्रिप्रस्थं क्षीर—औ
[५३]मित्येते कन्यसं—औ, ज, झ, ञ
[५४]'पयो दधि घृतं चैव गोमूत्रं गोमयं तथा।
श्वेता रक्ता च कपिला पीता कृष्णा यथाक्रमम् ॥
अथवा कपिला चैव श्वेतवर्णा अथापि वा।
अभावे सर्ववर्णानां ग्राहयेत्पञ्चगव्यकम् ॥'
(*अंशुमदागमे* पञ्चगव्यपटले ४, ५)
[५५]कपिलायां तु—औ, ज, झ, ञ
[५६]रक्तायां—औ, ज, झ, ञ
[५७]कृष्णायां—औ, ज, झ, ञ
[५८]दधिरुच्यते—ज, ञ

[५९]धूम्राया घृतमित्युक्तं पञ्च[६०]गव्यं तु संग्रहेत् ॥२७॥
सर्वं वै [६१]कपिलायास्तु नाना[६२]वर्णयुजोऽथवा ।

[पञ्चगव्याद्यभिषेकफलम्[६३]]

गोमूत्रं श्रीपदं ज्ञेयं गोमयं रोगनाशनम् ॥२८॥
[६४]क्षीरेण सर्वसिद्धिः [६५]स्याद्दध्ना पुत्रविवर्धनम् ।
[६६]घृतेन व्याधिनाशः स्यात्पञ्चगव्यफलं भवेत् ॥२९॥
प्रातःकाले[६७]ऽभिषेके तु सर्वरोगविनाशनम् ।
[६८]दशापराधास्तोयेन क्षीरेण [६९]शतसंख्यकम् ॥३०॥
[७०]सहस्रं क्षम्यते दध्ना [७१]घृतेनाप्ययुतं [७२]तथा ।
[७३]लक्षमिक्षु[७४]रसेनैव [७५]मधुना दशलक्षकम् ॥३१॥

---

[५९]धूम्रायां—औ, ज, झ, ञ
[६०]गव्यं च—ञ
[६१]कपिलायां तु—औ, ज, झ, ञ
[६२]वर्णं ततोच्यते—औ, झ पाठान्तरम्; वर्णं तथोच्यते—ज, ञ; वर्णं तदुच्यते—झ
[६३]'गोमूत्रं श्रीप्रदं विद्धि गोमयं रोगनाशनम् ।
पयः शत्रुविनाशं स्याद्दधि पुत्रविवर्धनम् ॥
घृतं मोक्षप्रदं चैव पञ्चगव्यफलं क्रमात् ।'
'प्रातःकालेऽभिषेकं तु ब्रह्मवर्गस्य वर्धनम् ।
मध्याह्ने त्वभिषेकं तु नृपवर्गस्य वर्धनम् ॥
सायंकालेऽभिषेकं तु वैश्यवर्गविवर्धनम् ।
सार्धयामेऽभिषेकं तु शूद्रवर्गविवर्धनम् ॥
उषःकाले विशेषेण सर्वसिद्धिकरं भवेत् ।
मातृहा पितृहा चैव गोघ्नश्चैव कृतघ्नकः ॥
भ्रूणहा च गुरुद्रोही पातको गुरुतल्पगः ।
मुच्यते तत्क्षणेनैव पञ्चगव्याभिषेचनात् ॥
पञ्चगव्यविहीनं च पूजनं क्रियते यदि ।
न देवतायाः सांनिध्यमित्थं तत्र प्रजापते ॥
एवं क्रमेण विधिवत्पञ्चगव्यपुरःसरम् ।
अभिषेकः प्रकर्तव्यो यथाविभवविस्तरम् ॥
इहैव धनवान् श्रीमान् सोऽन्ते रुद्रपदं लभेत् ।'
(*पूर्वकारणे* ३५.३७ उ० , ३८; ४५ उ०—५१);
'गोमूत्रं श्रीप्रदं ज्ञेयं गोमयं रोगनाशनम् ।
दधि पुत्रप्रवृद्धिः स्यात्पयः शत्रुविनाशनम् ।
घृतं पूज्यस्य पूज्यं स्यात्पञ्चगव्यफलं विदुः ।
एकाहमपि यो लिङ्गं पञ्चगव्यं समाचरेत् ।
विधूय सर्वपापानि शिवलोके महीयते ।'
('*वातुलागमे*' इति (टि० ११३a) मातृकायां २४५ पृष्ठे)
'दध्ना तु स्नापयेल्लिङ्गं सकृद्भक्त्या तु यो नरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥
दशापराधं तोयेन क्षीरेण शतनाशनम् ।
सहस्रं क्षमते दध्ना मधुनाप्ययुतं भवेत् ॥
घृतेन शतसाहस्रमिक्षुसारं त्रिलक्षकम् ।
नालिकेरोदकं कोटिं गन्धतोयमनन्तकम् ॥'
(*शिवधर्मे* इति (टि० ११३a) मातृकायां पृ० २४९)
[६४]क्षीरं तु सर्वसिद्धिः—औ, ज, झ, ञ
[६५]स्याद्दधि पुत्र—औ, झ, ञ; स्याद्दधि वै पुत्रवर्धनम्—ज;
[६६]घृतं वै व्याधिनाशं—औ, झ, ञ; घृतं च व्याधिनाशं—ज
[६७]ऽभिषेकं तु—औ, झ, ञ; ऽभिषेकेन—ज
[६८]दशापराधं—औ, झ; दशभारेण तोयेन—ज; दशापराधतेयेन—ञ
[६९]शतनाशनम्—औ, झ, ञ
[७०]सहस्रं क्षमते—औ, ज, झ; सहस्रं क्षमतो—ञ
[७१]लक्षमिक्षुरसं तथा—ज
[७२]शमम्—औ; समम्—झ; शतम्—ञ
[७३]मधुना दशलक्षं च—ज
[७४]रसं चैव—औ, झ, ञ
[७५]'ज' मातृकायां ३१श्लोकस्य चतुर्थपादो न दृश्यते ।

[७६]नालिकेराम्भसा कोटि[७७]र्गन्धतोयमनन्तकम् ।
[७८]गव्येन पापनाशः स्यात्सर्वारिष्टविनाशनम् ।।३२।।
[७९]प्रायश्चित्तेऽद्भुते शुद्ध्यै पञ्चगव्यं विशिष्यते ।
ब्रह्महत्या [८०]सुरापानं स्तेयं च गुरुत्तल्पकम् ।।३३।।
[८१]महान्ति पातकान्यत्र [८२]तत्संयोगश्च पञ्चकम् ।
पञ्चपातक[८३]शुद्धिश्च पञ्चगव्यफलं भवेत्[८४] ।।३४।।

[पञ्चगव्यानन्तरं पञ्चामृताभिषेकः]

अग्रे तु पञ्चगव्यं स्यात्तदनन्तरमामृतम्[८५] ।
[८६]ततस्तु [८७]स्नपनं [८८]कुर्यात्फलवर्गैर्गुरूत्तमः ।।३५।।

[पञ्चगव्यपात्रम्[८९]]

सौवर्णं राजतं वापि ताम्रपात्रमथापि वा ।
अथवा मृण्मयं वापि पात्रं चापि पृथक् पृथक् ।।३६।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] पञ्चगव्यविधिः
[षडशीतितमः] पटलः ।

---

[७६]नारिकोळं च कोटिम् —ज
[७७]गन्धतोयमनन्तं च —ज
[७८]'ज' मातृकायां ३२श्लोकस्य तृतीयपादो न दृश्यते।
[७९]'ज' मातृकायां '३३' श्लोकस्य पूर्वार्धं न दृश्यते। प्रायश्चित्ताभ्युते शुद्धं —ओ, झ; प्रायश्चित्ताद्युते शुद्धिं —ञ
[८०]सुरापान स्नेही च गुरुतल्पकः —औ; सुरापानं स्नेही च गुरुतल्पगः —ज; सुरापानी स्नेही च गुरुतल्पकः —झ; सुरापानं स्तेयी च गुरुतल्पगः —ञ
[८१]निहन्ति —औ, ज, झ, ञ;
'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महन्ति पातकान्याहुः संसर्गश्चापि तैस्सह ।।'
(*मनुस्मृतौ* ११.५४)
[८२]तत्संयोगेन —औ, झ, ञ; पञ्चगव्येन नश्यति —ज
[८३]शुद्ध्यर्थं —औ, ज, झ, ञ
[८४]'ज' मातृकायां '३५, ३६' श्लोकौ न स्तः ।
[८५]अमृतमेव आमृतम् । पञ्चामृतम् इत्यर्थः ।
[८६]तथास्था —औ, ञ; तथास्था —झ
[८७]स्थापनं —ञ
[८८]कुर्यात्प्रवर्गं तु गुरूत्तमाः —औ, झ, ञ
[८९]'उत्तमं स्वर्णपात्रं स्यान्मध्यमं कांस्यपात्रकम् ।
अधमं मृण्मयं चैव पात्रमेवमुदाहृतम् ।।'
(*पूर्वकारणे* ३५.२९);
'उत्तमं स्वर्णपात्रं तु कांस्यं मध्यमपात्रकम् ।
मृण्मयं चाधमं प्रोक्तम्'
(*वातुले* इति (टि० ४६) मातृकायां २२८ तमे पृष्ठे निर्दिष्टम् ।);
'स्वर्णरौप्यादिपात्रैर्वा पलाशैराम्रजैस्तु वा ।
त्रिसूत्रवेष्टितैश्चैव धूपितैः स्थापितैः क्रमात् ।।'
अंशुमति इति निर्दिश्य शिवागमशेखरे शिवलिङ्ग-प्रतिष्ठाविधौ द्वितीयभागे १९४ पृष्ठे सूचितम् ।

[सप्ताशीतितमः पटलः]

[पञ्चामृतविधिः[१]]

अतः परं प्रवक्ष्यामि पञ्चामृतविधिं शृणु ।

[कोष्ठपूजादि[२]]

[३]कोष्ठं पात्रं तथा मन्त्रं पूर्ववत्परिकल्पयेत् ।।१।।
शिवाग्रे स्थण्डिलं [४]कुर्यात्स्थण्डिलं पञ्चकोष्ठकम् ।
[५]कोष्ठे सर्वाणि पात्राणि पूर्ववत्परिकल्पयेत् ।।२।।

[द्रव्यन्यासः[६]]

मध्ये क्षीरं तु [७]संस्थाप्यं [८]तत्पूर्वे दधि चोच्यते ।

---

[१]अयं पटलः 'औ, झ, ञ' मातृकासु दृश्यते ।; एतद्विषये *अंशुमदागमे* (टि० ६) पञ्चामृतविधिपटलः; *पूर्वकारणे* १७, ३५; *चिन्त्ये*—१३; *मकुटे* (टि० १५९) पञ्चगव्यपञ्चामृतविधिपटलः; *सूक्ष्मे* ३ पटलश्च द्रष्टव्याः ।

[२]'देवाग्रे त्विष्टदेशे वा रम्यदेशे मनोरमे ।
गोमयालेपनं कृत्वा चतुरश्रसमन्वितम् ।।
शालीनामाढकं श्रेष्ठं त्रिप्रस्थं मध्यमं भवेत् ।
द्विप्रस्थमधमं प्रोक्तं त्रिविधं परिकल्पयेत् ।।
प्राक्सूत्रं युगसूत्रं च उदक्सूत्रं तथैव च ।
पूर्वादि युगसूत्रं च भूतकोष्ठं च विन्यसेत् ।।
ईशाने पद्ममालिख्य अब्धिसूत्रेण विन्यसेत् ।
मध्यमे रुद्रतत्त्वं तु शक्तितत्त्वं तु पूर्वके ।
सव्ये सादाख्यतत्त्वं तु उत्तरे कालतत्त्वकम् ।।
विद्यातत्त्वं तु पश्चिम्यां व्योमतत्त्वं तु ईशके ।
सोमामृतमयं पात्रं मध्यकोष्ठे तु विन्यसेत् ।।
ज्ञानामृतमयं पात्रं पूर्वकोष्ठे समर्चयेत् ।
योगामृतमयं पात्रं दक्षिणे तु समर्चयेत् ।।
सर्वामृतमयं पात्रमीशदेशे समर्चयेत् ।
धर्मामृतमयं पात्रमुत्तरे तु समर्चयेत् ।।
सुधामृतमयं पात्रं पश्चिमे तु समर्चयेत् ।
पात्रं संपूज्य निक्षिप्य दूर्वापुष्पाक्षतेन तु ।।'
(*अंशुमदागमे* पञ्चामृतविधिपटले २ उ० —१०)

[३]कोष्ठपात्रं—औ, ञ

[४]कृत्वा—औ, झ, ञ

[५]कोष्ठात्पात्राणि सर्वाणि—औ, झ, ञ

[६]'मध्ये दुग्धं दधि प्राच्यां दक्षिणे घृतमेव च ।
उत्तरे मधु संयोज्य शर्करा पश्चिमे भवेत् ।।
कदलीपनसाम्रं च गन्धोदकं तथैव च ।
अग्नेयादीशपर्यन्तं स्थापयेत्तु विशेषतः ।।
खण्डाभावे इक्षुसारो मध्वभावे घृतं भवेत् ।'
(*अचिन्त्यविश्वसादाख्ये* इति (टि० ११३a) १४६ पृष्ठे निर्दिष्टम् ।);
'इक्षुसारं च मध्ये तु मधूनां पूर्वमेव च ।
घृतं वै दक्षिणे स्थाप्य पश्चिमे तु पयस्तथा ।।
दध्युत्तरे च कृत्वा वै पञ्चामृतं तु कल्पयेत् ।
सद्यादीशानमन्त्रं स्यान्मध्यादीनि कृतस्य तु ।।
गन्धपुष्पं तथा कूर्चं धूपदीपं तथा भवेत् ।
मूलमन्त्रेण सहजं शिवमन्त्रं तथोच्चरेत् ।।'
(*पूर्वकारणे* १७.५—७);
एतद्विषये *अजिते* क्रियापादे २२.१५—१८ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[७]संस्थाप्य—औ, झ, ञ

[८]पूर्वे तु दधि—झ

दक्षिणे घृतमेवं तु उत्तरे मधु विन्यसेत् ॥३॥
पश्चिमे शर्करा [९]न्यस्या पञ्चामृतमिहोच्यते ।
कदलीपनसाम्राणि अग्निराक्षसमारुते ॥४॥
ऐशान्यां नालिकेरं तु स्थापयेत्तु यथाक्रमम् ।

[पञ्चामृतयोजनम्]

मध्ये दध्यादि संयोज्य [१०]मूलमन्त्रं समुच्चरन् ॥५॥
अमृतीकृत्य संपूज्य धूपदीपं तु योजयेत् ।

[पञ्चामृते उत्तममध्यमाधमभेदेन त्रैविध्यम्[११]]

क्षीरं दधि घृतं क्षौद्रं गुलं [१२]चैव तु पञ्चकम् ॥६॥
पञ्चामृतमिति ख्यातं प्रतिप्रस्थं पृथङ्न्यसेत् ।
पादहीनं तु मध्यं [१३]स्यादर्धहीनं कनीयसम् ॥७॥
मध्यादि [१४]पूर्ववन्न्यस्य पूर्ववत्परिकल्पयेत् ।

[फलपञ्चामृतम्]

नालिकेरस्य चूर्णं च[१५] कदलीशतसंयुतम् ॥८॥
पादप्रस्थघृतं चैव पादप्रस्थमधु न्यसेत् ।
[१६]प्रस्थमात्रा शर्करा स्या[१७]त्फलपञ्चामृतं [१८]भवेत् ॥९॥
कदलीफल[१९]शतैश्च मिश्रितं
[२०]नारिकेलफलचूर्णमिश्रितम् ।
दशवृत्तगुलचूर्णसंयुतं
मधु पादकुडुपं घृतं तथा ॥१०॥

---

[९]न्यस्य—औ, झ, ञ
[१०]मूलमन्त्रमनुस्मरन्—ञ
[११]'पञ्चप्रस्थाधमं प्रोक्तं द्विगुणं मध्यमं भवेत् ।
त्रिगुणमुत्तमं प्रोक्तं पञ्चामृतं तु कल्पयेत् ।
इक्षुर्मधु घृतं चैव पयो दधि क्रमेण तु ।
प्रस्थं प्रस्थं प्रमाणं स्यात्पञ्चामृतमिति स्मृतम् ।'
(*पूर्वकारणे* १७.३—४);
एतद्विषये *अजिते* क्रियापादे २२.१५—१८ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।
[१२]चैवं तु—औ
[१३]स्यान्मध्यहीनं तु कन्यसम्—ञ
[१४]पूर्वविन्यस्त्वा—औ, झ; पूर्व विन्यस्य—ञ
[१५]नालिकेरसकृच्चूर्णं—औ, झ; नालिकेरं सकृच्चूर्णं—ञ
[१६]प्रस्थमात्रं—औ
[१७]फलं पञ्चामृतं—झ
[१८]न्यसेत्—औ, झ, ञ
[१९]शतं च—औ, झ, ञ
[२०]एकनालिकेरचूर्ण—औ, झ, ञ

[प्रस्थतैलाभिषेके कर्तव्यं फलपञ्चामृतं पञ्चामृतं च]

प्रस्थ[21]तैलाभिषेके तु कदलीशत[22]संख्यकम् ।
[23]नालिकेरस्य चूर्णं च पादप्रस्थघृतं तथा ॥११॥
पाद[24]प्रस्थं मधूनि [25]स्युः [26]प्रस्थमात्रा तु शर्करा ।
[27]फलपञ्चामृतं ज्ञेयं पञ्चामृतमथोच्यते ॥१२॥
[28]क्षीरं दधि घृतं चैव मधु [29]चेक्षुरसस्तथा ।
पञ्चामृतमिति ख्यातं पादप्रस्थं च कारयेत् ॥१३॥

[अभिषेकद्रव्याणि]

द्विप्रस्थं क्षीरमेवोक्तं द्विप्रस्थं [30]दधि चोच्यते ।
[31]अर्धप्रस्थघृतं चैव [32]प्रस्थमेवं तु शर्करा ॥१४॥
हरिद्रामलकं पिष्टं पादप्रस्थं प्रकीर्तितम् ।
[33]लिकुचा दशसंख्याश्च नारङ्गद्वयमेव च ॥१५॥
चूतं पञ्चदशं ज्ञेयं [34]दाडिमत्रयमेव च ।
मातुलुङ्गानि च त्रीणि गुलो रसफलैर्युतः[35] ॥१६॥
तामरत्रयमेवोक्त[36]मेकं तु पनसं भवेत् ।
देवताम्र[37]फलत्रीणि शिवप्रीतिकरं भवेत् ॥१७॥
नालिकेरोदकं चैव दशसंख्याः प्रकीर्तिताः ।

[षड्गन्धद्रव्याणि]

[38]गन्धो मृगमदश्चैव कर्पूरं कुङ्कुमं तथा ॥१८॥
कस्तूरी रोचना चैव षड्गन्धं चैव[39] कीर्तितम् ।
हिमसेचनसंमिश्रं यथालाभेन वाहरेत् ॥१९॥

---

[21]तैलाभिषेकं—ञ
[22]संख्यया—औ, झ, ञ
[23]नालिकेरसकृच्चूर्णं—औ, झ; नालिकेरं सकृच्चूर्णं—ञ
[24]प्रस्थमधूनि—औ
[25]स्यात्—औ, झ, ञ
[26]प्रस्थमात्रं तु—औ, झ, ञ
[27]फलं पञ्चामृतं—झ
[28]क्षीरं च दधि घृतं वै—झ
[29]इक्षुरसं तथा—औ
[30]दधिरुच्यते—ञ
[31]अर्धप्रस्थं—झ
[32]प्रस्थमेकं तु—झ, ञ
[33]लिकुचि दशसंख्या च—औ, झ; 'ज्ञ' मातृकायामिदमर्धं न दृश्यते।
[34]डाडिमित्रय—औ; डाडिमीत्रय—झ, ञ
[35]फलैर्युतम्—औ, झ; गुलोञ्जीरस . . .—झ
[36]एकं पनसफलं भवेत्—ञ
[37]फलं त्रीणि—ञ
[38]गन्धं मृगमदं चैव—औ, झ, ञ
[39]चेति—झ

[अभिषेकप्रकारः]

[40]अन्नाभिषेके [41]मन्त्रान्नं प्रतिप्रस्थं च कारयेत् ।
प्रतिद्रव्यं विशेषेण अष्टपुष्पं समर्चयेत् ।।२०।।
यद्द्रव्य[42]मभिषेक्तव्यं तद्द्रव्यं तु निवेदयेत् ।
प्रतिद्रव्यावसाने तु उपस्नानं च धूपकम् ।।२१।।
पश्चा[43]दाचमनार्घ्यं च धूपदीपं तु [44]दर्शयेत् ।
[45]धारासहस्रकुम्भं च शृङ्गशङ्खाभिषेचनम् ।।२२।।
सूक्ष्मवस्त्रेण संमृज्य गन्धपुष्पैः समर्चयेत् ।

[अभिषेकानन्तरं नैवेद्यादिसमर्पणम्]

द्विप्रस्थ[46]तण्डुलैः पक्त्वा शुद्धान्नं तु निवेदयेत् ।।२३।।
धूपदीपं ददेच्छम्भोर्दिव्य[47]गन्धं च लेपयेत् ।
सर्वैराभरणैश्चापि पुष्प[48]माल्यादिभिस्ततः ।।२४।।
दुकूलपट्टवस्त्राद्यैरलंकुर्यान्महेश्वरम् ।
यज्ञसूत्रादिभिः सर्वैः [49]स्वप्रमाणेन धारयेत् ।।२५।।
भारेण तण्डुलानां वै महानैवेद्यमाचरेत् ।
प्रतिप्रस्थं विशेषेण व्यञ्जनं फलमेव हि ।।२६।।

---

[40]इदमर्धं 'औ, झ' मातृकयोर्न दृश्यते ।
[41]'आवाहनावसाने तु मधुपर्कं निवेदयेत् ।
गन्धतोयावसाने तु मन्त्रान्नं तु निवेदयेत् ।
मार्जनान्ते तु शुद्धान्नमलंकारे महाहविः ।
मन्त्रान्नं तु कथं देव ब्रूहि मे त्रिपुरान्तक ।
मन्त्रं रहस्यमित्युक्तमदनादन्नमुच्यते ।
रहस्ये त्वदनं यत्तन्मन्त्रान्नमिति कथ्यते ।'
(*कारणे* (टि० ३१३a) पृ० ३३३)
[42]०मभिषेकाय—औ, ञ; यद्द्रव्यमभिषेक—झ
[43]०दाचमनं चार्घ्यं—झ
[44]योजयेत्—झ
[45]'अथ वक्ष्ये विशेषेण सहस्रधाराभिषेचनम् ।
ना(अ)नावृष्टौ ज्वरोत्पन्ने सर्वव्याधिनिवारणम् ।
सर्वदोषहरं पुण्यं सर्वतीर्थं तथैव च ।
सर्वपापहरं चैव सहस्रधाराभिषेचनम् ।
सौवर्णमुत्तमं प्रोक्तं रजतं मध्यमं भवेत् ।
अधमं ताम्रमित्युक्तं पूर्णचन्द्रवदाकृतिम् ।
तन्मध्ये पद्मपत्रं च दलानामष्टसंयुतम् ।
सुषिरं सहस्रमित्युक्तं कल्पयेत्तु विचक्षणः ।
'सहस्रशीर्षा मन्त्राणि जपं कृत्वा विशेषतः ।
सहस्रधारामुद्धृत्य लिङ्गस्योर्ध्वे तु कल्पयेत् ।
चतुरङ्गुलमेवं तु लिङ्गमग्रे तु कल्पयेत् ।
रुद्रसंख्या तु मन्त्रेण जपित्वा धारयेद्बुधः ।
तज्जलैरभिषेकं स्यात्सर्वदोषनिकृन्तनम् ।
पूजान्ते सहस्रधारां च अभिषेकं शनैः शनैः ।
सर्वारिष्टविनाशं स्यात् सर्वतीर्थफलप्रदम् ।
सहस्रमुखगङ्गायां धारयेदभिषेचनम् ।
श्रीकरं विजयं पुण्यमायुरारोग्यवर्धनम् ।
(*कारणे* (टि० ३१३a) पृ० ३३३, ३३४)
[46]तण्डुलं ज्ञेयं शुद्धान्नं—औ, झ
[47]गन्धैश्च—ञ
[48]मालादिभिः सह—झ
[49]स्वप्रमाणेनैव—झ

[ताम्बूलं मुखवासश्च[५०]]

क्रमुकं चैकमेवोक्तं नागवल्लीचतुर्दलम् ।
चूर्णं निष्पावमात्रं च लवङ्गद्वयमेव च ॥२७॥
[५१]एलातण्डुलसप्तभिर्जातिपत्रीफलं त्रुटिः ।
कर्पूरं [५२]त्रुटिमात्रं च [५३]ताम्बूले दापयेच्छिवे ॥२८॥
मुखवासमिति ख्यातं [५४]पानीयं प्रस्थमेव च ।

[पाद्याद्युपचारसमर्पणम्]

पाद्यमाचमनं चार्घ्यं [५५]धूपदीपौ भ्रमेच्छिवे ॥२९॥
आरात्रिं दर्शयेच्छम्भोः सायरक्षां भ्रमेत्त्रिभिः ।
[५६]भस्म प्रदापयेद्धीमान्दर्पणं [५७]छत्रचामरम् ॥३०॥
व्यजनं [५८]तालवृन्तं वा दर्शयेद्देशिकोत्तमः ।
पाद्यमाच[५९]मनीयार्घ्यमन्त्तरान्तरमेव च ॥३१॥
[६०]वेदोक्तेनैव मन्त्रेण मन्त्रपुष्पं प्रदापयेत् ।
चुलुकोदकमेवं स्यात्स्वात्मनोऽर्पणमेव च ॥३२॥
शिवमन्त्रं जपेत्पश्चाद्यथाशक्त्या विशेषतः ।
स्तोत्रं गीतं च नृत्तं च यथालाभेन वा भवेत् ॥३३॥
उक्तेषु वस्तुकेष्वेषु न्यूने वाप्यधिकेऽपि वा ।
न त्यजेन्नान्यथा कुर्याद्यथासंभवमाचरेत् ॥३४॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे] पञ्चामृतविधिः
[सप्ताशीतितमः] पटलः

---

[५०] 'एलालवङ्गकर्पूरजातितक्कोलचूर्णकम् ।
मधु षट्खण्डसंमिश्रं मुखवासमिहोच्यते ॥'
(*कारणे* (टि० ३१३a) पृ० ३२०)

[५१] एलतण्डुल सप्ता च जापत्रं च फलं तुटि—औ; एलतण्डुल सप्ता च जापत्रं जाफलं तुटिः—झ

[५२] त्रुटिमात्रा च—औ; त्रुटिमात्रा च—झ; त्रुटिमात्रं . . . —ञ

[५३] ताम्बूलं—औ, झ

[५४] पानीयप्रस्थ—झ

[५५] धूपदीपै भ्रमेच्छिवः—औ; धूपदीपैः भ्रमेच्छिवम्—झ; धूपदीपैर्हदैशिवम्—ञ

[५६] भस्मं—औ, झ, ञ

[५७] छत्रमाचरेत्—औ, झ; छत्रचामरान्—ञ

[५८] तालवृत्तं—झ

[५९] मनीर्यञ्चार्घ्यं—औ; मनीयं चार्घ्यं—झ; मनं चार्घ्यं—ञ

[६०] वेदोक्तमूलमन्त्रेण—झ; 'झ' मातृकायां ३२ श्लोकस्योत्तरार्धं ३२, ३३ श्लोकौ च न दृश्यन्ते ।

[अष्टाशीतितमः पटलः]

[[1]स्नपनविधिः]

[स्नपनकालाः[2]]

नित्ये नैमित्तिके काम्ये [3]मङ्गले मन्त्रसाधने ।
[4]राज्ञां त्रिजन्मनक्षत्रे ज्वरक्लेशादिपीडने ।।१।।
राजपत्नीत्रिजन्मर्क्षे राज्ञां मरणकालके ।
राज्ञां विजयनक्षत्रे अभिषेकेऽसुखेऽपि वा ।।२।।
तच्चन्द्राष्टमनक्षत्रे [5]राजवैनाशिकोडुपे ।
दीक्षान्ते च प्रतिष्ठान्ते प्रोक्षणे पुरदाहके ।।३।।
अतिवृष्ट्यामनावृष्टौ दुर्भिक्षे दुर्निमित्तके ।
भूमिकम्पे [6]महारोगे [7]शत्रुभिः पीडनेऽपि च ।।४।।

---

[1]अयं पटलः 'औ, ज्ञ' मातृकयोर्दृश्यते।; एतद्विषये *अजिते* २९; *पूर्वकामिके* ४; *उत्तरकामिके* ४; *पूर्वकारणे* ३८; *रौरवे* क्रियापादे २०.२३, २४; *सुप्रभेदे* क्रियापादे १५ पटला द्रष्टव्याः।

[2]'अथातः संप्रवक्ष्यामि स्नपनं परमेष्ठिनः।
अष्टम्यां वा चतुर्दश्यां विषुवायनसंक्रमे ।।
ग्रहणे मासनक्षत्रे चार्द्रायां पर्वणोर्द्वयोः।
सुयोगे सूर्यवारे वा चोत्सवान्ते दिनत्रयम् ।।
कर्तुर्जन्मवियोगर्क्षे तस्याप्यनुदिनेऽथवा।
राज्ञोऽभिषेकनक्षत्रे दुर्भिक्षे दुर्निमित्तके ।।
भूमिकम्पे दिशां दाहे ज्वरमार्यादिपीडने।
प्रतिष्ठान्तेऽद्भुते सर्वरोगोत्पत्ताववग्रहे ।।
नित्ये नैमित्तिके काम्ये कारयेच्छंकरस्य च।
स्नपनं तु यथान्यायं तच्चानेकविधं भवेत् ।।' . . .
'जन्मर्क्षे च दिने राज्ञामभिषेके तथापि वा।
तत्तच्चन्द्राष्टमर्क्षे वा तस्य वैनाशिकोडुके ।।
अयने विषुवे वापि ग्रहणे स्थापनादिके।
उत्सवे च पवित्रे च दमनारोपणेऽपि च ।।
कृत्तिकादीपनक्षत्रे चान्यस्मिन्मासऋक्षके।
अष्टम्यां वा चतुर्दश्यां पञ्चदश्यां विशेषतः ।।
मार्गशीर्षे च मासेऽथ चार्द्रायां तु विशेषतः।
प्रायश्चित्तेषु तत्कार्यं नवनैवेद्यकर्मणि ।।
जनकल्याणकाले च नराणां रक्षणार्थके।
विशेषपूजाकाले च भक्तानामुत्सवेऽपि च ।।
देवभ्रमणकाले वा मृगयायां विशेषतः।
कुर्यात्प्रतिदिनं वापि त्रिसंध्यायां गुरूत्तमाः ।।
संध्याद्वये वा चैकस्यां स्नपनं कारयेच्छिवे।
प्रागुक्तवर्त्मना कश्चिद्विशेषस्तत्र कथ्यते ।।'
(*उत्तरकामिके* ४.१—५; २०९—२१५)

एतद्विषये *अजिते* २९.४—११श्लोकास्तदीयटिप्पणी, *रौरवे* क्रियापादे २३.१, २ श्लोकौ तदीयटिप्पणी च द्रष्टव्याः।

[3]मङ्गल्ये—ञ

[4]राज्ञा तिजन्म—औ; राजादिजन्म—ञ

[5]राजा वैनायके सुके—औ; राजावैनाशिके सुके—ञ

[6]महागेशि—औ, ञ

[7]शकुभिः—औ

यागान्ते सौरवारे च [८]कुजपुत्रदिनेऽपि च ।
उत्पाते च महोत्पाते स्वनक्षत्रे महोत्सवे ॥५॥
अयने [९]विषुवे चैव ग्रहणे स्थापनादिके ।
उत्सवे च [१०]पवित्राख्ये दमनारोपणेऽपि च ॥६॥
कृत्तिकादीपनक्षत्रे अन्यस्मिन्मासऋक्षके ।
अष्टम्यां वा चतुर्दश्यां पञ्चदश्यां च [११]पक्षयोः ॥७॥
[१२]संक्रान्तौ पुण्यदिवसे षडशीतिमुखेऽपि च ।
[१३]सिनीवाल्यां कुहौ चैव घृतस्नानोत्तरे तथा ॥८॥
घृतकम्बल[१४]लेपान्ते जीर्णोद्धारावसानके ।
परचक्रभयोत्पन्ने कृषिवाणिज्ययोस्तथा ॥९॥
विद्यारम्भे विवाहे च युद्धारम्भे त्ववग्रहे ।
शताभिषेककाले च गवां रोगप्रदर्शने ॥१०॥
गजाश्वरोगसंभूते पुरारम्भे च जन्मनि ।
यज्ञारम्भे सुयोगे च तथा यात्रावसानके ॥११॥
[१५]नवतोयागमने च नटेशभ्रमणान्तके ।
मार्गशीर्षे च मासे तु आर्द्रायां तु विशेषतः ॥१२॥
प्रायश्चित्तेषु [१६]कार्येषु नवनैवेद्यकर्मणि ।
जनकल्याणकाले च नराणां मरणर्क्षके ॥१३॥
विशेषपूजाकाले च भक्तानामुत्सवेऽपि च ।
देवभ्रमणकालान्ते मृगयात्रावसानके ॥१४
एवमादिषु कालेषु स्नापयेत्स्नपनोक्तवत् ।
कुर्यात्प्रतिदिनं वापि त्रिसंध्यायां गुरूत्तमः ॥१५॥

---

[८]कुजपत्र—औ
कुजपुत्रः=कुजः पुत्रः यस्य सः ईशानः तस्य दिने सोमवासरे इत्यर्थे कुजपुत्रदिने इति प्रयुक्तमिति भाति। तत्र प्रमाणतया *कूर्मपुराण*श्लोकाः प्रदर्श्यन्ते।
'रुरोद सुस्वरं घोरं देवदेवः स्वयं शिवः।
रोदमानं ततो ब्रह्मा मा रोदीरित्यभाषत।
रोदनाद्रुद्र इत्येवं लोके ख्यातिं गमिष्यसि।'
'अन्यानि सप्तनामानि पत्नीः पुत्रांश्च शाश्वतान्।'
'भवः शर्वस्तथेशानः पशूनां पतिरेव च।
भीमश्चोग्रो महादेवस्तानि नामानि सप्त वै ॥'
'सुवर्चला तथैवोमा विकेशी च तथा शिवा।
स्वाहा दिशश्च दीक्षा च रोहिणी चेति पत्नयः ॥
शनैश्चरस्तथा शुक्रो लोहिताङ्गो मनोजवः।
स्कन्दः सर्गोऽथ सन्तानो बुधश्चैषां सुताः स्मृताः ॥'
(*कूर्मपुराणे* पूर्वभागे १०.२३.२४पू०, २५, २८, २९)
अस्य विवरणं प्राचीनचरित्रकोशे ७५९ पृष्ठे वर्तते।
[९]विषुवश्चैव—औ
[१०]पवित्रे च—औ
[११]पर्वसु—औ, ञ
[१२]संक्रान्ते—औ, ञ
[१३]सिनीवाल्यं कुहे—औ; सिनीवाल्या कुहे—ञ
[१४]मालान्ते—औ, ञ
[१५]नवतोयागतान्ते च—औ, ञ
[१६]वा कार्यं—औ

संध्याद्वये वा चैकस्यां स्नपनं कारयेच्छिवे ।
[17]प्रागुक्तवर्त्मना कश्चिद्विशेषस्तत्र कथ्यते[18] ॥१६॥

[स्नपने प्रागुक्तमार्गाद्विशेषः]

[19]अष्टोत्तरशतैर्वापि एकाशीति[20]घटैस्तु वा ।
पञ्चाशत्पञ्च[21]विंशैश्च षोडशै[22]र्नवभिस्तथा ॥१७॥
नवकादि[23]शताष्टान्तैः स्नापयेत्प्रतिसंधिषु ।
कुम्भेनैकेन[24] वा व्योमसंख्येन कलशेन वा ॥१८॥
प्रागुक्त[25]द्रव्यसंयुक्तं वर्धनीसहितेन [26]च ।

[वर्ज्याः कुम्भाः[27]]

कालं भिन्नं च सुषिरं [28]भेदैश्छेदैश्च लीनकम् ॥१९॥
निर्दग्धं च पुराणं च वर्जयेत्तान्प्रयत्नतः ।

[कुम्भानां सूत्रवेष्टनमधिवासश्च[29]]

पक्वबिम्बोपमाः सर्वे क्षालयेत्तान्विशेषतः ॥२०॥

---

[17]अजिते २९ पटलोक्तमार्गादिति शेषः; प्रागुक्तवान्मन कश्चित्—औ; प्रागुक्तवाङ्मनः कश्चित्—ञ

[18]विशेषास्तत्र कथ्यते—औ; विशेषास्तत्र कल्पते—ञ

[19]'कुम्भेनैकेन वा व्योमसंख्येन कलशेन वा ।
प्रागुक्तद्रव्ययुक्तेन वर्धनीसहितेन वा ॥
पञ्चब्रह्माधिपैः पञ्च घटैर्वा कलशैस्तु वा ।
एकद्रव्ययुतैर्वापि वर्धनीसहितैस्तु वा ॥
इष्टद्रव्यं भवेन्मध्ये तद्वान्यत्करकस्थितम् ।
एकद्रव्यं चतुर्दिक्षु हीनद्रव्यमथापि वा ॥
पाद्यमाचमनं चार्घ्यं पञ्चगव्यं तु वा भवेत् ।
नवकुम्भविधानेऽपि विधानं सदृशं मतम् ॥
एकद्रव्यं तु वा हीने दिक्षु पाद्यादिकं तु वा ।
स्वर्णादिनिर्मिते पात्रे विधानं वैतदीरितम् ॥
प्रागुक्तत्रितयं चैतद्विशेषान्नित्यकर्मणि ।
पञ्चविंशतिसंख्यामपि नित्ये प्रशंसितम् ॥
उत्तमोत्तमपूजायामष्टोत्तरशतावधि ।
स्नपनं वा प्रकर्तव्यं नित्याध्यायप्रचोदितम् ॥
नैमित्तिकं तदूर्ध्वस्थं पूर्वोक्तमपि शंसितम् ।
पञ्चविंशतिसंख्यादौ साष्टसाहस्रकावधौ ॥'
(*उत्तरकामिके* ४.२१६—२२३)

[20]तथापि वा—औ; मथापि वा—ञ

[21]विंशाभिः—औ, ञ

[22]र्न बहिस्तु वा—ञ

[23]शताष्टानि—औ, ञ

[24]वै व्योम—औ

[25]प्रस्थसंयुक्तं—ञ

[26]वा—औ, ञ

[27]एतद्विषये *अजिते* २९.३२ पू०; *रौरवे* क्रियापादे २४.२१ पू० तदीयटिप्पणी च द्रष्टव्याः ।

[28]भेदं छेदं च लीनकाम्—औ, ञ

[29]एतद्विषये *अजिते* २९.३२—३४ श्लोकाः; *रौरवे* क्रियापादे २४.२१ उ०—२४ पू० तदीयटिप्पणी च द्रष्टव्याः ।

[30]कलशान्वेष्टयेद्द्वित्रिव्योम[31]सूत्रैः क्रमेण तु ।
अथवा व्योमसूत्रेण [32]त्रितयं परिवेष्टयेत् ।।२१।।
[33]शिवकुम्भे च वर्धन्यामेकद्वित्रियवान्तरम् ।
[34]अन्येषु [35]कलशेष्वेवं [36]गवाक्ष[37]सदृशान्तरम् ।।२२।।
ततः सर्वात्मना[38]वेष्ट्य सूत्रेण स्वस्तिकेऽपि च ।
[39]सूत्रैरावेष्टितान्कुम्भान्स्थापयेच्छत्रुबन्धने[40] ।।२३।।
तथैवावेष्टितान्स्वल्पतन्तुना [41]निष्कृतौ मृतौ ।
मण्डपस्योत्तरे धीमान्दर्भैश्चैव परिस्तरेत् ।।२४।।
सूत्रेण वेष्टयित्वा तु क्षालयित्वाधिवासयेत् ।
[42]अधोमुखांस्तु कलशान्स्थापयेत्तु कुशोपरि ।।२५।।
प्रोक्षयेद्धृदयेनैव कलशोन्मीलनं कुरु ।
सर्वालंकारसंयुक्तं ततः [43]स्नपनमारभेत् ।।२६।।

[स्नपने षोडशक्रियाक्रमस्तन्मन्त्रश्च]

प्रथमं शोधयेद्भूमिं द्वितीयमनुलेपनम्[44] ।
[45]तृतीयः [46]सूत्रविन्यासश्चतुर्थं [47]स्थण्डिलं भवेत् ।।२७।।
[48]पञ्चमः [49]कलशन्यासः [50]कूर्चन्यासस्तु षष्ठकः ।
[51]सप्तमो द्रव्य[52]विन्यासो देवन्यासस्तथाष्टमः ।।२८।।
[53]पिधानं नवमं प्रोक्तं दशमं वस्त्रवेष्टनम् ।
एकादशं [54]गन्धपुष्पं द्वादशं धूपदीपकम् ।।२९।।

---

[30]कलशैर्वेष्टयेद् —औ; कलशे विष्टयेद् —ञ
[31]सूत्रे क्रमेण तु —औ
[32]तृतीयं —औ, ञ
[33]एकद्वित्रियवान्तं स्यात् शिवकुम्भं च वर्धनी । —औ, ञ
[34]अन्यैश्च —औ, ञ
[35]कलशैश्चैव —औ; कलशाश्चैव —ञ
[36]गवाक्षी सदृशान्तकम् —औ
[37]सदृशांन्तकम् —ञ
[38]वेष्ट्या —औ; वेष्ट्यात् —ञ
[39]सूत्रेण वेष्टितान् —ञ
[40]स्थापनं शत्रुबन्धिनि —औ; स्थापनं पुत्रवर्धनीम् —ञ
[41]निष्कृतं मता —औ, ञ
[42]कलशानधोन्मुखिस्तत्र —औ; कलशानधोमुखान् तत्र —ञ
[43]स्थापनमारभेत् —ञ
[44]अत्र 'कुर्यात्' इत्यध्याहृत्य व्याख्येयम् ।
[45]तृयीयं —औ, ञ
[46]मूर्तिविन्यासं —औ; मूर्तिविन्यासः —ञ
[47]'स्थण्डिलम्' इत्यस्य लक्षणया स्थण्डिलकल्पनमित्यर्थो बोध्य इति भाति ।
[48]पञ्चमं —औ, ञ
[49]कलशं न्यासं —औ; तु कलान्यासः —ञ
[50]कूर्चन्यासं तु षष्टमम् —औ
[51]सप्तमं —औ, ञ
[52]विन्यासं —औ
[53]विधानं —औ, ञ; अत्र शरावेणेति शेषः ।
[54]'गन्धपुष्पं' 'धूपदीपकम्' इत्यनयोः गन्धपुष्पसमर्पणम्, धूपदीपसमर्पणम् इत्यर्थो व्याख्येयः ।

[55]मुद्रादानं ततः प्रोक्तं पुण्याहं तु चतुर्दशम् ।
[56]घटोद्धारः पञ्चदशः [57]षोडशे स्नापयेच्छिवम् ।।३०।।
अस्त्रेण शोधयेद्भूमिं वामदेवेन लेपयेत्[58] ।
सूत्रन्यासमघोरेण [59]स्थण्डिलं पुरुषेण तु ।।३१।।
हृदयेन न्यसेत्कुम्भमीशानेन [60]कुशं न्यसेत् ।
मूलेन विन्यसेद्[61]द्रव्यान्वामेनावाहयेत्सुरान् ।।३२।।
शरावान्बीजमुख्येन वस्त्राणि हृदयेन तु ।
ईशानेनैव गन्धादीन्धूपादीन्कवचेन तु ।।३३।।
दद्यान्मुद्रामघोरेण वाचयेत्पवमानकम् ।
प्रोक्षयेत्तु विशेषेण पुण्याहं तु [62]यथाविधि ।।३४।।
प्रणवेन घटोद्धारं महाव्योमेति मन्त्रतः ।
पञ्चब्रह्मषडङ्गैश्च स्नापयेत्परमेश्वरम् ।।३५।।

[नवकलशस्नपनविधिः[63]]

[64]नवसंख्यघटस्नानमादौ वक्ष्ये गुरो शृणु ।

[सूत्रपातः स्थण्डिलकल्पनं च]

प्रागग्रमुदगग्रं च युगसूत्रं प्रदापयेत् ।।३६।।
स्थण्डिलं [65]कल्पयेत्तस्मिञ्शालिभिर्विमलैः शुभैः ।
तिलतण्डुललाजांश्च तिर्यग्दर्भान्परिस्तरेत् ।।३७।।

[कुम्भादिलक्षणम् तत्स्थापनं च]

[66]कलशानि ततो ग्राह्य [67]स्थापयेदादिशैवकः ।

---

[55]मुद्रा त्रयोदशं प्रोक्तं—औ, ञ

[56]पञ्चदशं घटोद्धारं—औ; पञ्चदशं घटोत्थानं—ञ

[57]षोडशं—औ, ञ

[58]पालयेत्—औ

[59]स्थण्डिलमित्यनन्तरं कल्पयेदिति शेषः; स्थण्डिल-कुम्भयोर्विषये तथा कूर्चविधानवस्त्रविषये च *अजिते* २९.२७—४८ श्लोका द्रष्टव्याः ।

[60]'कुशं न्यसेत्' इत्यस्य कूर्चं न्यसेदित्यर्थो बोद्धव्यः । कूर्चन्यासस्यैव पूर्वं निर्देशो विद्यते ।

[61]द्रव्यशब्दस्यात्र पुंसि प्रयोगः । *रौरवे* क्रियापादे १८.८१ उत्तरार्धे 'द्रव्यास्त्वेकादश स्मृताः' इति तथा *रौरवोत्तरे* ६.१२ उत्तरार्धे 'तिला द्रव्याः प्रकीर्तिताः' इति च प्रयोगो दृश्यते ।

[62]तथाहिके—अ

[63]एतद्विषये *रौरवे* क्रियापादे २०.१, २ श्लोकौ तदीय-टिप्पण्यश्च द्रष्टव्याः ।

[64]नवसंख्यो घटो स्नानं—औ

[65]कारयेत्तस्मिन्—औ, ञ

[66]'कलशानि ततो ग्राह्य साधयेदादिशैवकः ।
सौवर्णं रजतं वापि तथा ताम्रमयैरपि ।।
शङ्खैर्वा शुक्तिकैर्वापि गवां शृङ्गैरथापि वा ।
अथवा मण्मयैर्वापि सर्वलक्षणसंयुतैः ।।

सौवर्णं [88]राजतं वापि तथा ताम्रमयं तु वा ।।३८।।
शङ्खैर्वा शुक्तिकैर्वापि गवां [89]शृङ्गैस्तथापि वा ।
अथवा मृण्मयैर्वापि सर्वलक्षणसंयुतैः ।।३९।।
सुपक्वैः सुस्वरैः स्निग्धैर्बिम्बप्रभासमन्वितैः ।
एतैर्लक्षणसंयुक्तैः स्नापयेत्परमेश्वरम् ।।४०।।
उत्तमं द्रोणसंपूर्णं मध्यमं तु तदर्धकम् ।
अधमं त्वाढकं प्रोक्तं सर्वेषामाढकं तु वा ।।४१।।
शङ्खशुक्तिकशृङ्गाणां स्वप्रमाणेन पूरयेत् ।

[शिवतोयम्[90]]

ततो मज्जनशालायां जल[91]द्रोणीष्वनेकशः ।।४२।।
वस्त्रपूतं सुशुद्धाम्बु नीत्वा नद्या गृहीतकम् ।
वरालत्रुटिकर्पूरो[92]शीरादिचूर्णमिश्रितम् ।।४३।।
पञ्चब्रह्मशिवाङ्गैश्च मूलमन्त्राभिमन्त्रितम् ।
शिवतोयमिति ख्यातं सुगन्धिकुसुमान्वितम् ।।४४।।
साधयित्वा [93]पुरा शीतं कलशान् साधयेत्ततः ।

[[94]कुम्भस्थापनं कुम्भपूजा च]

[95]श्रेष्ठान्तराधमाँल्लोहैर्मृद्भिर्वा कलशान् कुरु ।।४५।।

सुपक्वैः सुस्वरैः स्निग्धैर्बिम्बप्रभासमन्वितैः ।
एतैर्लक्षणसंयुक्तैः स्नापयेत्परमेश्वरम् ।।
उत्तमं द्रोणसंपूर्णं मध्यमं तु तदर्धकम् ।
अधमं चाढकं प्रोक्तं सर्वेषामाढकं तु वा ।।
शङ्खशुक्तिकशृङ्गाणां स्वप्रमाणेन पूरयेत् ।'
(*सुप्रभेदे* क्रियापादे १५, १६ उ० — २०);
एतद्विषये *अजिते* २९.२७ — ३२ पू० श्लोका द्रष्टव्याः ।

[87] साधयेदादि — औ

[88] रजतं — औ

[89] शृङ्गे तथापि — औ, ञ

[90] 'वरालत्रुटिकर्पूरत्वगेलोशीरजातयः ।
एभिर्युक्तं शिवाम्भः स्याच्छिवमन्त्राभिमन्त्रितम् ।।
तेनैव पूरयेत्कुम्भान् वर्धनीकलशानपि ।'
(*उत्तरकामिके* ४.९३ उ०, ९४);
वस्त्रपूतं सुशुद्धाम्बु नीत्वा नद्या गृहीतकम् ।
वरालात्रुटिकर्पूरोशीराद्यैश्चूर्णमिश्रितम् ।।
पञ्चब्रह्मशिवाङ्गैश्च मूलमन्त्राभिमन्त्रितम् ।
शिवतोयमिति ख्यातं सुगन्धकुसुमान्वितम् ।।
(*अजितागमे* अभिषेकद्रव्यम्, इति ईशानशिवाचार्यकृत-*शिवलिङ्गप्रतिष्ठाविधौ* उद्धृतम् ।);
एतद्विषये *रौरवे* क्रियापादे २४.१७ — १९पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[91] द्रोणिष्वनेकसु — औ, ञ

[92] शीराद्यैश्चूर्ण — औ, ञ

[93] पुरे शीतं — औ; पुरो शीतं — ञ

[94] 'वस्त्रयुग्मेन संवेष्ट्य शिवकुम्भं च वर्धनीम् ।
नव पञ्चात्मकं रत्नं शिवे शक्तौ च विन्यसेत् ।
पाद्यमाचमनं चार्घ्यं पञ्चगव्यं चतुर्दिशि ।
कुशोदकं ततः क्षीरं दधि कोणे घृतं भवेत् ।'
(*पूर्वकामिके* ४.२४९ उ० — २५१ पू०)
एतद्विषये *रौरवे* क्रियापादे २०.३ — ६ पू० श्लोका द्रष्टव्याः ।

[95] श्रेष्ठातराधमे लोहे — औ; श्रेष्ठतराधमे लोभे — ञ

[76]वेदाग्निपक्षप्रस्थैस्ते पूर्णाः [77]श्रेष्ठान्तराधमाः ।
शिवकुम्भं [78]तथोद्धृत्य पूरयेत्तु शिवाम्भसा ॥४६॥
कर्णिकायां न्यसेत्कुम्भं [79]पञ्चरत्नसमन्वितम् ।
हिरण्यं वापि निक्षिप्य नववस्त्रेण वेष्टयेत् ॥४७॥
[80]कूर्चं न्यस्त्वान्तरे तस्य [81]न्यस्त्वा कूटाक्षरं ततः ।
वर्धनीमुत्तरे स्थाप्य [82]वस्त्रहेमादिसंयुतम् ॥४८॥
[83]परितोऽष्टघटान् स्थाप्य [84]विद्येशानभिमन्त्रयेत् ।
पाद्यमाचमनं चार्घ्यं गन्धं पुष्पं च [85]गव्यकम् ॥४९॥
[86]लाजान् सक्तुं क्रमेणैव [87]शक्राद्यष्टघटे न्यसेत् ।
आसनं संप्रकल्प्यास्मिन् कुम्भे मूर्तिमनुं न्यसेत् ॥५०॥
ब्रह्मभिः सकलीकृत्य [88]तत्कलास्तत्र विन्यसेत् ।
न्यस्त्वा [89]विद्यातनुं मूर्तौ रूपं ध्यात्वा शिवं न्यसेत् ॥५१॥

[शिवध्यानम्]

चतुर्भुजं त्रिनेत्रं च चन्द्रार्धकृतशेखरम् ।
जटामकुटसंयुक्तं भस्मोद्धूलितविग्रहम् ॥५२॥
कृष्णापरशुसंयुक्तं पद्मपीठोपरि स्थितम् ।
ध्यात्वा [90]हृदा शिवं देवं शिवकुम्भे तु पूजयेत् ॥५३॥
स्थापनादींश्च पाद्यादि कृत्वा [91]दद्याद्धृदा गुरुः ।
गन्धं पुष्पं च धूपं च दीपमर्घ्यं विधाय च ॥५४॥
प्रदर्श्य लिङ्गमुद्रां च कवचेनावकुण्ठयेत् ।
[92]तस्यां मनोन्मनीं ध्यायेद् द्विभुजां च द्विलोचनाम् ।
नीलालकसमायुक्तां दुकूलवसनान्विताम् ॥५५॥
उत्पलं दक्षिणे हस्ते धृत्वा वामे प्रसारितम् ॥५६॥

---

[76]वेदवह्नि पक्ष—ञ
[77]श्रेष्ठान्तरासमम्—औ; श्रेष्ठतरासमम्—ञ
[78]ततोद्धृत्य—औ, ञ
[79]'माणिक्यं मुक्तावैडूर्यमिन्द्रनीलं प्रवालकम् ।
पञ्चरत्नमिति प्रोक्तम्' (*अजिते* २९.४९ उ०)
[80]कूर्चान् न्यस्त्वान्तरे—ञ
[81]न्यसेत्कूटा—ञ
[82]वस्त्रवेष्टनसंयुतम्—औ
[83]परितोऽष्टौ—औ
[84]विद्येशानाममन्त्रतः—औ
[85]धूपकम्—औ, ञ
[86]दीपमादिं क्रमेणैव—औ, ञ
[87]चक्राद्यष्ट—औ; शक्रादिषु—ञ
[88]तत्कालं यत्र—औ; तत्कालत्रयविन्यसेत्—ञ
[89]विद्याततन्मूर्ति—औ
[90]सदाशिवं—औ, ञ
[91]दत्त्वा हृदा—औ; दत्त्वा यथा—ञ
[92]तस्मिन्—औ, ञ

करण्डमकुटोपेतां किंचित्प्रहसिताननाम् ।
[93]सुस्थितं देवपार्श्वे तु अन्यत्कुञ्चितमम्बुजे ॥५७॥
[94]गणाम्बिकेति मन्त्रेण ध्यात्वा गन्धादिभिर्यजेत् ।
यष्ट्वा गौरीं च वर्धन्यां योनिमुद्रां प्रदर्शयेत् ॥५८॥
[95]वर्मणैवावकुण्ठ्याथ रुद्रानावरणस्थितान् ।
पूर्वोक्तविधिना वापि क्रमेणावाह्य पूजयेत् ॥
अनन्तादिशिखण्ड्यन्तं तेषु गन्धादिभिर्यजेत् ॥५९॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे अष्टाशीतितमः]
स्नपनविधिपटलः ।

---

[93]सुस्थितां—ञ

[94]गणाम्बिकायेति—औ, ञ

[95]वर्मणे वाव—औ; वर्मणे वाथ—ञ

[एकोननवतितमः पटलः]

[कलासूत्रयागशालाकुण्डविधिः[1]]

[कलासूत्रयागशाला]

कलासूत्रं प्रवक्ष्यामि पञ्चदशपदक्रमम् ।

---

[1]अयं पटलः ईशानशिवाचार्यकृत-*अष्टादशपद्धतौ* १२७—१२९ पृष्ठेषु दृश्यते। एतद्विषये *अंशुमदागमे* ५९तमपटलः, *पूर्वकारणे* २५तमः पटलः, *चन्द्रज्ञाने* (टि० ११) यागशालाविधिपटलः, *वीरागमे* ४६तमः पटलः, *वामदेवपद्धतौ* (टि० १२१) यागशाला-निर्माणम्, पृ० ४३९—४४४ इत्येते द्रष्टव्याः;

'सूत्रपातं प्रकुर्वीत प्रागग्रं चोत्तराग्रकम् ।
शालिपिष्टाक्तसूत्रेण पङ्क्तिसूत्रमथाचरेत् ॥
मण्टपस्यान्तरं सर्वमेकाशीतिपदं कुरु ।
ब्राह्म्यं नवात्मकं प्रोक्तं दैविकं षोडशं क्रमात् ॥
चतुर्विंशतिसंख्यं च मानुषं पदमीरितम् ।
द्वात्रिंशात्मकं ज्ञेयं पैशाचं यागवेश्मनि ॥
मानुषं च पदं तत्र देशिकस्थानमुच्यते ।
मध्ये ब्रह्मपदे वेदी दैविके मङ्गलाष्टकम् ॥
मानुषे च पदे कुण्डं पैशाचे तोरणं भवेत् ।
मध्ये त्वेकपदे कुम्भं प्रधानं वर्धनीमुमाम् ॥
अभितः पदे विद्येशान्दैविके षोडशाह्वये ।
अष्टमङ्गलमित्युक्तं चतुर्विंशतिसंज्ञके ॥
मानुषे कुण्डमित्युक्तं द्वात्रिंशत्पदसंज्ञके ।
पैशाचे तोरणं चैव कलशांश्च यथाक्रमम् ॥'

(*पूर्वकारणे* २५.१८ उ०—२५ पू०);

सूत्रनिर्णयः

'उत्तमं मनुसूत्रं स्यान्मध्यमं रविसूत्रकम् ।
अधमं दशसूत्रं चेत्येवं स्यात्सूत्रनिर्णयः ॥
मनुसूत्रस्य हस्ताश्च प्रोक्ताश्चैकोनविंशतिः ।
रविसूत्रस्य हस्ताश्च प्रोक्ताः सप्तदशेति च ॥
दशसूत्रस्य शास्त्रेऽस्मिन्हस्ताः पञ्चदश स्मृताः ।
पूर्वोक्तसूत्रत्रितये हस्ताः स्युः सान्तरालकाः ॥
वेदिविस्तारतुल्यं तदन्तरालमिहाथ वा ।
तदर्धं वान्तरालं स्याद्यथासंभवमुच्यते ॥
प्राक्पश्चिमविधानेन मनुसंख्याकसूत्रकम् ।
तथैव सूत्रं संख्यातं दक्षिणोत्तरमेव च ॥
चतुरश्रं प्रकुर्वीत मखालयमतः परम् ।
पदमेकोनसप्तत्युत्तरं शतमीरितम् ॥
सर्वेषां च पदानां तु विनियोगोऽथ कथ्यते ।
मध्ये नवपदं वेदी प्रधानं तत्र वर्धनीम् ॥
मध्यकोष्ठे न्यसेदेवं यथाशास्त्रं विचक्षणः ।
तद्बाह्ये चाष्टविद्येशांस्तद्बहिः षोडशं पदम् ॥
पूजास्थानं चतुर्दिक्षु विदिक्षु स्तम्भमुच्यते ।
शिष्टे चाष्टपदे प्रोक्तमष्टमङ्गलमत्र हि ॥
संचारार्थं पदं प्रोक्तं चतुर्विंशति तद्बहिः ।
द्वात्रिंशत्कुण्डकोष्ठानि तद्बहिः प्रोच्यते बुधैः ॥
तद्बहिश्च पदं प्रोक्तं चत्वारिंशद्विचक्षणैः ।
पदेष्वेतेषु कर्तव्यमङ्कुरस्थापनं बुधैः ॥
अस्त्रं च पञ्चगव्यं च चरुश्च परिकीर्तितः ।
शिष्टमत्र पदं सर्वमाचार्यपदमुच्यते ॥
तद्बहिश्चाष्टचत्वारि पदं तत्प्रोच्यते बुधैः ।
सप्तविंशतिकुम्भांश्च विन्यसेत्तत्र देशिकः ॥
स्तम्भान्द्वादशसंख्याकांश्चतुर्दिक्षु समं बुधः ।
शिष्टविंशतिकोष्ठेषु चतुर्दिक्षु समं बुधः ॥
चतुर्द्वारं प्रकुर्वीत यथाशास्त्रं विचक्षणः ।
तद्बहिश्चान्तरालं स्याच्चतुर्दिक्षु प्रकीर्तितम् ।
एतावता च ग्रन्थेन मनुसूत्रं प्रकीर्तितम् ॥

रविसूत्रक्रमः ।

पूर्वाग्रं रविसूत्रं स्यादुत्तराग्रं तथैव च ।
एकविंशाधिकशतं पदभागं समीरितम् ॥
मध्ये चैकपदे ब्राह्मे प्रधानं वर्धनीं तथा ।
दैविकेऽष्टपदे कुम्भान्पैशाचं षोडशं भवेत् ॥
पूजार्थं च चतुर्दिक्षु विदिक्षु स्तम्भमुच्यते ।
शिष्टे चाष्टपदे तु स्यादष्टमङ्गलमीरितम् ॥

[२]पूर्वास्यैश्चापि सौम्यास्यैः [३]कलासूत्रैः प्रकल्पितम् ॥१॥
पञ्च[४]विंशत्युत्तरैश्च [५]मण्डितं द्विशतैः पदैः ।
मध्ये शिवं पदं प्रोक्तं [६]शक्तेश्चापि तथोपरि ॥२॥
नादं तद्बाह्यकं प्रोक्तं तदूर्ध्वं बिन्दुसंज्ञकम् ।
सादाशिवं ततः प्रोक्तं माहेश्वरमतः परम् ॥३॥
[७]रौद्रं तस्योर्ध्वके चैव बाह्ये विष्णुपदं क्रमात् ।
मध्ये [८]नवपदां वेदीं चतुष्कोणेषु वै तथा ॥४॥
निखनेच्चतुरः स्तम्भान्'

[कुम्भस्थापनादि]

'प्रधानं च शिवे न्यसेत् ।
साष्टविद्येश्वरान्कुम्भान्न्यसेच्छक्तिपदे तथा ॥५॥
साष्टमङ्गलकान्नादे [९]बिन्दुप्रान्ते च संन्यसेत् ।
पूजाद्रव्याणि सर्वाणि सदाशिवपदे न्यसेत् ॥६॥
कुण्डाणि परितः [१०]कुर्यान्महेशस्य पदे क्रमात् ।
बहिः [११]संचरणं प्रोक्तं रुद्रस्यापि पदे तथा ॥७॥
विष्णोः पदे तथा भित्तिं [१२]पदार्धेन प्रकल्पयेत् ।
[१३]नन्द्यादीनां च कुम्भांस्तु परितो भित्तिमस्तके ॥८॥

षट्पञ्चाशत्ततो बाह्ये मानुषं पदमीरितम् ।
कोणे कोणे विशेषेण वीथिद्वितयमाचरेत् ॥
पूर्वादिनवके मध्ये त्वष्टकुण्डं तु कारयेत् ।
रुद्राखण्डलयोर्मध्ये कुर्याद्वृत्तं प्रधानकम् ॥
चत्वारिंशत्पदे बाह्ये राक्षसे घटतोरणम् ।
आचार्यशिष्यसंचारयोग्यं शिष्टपदं भवेत् ॥
दशसूत्रक्रमः ।
स्तम्भस्थानं पदाद्बाह्ये इत्येवं पदसंस्थितिः ।
पूर्वादि दशसूत्रं स्यात्तथा स्याद्दक्षिणोत्तरम् ॥
एकाशीतिपदन्यासं विनियोगश्च कथ्यते ।
मध्ये नवपदं वेदी तद्बहिश्चाष्टमङ्गलम् ॥
तद्बहिः कुण्डकोष्ठानि तद्बहिर्द्वारमुच्यते ।'
(*वामदेवपद्धतौ* (टि० ११२) पृ० ४४०—४४४)
[२]पूर्वास्यं चापि सौम्यास्यं—च
[३]कलासूत्रं—च
[४]विंशत्युत्तरं च—च
[५]द्विशतैः पदमण्डितम्—च
[६]शक्तिं चापि—च
[७]रुद्रं—च
[८]नवपदं—च
[९]बिन्दु सान्तं च सञ्चरेत्—च
[१०]कृत्वा महेशस्य—च
[११]सञ्चारकं—च
[१२]पदार्थेन प्रकल्पितम्—च
[१३]नंद्यादीन्यपि कुम्भानि—च;
'पूर्वद्वारोत्तरे कुम्भे नन्दिशान्तिद्विकुम्भकौ ।
तद्याम्ये त्रिषु कुम्भेषु शक्रकालरवीन्यजेत् ॥
अग्निं चानलदिग्भागे कुम्भमेकं प्रपूजयेत् ।
याम्यस्य पूर्वदिग्भागे भृङ्गिविद्याद्विकुम्भकौ ॥
तत्पश्चाद्यमविघ्नेशौ कुम्भयुग्मं प्रपूजयेत् ।
नैर्ऋत्यां त्रिषु कुम्भेषु ब्रह्मनिर्ऋतिकेशवम् ॥
प्रतीच्यां दक्षिणे भागे वृषभं च निवृत्तिकम् ।
तस्योत्तरत्रिकुम्भेषु स्कन्दोमावरुणान्यजेत् ॥
वायौ च वायुविघ्नेशौ कुम्भयुग्मे प्रपूजयेत् ।
उदीच्यां पश्चिमे भागे द्विकुम्भे संयजेद्गुरुः ॥
गौरीं प्रतिष्ठां तत्पूर्वे तथा सोमं च चण्डकम् ।

द्वारार्थं त्रिपदं त्यक्त्वा परितो दिग्विदिक्षु च ।
[14]यागशाला त्वियं प्रोक्ता'

[कुण्डलक्षणं तत्र कुण्डप्रमाणं मेखलाप्रमाणं च]

'कुण्डलक्षणकं शृणु ।।९।।
उत्तमं सप्त[15]विंशत्या चतुर्विंशति मध्यमम् ।
अधमं षोडशाङ्गल्यं प्रतिष्ठादौ प्रकल्पयेत् ।।१०।।
षोडशाङ्गुलकान्न्यूनं प्रतिष्ठादौ [16]विवर्जयेत् ।
षोडशाङ्गुलमारभ्याप्यष्ट[17]हस्तावधि क्रमात् । ।।११।।
अष्टहस्तात्परं चैव न कर्तव्यं गुरूत्तम ।
षोडशाङ्गुलकन्यूनं प्रायश्चित्तेषु कल्पयेत् ।।१२।।
हस्तादि षोडशान्तं च; मेखला च [18]नवाङ्गुला ।

[[19]चतुरश्रकुण्डम्]

प्रागुदक्त्रित्रिसूत्रं च समन्ताच्चतुरश्रकम् ।।१३।।
[20]चतुरश्रं पूर्वभागे'

[योनिकुण्डम्[21]]

'आग्नेय्यां तु भगाकृति ।
[22]क्षेत्रे पञ्चविभागे च एकभागं बहिर्न्यसेत् ।।१४।।

ईशाने त्रिषु कुम्भेषु गुरुमीशं विधिं यजेत् ।
वास्तुपं निर्ऋतिं विष्णुं द्विपदे तु प्रकल्पयेत् ।।
तथा च वरुणस्कन्दौ श्रियं च द्विपदे क्रमात् ।।
गुरुमीशं विधिं चैव द्विपदे तु प्रशस्यते ।।
अन्येषां सर्वदेवानां तत्तत्स्थानेषु पूजयेत् ।।
(*पूर्वकारणे* २५.४० उ० —४८ पू०);
एतद्विषये *अजिते* क्रियापादे २८.४९ उ० —५४ श्लोका द्रष्टव्याः ।

[14]यागशालामिदं प्रोक्तं —च

[15]विंशत्यां —च

[16]विवर्जितम् —च

[17]हस्तावधिं —च

[18]नवाङ्गुलम् —च

[19]'त्रिसूत्रं पूर्ववत्कृत्वा उत्तराग्रं तु सूत्रकम् ।
चतुरश्रं तु तत् कृत्वा हस्तमात्रं तु कारयेत् ।।'
(*सन्तानसंहितायाम्* ५३.६ उ० —७ पू०)
चतुरश्रकुण्डविषये *अजिते* २१.१९ श्लोकस्तदीय-टिप्पणी च द्रष्टव्याः ।

[20]'पूर्वे तु चतुरश्रं तु वह्नावश्वत्थपत्रवत् ।'
(*सन्तानसंहितायाम्* ५३.४ उ०)

[21]'चतुरश्रं पञ्चधा कृत्वा एकांशं पुरतो न्यसेत् ।
कोणार्धार्धं गृहीत्वा तु बहिश्चैव तु वर्जयेत् ।।
तत्कोणाद् भ्रामयेदन्यं योन्याकारं त्रिसूत्रकम् ।'
(*योगजे* १६.१२ उ० —१३);
योनिकुण्डविषये *अजिते* २१.३० —३३ श्लोकास्तदीय-टिप्पणी च द्रष्टव्याः ।

[22]क्षेत्रं पञ्चविभागं च —च

कोणार्धार्धस्य मध्ये च क्षेत्रार्धाद् भ्रामयेत्ततः ।
[२३]क्षेत्रार्धादधिकं यावद् भ्रामयेच्च द्विपार्श्वयोः ।।१५।।
पञ्चमान्तं बहिर्न्यस्त्वा भवेदश्वत्थपत्रवत् ।
उत्तराग्रमिति ख्यातं योनिमाग्नेयकोणके ।।१६।।

[[२४]अर्धचन्द्रकुण्डम्]

भूतभाग[२५]कृते क्षेत्रे पार्श्वे चैकैकभागकम् ।
वृद्धिं कृत्वा विशेषेण क्षेत्रमध्यं [२६]समाचरेत् ।।१७।।
पार्श्व[२७]सूत्रान्तके चैव भ्रामयेदर्धचन्द्रकम् ।
खण्डं दक्षिणभागे चाप्यखण्डमुत्तराग्रकम् ।।१८।।
प्रतिष्ठादौ प्रकर्तव्यं दीक्षायां च सुकर्मणि ।
दक्षिणाग्रं प्रकर्तव्यं पादमुत्तरतो न्यसेत् ।।१९।।
[२८]मोहेन नान्यथा कार्यं [२९]राष्ट्रक्षोभो न संशयः ।

[[३०]त्रिकोणकुण्डम्]

क्षेत्रं च सप्तधा भज्य चैकैकं पार्श्वके न्यसेत् ।।२०।।
क्षेत्रस्य सौम्यबाह्ये तु एकभागं च विन्यसेत् ।
पार्श्वयो[३१]र्द्विकयोश्चापि [३२]रेखयोर्मेलनं तु यत् ।।२१।।
त्रिकोणमिति विख्यातमुत्तराग्रं [३३]प्रकल्पयेत् ।
प्रतिष्ठादौ प्रकर्तव्यं नैव पूर्वाग्रमेव च ।।२२।।

---

[२३] क्षेत्रार्धाविधितं —च

[२४] 'विस्तारं नवधा कृत्वा अंशं न्यस्त्वोर्ध्वाधः क्रमात् ।
सूत्रकं पातयित्वा तु भ्रामयेदर्धचन्द्रवत् ।।'
(*योगजे* (टि० ६२) १६.१४);
एतद्विषये *अजिते* २१.२०—२२ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[२५] कृतं क्षेत्रं —च

[२६] समारभेत् —च

[२७] सूत्रान्तकश्चैव —च

[२८] मोहेनाप्यन्यथा कृत्वा —च

[२९] राष्ट्रक्षोभं —च

[३०] 'वसुभागे कृते क्षेत्रे पूर्वमेकं तु वर्धयेत् ।
पार्श्वद्विभागवृद्धिः स्यात्तेन मानेन सूत्रकम् ।।
त्रिकोणं प्रोच्यते देवि'
(*संतानसंहितायाम्* (टि० ६७) ५२.११ उ०, १२);
एतद्विषये *अजिते* २१.३४—३८ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[३१] द्वितयोश्चापि —च

[३२] रेखा च मेलनं —च

[३३] प्रकल्पितम् —च

[[34]वृत्तकुण्डम्]

[35]क्षेत्रं तु वसुधा भज्य कर्णान्ते त्वेकभागकम् ।
त्यक्त्वा क्षेत्रस्य मध्ये तु कर्णान्तं भ्रामयेत्क्रमात् ॥२३॥
वर्तुलं चेति विख्यातं'

[[36]षडश्रकुण्डम्]

'क्षेत्रं वेदांशकं कुरु ।
एकांशं च द्विपार्श्वे तु लाञ्छितं तद्विशेषतः ॥२४॥
रेखाद्वयं समालिख्य भागार्धं क्षेत्रमध्यके ।
षड्रेखामेलनं कुर्यात्षडश्रं चेति कीर्तितम् ॥२५॥
पूर्वपश्चिमकाग्रं च कल्पयेत्कल्पवित्तमः ।

[[37]पद्मकुण्डम्]

वृत्तं पूर्वोक्तवत्कृत्वा कर्णिकां च त्रियङ्गुलाम् ॥२६॥
[38]कर्णिकाया अधोभागे तथाधोमेखलोपरि ।
रसाङ्गुलं दीर्घमग्रे तथा चैकाङ्गुलं मतम् ॥२७॥
उन्नतं चेति विख्यातं पञ्चाङ्गुल[39]मथापि वा ।
[40]दलाष्टषोडशं तत्र पद्मकुण्डमिति स्मृतम् ॥२८॥

---

[34] 'वृत्तकुण्डं ततः शृणु ।
दशभागकृते क्षेत्रे एकांशं पूर्वतो न्यसेत् ॥
तस्मान्मध्यं गृहीत्वैवं भ्रामयेत्पूर्णचन्द्रवत् ।
वृत्तकुण्डमिति ख्यातम्'
(*सन्तानसंहितायाम्* (टि० ६७) ५३.१२ उ० — १४ पू०);
एतद्विषये *अजिते* २१.२३ श्लोकः २४ श्लोकस्य पूर्वार्धं तदीयटिप्पणी च द्रष्टव्याः ।

[35] कर्णार्धं वसुधा — च

[36] 'षडश्रं च शृणु प्रिये ।
अष्टभागकृतक्षेत्रे द्विपार्श्वे भागद्वयं न्यसेत् ॥
तस्मान्मध्यं गृहीत्वा तु तत्सूत्रं विन्यसेत्ततः ।
पूर्वादि लाञ्छयेत्तत्र षट्कोणमिति संमितम् ॥'
(*सन्तानसंहितायाम्* (टि० ६७) ५३.१४, १५);
एतद्विषये *अजिते* २१.३९ — ४१ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[37] 'पूर्ववद्वृत्तकुण्डं स्यादष्टपत्रं सकर्णिकम् ।
पद्मकुण्डमिति ख्यातम्'
(*सन्तानसंहितायाम्* (टि० ६७) ५३.१६);
एतद्विषये *अजिते* २१.२४ — ३० पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[38] कर्णिकायामधो — च

[39] मथाविधिः — च

[40] दलाष्टं — च

[[४१]अष्टाश्राष्टकोणकुण्डे]

क्षेत्रं च वसुधा भज्य एकैकं पार्श्वयोर्न्यसेत् ।
चतुरश्रं प्रकल्प्याथ क्षेत्रबाह्यैकभागकम् ।।२९।।
[४२]क्षेत्रमध्ये समन्तात्तु चतुश्चिह्नं विधाय च ।
चतुष्टयं तथा रेखामेलनं न्यस्य चाश्रकम् ।।३०।।
अष्टाश्रमिति विख्यातमष्टकोणं च कीर्तितम् ।

[प्रधानकुण्डम्]

इन्द्रईशानयोर्मध्ये वृत्तकुण्डं प्रधानकम् ।।३१।।
अर्धचन्द्रं त्रिकोणं च [४३]मारणे द्वेषणे भवेत् ।
[४४]प्रधानवर्जितं चैव [४५]मोहेनापि कृतं तु चेत् ।।३२।।
राज[४६]राष्ट्रविनाशश्च कर्ता भोक्ता विनश्यति ।
तस्मात्सर्वप्रयत्नेन उक्तवत्परिकल्पयेत् ।।३३।।

[४७]इत्यजिताख्ये महातन्त्रे [क्रियापादे] कलासूत्रयाग[शाला]कुण्डविधिः
[एकोनवतितमः] पटलः।

---

[४१] 'चतुरश्रस्य नाहके ।।
कोणस्यार्धं गृहीत्वा तु कोणेनैव च कारयेत् ।
एवं वस्वश्रकुण्डं स्यात्सर्वकार्येषु पूजितम् ।।'
(*योगजे* (टि० ६२) १६.१९ उ०, २०);
एतद्विषये *अजिते* २१.४२ –४४ श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[४२] क्षेत्रमध्यं –च

[४३] मारणं द्वेषणं विधिः –च

[४४] प्रधाने –च

[४५] मोहेनविक्रत्तन्तु –च

[४६] राष्ट्रं विनाशं च –च

[४७] इत्यजिते क्रियापादे कलासूत्रयागकुण्डविधिपटलः –च

[नवतितमः पटलः]

[स्थानशुद्धिः[1]]

[स्थानशुद्धेर्निमित्तानि[2]]

स्थानशुद्धिं ततो वक्ष्ये शृणुष्व कमलापते ।

---

1. अयं पटलः आर० इ० १८६६९ मातृकायां परं दृश्यते ।; एतद्विषये *अजिते* १८.१०४, १०५श्लोकौ-तदीयटिप्पणी; २०.१०८ उ०—११०पू० श्लोकास्त-दीयटिप्पणी च द्रष्टव्याः ।

2. 'कपिकुक्कुटकाद्यैर्वा कपोतैः सूकरैः श्वभिः ।
उलूकगृध्रकाकैश्च ऋतुस्त्रीचोरगर्दभैः ॥
पतितैः प्रेतकैर्वापि पातकैः सूतकैरथ ।
गूढजैः पापरोगार्तैर्व्रात्यैर्वा प्रतिलोमजैः ॥
गुर्वादिद्रोहसंयुक्तैर्दीक्षाहीनैर्द्विजातिभिः ।
चतुष्पादैरथान्यैश्च पक्षिभिर्वा सरीसृपैः ॥
हीनजातिभिरन्यैर्वा नरैर्दीक्षान्तरस्थितैः ।
शिल्पिभिः पाणचण्डालरजकाद्यैरथापि वा ॥
स्पृष्टे पीठेऽथ लिङ्गे वा बेरादौ तत्र वासिनः ।
राष्ट्रे शत्रुजनैर्मर्त्याः पीड्यन्ते सर्व एव ते ॥
मृद्भाण्डांस्तु त्यजेदेतैः स्पृष्टानासन्नकानपि ।
गोमयालेपनं कृत्वा पुण्याहं च गुरूत्तमः ॥
गव्येन स्नपनं कृत्वा संप्रोक्षणमथाचरेत् ।
ऋतुस्त्रीपातकाशौचकारुकैः स्पर्शिते सति ॥
शान्तिहोमादिकं कार्यं प्रागुक्तं रजकैरपि ।
चण्डालपाणकाद्यैश्चेच्छान्तिकर्मादिकं नयेत् ॥
गर्भगेहे प्रविष्टे तु स्नपनं शान्तिहोमयुक् ।
संप्रोक्षणं विना कुर्यात्कपिकुक्कुटकादिभिः ॥
ऋतुस्त्रीपातकाद्यैश्चेत्प्रविष्टं गर्भगेहकम् ।
तदा संप्रोक्षणं कुर्यात्केवलं प्राक् प्रचोदितम् ॥
चण्डालरजकाद्यैश्चेच्छान्तिहोमसमायुतम् ।
संप्रोक्षणं विधातव्यं क्रमादेवं त्रिधा मतम् ॥
शान्तिकर्म दिशाहोमं क्रमात्संप्रोक्षणं नयेत् ।
त्रिप्रकारैः क्रमादर्धमण्डपस्य प्रवेशने ॥
प्रथमेन द्वितीये च चण्डालविहितं तु यत् ।
प्रायश्चित्तमृतुस्त्रीणां स्पर्शनादौ विधीयताम् ॥
प्रतिमामण्डपावेशे त्रिप्रकारैः क्रमेण वै ।
शान्तिहोमं च मूर्त्याख्यं दिशाहोमं क्रमान्नयेत् ॥
दीक्षाहीनान् द्विजातींश्च हित्वा दीक्षान्तरानपि ।
परिवारालयावेशेऽप्येतदेव समीरितम् ॥
कपोतकाकसर्पादि प्रवेशो नात्र दोषभाक् ।
चण्डालरजकाद्यैश्चेदन्तर्मण्डलवेशनम् ॥
कृतं चेन्मूर्तिहोमः स्याच्छान्तिहोमो द्वितीयके ।
गोमयालेपनाद्यं च समानं सर्वकर्मसु ॥
परिवारालयप्रोक्तं प्रायश्चित्तं महानसे ।
महानससमा ज्ञेया बलिपीठेषु निष्कृतिः ॥
(*उत्तरकामिके* ३०.३९७ उ०—४१५ पू०);
'कुक्कुरैः कुक्कुटैश्चैव खरसूकरवानरैः ।
स्पर्शिते लिङ्गबेरे च प्रविष्टे गर्भगेहके ॥
प्रवर्तते महामारी तद्ग्रामश्च विनश्यति ।
मृद्भाण्डानि विसृज्याथ स्थानशुद्धिं ततः कुरु ॥
गोमयालेपनं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ।
स्नपनं कारयित्वा तु शान्तिहोमं ततः कुरु ॥'
'लिङ्गे वा प्रतिमे स्पृष्टे ऋतुस्त्रीभेकतस्करैः ।
गर्भगेहे प्रविष्टे वा जनानां नाशनं भवेत् ॥
मृद्भाण्डानि विसृज्याथ गोमयेनोपलेपयेत् ।
पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्ततः ॥
स्नपनं कारयेत्पश्चाद्बिल्वपत्रेण घर्षयेत् ।
मूर्तिहोमं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः ॥
अन्तर्मण्डलशालादावभिस्पृष्टे विशेषतः ।
संप्रोक्ष्य पञ्चगव्येन पुण्याहं वाचयेत्ततः ॥'
'स्पृष्टे सूतिकया बिम्बे गर्भगेहे प्रविष्टके ।
दुर्भिक्षं जायते लोके बालानां नाशनं भवेत् ॥
मृद्भाण्डानि विसृज्याथ गोमयेनानुलेपयेत् ।
पर्यग्निकरणं कृत्वा ब्राह्मणान्भोजयेत्ततः ॥
मूर्तिहोमं ततः कृत्वा शस्त्रेणैव शतं जपेत् ।

[३]उदक्या सूतकी कुण्डो व्रात्यश्च [४]पुल्क[सोऽपि च] ॥१॥
नापितो रजकश्चैव शुनको रा[सभस्त]था।
कुक्कुटः श्येनपक्षी च गृध्रश्चैते [च] म[न्दिरम्] ॥२॥

ब्राह्मणान्भोजयेत्तत्र सावित्रीं च शतं जपेत् ॥'
'प्रतिलोमैरथ स्पृष्टे लिङ्गे च प्रतिमे तु वा।
प्रविष्टे गर्भगेहे तु ह्यनावृष्टिर्न संशयः ॥
तन्मण्डलाधिपो भूपो ग्रामो राज्यं च नश्यति।
पञ्चशुद्धिक्रमं कृत्वा मृत्पात्राणि विसर्जयेत् ॥
गोमयालेपनं कृत्वा पर्यग्निकरणं कुरु।
पुण्याहं वाचयित्वा तु स्नपनं कारयेद्विभोः ॥
मूर्तिहोमं ततः कृत्वा संप्रोक्षणमथाचरेत्।
विलोमैः संकरैरन्यैः स्पृष्टे लिङ्गे च पीठके ॥
प्रविष्टे गर्भगेहे वा महामारीप्रकोपनम्।
धावत्येव नृपोऽन्यत्र राष्ट्रं चापि विनश्यति ॥
मृद्भाण्डानि विसृज्याथ पञ्चशुद्धिक्रमाद्यजेत्।
गोमयेनोपलिप्याथ पुण्याहं वाचयेत्क्रमात् ॥
स्नपनं कारयेत्तत्र मूर्तिहोमं ततः कुरु।
प्रागुदीरितमार्गेण संप्रोक्षणमथाचरेत् ॥'

(*पूर्वकारणे* १४४.५६—६५; ७६ उ०—८३ पू०); 'प्रतिष्ठाविधानस्य अनुज्ञां संकल्प्य पुण्याहं कृत्वा स्थानशुद्धिं कुर्यात्।

'खननोद्धारदहनं पूरणं गोनिवासनम्।
विप्रोच्छिष्टं च गव्यं च वेद इत्यष्टशुद्धयः ॥

प्रासादस्य पूर्वाद्यष्टदिक्षु गत्वावलोक्य, भूसूक्तेन भूमिमभिमंत्र्य, संपूज्य, प्रार्थ्य, खननमन्त्रेण खनित्रेण तालमात्रप्रमाणं खातं खात्वा, 'मृत्तिके हन' मन्त्रेण मृदं गृहीत्वा, तत्खातं साक्षात् पवित्रमन्त्रेण दर्भान्प्रकीर्य तत्पुरुषेण दग्ध्वा, ईशानेन विसृज्य, वल्मीकमृत्तिकया 'आपूर्यमाण' इति मन्त्रेण तं खातमापूर्य, एवमेव सर्वासु दिक्षु कृत्वा गोपूजा [कर्तव्या]। गोवृन्दमानीय तेष्वेकवृषभं च तद्गायत्र्या आवहनादिपूजां कृत्वा,

अथाङ्गपूजा—शृङ्गमूलयोः ॐ हां ब्रह्मणे नमः। ॐ हां विष्णवे नमः। शृङ्गाग्रयोः ॐ हां शिवाय नमः। ललाटे ॐ हां गणपतये नमः। गले ॐ हां आत्मने नमः। नासापुटे ॐ हां वृक्षेभ्यो नमः। ॐ हां नागेभ्यो नमः। कर्णयोः ॐ हां अश्विनीभ्यां नमः। चक्षुषोः ॐ हां शशिने नमः। ॐ हां भास्कराय नमः। दन्तेषु ॐ हां मरुद्भ्यो नमः। जिह्वायां ॐ हां वरुणाय नमः। हुंकारे ॐ हां सरस्वत्यै नमः। गण्डयोः ॐ हां यमाय नमः। ॐ हां यक्षसे नमः। ओष्ठयोः ॐ हां संध्याभ्यां नमः। ग्रीवे ॐ हां चन्द्राय नमः। खुरमध्ये ॐ हां गन्धर्वेभ्यो नमः। खुराग्रेषु ॐ हां पन्नकेभ्यो नमः। खुरपश्चिमेषु ॐ हां अप्सरेभ्यो नमः। दशनादिषु ॐ हां रुद्रेभ्यो नमः। संधिषु ॐ हां वायुभ्यो नमः। श्रोण्यां पितृभ्यो नमः। उरसि ॐ ह्रीं उमायै नमः। अपाने ॐ श्रीं श्रियै नमः। गोमये ॐ हां आदित्याय नमः। पुच्छे रश्मिभ्यो नमः। सूत्रे ॐ हां गङ्गायै नमः। रोमाग्रेषु ॐ हां ऋषिभ्यो नमः। उदरे ॐ हां पृथिव्यै नमः। पयोधरे ॐ हां चतुःसागरेभ्यो नमः। तत 'आगावो' मनुनाभिमंत्र्य तृणादीनि दापयेत्। ततस्त्रिरात्रमेकरात्रं वा गोवृन्दवासं कृत्वा 'दशाहं रजनीकाले गोनिवासं दिनं प्रति'

तदनन्तरं विप्रोच्छिष्टविधिः—

शिवभक्तान्विप्रानाहूय, गन्धतैलेन स्नापयित्वा, वस्त्राभरणगन्धपुष्पाक्षतान्दत्त्वा देशिको द्विजैः सह महामण्डपमासाद्य, सकलीकरणं कृत्वा विघ्नेश्वरं संपूज्य, पुण्याहं वाचयित्वा, तदम्भसा तत्स्थानं संप्रोक्ष्य, तिलतण्डुलशालिभिः स्थण्डिलं प्रस्तीर्य, तदुपरि नलिनं विलिख्य, तत्र शिवं सावरणमभ्यर्च्य, ततः शिवमन्त्रं शतं जपित्वा, 'ब्रह्मसूक्तं विष्णुसूक्तं रुद्रसूक्तं पवमानं श्रीसूक्तं पुरुषसूक्तं पञ्चशान्तिं घोषशान्तिं भूसूक्तम्' एतान् क्रमाज्जपित्वा, तन्मण्डलाग्रे कुण्डं वृत्तं चतुरश्रं वा स्थण्डिलं वा परिकल्प्य, तत्र शिवाग्निं प्रतिष्ठाप्य, मूलेनाज्याहुतिं शतं हुत्वा तद्दशांशतो ब्रह्माङ्गैश्च हुत्वा, घृतेन 'एकस्मै स्वाहेत्यादि सर्वस्मै स्वाहेत्यन्तं' हुत्वा, हव्यवाहेति स्विष्टकृद्धुत्वा, जयादिं हुत्वा, मूलेन पूर्णां हुत्वा, अन्तर्बलिं बहिर्बलिं क्षिपेत्। ततो विप्रान्शिवनामसहस्रैरखण्डितैर्बिल्वपत्रैः संपूज्य, घृतसूपसमन्वितं सव्यञ्जनमोदनं दत्त्वा भोजयेत्। पश्चाद् गोमयेनानुलिप्य, ततः पञ्चगव्यं संस्थाप्य, पञ्चगव्योदकेन शुद्धैरुक्थैरिति मन्त्रेण गर्भगृहमालयं च

प्रविष्टाश्चेत्प्रमादात्तु स्थानशुद्धिं पुरा [चरेत्] ।
[प्रागुदीरितमार्गेण] संप्रोक्षणमथाचरेत् ।।३।।

[शुद्ध्यष्टकम्[5]]

आलयस्य नवीनस्य [शुद्ध्यर्थं] च यथाविधि ।
खननोद्धारदहनं पूरणं गोनिवासनम् ।।४।।
विप्रोच्छिष्टं च गव्यं च वेद इत्यष्ट शुद्धयः ।
[6]प्रतिकर्मणामेतेषां [7]विधिरेवाधुनोच्यते ।।५।।

[खननोद्धारणदहनपूरणानि]

[8]खातान्खनेत्तन्मन्त्रेण खननं तालमात्रतः ।
प्रासादस्य चतुर्दिक्षु कृत्वा तत्रत्यमृत्तिकाम् ।।६।।
[9]मृत्ति[के]हन मन्त्रेण ग्राहये[10]दवटा[त्ततः] ।
साक्षात्पवित्रमन्त्रेण[11] दर्भान्न्यस्त्वा दहेत्ततः ।।७।।

प्रोक्षयेत्। पश्चाद्भोजनान्ते दक्षिणासहितं ताम्बूलं दत्त्वा कर्ता नमस्कारं कुर्यात्।

'ब्राह्मणान्भोजयेत्तत्र दिनं प्रति दिनं प्रति।
पश्चादुच्छिष्टमुद्वास्य पुनः पुण्याहमाचरेत्।।'

इति विप्रोच्छिष्टविधिः।

ततो वेदशुद्धिः—

ततो ब्राह्मणान् सायं संध्यादिं निर्वर्त्य आलयं प्रवेश्य, ब्रह्मस्थानादिषष्ठाङ्घ्रिमण्डपे वेदं समस्तमृग्वेदादि चतुर्दिक्षु जपं च कारयेत् क्रमात्। ततो ब्राह्मणान्गन्धपुष्पदक्षिणाताम्बूलैः संपूजयेत्। एवं गोपूजादिचतुर्वेदशुद्धिं त्रिदिनं कारयेद्गुरुः। अथवा वारमेकं वा कुर्याद्देशिकोत्तमः।

'पूर्णभोजनमित्युक्तं पूजकस्य विधीयते।।
तत्परार्थप्रियदं स्यात्तत्परस्तु महेश्वरः।
चतुर्वेदिसहस्त्रेभ्यः शिवद्विजो विशेषतः।।
शिवद्विजस्य यद्दानं तद्दानं मम पार्वति।'

(ईशानशिवाचार्यविरचित*शिवलिङ्गप्रतिष्ठाविधौ* पृ० ९०—९२; ९४, ९५)

[3]उदकी—ण; उदक्या=रजस्वला

[4]पुल्कसः=ब्राह्मणात् क्षत्रियायां जातः (*वाचस्पत्ये* पृ० ४३८१)

[5]'खननोद्धारदहनं पूरणं गोनिवासनम्।
विप्रोच्छिष्टं च गव्यं च सप्तैते स्थानशुद्धयः।।'

(*शैवपरिभाषामञ्जर्याम्* ७.४८ उ०, ४९ पू०);

'ब्राह्मणान् भोजयेत्तत्र उच्छिष्टान् परिपूरयेत्।
तृणं संग्राह्य विधिवद्गोभिर्गोष्पदधूलिभिः।।
अग्निना दाहयेत्तत्र पुण्याहप्रोक्षणं तथा।
इत्येवं विधिवत्कृत्वा सर्वज्ञानप्रदायकम्।।'

(*उत्तरकारणे* ३.३०५ उ०—३०७);

'पञ्चधा वा चतुर्धा वा भूरमेध्या विशुद्ध्यति।
दुष्टा द्विधा त्रिधा वापि शुद्ध्यते मलिनैकधा।।
दहनं खननं भूमेरुपलेपनवापने।
पर्जन्यवर्षणं चापि शौचं पञ्चविधं स्मृतम्।
वापनं=मृदन्तरेण पूरणम्'

(*शुद्धितत्त्वे* इति *शब्दकल्पद्रुमे* पञ्चमकाण्डे पृ० १२२);

'भूर्विशुद्ध्यते खातदाहगोक्रमसेचनैः।
लेपादुल्लेखनात्सेकाद्वेश्मसंमार्जनाज्जलात्।।'

(*वामनपुराणे* अध्याय १४);

एतद्विषये *अजिते* ७.२६ श्लोको द्रष्टव्यः।

[6]एतेषां प्रतिक्रर्माणि—ण

[7]विधिमेवा—ण

[8]खातात्परेति—ण; खननमन्त्रः=अस्त्रमन्त्रः (*अजिते* २७.१४४)

[12]**पुरुषेण [तु मन्त्रेण] मृदा वल्मीकजेन च ।**
आपूर्यमाणं [रजसा] गर्तं च पूरयेद्गुरुः ।।८।।

[गोनिवासनम्, तत्र गोपूजा]

[13]**गोष्पदेषु [सवत्सां गां] गोपतिं चानयेद्गुरुः ।**
[14]**तद्गायत्र्या वि[धानेन पूजां कुर्या]दनन्तरम् ।।९।।**

[तदङ्गपूजा]

कारयेदङ्गपूजां [तु ज्ञात्वा चाङ्गाधिदेवताः] ।

[[15]अङ्गाधिदेवताः]

शृङ्गाग्रयोः सर्वतीर्थं जङ्[मस्थावराणि च ।।१०।।
शिरोमध्ये महादेवो ललाटे गणन[ायकः] ।

---

[9]'मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ।'
(*तै० आरण्यके*, १०.१)

[10]दवटे—ण

[11]पवित्रमन्त्रः =पञ्चब्रह्ममन्त्रः ।
प्रमाणम्—ब्रह्मणां तावत्पवित्रत्वकथनं प्रायश्चित्तादौ विनियोगप्रदर्शनार्थम् । यदुक्तं श्रीमत्पौष्करे—
''सर्वेषामेव पापानां संकरे समुपस्थिते ।
पवित्राणि जपेत्पञ्च एकं वा बहुरूपिणम् ।।''
(इति *सार्धत्रिशतिकालोत्तरे* ७.७ पृ० वृत्तौ)

[12]पुरुषेण . . . राते मृदा—ण; पुरुषमन्त्रः =तत्पुरुषमन्त्रः ।

[13]गोप्रदेषु च—ण

[14]वृषगायत्री—'तीक्ष्णशृङ्गाय विद्महे वेदपादाय धीमहि ।
तन्नो वृषः प्रचोदयादिति गायत्रिमुच्चरेत् ।।'
(*अजिते* ४६.५)

[15]'शृङ्गमूले गवां नित्यं ब्रह्मा विष्णुः स्वयं स्थितौ ।
शृङ्गाग्रे सर्वतीर्थानि चराणि स्थावराणि च ।।
शिरोमध्ये महादेवः सर्वदेवपतिः स्थितः ।
ललाटे पार्वतीदेवी नासाग्रे चैव षण्मुखः ।।
कम्बलाश्वतरौ नागौ नासापुटसमाश्रितौ ।
कर्णयोरश्विनीदेवौ नेत्रे च शशिभास्करौ ।।
दन्तेषु वायवः सर्वे जिह्वायां वरुणः स्थितः ।
सरस्वती च हुंकारे यमयक्षौ च गण्डयोः ।।
संध्याद्वयं तथोष्ठौ च ग्रीवायामिन्द्र आश्रितः ।
ऋक्षाणि च ककुद्देशे साध्याश्चोरसि संस्थिताः ।।
चतुष्पात्सकलो धर्मः स्वयं जङ्घासु संस्थितः ।
ऊरुमध्येषु गन्धर्वाः खुरमध्येषु पन्नगाः ।।
खुराणां पश्चिमाग्रे च अप्सराश्च समाश्रिताः ।
रुद्रैकादशकं पृष्ठे वसवः सर्वसन्धिषु ।।
श्रोणीतटस्थाः पितरः स्थिता योनौ च मातरः ।
श्रीरपाने गवां नित्यं नागा लाङ्गूलसंश्रिताः ।।
आदित्यरश्मयो वाले पिण्डीभूता व्यवस्थिताः ।
साक्षाद्गङ्गा च गोमूत्रे गोमये यमुना स्थिता ।।
अष्टाविंशद्देवकोट्यो रोमकूपेषु संस्थिताः ।
ऋषयश्च तथा सर्वे रोमरन्ध्रेषु संस्थिताः ।।
उदरे पृथिवी देवी सशैलवनकानना ।
चत्वारः सागराः पूर्णाः गवां ये च पयोधराः ।।
जठरे गार्हपत्याग्निः हृदये दक्षिणाग्निकः ।
मुखे चाहवनीयोऽग्निः तथा चाङ्गे पतिव्रताः ।।
सन्धिषु क्रतवः सर्वे हयमेधादयः स्थिताः ।
एतच्च कथितं सर्वं गोषु यच्च व्यवस्थितम् ।।'
(*शिवधर्मे* पूर्वे (टि० ३२, ७२) पृ० ९७, ९८); एतद्विषये *अजिते* ३१.२६, २७ श्लोकौ तटीयटिप्पणी तथा *रौरवे* अनुबन्धे ११—१६ पृ० श्लोकास्तदीय-टिप्पणी च द्रष्टव्याः ।

[16][क]ण्ठे चात्मा नासिकायां भूरुहाश्च सरीसृपाः ।।११।।
अश्विनी[17]देवते श्रुत्योर्नेत्रयोरिन्द्र [एव च] ।
मरुतो दन्तदेशेषु जिह्वायां वरुणः स्मृतः ।।१२।।
हुंक[ारे] भारती चैव गण्डयोर्यमराक्षसौ ।
[संध्ये] चोष्ठद्वयोश्चैव [18]ग्रीवायां तारकाधिपः ।।१३।।
खुरमध्ये च गन्धर्वाः खुराग्रे पन्नगास्ततः ।
[तस्य] पश्चादप्सरश्च दशनाडीषु[19] रुद्रकाः ।।१४।।
संधौ [प्राणादि] वायुश्च श्रोण्यां च पितृदेवताः ।
उरस्युमा [20]रमापाने यमुना गोमये ततः ।।१५।।
आदित्यर[श्मयो वाले] मूत्रे देवतरङ्गिणी ।
रोमाग्रे ऋषयश्चैव तुन्दे विश्वंभरा ततः ।।१६।।
पयोधरे [21]चतुःसिंधु[स्तेनै]व[22] मनुना ततः ।
अभिमंत्र्य तृणान्यन्नं दत्त्वाथ गोकुलं हरे ।।१७।।
त्रिरात्रमेकरात्रं वा [23]वासं कृत्वा ततः परम् ।

[विप्रोच्छिष्टम्[24]]

विप्रोच्छिष्टं च वक्ष्यामि शृणुष्व कमलापते ।।१८।।
[शिव]भक्तान्दयासक्तान् द्विजानाहूय पण्डितान् ।
स्नापयित्वा गन्धतैलैः पश्चा[द्वस्त्रा]दिकं ददेत् ।।१९।।
शिवाग्रे [25]मण्डपं गत्वा भूसुरैः सह देशिकः ।

---

[16] कण्ठः =ग्रीवापुरोभागः तत्पर्यायः गल इत्यमरः ।

[17] देवता —ण

[18] ग्रीवा =गलघाटादिसमुदिता । तत्पर्यायः शिरोधरा । घाटा =ग्रीवापश्चाद्भागः । *शब्दकल्पद्रुमे*

[19] नाडिषु —ण; दशनाडयः =*सार्धत्रिशतिकालोत्तरे* १०.३ उ०, ४ पू० श्लोकेषु द्रष्टव्याः ।

[20] त . . . पाने पद्मा च गोमये ततः —ण

[21] चतुःसंख्याकः सिन्धुः चतुःसिन्धुः मध्यमपदलोपिसमासः ।

[22] तेनैव मनुना =तत्तद्देवतामन्त्रेणेत्यर्थः ।

[23] 'वासं कृत्वा' वासं कारयित्वा इत्यर्थोऽवगन्तव्यः । अन्तर्भावितणिजर्थे प्रयुक्तः ।

[24] स्वगृहे देवगृहे वा यत्र शुचिर्देशो लभ्यते तत्र शुचिर्भूत्वा, युग्मान् ब्राह्मणानाहूय, सुप्रक्षालितपाणिपादानप आचमय्य, आसनं कल्पयित्वा, गन्धपुष्पधूपदीपैरलंकृत्य, संकल्पसिद्धिरस्त्विति वाचयित्वा, त्रिवृतान्नेन ब्राह्मणान्संपूज्य, आशिषो वाचयित्वा, प्रदक्षिणनमस्कारं विदधाति । सहस्रात्मानमीश्वरं सहस्रब्राह्मणभोजनेन संपूज्य, एकस्मै स्वाहा द्वाभ्यां स्वाहेति दशानुवाकान् द्वादश ब्राह्मणाः श्राविता भवन्ति । षड्वा ब्राह्मणान् अन्नेन परिविष्य, पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वा, अथ देवयजनोल्लेखनप्रभृति अग्निमुखात् कृत्वा, पक्वाज्जुहोति । विष्णोर्नुकमिति पुरोऽनुवाक्यामनूच्य, विष्णोरराटमसीति याज्यया जुहोति । अथाज्याहुतीरुपजुहोति केशवाय स्वाहेति द्वादशनामधेयैः । स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानाद् विप्रान्भोजयित्वा गुलपायसघृतमिश्रमन्नस्यैव बलिमुपहरति अमुष्मै स्वाहाऽमुष्मै स्वाहेति केशवादिनामधेयैः । पय ओदनं मुद्गौदनं दध्योदनं वा ब्राह्मणेभ्यो निवेद्य वस्त्रयुगानि कमण्डलुमङ्गुलीयकमुपानहौ छत्रं कुण्डले भूमिं च दद्यात् । अन्नशेषमाज्यशेषं पक्वशेषमुभौ जायापती प्राश्नीयाताम् ।' (बोधायनोक्तसहस्रभोजनविधिः)

(*शान्तिकुसुमाकरे* पूर्वभागे पृ० ११९, १२०)

[25] मण्डपे —ण

सकलीकृत्य मतिमान्[25]विघ्नेशं पूजयेत्ततः ।।२०।।
पुण्याहं वाचयित्वाथ तिलतण्डुलशालिभिः ।
स्थण्डिलं कल्पयित्वा च नलिनं तत्र संलिखेत् ।।२१।।
सदाशिवं समभ्यर्च्य साङ्गं सावरणं हरे ।
शिवमन्त्रं शतं जप्त्वा सकृच्च संहितां जपेत् ।।२२।।
ब्रह्मसूक्तं विष्णुसूक्तं रुद्रसूक्तमतः परम् ।
घृतसूक्तं पावमानं श्रीसूक्तं नरसूक्तकम् ।।२३।।
भूसूक्तं पञ्चशान्तिं [च] घो[षशान्ति]मतः परम् ।
एवं क्रमात्सकृज्जप्त्वा पश्चाद्धोमं समाचरेत् ।।२४।।
[27]मण्डपस्य पुरोभागे कारयेल्लक्षणान्वितम् ।
[28]कुण्डं वा स्थण्डिलं वापि तत्राग्निं जनयेद्गुरुः ।।२५।।
तत्र देवं समभ्यर्च्य त[न्म]न्त्रेण हुनेच्छतम् ।
दशांशं संहितां हुत्वा हुनेदेकादिमन्त्रतः ।।२६।।
[29]सर्वस्मेत्यन्तकैर्हुत्वा होमशेषं समापयेत् ।
ततो विप्रान्महाभागाञ्शिवनामसहस्रकैः ।।२७।।
अखण्डितैर्बिल्वपत्रैः पूजयेद्देशिकोत्तमः ।
साज्यं [30]हि व्यञ्जनाद्युक्तमोदनं दापयेत्ततः ।।२८।।
तदन्ते दक्षिणां [31]दद्यात्ताम्बूलैः सह पण्डितः ।
विप्रोच्छिष्टमिति प्रोक्तं'

[गव्यशुद्धिः]

'गव्यशुद्धिमथ शृणु ।।२९।।
पञ्चगव्यं च संस्थाप्य यथोक्तविधिना तथा ।
शुद्धैरुक्थेति मन्त्रेण आलयं प्रोक्षयेद्गुरुः ।।३०।।

[वेदशुद्धिः]

वेदशुद्धिमथो वक्ष्ये शृणुष्व गरुडा[धिप] ।
ब्रह्मस्थानादिषष्ठाङ्घ्रिमण्टपे वेदमन्त्रतः ।।३१।।
ऋग्वेदादि चतुर्दिक्षु [32]जपेयुर्ब्राह्मणाः क्रमात् ।
तदन्ते गन्धपुष्पादीन् ब्राह्मणानां [प्रदा]पयेत् ।।३२।।
एवं [33]चतुर्विधां शुद्धिं त्रिदिनं कारयेद्बुधः ।
अथवा वारमेकं वा कर्तव्यं कमलापते ।।३३।।

[34]इत्यजिताख्ये महातन्त्रे [क्रियापादे] [नवतितमः] स्थानशुद्धिपटलः ।

---

[25]विघ्ना . . . जपेत्ततः —ण; २३-२४ श्लोकयोर्निर्दिष्टानि सूक्तानि याजुषमन्त्ररत्नाकरे द्रष्टव्यानि
[27]मण्डलस्य —ण
[28]कुण्डं च —ण
[29]सर्वस्मैत्यन्त —ण
[30]सव्यञ्जनाद्युक्त —ण
[31]दत्त्वा ताम्बूलैः —ण
[32]जपं च . . . क्रमात् —ण
[33]चतुर्विधं शुद्धं —ण
[34]इत्यजिततन्त्रे स्थानशुद्धिपटलः ।

[एकनवतितमः पटलः]

[तीर्थोत्सवः[1]]

अतः परं प्रवक्ष्यामि तीर्थोत्सवविधिक्रमम् ।

[तीर्थोत्सवफलम्]

सर्वलोकोपकारार्थं सारूप्यपददायकम् ॥१॥
नृपराष्ट्रादि[2]रक्षार्थं सर्वेषां कामसिद्धिदम् ।
ब्रह्महत्यादिपापघ्नं सर्वदोषनिबर्हणम् ॥२॥
आयुरारोग्य[3]मैश्वर्यपुत्रराज्यप्रदायकम् ।

[तीर्थोत्सवकालः]

अयने विषुवे क्रान्तौ ग्रहणे चन्द्रसूर्ययोः ॥३॥
अमायां पौर्णिमायां च वर्षमासान्त्यकेऽपि च ।
वारे तिथौ च नक्षत्रे चान्यकाले शुभे दिने ॥४॥
[4]षष्ठ्यष्टम्योश्चतुर्दश्यामार्द्रायां पुष्यऋक्षके ।
अयनादिषु कालेषु शिवस्योत्सवमाचरेत् ॥५॥

[तीर्थोत्सवदिनानि तत्रोत्तमादिभेदत्रयं च]

नवाहे वाथ सप्ताहे पञ्चाहे त्रिदिनेऽपि वा ।
एकाहे वाथ कर्तव्यं [5]तीर्थोत्सवं सुसंज्ञकम् ॥६॥
आरोहाद्यवरोहान्तमुत्तमं चेति कीर्तितम् ।
आरोहणं विना यत्तु [मध्यमं] चेति कीर्तितम् ॥७॥
तीर्थं वाथ प्रकुर्वीत कन्यसं तत्प्रकीर्तितम् ।
[6]सर्वमासेषु चार्द्रायामुत्सवं तु विधीयते ॥८॥
[7]मृगर्क्षे पुष्यनक्षत्रे पौर्णमास्यां विशेषतः ।
पुष्यर्क्षे केवलं शम्भोः स्नपनं सम्यगाचरेत् ॥९॥
पर्वयुक्ते वियुक्ते वा पुष्ये तीर्थं विधानतः ।

---

[1] अयं पटलः 'आर्-इ. २०३१२ मातृकायां परं दृश्यते ।
[2] रक्षां च—ट
[3] मैश्वर्यं पुत्र—ट
[4] षष्ठ्यष्टम्यां चतु—ट
[5] तीर्थं चोत्सवसंज्ञिकम्—ट
[6] 'चैत्रादिसर्वमासेषु रौद्रर्क्षं तीर्थभं भवेत् ।'
(*अजिते* २७.१४ पू०)
[7] मृगार्के—ट

[उत्सवः]

[6]तीर्थं पूर्वोक्तवत्कृत्वा मन्त्रान्नं तु निवेदयेत् ।।१०।।
अलंकृत्याथ संपूज्य प्रभूतं हविषं ददेत् ।
वृषयाने समारोप्य नानावाद्यसमन्वितम् ।।११।।
छत्रचामरसंयुक्तं गाननाट्यसमन्वितम् ।
[ग्रामप्रदक्षि]णं कृत्वा प्रविशेदालयं गुरुः ।।१२।।
अवरोप्य वृषाद्यानात्स्नपनं सम्यगाचरेत् ।
मूल [बेरे] विशेषेण स्नपनं शान्तिहोमकम् ।।१३।।

[1]इत्यजिताख्ये महातन्त्रे [क्रियापादे] तीर्थोत्सवविधिः [एकनवतितमः] पटलः ।

[6]*अजिते* २७.२९१ उ० — ३०२ श्लोकेषूक्तवत् ।

[1]इत्यजितागमे तीर्थोत्सवपटलः ।

[द्विनवतितमः पटलः]

[[1]सप्तकन्यास्थापनम्]

[सप्तकन्यकाः]

[2]प्रथमा देवकन्या च [3]द्वितीया नागकन्यका ।
तृतीयकन्या गन्धर्वा [4]चतुर्थी [5]ब्राह्मकन्यका ॥१॥
[6]पञ्चमी राजकन्या च [7]षष्ठी तु वैश्यकन्यका ।
[8]सप्तमी शूद्रकन्या च सप्तकन्याः प्रकीर्तिताः ॥२॥

[प्रतिष्ठायोग्यस्थानं तत्फलं च]

भूलोके सप्तकन्यानामन्योन्यं स्नेहसंभवात् ।
वनमध्ये [9]जले तीरे आरामे वृक्षमूलके ॥३॥
[10]वासयन्ति विलासार्थं यक्षादिपरिचारकैः ।
आलये तु [11]प्रतिष्ठाप्य पूजयेत्तु विधानतः ॥४॥
[12]ब्राह्मणादिकवर्णानां वाञ्छितार्थं फलं [13]ददुः ।
कन्यास्मरणमात्रेण ग्रहरोगनिवारणम्[14] ॥५॥

[संक्षेपतः स्थापनक्रियाकथनम् तत्र विशेषनिरूपणं च]

कन्यकास्थापनं वक्ष्ये आगमोक्तविधानतः ।
मण्डपं पूर्ववत्कृत्वा वेदिकुण्डसमन्वितम् ॥६॥
अङ्कुरार्पणपूर्वं चाभिषेकान्तं यथाक्रमम् ।

---

[1]अयं पटलः 'आर्० इ० ३२६०२' इत्यङ्किते तालपत्रकोशे २०, २१ पत्रयोर्दृश्यते। यद्यपि मातृकायां 'कन्यास्थापनम्' इत्येव पटलनाम विद्यते। तथापि सप्तकन्यानां स्थापनस्यात्र दृश्यमानत्वात् 'सप्तकन्यास्थापनम्' इति पटलनाम निर्दिश्यते।

[2]प्रथमं —ऋ

[3]द्वितीयं —ऋ

[4]चतुर्थं —ऋ

[5]'ब्राह्मणकन्यका' इत्यर्थे 'ब्राह्मकन्यका' इति प्रयोगः। ८.१७ श्लोकयोरप्येवं प्रयोगो दृश्यते।

[6]पञ्चमं —ऋ

[7]षष्ठं —ऋ

[8]सप्तमं —ऋ

[9]'जलतीरे' इत्यर्थे 'जले तीरे' इति व्यस्तपदप्रयोगो वृत्तार्थमिति भाति।

[10]'वासयन्ति' इत्यत्र स्वार्थे णिच्, वसन्तीत्यर्थः।

[11]'प्रतिष्ठाप्य' इत्यतः प्राक् 'कन्यकाः' इत्यध्याहृत्य व्याख्येयम्।

[12]ब्राह्मणादिं च वर्णानां —ऋ

[13]दद्युरित्यर्थे 'ददुः' इति प्रयोग इति भाति।

[14]अत्र 'भवेत्' इति शेषः।

सर्वं [च] [१५]पूर्ववत्कुर्याद्विशेषस्त्वधुनोच्यते[१६] ॥७॥
वेदिमध्ये [१७]देवकन्यां नागकन्यां च पूर्वके ।
प्रत्यग्गन्धर्वकन्यां च ब्राह्मकन्यां च दक्षिणे ॥८॥
उत्तरे राजकन्यां च नैर्ऋत्यां वैश्यकन्यकाम् ।
वायव्यां शूद्रकन्यां च ऐशान्यां तु गणेश्वरम् ॥९॥
आग्नेय्यामेव शास्तारं पूजयेत्पूर्वमार्गतः ।

[तत्त्वतत्त्वेश्वरमूर्तिमूर्तीश्वरन्यासः]

त्रिखण्डं कल्पयेत्तत्त्वमात्मविद्याशिवात्मकम् ॥१०॥
आत्मानमन्तरात्मानं परमात्मानमेव हि ।
तत्त्वाना[१८]मधिपान्न्यस्त्वा [१९]मूर्तिमूर्तीश्वरान्न्यसेत् ॥११॥
क्ष्मादि[२०]मूर्तीर्न्यसेत्पूर्वमिन्द्रादि[२१]मूर्तिपांस्तथा ।
पञ्चपक्षे न्यसेद्विद्वान्पृथिव्यादिकमूर्तिकाः[२२] ॥१२॥
निवृत्त्याद्याः पञ्चकला मूर्तिपास्तत्र विन्यसेत् ।
सर्वं पूर्वोक्तवत्कुर्यादग्नौ संतर्प्य पूर्ववत् ॥१३॥
[२३]सप्तकन्यकाध्यानम्—
पीताभां पीतवस्त्रां च पीताभरणभूषिताम् ।
[२४]पद्मलम्बितहस्तां च तां ध्यायेद्देवकन्यकाम् ॥१४॥
श्वेताभां [२५]श्वेतवस्त्रां च श्वेताभरणभूषिताम् ।
किरीटमकुटोपेतां नागकन्यां च भावयेत् ॥१५॥
श्यामाभां श्यामवस्त्रां च श्यामाभरणभूषिताम् ।
पद्मासनस्थितां ध्यायेदेवं [२६]गन्धर्वकन्यकाम् ॥१६॥
शुक्लवर्णां शुक्लवस्त्रां शुक्लाभरणभूषिताम् ।
तुङ्गस्तनां पद्मपीठां तां [२७]ध्यायेद्ब्राह्मकन्यकाम् ॥१७॥
रक्तवर्णां रक्तवस्त्रां रत्नाभरणभूषिताम् ।
करण्डमकुटोपेतां [२८]ध्यायेद्वै राजकन्यकाम् ॥१८॥

---

[१५]'पूर्ववत्कृत्वा' इति मातृकापाठोऽत्र 'पूर्ववत्कुर्याद्' इत्यर्थानुरोधेन शोधितः।
[१६]विशेषमधुनोच्यते—ऋ
[१७]देवकन्या—ऋ
[१८]०मधिपं न्यस्त्वा—ऋ
[१९]मूर्तिमूर्तिश्वरान्—ऋ
[२०]०मूर्तिन्यसेद्—ऋ
[२१]मूर्तिपास्तथा—ऋ
[२२]पृथिव्यादिनि मूर्ति च—ऋ
[२३]'ध्यायेत्करालवदनां तप्तकाञ्चनसंनिभाम् ।
षट्सखीभिश्च संयुक्तां करद्वयविराजिताम् ॥'
(*ध्यानश्लोकाः* (टि० १८९) पृ० ४३)
[२४]पद्मं लम्बितं च (क्रमेण) हस्तयोः यस्याः, तां पद्मलम्बितहस्ताम्; पद्मं लम्बित०—ऋ
[२५]श्वेतवस्त्रं—ऋ
[२६]गन्धर्वकन्यकाः—ऋ
[२७]ध्यायेत् ब्रह्मकन्यकाम्—ऋ
[२८]ध्याययेत् राज०—ऋ;

स्वर्णाभां स्वर्णवस्त्रां च स्वर्णाभरणभूषिताम् ।
स्वर्णकुण्डल[२९]धारिणीं वैश्यकन्यां च भावयेत् ।।१९।।
नीलाभां नीलवस्त्रां च नीलाभरणभूषिताम् ।
नीलालक[सु]वेण्याभां शूद्रकन्यां च भावयेत् ।।२०।।

[३०]इत्यजिताख्ये महातन्त्रे [क्रियापादे]
[द्विनवतितमः] सप्तकन्यास्थापन पटलः ।

---

[२९] ०धारिण्यां —ऋ

[३०] पटलपुष्पिकाभागो मातृकायां न दृश्यते ।

[त्रिनवतितमः पटलः]

[[1]कन्यकापरमेश्वरीस्थापनम्]

[प्रतिमालक्षणम्]

[2]प्रतिमालक्षणं वक्ष्ये [समाहितमनाः शृणु] ।
कन्यकापरमेश्वर्या [महिताया महात्मभिः] ।।१।।
रक्तां पद्मसुधारिणीं शशिमुखीं दिव्याम्बरालंकृतां
वामे लम्बकरां [3]जटामकुटकां सर्वाङ्गभूषोज्ज्वलाम् ।
विद्युत्कोटिसमप्रभां समपदां पद्मासने संस्थितां
[4]ध्यायेच्छंभ्वपदानसक्तमनसां [5]कन्यां परामीश्वरीम् ।।२।।
यद्वा —
द्विनेत्रां द्विभुजां चैव [6]द्विपादाञ्चितनूपुराम् ।
[7]दाडिमीपुष्पसंकाशां पद्मपीठे स्थिरासनाम् ।।३।।
[8]पादुकालक्तसंयुक्तां विद्युत्कोटिसमप्रभाम् ।
[9]शिरश्चक्रजटाचूडां सर्वलक्षणसंयुताम् ।।४।।
दिव्याभरणभूषाढ्यां दिव्यगन्धानुलेपनाम् ।
दिव्यमाल्याम्बरयुतां सर्वावयवशोभिनीम् ।।५।।

---

[1]अयं पटलः 'आर्० इ० ३२६०२' इत्यङ्किते तालपत्रकोशे २१—२४ पत्रेषु दृश्यते; कन्निका०—ऋ

[2]प्रथमश्लोकस्य स्थाने मातृकायां 'प्रतिष्ठालक्षणं वक्ष्ये कन्निकापरमेश्वरीम्' इत्येकमेवार्धं दृश्यते। तत्रानन्तर-श्लोकैः प्रतिमालक्षणस्यैव ध्यानरूपेण प्रतिपाद्य-मानत्वात् 'प्रतिमालक्षणं' इति पाठः शोधितः। तथा 'कन्निकापरमेश्वरीम्' इत्यनन्वितद्वितीयान्तपदार्थ-समन्वयाय तदादावन्ते च पादद्वयपूरणं कृत्वा पाठः शोधितः।

[3]जटां च मकुटां —ऋ

[4]ध्यायेत् शम्भुपदानसक्तमनसां —ऋ; अपदानम्=वृत्तं कर्म प्रशस्तम्। शम्भोरपदाने सक्तं मनो यस्याः, ताम्।

[5]कन्निकापरमेश्वरीम् —ऋ; अत्र छन्दोऽनुरोधात् सप्त-वर्णकपदत्वसंपादनार्थं पाठः शोधितः।

[6]द्विपादौचिञ्चनूपुराम् —ऋ

[7]डाडिमीपुष्प० —ऋ

[8]पादुकया अलक्तेन च संयुक्ता 'पादुकालक्तसंयुक्ता, ताम्' इति विग्रहोऽत्र कार्यः।

[9]शिरश्चक्रजटाचूटां —ऋ; शिरश्चक्रम् —
'शिरश्चक्रसमायुक्तं तस्य लक्षणमुच्यते।
रुद्राङ्गुलविशालं तु तद्धान्वंशेन तद्घनम् ।।
सुवृत्तं चक्रवद्विप्र पद्माकृतिरथापि वा।
शिरश्चक्रविशाले तु सप्तभागैकभागिकम् ।।
शिरश्चक्रस्य नालस्य विस्तारं द्विजसत्तम।
चक्रतारत्रिभागैकं चक्रादाशिरसोत्तमम् ।।
अग्रे ललाटपट्टस्य शिरश्चक्रस्य नालकम्।
गुणाङ्गुले कृकाट्यूर्ध्वे चक्रनालस्थितिर्भवेत् ।।
चक्राद्गुणाङ्गुलं लम्ब्या पुष्पमाला तु मध्यमात्।
सर्वेषामपि देवानां देवीनां ह्येवमाचरेत् ।।'
(*अंशुमत्काश्यपे* ७६.५ उ० —१० पू०)

चन्द्रकान्तिस्मितां दान्तां पूर्णचन्द्रनिभाननाम् ।
तत्त्वत्रय[10]सुविज्ञानां सर्वशास्त्रार्थ[11]संविदाम् ॥६॥
द्वात्रिंशल्लक्षणैर्युक्तां षट्त्रिंशत्तत्त्वसंयुताम् ।
[12]अष्टाङ्गयोगसंयुक्तां त्रैलोक्यसमदर्शिनीम् ॥७॥
[13]वाञ्छितार्थान्प्रसीदन्तीं वैश्यानां कुलदेवताम् ।
[14]त्रिमूर्तिभिर्दत्तवरां सर्वसिद्धि[15]प्रदायिकाम् ॥८॥
कन्यकापरमेश्वर्या[16] नाम लोके [17]प्रसिद्धितम् ।
सव्यहस्ते [18]पद्मधरा वामहस्ते च लम्बनम्[19] ॥९॥
[20]सर्वलोकेष्विति ख्याता कन्यकापरमेश्वरी[21] ।
अष्टकन्यासमायुक्ता [22]तत्तन्नाम तु कथ्यते ॥१०॥

[अष्टकन्यकानां नाम, तल्लक्षणं च]

गगनी घाननी [23]वैश्वी सजीवी पितृरूपिणी ।
[24]सोमसूर्यवती [25]हृष्टिरष्टशक्तिर्यथाक्रमम् ॥११॥
[26]अष्टकन्याः समरूपा द्विभुजाश्च द्विनेत्रकाः ।
अभयालम्बितहस्ताः[27] पूर्वादिपरितः स्थिताः ॥१२॥
सर्वलक्षणसंयुक्ताः सर्वाभरणभूषिताः ।
विचित्रवर्णशोभाढ्याः [28]कन्यकाः परिचारिकाः ॥१३॥
[29]एतादृक्समरूपा च कन्यकापरमेश्वरी ।

---

[10] ०सुविज्ञानिं —ऋ

[11] 'संविदाम्' इत्यत्र 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा दिशा निशा ॥' इत्याबन्तत्वम् ।

[12] 'योगाष्टाङ्गं प्रवक्ष्यामि शृणुष्वैकाग्रमानसः ।
यमनियमासनं च प्राणायामं ततः परम् ॥
प्रत्याहारं च ध्यानं च धारणा च समाधिकम् ।
अष्टाङ्गमिति विज्ञेयं योगिनां योगसाधनम् ॥'
(*सुप्रभेदे* योगपादे ३.५३ उ० —५५ पू०); अस्मिन्विषये *मतङ्गपारमेश्वरे* योगपादे १०६, ७ पू० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[13] वाञ्छितार्थप्रसादज्ञां —ऋ

[14] त्रिमूर्तिना दत्तवरां —ऋ

[15] ०प्रदायकाम् —ऋ; तृतीयश्लोकादारभ्याष्टमश्लोकान्तं विद्यमानानां द्वितीयान्तानां पदानां 'ध्यायेत्' इतिपदमध्याहृत्य तेन सहान्वयः कार्यः ।

[16] कन्निकापरमेश्वरीं —ऋ

[17] प्रसिद्धिताम् —ऋ; प्रसिद्धिरस्य संजाता प्रसिद्धितम् । 'तदस्य संजातं तारकादिभ्य इतच् (५.२.३६)' इति इतच्प्रत्यये रूपमिदं निष्पन्नम् ।

[18] पद्मधारां —ऋ

[19] लम्बनाम् —ऋ; अत्र धरन्तीति शेषः ।

[20] सर्वलोके इति ख्याता —ऋ

[21] कन्निकापरमेश्वरी —ऋ

[22] तत्तन्नामानि कथ्यते —ऋ

[23] वैश्वि सजीवि पितरूपिणी —ऋ

[24] द्वंद्वान्ते श्रूयमाणं पदं प्रत्येकमभिसंबन्ध्यते' इति न्यायेनात्र सोमवती, सूर्यवती इति व्याख्येयम् ।

[25] हृष्टि अष्ट० —ऋ; अष्टसंख्याका शक्तिः =अष्टशक्तिरिति मध्यमपदलोपिसमासः ।

[26] अष्टकन्या समारूपा —ऋ

[27] अभयालम्बनाहस्ता —ऋ

[28] कन्निकापरि० —ऋ

[29] एतादृशसमारूपि कन्निकापर० —ऋ

[कन्यकापरमेश्वरीस्थापनं, तत्र प्रतिष्ठाकालः]

कन्यकापरमेश्वर्याः स्थापनं वक्ष्यतेऽधुना ।।१४।।
सर्वमासेषु कर्तव्यं शुक्लपक्षे शुभे दिने ।

[अङ्कुरार्पणं, रत्नन्यासश्च]

अङ्कुरार्पणपूर्वं तु पालिका नव [30]पञ्च वा ।।१५।।
रत्नन्यासं ततः [31]कुर्यान्नव[32]कोष्ठेषु विन्यसेत् ।
[33]कोष्ठपूजासमायुक्तं वैडूर्यादि क्रमाद्बुधः ।।१६।।
सौवर्णं रजतं ताम्रं स्थापयेन्नवकोष्ठके[34] ।
आवाहाद्युपचारैस्तु पायसादीन्बलिं ददेत् ।।१७।।

[नयनोन्मीलनं प्रतिमाशुद्धिश्च]

नयनोन्मीलनं कृत्वा पुण्याहं वाचयेद्गुरुः ।
कांस्यताम्रादिपात्रेषु[35] घृतक्षौद्रं न्यसेत्क्रमात् ।।१८।।
[36]हेमसूचीहेमदूर्वाः [37]कोट्टलायुधनिर्मिताः ।
कलशस्थापनं कृत्वा पूर्वोक्तविधिना सह ।।१९।।
प्रच्छन्नपटमाहृत्य [38]दिग्दर्शनं यथाक्रमम् ।
दर्पणं दर्शनं [39]कृत्वा कन्यादर्शनमेव च ।।२०।।
[40]गोब्राह्मणजनांश्चापि दर्शयेद्भोगकर्मणि ।
नेत्रमन्त्रं समुच्चार्य शतमष्टोत्तरं हुनेत् ।।२१।।
[41]अग्निमन्त्रेण संयुक्तं [42]सूर्यसोमाभिमन्त्रयेत् ।
[43]प्रतिमां शुद्धतोयेन[44] [45]पञ्चगव्यैश्च सेचयेत् ।।२२।।

---

[30] पञ्चका —ऋ; अत्र 'भवेयुरिति' पदमध्याहृत्य पालिका नव वा पञ्च वाङ्कुरार्पणे भवेयुरिति व्याख्येयम् ।

[31] कृत्वा नव० —ऋ; अत्रार्थानुरोधेन 'कुर्यादिति' पाठः शोधितः ।

[32] ०कोष्टेषु —ऋ

[33] कोष्टपूजा० —ऋ

[34] ०कोष्टके —ऋ

[35] कांस्यपात्रादिताम्रेण —ऋ

[36] हेमसूचिहेम० —ऋ

[37] कोट्टलायुधनिर्मि च —ऋ; अत्र 'टङ्काद्यायुधनिर्मिताः' इति पाठो युक्त इति भाति । अथवा तक्षकस्यायुधमेकं कोट्टलम् अथवा कोट्टापुळि इति द्राविडभाषायां प्रसिद्धम् । तदिदमायुधं स्यात् ।

[38] दिग्दर्शन यथा० —ऋ

[39] कृत्वा =अन्तर्भावितणिजर्थकात्कृञ्धातोः क्त्वाप्रत्ययः । कारयित्वेत्यर्थः; दर्शयित्वेति यावत् ।

[40] गवां कन्यां जनानां च —ऋ; २१ —२३ श्लोकेषु पाठो रौरवोत्तरानुबन्धस्थरेणुकाप्रतिष्ठायाः (८ —१०) श्लोकाननुसृत्य शोधितः ।

[41] अक्षरं मन्त्रसंयुक्तं —ऋ

[42] सूर्यसोमौ +अभि =सूर्यसोमा अभि; ततः संधिरार्षः ।

[43] २२उ० —२३ सार्धश्लोको यद्यपि मातृकायां २५ पूर्वार्धानन्तरं लिखितः, तथापि प्रकरणानुराधादस्मिन्स्थाने निवेशितः ।

[44] प्रतिमाशुद्धितोयेन —ऋ

[45] पञ्चगव्याभिषेचयेत् —ऋ

काषायफलपुष्पैश्च[४६] रत्नस्वर्णोदकैः कुशैः[४७] ।
गन्धतोयाभिषेकेन[४८] शुद्धतोयाभिषेचनम् ॥२३॥

[ग्रामप्रदक्षिणं, जलाधिवासो यागाशालानयनं च]

सर्वालंकारसंयुक्तं ग्रामप्रदक्षिणं कुरु ।
जलाधिवासनं [४९]कुर्याद्यामं यामार्धमेव वा ॥२४॥
गङ्गादि[५०]सर्वनद्यादिविनियोगं[५१] विशेषतः ।
[५२]गुडलवणतीर्थे च [५३]वासयेदवभृथं कुरु ॥२५॥
उद्धृत्य यागाशालां च प्रविशेत्स्नानमाचरेत् ।

[मण्डपकल्पनं तत्र कुण्डकल्पनं च]

षोडशस्तम्भसंयुक्तं [५४]मध्यवेदिं प्रकल्पयेत् ॥२६॥
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ।
योनिकुण्डमथैशान्यां पूर्वोक्तविधिना कुरु ॥२७॥

[मण्डपपूजा]

[५५]सौरपूजां समारभ्य पूर्वोक्तविधिपूर्वकम् ।
[५६]द्वारशक्तेर्वर्धनीषु अष्टशक्तीस्तु पूजयेत् ॥२८॥

[द्वारशक्त्यादिपूजा]

जया च विजया चैव योगिनी मोहिनी तथा ।
माधवी मालिनी चैव [५७]भोगी भोगवती तथा ॥२९॥
[५८]द्वारशक्तीस्तु संपूज्य [५९]गन्धपुष्पाक्षतादिभिः ।
नैर्ऋते वास्तुपूजां च [६०]लक्ष्म्याः पश्चिमपूजनम् ॥३०॥

---

[४६] ०पुष्पं च—ऋ
[४७] ०स्वर्णोदकं कुशम्—ऋ
[४८] अत्र 'सह' इतिपदमध्याहृत्य व्याख्येयम् ।
[४९] ०कृत्वा यामं—ऋ
[५०] ०सर्वधान्यादीन् विनि० —ऋ
[५१] अत्र 'कुर्याद्' इति पदमध्याहृत्य व्याख्येयम् ।
[५२] ०गुडुलवण० —ऋ
[५३] ०वाहयेदवभृतं—ऋ
[५४] मध्ये वेदिं—ऋ; अत्र 'मण्डपं' इति पदमध्याहृत्य 'मण्डपं प्रकल्पयेत्' इति व्याख्येयम् ।
[५५] सौरपूजा—ऋ
[५६] द्वारशक्त्यादिवर्धन्यामष्टशक्त्यादि पूजयेत्—ऋ; अष्टशक्तीः=अनन्तरश्लोके प्रोक्ता जयाद्यष्टशक्तीः ।
[५७] अत्र 'भोगिनी भोगवत्यथ' इति पाठश्चेत् सुष्ठु । रेणुकाप्रतिष्ठायां द्वारशक्तिविषयेऽयं पाठो विद्यते ।
[५८] द्वारशक्त्यादि संपूज्य—ऋ
[५९] गन्धपुष्पादनादिभिः—ऋ
[६०] लक्ष्मीं पश्चिमपूजयेत्—ऋ

वायव्ये विघ्नराजं च ऐशान्यां [61]गुरुपूजनम् ।
दशायुधानि [62]संपाद्य तत्तत्स्थानेषु पूजयेत् ।।३१।।
अस्त्रवर्धनीं संपूज्य ईशाने स्थिरपूजनम् ।

[शयनाधिवासः, कुम्भस्थापनं च]

[63]यवतण्डुलदर्भैश्च अष्टद्रोणैश्च [64]शालिभिः ।।३२।।
वेदिमध्ये तु संस्थाप्य अण्डजाद्युपरि न्यसेत् ।
अण्डजं मुण्डजं चर्म रक्तवस्त्रं च कम्बलम् ।।३३।।
तदूर्ध्वे प्राक्शिरः स्थाप्य वक्त्रेण [65]शाययेत्तु ताम् ।
शिरःस्थाने [66]पूर्णकुम्भं [67]स्थापयेद्वर्धनीं घटान् ।।३४।।
[68]शक्त्यष्टकपरिवृतान् वेदिकोपरि संस्थितान् ।
[69]आवाहनादि संपूज्य धूपदीपोपचारकैः ।।३५।।

[अष्टमङ्गलपूजा[70]]

गजं कुम्भं ध्वजं दीपं चामरं शङ्खपद्मकम् ।
स्वस्तिकं च समायुक्तमष्टमङ्गलमर्चयेत् ।।३६।।

[प्रतिसरबन्धः]

हेमप्रतिसरं बद्ध्वा रक्षामन्त्रपुरःसरम् ।
शान्तिकुम्भाम्भसा प्रोक्ष्य बिम्बरक्षावकुण्ठनम् ।।३७।।

[तत्त्वतत्त्वेश्वरीमूर्तिमूर्तीश्वरीन्यासः]

त्रिखण्डं पूजयेत्तत्र आत्मविद्याशिवात्मकम् ।

---

[61] ०गुरू पूजयेत् —ऋ

[62] संपूज्य —ऋ; दशायुधविषये रौरवोत्तरानुबन्धे १.२४ उ०; २५ पू० श्लोको द्रष्टव्यः ।

[63] यद्यपीदमर्धं मातृकायां ३३तमश्लोकानन्तरं दृश्यते। तथापि प्रकरणानुरोधेनास्मिन्स्थाने संघटितम् ।

[64] शालिना —ऋ

[65] शाययेत् कृता —ऋ; अत्र 'चोर्ध्ववक्त्रेण शाययेत्' इति पाठश्चेत् सुष्ठु ।

[66] अत्र 'पूर्णकुम्भं' इत्यनेन मुख्यकुम्भभूता वर्धन्येवोच्यत इति भाति ।

[67] स्थापयेत् वर्धनीघटम् —ऋ

[68] अष्टशक्त्या परिवृतः वेदिकोपरि संस्थिताम् —ऋ; 'संस्थितान्' इति क्रियाविशेषणम् । संस्थितान्यथा तथा स्थापयेदित्यन्वयः । 'शक्त्यष्टकपरिवृतान्' इत्यनेन ११तमश्लोके प्रोक्ता गगनीत्याद्यष्टकन्या विवक्षिता इति भाति ।

[69] यद्यपीमर्धं मातृकायां ३४तमश्लोकपूर्वार्धानन्तरं दृष्टं, तथापि प्रकरणानुरोधेनात्र संघटितम् ।

[70] अष्टमङ्गलपूजाविषये रौरवोत्तरे (पृ० ११२) रेणुका-प्रतिष्ठायां दृश्यमानः २३ उ० २४ पू० श्लोको द्रष्टव्यः ।

आत्मानमन्तरात्मानं [71]परमात्मानं विन्यसेत् ॥३८॥
चतुर्विंशतितत्त्वानि विन्यसेद्बिम्बमध्यमे ।
खण्डं प्रति विशेषेण मूर्ति[72]मूर्तीश्वरीर्यजेत् ॥३९॥
मूर्ति[73]मूर्तीश्वरीर्न्यस्त्वा होमयेत्तु विशेषतः ।

[होमः]

[74]अग्निकार्योक्तमार्गेण दीपनान्तं समाचरेत् ॥४०॥
तिलतण्डुलमुद्गं च लाजं माषं च होमयेत् ।
गोधूमसर्षपं क्षीरं गुलं क्षौद्रं फलं तथा ॥४१॥
नारिकेलं घृतं चैव मूलमन्त्रैश्च होमयेत् ।
शतं वाथ सहस्रं वा होमयेद् देशिकोत्तमः ॥४२॥
प्रायश्चित्तं ततो हुत्वा पूर्णाहुतिमथाचरेत् ।

[अधिवासानन्तरदिवसकृत्यम्]

रात्रौ जागरणं कृत्वा प्रभाते स्नानमाचरेत् ॥४३॥
मण्डपं पूर्ववत्पूज्य होमयेत्तु यथाक्रमम् ।
नवग्रहादिहोमं च प्रायश्चित्तं विशेषतः ॥४४॥

[प्रतिमास्थापनं, कुम्भाभिषेकश्च]

बिम्बमुद्धृत्य संपूज्य गन्धपुष्पाद्यलंकृतम् ।
ग्रामप्रदक्षिणं कृत्वा यजमानपुरःसरम् ॥४५॥
सुमुहूर्ते सुलग्ने च स्थापयेदासनोपरि ।
मन्त्रन्यासादिकं कृत्वा जीवन्यासमथाचरेत् ॥४६॥
स्पृष्ट्वा जप्त्वा च हुत्वा च पूर्णाहुतिमथाचरेत् ।
कुम्भानुद्धृत्य शिरसा वाद्यघोषसमन्वितम् ॥४७॥
आलयप्रदक्षिणं कृत्वा गर्भगेहं प्रविश्य च ।
अकारादिक्षकारान्त[75]मक्षरं विन्यसेत्क्रमात् ॥४८॥
आवाहनादि संपूज्य अभिषेकं यथाक्रमम्[76] ।
तिलतैलाभिषेकं च पञ्चगव्याभिषेचनम् ॥४९॥

---

[71] परमात्मा च विन्यसेत्—ऋ

[72] ०मूर्तीश्वरीं यजेत्—ऋ

[73] ०मूर्तीश्वरी न्यस्त्वा—ऋ

[74] यद्यपीदमर्धं मातृकायां ३५तमश्लोकोत्तरार्धानन्तरं दृश्यते। तथापि प्रकरणानुरोधेनात्र संघटितम्।

[75] ०मक्षरन्यास विन्यसेत्—ऋ

[76] अत्र 'कुर्याद्' इति शेषपूरणं कृत्वा व्याख्येयम्। एवमुत्तरार्धेऽपि व्याख्येयम्।

क्षीरदधिफलक्षौद्रैः[७७] सुगन्धादिभिः पूजयेत्[७८] ।
वस्त्राभरण[७९]गन्धैश्च पुष्पदामैरलंकुरु[८०] ।।५०।।
धूपदीपं ददेत्पश्चान्नैवेद्यं भक्ष्यभोज्यकैः ।

[आचार्यादिपूजा]

आचार्यं पूजयेत्कर्ता वस्त्रहेमाङ्गुलीयकैः ।।५१।।
[८१]गाश्च दद्याद्विशेषेण दक्षिणां दापयेत्सुधीः ।
यजमानोऽभिषिक्तस्तु[८२] गन्धपुष्पाद्यलंकृतः[८३] ।।५२।।
दीनान्धकृपणादीनां [८४]दानं वित्तानुसारतः ।
एवं यः कुरुते भक्त्या इष्टकामार्थसिद्धये ।।
[सोऽभीष्टसिद्धिं संप्राप्य चिरकालं प्रमोदते] ।।५३।।

इत्यजितागमे प्रतिष्ठातन्त्रे [क्रियापादे] [त्रिनवतितमः]
[८५]कन्यकापरमेश्वरीस्थापन[८६]पटलः ।

---

[७७]क्षीरं दधि फलं क्षौद्रं—ऋ; अत्र 'एतैरभिषेचयेत्' इति पदद्वयमध्याहृत्य व्याख्येयम् ।

[७८]'पूजयेत्' इत्यस्यालंकुर्यादित्यर्थो वाच्यः ।

[७९]०गन्धं च—ऋ

[८०]०रलंकृतम्—ऋ

[८१]गवां दद्या०—ऋ

[८२]यजमानाभिषेकेन—ऋ

[८३]०द्यलंकृतम्—ऋ

[८४]कर्ता वित्तानु०—ऋ; अत्र 'कुर्यात्' इति पदमध्याहृत्य व्याख्येयम् ।

[८५]भक्तप्रतिष्ठाविधौ कन्निका०—ऋ

[८६]०'पटलः' इत्यनन्तरं मातृकायां 'अष्टाविंशतिः । विरिञ्चिपुरं रामस्वामिगुरुक्कल् कुमारन् सुब्रह्मण्य-गुरुक्कल् लिखितम्' इत्यधिकं दृश्यते ।

[चतुर्नवतितमः पटलः]

[जीर्णोद्धारविधिः[1]]

जीर्णोद्धारविधिं वक्ष्ये सर्वसंपत्करं नृणाम् ।

[प्रासादलिङ्गपीठेषु जीर्णतादिसंभवे]

प्रासादलिङ्गपीठानां जीर्णकाले समुद्धरेत्[2] ।।१।।
ग्रामे वा नगरे वापि अरण्ये पर्वतेऽपि वा ।
शिवलिङ्गं विना यत्र तत्र जुष्टं च शत्रुणा ।।२।।
तस्मात्सर्वप्रयत्नेन शिवधामसमन्वितम् ।
कालक्षेपेण जीर्णं हि भिन्नं स्फुटितं पातितम् ।।३।।
पुराकृतं परित्यज्य लिङ्गं पीठं निकेतनम्[3] ।

[प्रासाद गोपुरादौ जीर्णतादिसंभवे]

प्रासादे गोपुरे चैव आलये ध्वजदण्डके ।।४।।
शिखरे चित्रकूटे च नृत्तमण्टपसालके ।
चित्रशालासभास्थाने आस्थानमण्टपे तथा ।।५।।
जीर्णकाले तु तद्भेदे महाजीर्णैः सरन्ध्रकैः ।
शैलजैर्लोहजैश्चैव दारुमृण्मयकेष्टकैः[4] ।।६।।
शिखरे गतमाने च आयतस्तम्भशोभिते ।
चित्रशाले सरन्ध्रे च मकुटकर्णे चोन्नते ।।७।।
पद्मकर्णे गते चैव कुम्भकर्णे च कुब्जके ।
प्रतिमाशोभके चैव सिंहकन्दरपट्टिके ।।८।।
गजाष्टके च नागेषु कर्णकूटकशालके ।
चतुर्द्वारसमायुक्ते चतुर्देवसमावृते[5] ।।९।।
पूर्वदक्षिणशालायां पश्चिमोत्तरशालयोः ।
इन्द्रे च दक्षिणामूर्तौ विष्णुब्रह्मवृषेषु च ।।१०।।
ईशादिस्थूपिपर्यन्ते जगतीकण्ठपट्टिके ।
मध्यस्तम्भसमायुक्ते शृङ्गारभृतशालके ।।११।।
सिंहशाले प्रभाशाले दिक्शाले द्वारशालके ।
उपशाले च कर्णे च मध्यमे मूलपादके ।।१२।।

---

[1]अयं पटलः टि० ५३६ मातृकायां परं दृश्यते।
[2]अत्र तानीति शेषः ।
[3]अत्र नूतनं कुर्यादिति शेषः ।
[4]अत्र निर्मिते इति शेषः ।
[5]अत्र मण्डपे इति शेषः ।

एतेषु भेदे जीर्णे च पुनः कल्पनमाचरेत् ।
पूर्ववत्कल्पने शिल्पशास्त्रमार्गेण निर्मितिः[६] ॥१३॥
यथापूर्वं च तद्रूपं तथैव कल्पयेत्पुनः ।

[मूललिङ्गे बेरादौ च जीर्णतादिसंभवे]

मूललिङ्गे च बेरे च भित्तिचित्रे च पीठके ॥१४॥
इष्टिकाचूर्णसंयुक्ते बिम्बरूपेण कल्पिते ।
गर्भालये च भित्तौ तु पाषाणे छिन्नभिन्नके ॥१५॥
एतेषु भेदे जीर्णे च पूर्ववत्कल्पयेत्पुनः ।

[जीर्णोद्धारे नूतनप्रासादादिकरणानन्तरविधिः]

मूललिङ्गस्य मूर्तिं च दारुलिङ्गे तु योजयेत् ॥१६॥
मण्टपे पूजयेत्तत्र स्थापनावाहनपूर्वकम् ।
अष्टविद्येश्वरकुम्भान्वर्धनीमूलकुम्भकौ ॥१७॥
मूर्तिहोमं ततः कुर्यात्षडध्वाङ्गार्चनं क्रमात् ।
जीवन्याससमायुक्तं शिवमन्त्रेण योजयेत् ॥१८॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।
पञ्चशुद्धिसमोपेतं पञ्चावरणं पूजयेत् ॥१९॥
आवाहनं स्थापनं स्यादर्चनाङ्गं विधीयते ।
दारुलिङ्गे प्रतिष्ठाप्य अभिषेकमथाचरेत् ॥२०॥
यथापूर्वोक्तमार्गेण पूजयेद्दारुलिङ्गकम् ।
मण्डलान्ते तु लिङ्गे च पुनः प्रोक्षणमाचरेत् ॥२१॥
यथाशास्त्रोक्तमार्गेण संप्रोक्षणमथाचरेत् ।
गर्भालये चेदुद्धारः पुनर्निर्माय [७]मण्टपम् ॥२२॥
मण्डलात्पूर्वं संस्थाप्यं राजराष्ट्राभिवृद्धये ।
षण्मासे चेद्वत्सरान्ते राजराष्ट्रं विनश्यति ॥२३॥
मण्डलान्ते प्रतिष्ठाप्यं यथापूर्वविधिक्रमात् ।

[विधिक्रमः]

यागशालां समापाद्य पञ्चाग्निं स्थापयेद्गुरुः ॥२४॥
यथापूर्वं तु नित्यं स्यात्तथा नैमित्तिकं तथा ।
द्विगुणं पूजयेत्तत्र द्विगुणं होममाचरेत् ॥२५॥
ब्राह्मणान्भोजयेत्तत्र जपहोमौ[८] विधिक्रमात् ।

---

[६]अत्र भवेदिति शेषः ।
[७]अत्र 'मण्टपं' इत्यस्य लक्षणया गर्भालयमित्यर्थो व्याख्येय इति भाति ।
[८]अत्र कर्तव्यौ इति शेषः । इतः परं ग्रन्थानुस्यूतिर्न दृश्यते ।

[मुखलिङ्गे तथा बिम्बे चावयवभेदादिसंभवे]

[९]लिङ्गे च प्रतिमायां च बिम्बबाहुकिरीटयोः ।।२६।।
कण्ठे श्रोत्रे च जान्वोश्च पादस्थले द्विहस्तयोः ।
हस्तमूले च अङ्गुल्यौ नास्यामोष्ठे च नेत्रयोः ।।२७।।
कण्ठस्य पृष्ठभागे तु स्तनमध्ये च गुह्यके ।
एतेषु जीर्णे भेदे च पुनर्निर्माय कारयेत्[१०] ।।२८।।

[उत्सवकाले बिम्बे वाहने च भेदादिसंभवे]

एवं महेशबिम्बेषूत्सवोद्धरणकालके ।
वाहनेषु चैव तथा दारुपीठे विमानके ।।२९।।
सूत्रबन्धे च नाराचे ऊर्ध्वबिम्बे च भिन्नके ।
महोत्सवस्य काले वै बिम्बोद्धारणपूर्वकम् ।।३०।।
त्रिरात्रे पञ्चरात्रे वा अथवा सप्तरात्रके ।
निर्माय पूर्ववद् बिम्बं संप्रोक्षणमथाचरेत् ।।३१।।
ध्वजारोहादितीर्थान्तदिनकर्म समाचरेत् ।

[रत्नजादिबिम्बेषु भेदच्छेदादिसंभवे]

रत्नजे हेमजे वापि राजते ताम्र एव च ।।३२।।
लोहजे दारुजे चैव इष्टके बिम्बरूपके[११] ।
प्रायश्चित्तोक्तमार्गेण यथापूर्वं तथा नयेत् ।।३३।।

[सभास्थानवर्णनं सभापतिवर्णनं च]

शैलजस्तम्भकैश्चैव दारुजस्तम्भकैस्तथा[१२] ।
इष्टिकाचूर्णसंयुक्तचित्रशालाभिशोभिते ।।३४।।
चतुर्वेदचतुःस्तम्भैः षट्शास्त्रोपरिस्तम्भकैः[१३] ।
शिवतत्त्वस्वरूपकशिवरूपककूटकैः[१४] ।।३५।।
वर्णपदाध्वतत्त्वाध्वमन्त्राध्वपरिवेष्टिते ।
कलाभुवनरूपैश्च मध्यनृत्तसुशोभिते ।।३६।।
यक्षगन्धर्वसिद्धाद्यैः किन्नरैर्मुनिसेविते ।
त्रयस्त्रिंशत्कोटिदेवैः सेव्यभक्तैः परिवृते ।।३७।।

---

[९] अत्र लिङ्गे इत्यस्य 'मुखलिङ्गे' इत्यर्थो व्याख्येय इति भाति ।

[१०] अत्र संप्रोक्षणमिति शेषः ।

[११] 'भेदच्छेदादिसंभवे' इति शेषः ।

[१२] अत्र 'शोभिते' इति शेषः ।

[१३] अत्र 'युक्ते' इति शेषः ।

[१४] अत्र 'संयुक्ते' इति शेषः ।

तत्तत्स्थानस्थितैर्देवैस्तत्तद्देवैः पृथक् पृथक् ।
भित्तिचित्रेण लिखितैः[१५] शिल्पशास्त्रोक्तमार्गतः ॥३८॥
देवदुन्दिभिघोषैश्च हरिब्रह्मसुतालकैः[१६] ।
शङ्खकाहलझल्लरीवाद्यघोषसमन्विते ॥३९॥
भूतवेतालपैशाचयक्षरक्षःपरिवृते ।
सभास्थाने च बाह्ये च विचित्रैश्च समावृते ॥४०॥
देवघोषब्रह्मघोषवाद्यघोषैश्च शोभिते ।
[१७]हेमवर्षपुष्पवर्षैर्देवासुरनमस्कृते ॥४१॥
द्वारशालाद्वारदेवनन्दिकेश्वरसेविते ।
विघ्नेशस्कन्ददेवेशवृषभबलिपीठके ॥४२॥
ध्वजदण्डादिदिक्पीठे महोत्सवसभापतिम् ।
सभाकूटे स्थितं नृत्तं रत्नसिंहासनस्थितम् ॥४३॥
वामभागस्थितदेवीसमालोकनतत्परम् ।
कुञ्चितपादसंकाशकिङ्किणीजालसंनिभम् ॥४४॥
आनन्दताण्डवं पूर्वं संध्याताण्डवं तत्परम् ।
गौरीताण्डवमेवं तु तथा त्रिपुरताण्डवम् ॥४५॥
कालीताण्डवमेवं तु मुनीनां ताण्डवं तथा ।
सभाताण्डवमेवोक्तमित्येतत्सप्तताण्डवैः ॥४६॥
संयुक्ते च सभामध्ये[१८] देवानां मोक्षदायकम् ।
सकृद्दर्शनमात्रेण शिवसायुज्यदायकम्[१९] ॥४७॥

[सभाकूटादिषु जीर्णताभेदयोः संभवे]

सभाकूटे च शिखरे दण्डपट्टिकाकण्ठके ।
चित्रशाले च प्रतिमाभित्तिचित्रकदैवते ॥४८॥
एतेषु भेदे जीर्णे च पुनः कल्पनमाचरेत् ।

[जीर्णोद्धारविधिक्रमः]

जीर्णोद्धारे च पूर्वं [२०]यत्तद्रूपं प्रतिबिम्बके ॥४९॥
पूर्वस्थाने च ईशाने दक्षिणोत्तरपश्चिमे ।
बालालयं च कर्तव्यं पूर्ववत्कारयेत्क्रमात् ॥५०॥
बालालये च शालायां दारुमृण्मयनिर्मितान् ।
भित्तिचित्रादिदेवेशांस्तत्तत्स्थानेषु निक्षिपेत् ॥५१॥

---

[१५] अत्र 'भूषिते' इति शेषः ।
[१६] अत्र 'समन्विते' इति शेषः ।
[१७] अत्र 'युक्ते' इति शेषः ।
[१८] अत्र 'स्थितम्' इति शेषः ।
[१९] अत्र 'नमामि' इति शेषः ।
[२०] अत्र यदित्यस्थानन्तरं 'रूपं' इति पदमध्याहृत्य व्याख्येयम् ।

देवानावाह्य तत्पूर्वे कुम्भमध्ये नियोजयेत् ।
मूर्तिहोमं ततः कुर्याद्यात्राहोममतः परम्[२१] ॥५२॥
मण्टपे स्थलशुद्धिः स्याद्वास्तुपूजाविधिक्रमात् ।
पुण्याहं वाचयेद्धीमान्पञ्चगव्यं ततः परम्[२२] ॥५३॥
आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः ।
कटकं हेमसूत्रं च कर्णभूषणं धारयेत् ॥५४॥

[बालालये कर्तव्यो नित्यपूजाविधिः]

आत्मशुद्धिस्ततः पूर्वा स्थानशुद्धिर्द्वितीयिका ।
तृतीया द्रव्यशुद्धिः स्याच्चतुर्थं मन्त्रशोधनम् ॥५५॥
पञ्चमी कुम्भशुद्धिः स्यात्षष्ठकं कुम्भपूजनम् ।
सप्तमो देवतावाहो ह्यष्टमश्चार्चनाविधिः ॥५६॥
नवममग्निकार्यं स्याद्दशमं दर्पणार्चनम् ।
एकादशश्चाभिषेको द्वादशं प्रतिमार्चनम् ॥५७॥
त्रयोदशी सभापूजा चतुर्दशो न्यास एव च ।
पञ्चदशं तु नैवेद्यं षोडशश्चोपचारकः ॥५८॥
नटेशशालामध्ये तु रक्षाबन्धनपूर्वकम् ।
पुनःप्रोक्षणपर्यन्तं नित्याग्निहवनं तथा ॥५९॥
प्रायश्चित्तादिहोमश्च बलिदानं विशेषतः ।
आचार्यो दीक्षितै[२३]स्तत्र नित्यपूजां विधाय तु ॥६०॥
पुनःप्रोक्षणपर्यन्तं जपं पूजां[२४] च होमयेत् ।
ब्राह्मणान्भोजयेत्तत्र दक्षिणाभ्यङ्गपूर्वकम् ॥६१॥
उत्तमं मण्डलान्तं स्यान्मध्यमं वत्सरार्धकम् ।
अधमं वत्सरान्तं स्यात्त्रिविधं परिकीर्तितम् ॥६२॥

[संप्रोक्षणविधिः]

जीर्णनिमित्तकुम्भं च पूर्ववत्कल्पयेत्प्रभोः ।
भित्तिचित्रादिदेवेशान्यथापूर्वं प्रकल्पयेत् ॥६३॥
पुनःप्रोक्षणकालश्च मुहूर्ते स्थिरलग्नके ।
सप्ताहे वा त्र्यहे वापि पञ्चाहे वा विधीयते ॥६४॥
मृत्संग्रहणमारभ्य[२५] द्वितीयमङ्कुरार्पणम् ।
तृतीया वास्तुपूजा च चतुर्थं नयनमोचनम् ॥६५॥

---

[२१] अत्र कुर्यादिति शेषः ।
[२२] अत्र प्रोक्षयेदिति शेषः ।
[२३] अत्र सहेति शेषः ।
[२४] अत्र कुर्यादिति शेषः ।
[२५] अत्र 'प्रथमतः' इति पदमध्याहृत्य व्याख्येयमिति भाति ।

पञ्चमी प्रतिमाशुद्धिः षष्ठकं मण्टपार्चनम् ।
सप्तममग्निकार्यं च अष्टमं मन्त्रपूजनम् ॥६६॥
नवमी दर्पणपूजा दशमं चाभिषेचनम् ।
एकादशो जीवन्यासो द्वादशं मूर्तिपूजनम् ॥६७॥
त्रयोदशं [26]षडध्वाङ्गं नैवेद्यकं चतुर्दशम् ।
पञ्चदशे परीवारमर्चयेद्देशिकोत्तमः ॥६८॥
उपचारः षोडशः स्यात्प्रोक्षणे विधिरुच्यते ।
यथाशास्त्रोक्तमार्गेण पुनरावर्तनं[27] प्रभोः ॥६९॥
आचार्यं पूजयेत्तत्र सर्वालंकारशोभितम् ।
दशनिष्केण हेम्ना च ताम्बूलं दापयेद्गुरोः ॥७०॥
आचार्यमनसस्तृप्तिर्देवसान्निध्यकारणम् ।

[चित्रकूटप्रतिष्ठाफलं, सभापतिप्रतिष्ठाफलं च]

चित्रकूटं प्रतिष्ठाप्य शिवलोके महीयते ॥७१॥
सभापतिं प्रतिष्ठाप्य स पुण्यां गतिमाप्नुयात् ।
सजीवः सन्स धन्यश्च मोक्षपदं स वीक्षते ॥७२॥
तृणकोटिशतैर्वापि मृण्मयदशकोटिकैः ।
इष्टिकाशतकोट्या वा शिलया दारुणाथवा ॥७३॥
चित्रकूटस्य निर्माणं युक्त्या भक्त्या च कल्पयेत् ।
शिवालयसहस्रे च मुक्तिक्षेत्रे प्रतिष्ठिते ॥७४॥
यत्फलं तत्कोटिगुणितं चित्रकूटस्य निर्मितौ ।
तस्य दर्शनमात्रेण शिवलोके महीयते ॥७५॥
सभापतौ प्रतिष्ठिते सर्वे देवाः प्रतिष्ठिताः ।
सकृद्दर्शनमात्रेण कोटियज्ञफलं लभेत् ॥७६॥
नटेशाय च ताम्बूलं यो दद्यान्नृत्तमूर्तये ।
कल्पकोटिसहस्रं स्याच्छिवलोके महीयते ॥७७॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे] जीर्णोद्धारविधिः
[चतुर्नवतितमः] पटलः ।

---

[26] अत्र 'षडध्वाङ्गकल्पनम्' इत्यर्थो व्याख्येयः ।

[27] अत्र कुर्यादित्यध्याहृत्य पुनरावर्तनाख्यं संप्रोक्षणं कुर्यादिति व्याख्येयमिति भाति ।

[पञ्चनवतितमः पटलः]

[कलाकर्षणविधिः[१]]

अथातः संप्रवक्ष्यामि विधानं गुरुपुङ्गव ।
कलाकर्षणके सम्यक् शृणु श्रद्धापुरःसरम् ।।१।।

[शाक्तं शैवमिति कलाकर्षणे भेदद्वयम्]

कलाकर्षणमेतत्तु शाक्तं शैवमिति द्विधा ।
दूतिका च तथा प्राणप्रतिष्ठाद्यैश्च शाक्तके ।।२।।
दूतिकाप्रकृतिशक्तित्वात् प्राणस्य जडधर्मतः ।
चिदात्मनि परेशे तु कल्पना नोपपद्यते ।।३।।
अकारं च उकारं च मकारं बिन्दुमेव च ।
अर्धचन्द्रनिरोधी च नादं चेति त्रयं गुरो ।।४।।
नादनामकलायां तु संमितं नादमुच्यते ।
कलापञ्चकमित्युक्तमेतदाकर्षयेद्गुरो ।।५।।
एवमाहुः कलाकर्षं शैवस्य गुरुसत्तम ।
कलातीतं शिवं साक्षादावाहनविधानतः ।।६।।
आवाहयेद्विशेषेण कलाकर्ष उदीरितः ।
शाक्तं शाक्तेन कर्तव्यं शैवं शैवेन कारयेत् ।।७।।
अन्यथा कुरुते मोहाद्यदि तत्कर्म निष्फलम् ।

[शिवमूर्तिभेदाः]

शिवस्य नवधा मूर्तिर्भाव्यते गुरुसत्तम ।।८।।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
बिन्दुर्नादश्च शक्तिश्च शिवश्चेति प्रकीर्तिता ।।९।।
एषा नवविधा मूर्तिस्त्रिधा भोगादिकैर्मता ।
ब्रह्मा विष्णुश्च रुद्रश्च भोगाङ्गत्वेन कीर्तिता ।।१०।।
अधिकाराङ्गकावेतौ महेश्वरसदाशिवौ ।
बिन्दुर्नादः शक्तिशिवौ लयाङ्गत्वेन कीर्तितौ ।।११।।

[कलाकर्षणप्रकारः]

कुम्भे चावाहयेच्छम्भोस्तनुं भोगलयाह्वयाम् ।
आवाहयेत्तथा वह्नौ तनुं चैवाधिकारिकाम् ।।१२।।

---

[१] अयं पटलः *शिवप्रतिष्ठाकारिकायां* २३१, २३२ पृष्ठयोर्दृश्यते ।

[कलाकर्षणकालः]

कलाकर्षणमेतत्तु निशीथे चोत्तमं स्मृतम् ।
दशनाड्यां मध्यमं स्यादधमं पञ्चनाडिके ।।
दिवा चापररात्रे वाकर्षणं नैव कारयेत् ।।१३।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] कलाकर्षणविधिः
[पञ्चनवतितमः] पटलः

[षण्णवतितमः पटलः]

[शक्तिकलाकर्षणविधिः[1]]

[चतुर्विधशक्तीनां नामनिरूपणं तासां स्वरूपकथनं च]

शक्तिश्चतुर्विधा ज्ञेया तासां भेदं शृणुष्व वै ।
स्वतन्त्रा केवला शक्तिः सहजा गुरुपुङ्गव ॥१॥
मिश्रा चेति महेशस्य शक्तिर्भिन्ना चतुर्विधा ।
परमेश्वरस्य या शक्तिर्द्विधा संपरिकीर्तिता ॥२॥
स्वशक्तिः प्रथमा प्रोक्ता द्वितीया तु परिग्रहा ।
शिवादभिन्ना या शक्तिः सा स्वशक्तिः प्रकीर्तिता ॥३॥
कार्यमात्रे प्रक्लृप्ता या सा शक्तिर्वै परिग्रहा ।
शिवालयेषु सर्वत्र शिवलिङ्गेन वै सह ॥४॥
प्रतिष्ठिता पराशक्तिः स्वशक्तिरिति संमता ।
शिवालये प्रधानायाः शक्तेरन्यत्र वै गुरो ॥५॥
सा परिग्रहशक्तिः स्यादावृतौ स्थापिता गुरो ।
स्वतन्त्रा केवला चैव सहजेति प्रकीर्तिता ॥६॥
शक्तयस्तिस्र आख्याताः स्वशक्तेर्भेदतो गुरो ।
मिश्रेति कथिता शक्तिः परिग्रह इतीरिता ॥७॥

[स्वप्रधानस्वाङ्गशक्त्योरालयकल्पनस्थानादिकथनम्]

स्वतन्त्राख्या तु या शक्तिर्द्विधा सा परिकीर्तिता ।
स्वप्रधानं तथा स्वाङ्गमिति देशिकसत्तम ॥८॥
प्राकारस्य तृतीयस्य द्वितीयस्याथवा गुरो ।
प्राकारगोपुरैर्युक्तं दिव्यमण्टपसंवृतम् ॥९॥
शिखरेण ध्वजेनापि बलिपीठेन संयुतम् ।
वृषेण सहितं रम्यं देव्यागारं सलक्षणम् ॥१०॥
तस्मिन्प्रतिष्ठिता शक्तिः स्वप्रधाना भवेद्गुरो ।
शिवागारपुरद्वारं यस्यां दिशि प्रकल्पितम् ॥११॥
तादृक् चैव भवेत्तत्र देव्यागारस्य संनिधिः ।
पूर्वाभिमुखमीशस्य संनिधानं भवेद्यदि ॥१२॥
संनिधिः पश्चिमे वा स्याद् वामे दक्षिणतोऽपि वा ।
स्वप्रधानपराशक्तेर्नियमो नास्ति संनिधौ ॥१३॥

---

[1] अयं पटलः *शिवप्रतिष्ठाकारिकायां* ३८१-३८४ पृष्ठेषु दृश्यते ।

पश्चिमाभिमुखमीशस्य संनिधिर्यदि देशिक ।
स्वप्रधानपराशक्तेः संनिधिः पूर्वके भवेत् ।।१४।।
स्वप्रधानमिव स्वाङ्गमीशागारे विशेषतः ।
स्वाङ्गस्यापि तथा शक्तेः प्रधानस्येव देशिक ।।१५।।
पृथगालयसंयुक्तं वृषभध्वजसंयुतम् ।
परिवारविहीनं च भवेत्प्रासादमुत्तमम् ।।१६।।

[सहजशक्तेरालयकल्पनस्थानादिकथनम्]

सहजायाः पराशक्तेर्गर्भावरणतोऽथवा ।
अन्तर्हारे महेशस्य संनिधौ पुरतो दिशि ।।१७।।
दक्षिणाभिमुखसान्निध्यमुन्मुखीकृत्य देशिकः ।
शिवागारे वामपार्श्वे पुरोऽगारं प्रकल्पयेत् ।।१८।।

[केवलशक्तेरालयकल्पनस्थानादिकथनम्]

केवलायास्तथा शक्तेः शिवागारात्पृथक् स्थले ।
प्राकाराद् बाह्यदेशे तु कल्पयेदालयं शुभम् ।।१९।।

[मिश्रशक्तेरालयकल्पनस्थानादिकथनम्]

गोपुरध्वजसंयुक्तं प्रासादावरणैर्युतम् ।
मिश्रायास्तु पराशक्तेः शिवागारे गुरूत्तम ।।२०।।
स्वशक्तेरन्यतोऽगारं प्रावृतौ कारयेद्वरम् ।
परिग्रहशक्तिरेषा स्यादीशस्य गुरुसत्तम ।।२१।।
शिवालयादन्यदेशे पृथक्प्रासादसंयुतम् ।
गोपुरध्वजसंयुक्तं प्राकारैर्मण्टपैर्वृतम् ।।२२।।
सिंहेन वाथ हंसेन युतं लक्षणसंयुतम् ।
बलिपीठेन सहितं कारयेदालयं शुभम् ।।२३।।
शिवालयस्थापितायाः शक्तेर्न पृथगुत्सवः ।
स्वप्रधानं तथा स्वाङ्गं पृथगुत्सवमर्हति ।।२४।।

[स्वप्रधान-स्वाङ्ग-सहज-केवलाख्यानां चतुःशक्तीनामावरणपूजा]

एतासां शिवशक्तीनामावृतेः पूजनं शृणु ।
स्वप्रधाना तथा स्वाङ्गा सहजा केवला तथा ।।२५।।
एतासां शिवशक्तीनां प्रथमावरणे गुरो ।
परामादिं तथैवेच्छां क्रियां ज्ञानाभिधां तथा ।।२६।।
पञ्चशक्तीः समावाह्य पूजां कुर्याद्विशेषतः ।
हृदयादिषडङ्गानि विद्यादेहं च देशिक ।।२७।।

नेत्रन्यासं च विन्यस्य पूजयेद् गुरुपुङ्गव ।
धारिकाद्यास्तथा शक्तीर्द्वितीयावरणे तथा ।।२८।।
ध्यात्वावाह्य ततो पूजां कारयेद् गुरुपुङ्गव ।
तृतीयावरणे पूजां कुर्याद्वामादिका अनु ।।२९।।
शचीमुख्यास्तथा शक्तीः समावाह्य यथाविधि ।
चतुर्थावरणे पूजां कारयेद्गुरुसत्तम ।।३०।।
शचीमुखानां शक्तीनामायुधानि यथाविधि ।
पञ्चमावरणे ध्यात्वा पूजां कुर्याद् गुरूत्तम ।।३१।।

[मिश्राख्यशक्तेरावरणपूजा]

मिश्रा शक्तिर्यदि भवेत्प्रथमावरणे तदा ।
उमाम्बिकामुखाः शक्तीर्हृदयादीनि सादरम् ।।३२।।
विद्यादेहं च नेत्रं च न्यसन्पूजां समाचरेत् ।
वामादिकास्तथा शक्तीः पूजयेद् द्वितयावृतौ ।।३३।।
क्षोभिण्यादीस्तथा शक्तीः समावाह्य यथाविधि ।
तृतीयावरणे पूजां कारयेद् गुरुसत्तम ।।३४।।
शचीमुख्यास्तथावाह्य शक्तीश्चैव यथाविधि ।
चतुर्थावरणे ह्यर्चां कारयेद् गुरुवल्लभ ।।३५।।
शचीमुखानां शक्तीनामायुधानि क्रमेण च
पञ्चमावरणे ध्यात्वा पूजां वै परिकल्पयेत् ।।३६।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] शक्तिकलाकर्षणविधिः
[षण्णवतितमः] पटलः ।

[सप्तनवतितमः पटलः]

[गौर्युत्सवविधिः[1]]

[गौर्युत्सवफलम्]

गौर्युत्सवविधिं वक्ष्ये नृपराष्ट्रविवर्धनम् ।
सर्वसंपत्समृद्ध्यर्थं यशोवृद्धिकरं शुभम्[2] ।।१।।

[उत्सवशब्दार्थवर्णनम्]

सवो दुःख इति ख्यातः सर्वसंपन्निवारकः ।
उद्गतस्तु सवो यस्मात्तस्मादुत्सव उच्यते ।।२।।
उत्सवस्त्रिविधः प्रोक्तः स नित्यादिसमन्वितः ।
एतेषां शैववत्कालः केतु[3]ताडनमङ्कुरम् ।।३।।

[ध्वजदण्डप्रमाणादि]

ध्वजदण्डप्रमाणं च शिखरादिप्रमाणकम् ।
आदिशक्तिरधोभागं[4] तत्त्रिकोणसमन्वितम् ।।४।।
रसकोणसमायुक्तमादिशक्तेरतः परम् ।
चतुरश्रसमायुक्तमूर्ध्वं तच्छक्तिरूपकम् ।।५।।
स्कन्धत्रयसमायुक्तं चोपदण्डसमन्वितम् ।
प्रमाणमुक्तवत्कुर्याद्दण्डभागे च शैववत्[5] ।।६।।

[ध्वजपटवर्णनं तत्र कृष्णसारादिलेखनं च]

अणुशक्तिः पटः प्रोक्तः सरोमदर्भमाल्यकः ।
पटस्य दीर्घतारं च शैववत्समुदाहृतम् ।।७।।
एकैकाङ्गुलहीनं तु कुर्यात्तच्छिल्पवित्तमः ।
तत्पटे मध्यभागे तु कृष्णसारं लिखेत्क्रमात् ।।८।।

---

[1] अयं पटलः (टि० ४९५, टि० १००९) मातृकयोर्दृश्यते ।

[2] उत्सवशब्दस्यात्र क्लीबे प्रयोगः । अत्र विषये *रौरवे* क्रियापादे १८ पटले ७.८ पू० श्लोकटिप्पणी द्रष्टव्या ।

[3] अत्र ताडनशब्देन लक्षणया भेरीताडनमुच्यते । ध्वजारोहणपूर्वकं भेरीताडनं कृत्वा ततोऽङ्कुरार्पणं कर्तव्यमिति व्याख्येयमिति भाति ।

[4] भागशब्दस्यात्र क्लीबे प्रयोगः ।

[5] अत्रोत्सवः शिवोत्सवविधौ प्रोक्तवत् कार्यम् इति व्याख्येयम् ।

इतरं शैववल्लिख्य चोत्पलं तु समालिखेत् ।
कृष्णसारः शक्तिराद्या शान्ता चेति वरा शुभा ।।९।।

[कृष्णसारगायत्री]

तिग्मशृङ्गाय विद्महे वेदपादाय धीमहि ।
तन्नः सारः प्रचोदयात् ।
तीक्ष्णकर्णाय विद्महे वेदपादाय धीमहि ।
तन्न एणः प्रचोदयात् ।
तत्पटे मध्यभागे तु वृषभं वा समालिखेत् ।

[लोकेशाः]

शान्तश्च सत्कलश्चैव सारश्च तरुणस्तथा ।।१०।।
साक्षी च समिधश्चैव सद्गिमिश्च ततो वरः ।
लोकेशांस्तान्विशेषेण[६] परिवारकमुच्यते ।।११।।

[परिवारिकाः]

कामी गमीका मोही च नीली बाला विचारिणी ।
दामी चैव तथा चेता परिवारकमुच्यते ।।१२।।
कृष्णसारश्च वृषभो विष्णुमूर्ती प्रकीर्तिते ।
मोक्षावतारे [७]कृष्णस्तु वृषः सुखावतारके ।।१३।।
शम्भुवास्तुप्रदेशे चेच्छक्त्युत्सवं कृतं यदि ।
वृषभं चैव सिंहं च मतिमान्विलिखेत्पटे ।।१४।।
शक्त्यग्रे संस्थितमुक्षं विलिखेत्तदा मन्त्रवित् ।
सुस्निग्धं कृष्णसारं च लिखेत्तु देशिकाज्ञया ।।१५।।
शक्तेर्वास्तुप्रदेशे चेत्तच्छक्तेरुत्सवे कृते ।
वृषभं वाथ सिंहं वा पटे सम्यग्लिखेद्बुधः ।।१६।।

[वृषगायत्री]

तीक्ष्णशृङ्गाय विद्महे वेदपादाय धीमहि ।
तन्नो वृषः प्रचोदयात् ।

---

[६]अत्र पूजयेदिति शेषः ।

[७]अत्र कृष्णशब्देन कृष्णसारो लक्षणयाभिधीयते । भीमसेनविषये भीम इतिवत् ।

[वृषशक्तिः]

वृषस्य शक्तिराख्याता वृषाणी चेति निर्मला ।

[वृषपरिवारकाः]

वीरोक्षो निर्मलोक्षश्च विजयोक्षस्तथैव च ॥१७॥
शूरोक्षको द्रुतोक्षश्च सरोक्षः सम्यगुक्षकः ।
नयोक्षो ह्येवं नामानि वृषस्य परिवारकाः ॥१८॥

[वृषाणीगायत्री]

शान्तिकर्णायै विद्महे वेदपादायै धीमहि ।
तन्नो वृषाणी प्रचोदयात् ।

[वृषाणीपरिवारिकाः]

दुग्धा सारा रसा कामा दात्री दामा सुखावहा ।
तथैव विजयी चैव वृषाण्याः परिवारिकाः ॥१९॥

[सिंहगायत्री]

तीव्रकर्णाय विद्महे धर्मपिण्डाय धीमहि ।
तन्नः सिंहः प्रचोदयात् ।

[सिंहशक्तिः]

हास्यसिंहीति विख्याता सिंहस्य शक्तिरुत्तमा ।

[सिंहपरिवारकाः]

क्वणत्सिंहो लसत्सिंहो नारसिंहस्तथैव च ॥२०॥
नदत्सिंहो नादसिंहो द्रुतसिंहोऽरसिंहकः ।
कामसिंहस्तु वै ह्येते सिंहस्य परिवारकाः ॥२१॥

[सिंहशक्तिगायत्री]

वरश्रोत्रायै विद्महे धर्मपुष्ट्यै च धीमहि ।
तन्नः सिंही प्रचोदयात् ।

[सिंहशक्तिपरिवारिकाः]

कोपा च मारुता मर्त्या तारकी सर्वमोहिनी ।
क्रुद्धी कुहू वली वक्री सिंह्यष्टपरिवारिकाः ॥२२॥

[अत्रैव प्रकारान्तरम्]

वारा च वकुली माली मायी सोमी विलासिनी ।
मुदती कुन्ददन्ती च सिंह्यष्टपरिवारकाः ॥२३॥

[उत्सवदिनानि]

ग्रहाहे धात्वहे वाथ बाणाहे त्रिदिने[३]ऽथवा ।
मोक्षाहे वाथ कर्तव्यमुत्सवं विधिपूर्वकम् ॥२४॥
मन्वहे वाथ रन्ध्राहे; ध्वजारोहणमारभेत् ।

[ध्वजदण्डयोग्यवृक्षाः]

चम्पकं चन्दनं चैव खदिरं सरलं तु वा ॥२५॥
असनं वैणवं चैव मधूकं क्रमुकं तथा ।
अशोकं चैव बिल्वं च कीर्तिताः केतुदारवः ॥२६॥
स्थानानि शैववत्प्रोक्तमेवं वै केतुदारुणाम् ।

[ध्वजारोपणम्]

तत्पटं रज्जुना युक्तं रोपयेच्छैवकर्मवित् ॥२७॥
भेर्युत्सवं ततः कृत्वा उत्सवं पुनरारभेत् ।

[होमः]

योनिकुण्डं चतुर्दिक्षु तुर्याश्रं त्वीशगोचरे ॥२८॥
यागेशस्थापनं कृत्वा स्वस्वमन्त्रैश्च होमयेत् ।
सायं प्रातर्बलिं दत्त्वा अन्त्ये चोत्सवमारभेत् २९॥

[बलिविधिः]

अन्नशक्तिसमायुक्तं शक्तिमूर्तिसमायुतम् ।
रुद्राङ्गुलसमायुक्तमुत्तमं तत्प्रकीर्तितम् ॥३०॥
अक्ष्यङ्गुलविहीनं तु मध्यमस्याधमस्य तु ।
प्रतिमालक्षणोक्तेन कारयेच्छक्तिरूपकम् ॥३१॥

एतदुत्सेधमानेन चान्नशक्तिस्वरूपकम् ।
[६]बलिरूपं ततो ध्यात्वा यजेच्छक्तिं तु मध्यमे ।।३२।।
द्विनेत्रं द्विभुजं शान्तं कोटिकोटिसमुज्ज्वलम् ।
ब्रह्मादीशानपर्यन्तं ब्रह्मदेव्यादिदेवताः ।।३३।।
क्षीरान्नमाज्यसंयुक्तमावाहनबलिं ददेत् ।
पूर्वे गणेशशक्तिः स्यात्पिशाची स्याद्द्वितीयके ।।३४।।
तृतीये वह्निदेवी स्याच्छर्वशक्तिश्चतुर्थके ।
पञ्चमे भूतशक्तिः स्याद्वल्लीरात्रं तु षष्ठकम् ।।३५।।
सप्तमे ऋषिदेवः स्यान्नागेशी वसुरात्रके ।
इन्द्राणिरात्रं नवमं भूमिदेवी ततः परम् ।।३६।।
एकादशे च रुद्राणी तत्परे तु [९]परानिशा ।
मुद्गान्नं पनसं चैव दाडिमं घृतसंयुतम् ।।३७।।
प्रथमेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
सर्षपान्नं घृतोपेतं कदलीफलसंयुतम् ।।३८।।
द्वितीयेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
पायसान्नं गुलोपेतं सघृतं लाजसंयुतम् ।।३९।।
तृतीयेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
तिलान्नं घृतसंयुक्तं गोदध्ना तु समन्वितम् ।।४०।।
चतुर्थेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
हरिद्रान्नं घृतोपेतं पिशाचफलसंयुतम् ।।४१।।
पञ्चमेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
गुलोदनं घृतोपेतं नालिकेरसमन्वितम् ।।४२।।
षष्ठे चाहनि दद्याच्च वल्लीमन्त्रमनुस्मरन् ।
गुलोदनं घृतोपेतं पयसा च परिप्लुतम् ।।४३।।
सप्तमेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
शुद्धान्नमाज्यसंयुक्तमिक्षुदण्डसमन्वितम् ।।४४।।
अष्टमेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
रक्तान्नं मधुसंयुक्तमपूपं घृतसंयुतम् ।।४५।।
नवमेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
घृतान्नं गुलसंयुक्तं कदलीफलसंयुतम् ।।४६।।
दशमेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
मध्वन्नमाज्यसंयुक्तं कृसरापूपसंयुतम् ।।४७।।
एकादशाहे दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।
शाल्यन्नं च घृतोपेतं तिलचूर्णसमन्वितम् ।।४८।।
द्वादशेऽहनि दद्याच्च तच्छक्तिमन्त्रमुच्चरन् ।

---

[६]बलिदेवतारूपमित्यर्थः ।

[९]पराशक्तेर्निशेत्यर्थः ।

प्रणवादि चतुर्थ्यन्तं स्वनामपदमध्यमम् ।।४९।।
स्वाहान्तं बलिनिर्देशे सर्वेभ्य इति निर्दिशेत् ।

[बलिप्रमाणम्]

श्रेष्ठं करतलं प्रोक्तं मध्यमं मुष्टिमात्रकम् ५०।।
कन्यसमक्षमात्रं स्यादेवमेवं बलिं क्षिपेत् ।

[बलिदानकाले दातव्यानि पुष्पाणि]

करवीरं पद्मपुष्पं पुन्नागं पाटली तथा ।।५१।।
द्रोणपुष्पं च मन्दारं नंद्यावर्तं च पट्टिका ।
मालती मल्लिका चैवमुत्पलं केतकी तथा ।।५२।।
एवमेवं विशेषेण द्वादशे द्वादशं तथा ।

[वाहनानि]

प्रथमे चार्कपत्रं च कोलके हंसवाहनम् ।।५३।।
शूले हरिणवाहं च चतुर्थे कृष्णसारकम् ।
पञ्चमे स्यात्पुष्पधाम गवयो रस एव च ।।५४।।
पाताले शेषमध्ये तु लोकेशे व्याघ्रवाहनम् ।
ग्रह एव रथः प्रोक्तो दशाहे तीर्थमाचरेत् ।।५५।।

[चतुर्थपञ्चमषष्ठदिनेषु कर्तव्या विशेषाः]

भोगशक्त्या विरोधश्च चतुर्थदिवसे ततः ।
प्रवृत्तो बहुविधः [10]कार्यं संधानद्रव्यहेतुना ।।५६।।
संधिकर्म च कर्तव्यं ततो भूतदिने क्रमात् ।
देवदास्येति तत्प्रोक्तं भोगशक्त्यनुसारिणा ।।५७।।
तैर्विरोधः प्रकर्तव्यश्चारु भक्तसमन्वितम् ।
व्यञ्जनं भोजनं भज्य भक्तद्रव्यं क्रमाद्ददेत् ।।५८।।
षष्ठे क्षपणसंहारं परमेश्वरवत्कृतम्[11] ।
सर्वभक्तजनैर्युक्तं मुकुलाञ्जलिभिस्ततः ।।५९।।
गरुकर्दमजं कार्यं मारशत्रुं भजेद्वरम् ।
मुकुलाञ्जलिभिश्चैव सर्वभक्तजनैस्ततः ।।६०।।

कर्तव्यः ।

[10]अत्र 'यथा भवेत्तथा' इत्यध्याहृत्य कार्यमित्यनेनान्वयः [11]अत्र भावयेदिति शेषः ।

मासर्क्षाणि च सर्वाणि शंकरोक्तवदाचरेत् ।
यत्रास्ति मन्त्रभेदश्च क्रियाभेदो न विद्यते ।।६१।।
बलिं दद्यात्क्रमेणैव शंकरस्य च वास्तुनि ।
अथवा विधिवद्धीमान्न तु ग्रामादिभेदतः ।।६२।।
अनुक्तं चेद्भवेत्किंचिच्छंकरोक्तवदाचरेत् ।
विपरीतं न कर्तव्यं कृतं चेत्कर्तृनाशनम् ।।६३।।
तद्दोषशमनार्थाय महाशान्तिं समाचरेत् ।
एवमुक्तक्रमेणैव पुनरुत्सवमाचरेत् ।।६४।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] गौर्युत्सवविधिः
[सप्तनवतितमः] पटलः ।

[अष्टनवतितमः पटलः]

[यागशालालक्षणविधिः[1]]

[यागशालाशब्दनिर्वचनम्]

अथातः संप्रवक्ष्यामि यागशालाविधिं शृणु ।
यकारो यजनार्थश्च गमनार्थो गकारकः ।।१।।
शकारश्च सुखार्थः स्याल्लकारो लय इत्यपि ।
सुखार्थं च लयस्थाने गमनार्थं सुयागकः ।।२।।
यानयागमयी यागशालेति परिगीयते ।
यागार्थं मण्टपं कुर्याद्धर्म्याग्रे वाथ पार्श्वयोः ।।३।।

[यागशालास्थानानि]

पञ्चप्राकारसंयुक्ते चालये च मखालयम् ।
गर्भावरणके चापि अन्तर्हारेऽथवाचरेत् ।।४।।
अथवा मध्यहारे चाप्यग्रयोः पार्श्वयोरपि ।
यागशालां प्रकल्पेत तद्बाह्यं परिवर्जयेत् ।।५।।
व्यामोहात्कुरुते पुंसां राजराष्ट्रस्य दोषकृत् ।
तस्मात्सर्वप्रयत्नेन उक्तमार्गेण कारयेत् ।।६।।
चतुःप्राकारके चापि त्रिप्राकारे त्वथापि वा ।
द्विप्राकारके त्वथवाप्येकप्राकारकेऽपि च ।।७।।
प्राकाराभ्यन्तरे चैव यागशालां प्रकल्पयेत् ।
प्राकारबाह्यदेशे तु यागशालां न कारयेत् ।।८।।
ईशाने चैन्द्रदेशे च कुबेरे च मखालयः ।
उत्तमश्चेति विख्यातो वारुणो मध्यमो भवेत् ।।९।।
आग्नेये नैर्ऋते वायावधमश्च प्रकीर्तितः ।
अधमाच्चाधमः प्रोक्तो दक्षिणे तु प्रदेशके ।।१०।।
अथवा रम्यदेशे तु यागशालां प्रकल्पयेत् ।

[मानं द्विविधम्]

उत्तमं पीठमानं चाप्याचार्यहस्तमानकम् ।।११।।
मध्यमं चेति विख्यातं हस्तमानं द्विधा मतम् ।

---

[1] अयं पटलः शिवप्रतिष्ठाकारिकायां ५१६—५४४ पृष्ठेषु दृश्यते ।

[त्रिविधमङ्गुलम्]

मानं मात्राङ्गुलं चैव देहलब्धं त्रिधा भवेत् ॥१२॥
अङ्गुलत्रितयं प्रोक्तं मानायामं यवाष्टकम् ।
यवोदरेण गुणितं मानाङ्गुलमिति स्मृतम् ॥१३॥
आचार्यदक्षिणे हस्ते कनिष्ठाङ्गुलिमध्यके ।
पर्वादूर्ध्वं समारभ्य तत्पर्वाग्रान्तकं क्रमात् ॥१४॥
आयामं च यथाप्रोक्तं मात्राङ्गुलमिति स्मृतम् ।
मध्यमाङ्गुलिमध्ये तु पर्वदीर्घस्य तारकम् ॥१५॥
आयामं च यथाप्रोक्तं मात्राङ्गुलमथापि वा ।
यल्लब्धोत्सेधमानं तु चतुर्विंशच्छतं कुरु ॥१६॥
तेष्वेकभागमङ्गुल्यं देहलब्धमिति स्मृतम् ।

[मानाङ्गुलेन करणीयानि]

प्रासादं मण्डपं चैव विमानं गोपुरादिकम् ॥१७॥
प्राकारस्तम्भशालां च नदीं चाध्वानदुर्गकम् ।
ग्रामादीनां तटाकं च मानाङ्गुलेन कारयेत् ॥१८॥

[मात्राङ्गुलेन करणीयानि]

यागोपकरणं चैव यागशालादिकं क्रमात् ।
मात्राङ्गुलेन कर्तव्यं मानाङ्गुलं न कारयेत् ॥१९॥
मात्राङ्गुलचतुर्विंशत्यङ्गुलं हस्तमानकम् ।
तेन हस्तेन कर्तव्यं यागशालादिकं चरेत् ॥२०॥
मूलपीठस्य नाहं च त्रिविधं च विभाजितम् ।
तेष्वेकभागहस्तं च उत्तमं चेति कीर्तितम् ॥२१॥
आचार्यहस्तमानं च मध्यमं समुदाहृतम् ।
आचार्यदक्षिणे हस्ते मध्याङ्गुलिसमाग्रके ॥२२॥
सप्तविंशत्यङ्गुलं च मध्यमं हस्तमानकम् ।
आचार्यदक्षिणे हस्ते मध्यमाङ्गुलिमध्यमे ॥२३॥
पर्वदीर्घायतं चाथाप्यधमं हस्तमानकम् ।
चतुर्विंशत्यङ्गुलाच्च न्यूनहस्तं न कारयेत् ॥२४॥
सकलादीनि बेराणि बाललिङ्गानि वै शृणु ।
देहलब्धेन कर्तव्यमन्यथा राष्ट्रनाशनम् ॥२५॥
तस्मात्सर्वप्रयत्नेन उक्तमार्गेण कारयेत् ।

[यागशालालक्षणम्]

यागशालां प्रवक्ष्यामि आयामं च शृणुष्व वै ॥२६॥

पञ्चाशद्धस्तमानं च उत्तमं चेति कीर्तितम् ।
चत्वारिंशन्मध्यमं च अधमं त्रिंशतिस्तथा ॥२७॥
अधमाच्चाधमं प्रोक्तं पञ्चादशकरं तथा ।
अथवा द्वादशं हस्तं तस्मान्न्यूनं न कारयेत् ॥२८॥
एकादशत्रिहस्तान्तं प्रायश्चित्ते च संग्रहेत् ।

[भूमिपरीक्षा, तत्र शुभाशुभलक्षणदर्शनम्]

हस्तमात्रं खनेद्भूमिं वीक्षेत देशिकोत्तमः ॥२९॥
सुवर्णं रजतं ताम्ररत्नाद्यादि च द्रव्यकम् ।
वापीकूपतटाकं चापीष्टिका शैलमेव च ॥३०॥
दृश्यं चेच्छुभदं प्रोक्तमशुभं च ततः शृणु ।
वृश्चिकं सर्पमण्डूकं वल्मीकं तु पिपीलिका ॥३१॥
अङ्गारनखभस्मानि रोमास्थिचर्मकं तथा ।
अन्येषां विषजन्तूनां दर्शनं चाशुभावहम् ॥३२॥
वृश्चिकादीन्परित्यज्य पुनर्वास्तुं समाचरेत् ।
अन्यथा शिवतुल्योऽपि विघ्नैरेवाभिभूयते ॥३३॥

[रत्नन्यासः]

मृत्तिकां पूरयेत्पश्चान्नव रत्नानि विन्यसेत् ।
तद्वेद्याश्चाप्यधोभागे रत्नन्यासं च कारयेत् ॥३४॥
समीकृत्योपलिप्याथ दर्पणोदरसंनिभम् ।
तस्योर्ध्वे सूत्रविन्यासमुत्तमादिक्रमेण तु ॥३५॥

[पञ्चविधसूत्रभेदाः, तन्मानं च]

शालापञ्चविधं सूत्रं रुद्रं विष्णुं च ब्रह्मकम् ।
मनुं रविं च पञ्चैतत्सूत्रभेदाः प्रकीर्तिताः ॥३६॥
चतुश्चत्वारिंशतिश्च रुद्रसूत्रमिति स्मृतम् ।
चतुस्त्रिंशतिसूत्रं च विष्णुसूत्रं प्रकीर्तितम् ॥३७॥
चतुर्विंशतिसूत्रं च ब्रह्मसूत्रमुदाहृतम् ।
चतुर्दशं च सूत्रं च मनुसूत्रं प्रकीर्तितम् ॥३८॥
द्वादशं रविसूत्रं च पञ्चसूत्रं क्रमात्कुरु ।

[रुद्रसूत्रपदक्रमः]

अथातः संप्रवक्ष्यामि रुद्रसूत्रपदक्रमम् ॥३९॥
मध्ये शिवपदं प्रोक्तमेकं वै चतुरश्रकम् ।
परितस्तस्य चाष्टासु पदान्यष्टौ प्रकल्पयेत् ॥४०॥

एतच्छक्तिपदं नाम समदीर्घायतं शुभम् ।
परितस्तस्य वै कुर्यात्पदानां षोडशं गुरो ।।४१।।
एतद्बिन्दुपदं नाम्ना प्रोक्तं देशिकसत्तम ।
परितश्च ततः कुर्यात्पदानां च चतुर्वसु ।।४३।।
सदाशिवपदं प्रोक्तं शृणु तत्परितस्तथा ।
चत्वारिंशत्पदेनैव माहेश्वरमुदाहृतम् ।।४४।।
अष्टाचत्वारिंशकैश्च पूर्ववत्परितः कृतैः ।
अष्टविद्येश्वराणां च पदं प्रोक्तं गुरूत्तम ।।४५।।
षट्पञ्चाशत्पदं प्रोक्तमैशं वै परिकीर्तितम् ।
चतुष्षष्टिपदैस्तद्वच्छुद्धमायापदं स्मृतम् ।।४६।।
द्विसप्ततिपदैश्चैव मान्त्रं पदमुदाहृतम् ।
तथाशीत्या पदेनैव वर्णपदमुदीरितम् ।।४७।।
अष्टाशीतिपदेनैव पदं गणपदं स्मृतम् ।
षण्णवत्या पदैः कुर्यात्प्रकृतेः पदमुत्तमम् ।।४८।।
तथा कालपदं प्रोक्तं चतुर्भिः सहितं शतम् ।
कलापदं ततः कुर्याच्छतं द्वादशसंयुतम् ।।४९।।
विद्यापदं ततः कुर्याच्छतं विंशतिमिश्रितम् ।
पदं च वैष्णवं प्रोक्तमष्टाविंशतिकैः शतम् ।।५०।।
विद्यापदं ततः कुर्याच्छतं विंशति मिश्रितम् ।
पदं च वैष्णवं प्रोक्तमष्टा विंशतिकैः शतम् ।।५०।।
ततोऽविद्यापदं प्रोक्तं पदैः षट्त्रिंशकैः शतम् ।
चतुश्चत्वारिंशकैश्च शतं च विकृतिर्भवेत् ।।५१।।
द्विपञ्चाशैः शतं ब्राह्मं पदं प्रोक्तं गुरूत्तम ।
षष्ट्या शतैः पदैः कुर्याद् दैवं देशिकसत्तम ।।५२।।
अष्टषष्ट्या शतं प्रोक्तं राक्षसं गुरुसत्तम ।

[शिवपदादिषु कल्पनीयानि]

प्रधानकुम्भस्थानं हि पदं शैवं समीरितम् ।।५३।।
शक्तेः पदे न्यसेत्पद्मं नादस्य परितः पदे ।
चतुष्कोणे चतुस्तम्भान् निखनेच्छेषमध्यके ।।५४।।
अष्टमङ्गलकान्यन्तःसंचारं द्वादशे पदे ।
बिन्दोः सदाशिवस्यापि पदयोरन्तरे गुरो ।।५५।।
कुण्डं कुर्याद् विधानेन रुचिरं परितः क्रमात् ।
माहेश्वरपदे चैव बहिःसंचारमीरितम् ।।५६।।
अष्टविद्येश्वरस्याथ पदेषु परितो गुरो ।
पदमात्रप्रमाणेन पदार्धमिततोऽथवा ।।५७।।
भित्तिं प्रकल्पयेत्सम्यगुत्सेधाद् द्वादशाङ्गुलम् ।
पूर्वादिषु दिक्षु मध्ये पदं च द्विपदं क्रमात् ।।५८।।

[स्तम्भकल्पनम्]

द्वारार्थं कल्पयेत्तत्र चतुष्कोणेषु देशिक ।
निखनेच्चतुरः स्तम्भान् तथा द्वारेषु पार्श्वतः ॥५९॥
द्विद्वि स्थूणांश्च निखनेत् सुदृढं च मनोहरम् ।
द्वादशानामधस्तेषां स्तम्भानां च ततः शृणु ॥६०॥

[द्वारविधिः]

दशहस्तसमुत्सेधमुत्तमं परिकीर्तितम् ।
सप्तहस्तं मध्यमं स्यादधमं पञ्चहस्तकम् ॥६१॥
सप्तहस्तमितोत्सेधं तदर्धायामसंयुतम् ।
द्वारमुत्तममेतद्वै रुचिरं साधु कल्पितम् ॥६२॥
पञ्चहस्तमितोत्सेधं तदर्धायामसंमितम् ।
द्वारेषु मध्यमं द्वारं तदन्यदधमं भवेत् ॥६३॥
द्वारस्योर्ध्वे द्विपार्श्वेऽपि द्विशूलं परिकल्पयेत् ।
द्वारस्योर्ध्वे तथा मध्ये शूलमेकं प्रकल्पयेत् ॥६४॥
अष्टविद्येश्वरान्कुम्भान्स्थापयेद् भित्तिमस्तके ।
भित्तौ च परितश्चाष्टविद्येश्वरघटान्न्यसेत् ॥६५॥
तथा चैशं पदं चान्तःसंचारपदमीरितम् ।
शुद्धमायापदस्यापि तथा मन्त्रपदस्य च ॥६६॥
मध्ये कुण्डं विधानेन कारयेद् गुरुपुङ्गव ।
ततो वर्णपदं प्रोक्तं बहिःसंचारसंज्ञिकम् ॥६७॥
तृतीयावृतिके भित्तिं पदं गणमुदाहृतम् ।
पदमात्रं पदार्धं वा भित्तिं सम्यक्प्रकल्पयेत् ॥६८॥
द्वादशाङ्गुलकोत्सेधां रुचिरां दृढसंधिकम् ।
पूर्वादिषु चतुर्दिक्षु मध्ये च द्विपदं क्रमात् ॥६९॥
द्वारार्थं कल्पयेद्वाथ चतुष्कोणेषु देशिक ।

[स्तम्भस्थापनप्रकारः]

निखनेच्चतुरः स्तम्भान् द्वारेषु च द्विपार्श्वयोः ॥७०॥
द्विद्विस्तम्भांश्च निखनेद् दृढं च रुचिरं गुरो ।
द्वितीयावृतिकोणस्थस्तम्भे रेखाश्रके पदे ॥७१॥
स्थापयेत्स्तम्भमेकैकं क्रमादष्टौ गुरूत्तम ।
तृतीयावरणे चेत्थं स्तम्भानां विंशतिर्मता ॥७२॥

[नंद्याद्यष्टकुम्भस्थापनम्]

भित्तौ च परितश्चाष्टघटान् संस्थापयेद्गुरो ।

नंद्यादीनष्टकान् स्थाप्य भितिं च परितः क्रमात् ।।७३।।
प्रकृतेः पदमन्तस्थसंचारपदमीरितम् ।
कालाख्यस्य पदस्यापि कलायाश्चैव मध्यतः ।।७४।।
यथाविधि समुद्दिष्टं कुण्डं साधु प्रकल्पयेत् ।
विद्यापदं ततश्चैव बहिःसंचारमीरितम् ।।७५।।
ततो विष्णुपदं प्रोक्तं चतुर्थावृतिभित्तिकम् ।
पूर्ववच्चतुरः स्तम्भान् चतुष्कोणेषु कारयेत् ।।७६।।
पूर्ववद् द्वाररेखायां कुर्यात्तु द्विपदं तथा ।
तृतीयावरणस्थानं कोणमध्यमवर्तिनाम् ।।७७।।
स्तम्भांश्च निखनेत्स्तम्भांस्तथा रेखापदे दृढम् ।
इन्द्रादीशान्तकलशान् परितो भित्तिमस्तके ।।७८।।
तत्तद्दिक्षु न्यसेदेवं क्रमेण गुरुसत्तम ।
ईशानदक्षिणस्तम्भपार्श्वे ब्रह्मघटं न्यसेत् ।।७९।।
निर्ऋत्युत्तरतः स्तम्भपार्श्वे विष्णुघटं न्यसेत् ।
ततोऽविद्यापदं प्रोक्तमन्तःसंचारसंज्ञया ।।८०।।
विकृतेर्ब्रह्मणश्चैव मध्ये कुण्डं प्रकल्पयेत् ।
ततो दैवं पदं प्रोक्तं बहिःसंचारमानतः ।।८१।।
ततो वै राक्षसं प्रोक्तं पञ्चमावृतिभित्तिकम् ।
पूर्ववद् द्वाररेखायां द्वारदेशं प्रकल्पयेत् ।।८२
चतुःकोणे चतुःस्तम्भान्निखनेद् दृढमेव हि ।
पूर्वोक्तवच्चतुर्द्वारि द्विर्द्विःस्तम्भं प्रकल्पयेत् ।।८३।।
चतुर्थावरणे खातः स्तम्भरेखानुसारतः ।
षट्षट्स्तम्भान् चतुःपार्श्वे निखनेद् गुरुपुङ्गव ।।८४।।
पुरन्दरादिविष्ण्वन्तदेवानामायुधानि हि ।
तत्तद्रेखानुसारेण पञ्चमावृतिभित्तिके ।।८५।।
स्तम्भपार्श्वे स्थापयेत सादरं गुरुसत्तम ।
प्रथमावरणे प्रोक्तं स्तम्भानां तु चतुष्टयम् ।।८६।।
द्वितीयावरणं चैव द्वादशस्तम्भमण्डितम् ।
तृतीयावरणं चैव विंशतिस्तम्भसंकुलम् ।।८७।।
चतुर्थावरणस्थानामष्टाविंशतिरीरिता ।
पञ्चमावरणं प्रोक्तं षट्त्रिंशत्स्तम्भमण्डितम् ।।८८।।
पदे चैकोनपञ्चाशदष्टशतसहस्रके ।
पञ्चावरणसंयुक्तं स्तम्भानां शतमीरितम् ।।८९।।
रुद्रसूत्रक्रमं प्रोक्तं विष्णुसूत्रं ततः शृणु ।

[विष्णुसूत्रविधिः]

विष्णुसूत्रे क्रमात्प्रोक्तं पदानां तु वसुद्वयम् ।।९०।।
शैवं पदं समारभ्य सर्वं विष्णुपदान्ततः ।

पूर्वोक्तवत् प्रकर्तव्यं पदावरणपूर्वकम् ।।९१।।
रुद्रसूत्राद् विष्णुसूत्रे भेदमेतद् निबोधताम् ।
अविद्यादिराक्षसान्तैः पञ्चमावरणं पुरा ।।९२
रुद्रसूत्रे किल प्रोक्तं विष्णुसूत्रे न कल्पयेत् ।
चतुष्टयैरावरणैः कल्पितं वैष्णवं गुरो ।।९३।।
पञ्चमावृतिके प्रोक्तान्यायुधानि क्रमेण हि ।
तत्तद्देवघटांश्चैव युक्त्या स्थाने प्रकल्पयेत् ।।९४।।
चतुष्पष्टिः समाख्याताः स्तम्भानामत्र देशिक ।
त्रयस्त्रिंशत्पदं प्रोक्तं दशसप्तावृतौ पदे ।।९५।।
नवाशीतिसहस्रं च पदमत्र समीरितम् ।
विष्णुसूत्रक्रमं प्रोक्तं ब्रह्मसूत्रं ततः शृणु ।।९६।।

[ब्रह्मसूत्रविधिः]

ब्रह्मसूत्रे किल प्रोक्तं पदमेकादशं गुरो ।
शैवं पदं समारभ्य सर्वं गणपदावधि ।।९७।।
पूर्वोक्तविधिना कुर्यात् पदावरणपूर्वकम् ।
विष्णुसूत्राद् ब्रह्मसूत्रे भेदं शृणु गुरूत्तम ।।९८।।
प्रकृतेः पदमारभ्य ततो विष्णुपदान्तकम् ।
चतुर्थावरणं प्रोक्तं ब्रह्मसूत्रे न कारयेत् ।।९९।।
आवृतित्रितयाद् ब्रह्मसूत्रमेतत्प्रकीर्तितम् ।
पूर्ववत्कल्पिते चात्रावरणेऽथ तृतीयके ।।१००।।
विष्णुसूत्रान्तिमे न्यस्तं सर्वमावरणे गुरो ।
तृतीयावरणे ह्येवं तत्तद्देशानुसारतः ।।१०१।।
स्तम्भपार्श्वे भित्तिशीर्षे स्थापयेद्धरिमीश्वरम् ।
नवविंशतिभिश्चैव तथा पञ्चशतैः पदैः ।।१०२।।
त्रयस्त्रिंशत्स्तम्भकैश्च त्रयोविंशतिभिः पदैः ।
द्वादशावृतिपादैश्च ब्रह्मसूत्रं प्रकीर्तितम् ।।१०३।।

[मनुसूत्रविधिः]

मनुसूत्रविधिं वक्ष्ये सादरं शृणु देशिक ।
मानवे हि किल प्रोक्तं पदानां सप्तकं क्रमात् ।।१०४।।
शैवं पदं समारभ्य विद्येश्वरपदावधि ।
सर्वं पूर्वोक्तविधिना कार्यं देशिकसत्तम ।।१०५।।
आवृतेर्द्वितयं प्रोक्तं मध्ये शैवपदे तथा ।
प्रधानकुम्भं विन्यस्य तस्य वामे तु वर्धनीम् ।।१०६।।
बाह्ये शक्तिपदे चैव विद्येश्वरघटानपि ।
ब्रह्मसूत्रोक्तविधिना तृतीयेऽथ निवेशयेत् ।।१०७।।

शस्त्रेन्द्रनन्दिकुम्भादिस्थापनं कारयेदिह ।
तत्तद्देशे क्रमेणैव तत्तद्दक्षिणपार्श्वतः ।।१०८।।

[मनुसूत्रे प्रकारान्तरम्]

अथवान्यप्रकारेण मनुसूत्रविधिं शृणु ।
चतुर्दशसमं सूत्रं प्रागुदक्च विलेखयेत् ।।१०९।।
मध्ये नवपदां वेदीं तद्बाह्ये षोडशं पदम् ।।११०।।
तद्बाह्ये च चतुर्विंशत्पदं चेति प्रकीर्तितम् ।
द्वात्रिंशच्च पदं प्रोक्तं वेदिकायास्तृतीयके ।।१११।।
चत्वारिंशत्पदं प्रोक्तं वेदिकायाश्चतुर्थके ।
अष्टाचत्वारिंशतिश्च पञ्चमावरणे पदम् ।।११२।।
पञ्चमावरणस्थानं परितो भित्तिकं कुरु ।
द्वारार्थं त्रिपदं त्यज्य चतुर्दिक्षु विशेषतः ।।११३।।
चतुर्दिक्षु चतुर्द्वारं कल्पयेत्तादृशं गुरो ।
शेषं भित्त्याकृतिः प्रोक्तं पदायामं प्रकल्पयेत् ।।११४।।
पदार्धमथवा कुर्याद् वस्त्राङ्गुलसमुन्नतिम् ।
वेदिभित्त्यन्तराले तु तुरीयपदमध्यके ।।११५।।
कुण्डानि परितः कुर्यात्पूर्वोक्तविधिमार्गतः ।
किंचिदीशानमाश्रित्य प्रधानं च विशेषतः ।।११६।।
वामभागे नवाङ्गुल्यं त्यक्त्वा कुण्डस्य कल्पनम् ।
अष्टाश्रं च तथा प्रोक्तमीशानाश्रितदृष्टिकम् ।।११७।।
ईशानदृष्टिहीनं चेत् कर्ता कर्म च नश्यति ।
तस्मात्सर्वप्रयत्नेन उक्तमार्गेण कारयेत् ।।११८।।
मध्ये शिवपदं विद्याद् विद्येशादीन् ततः परम् ।
तद्बाह्ये चैशकं प्रोक्तं शुद्धमायापदं ततः ।।११९।।
तद्बाह्ये च गणं विद्यात् ततो दैवपदं क्रमात् ।
अशुद्धाख्ये तथा मायापदे बाह्ये प्रकीर्तितम् ।।१२०।।
मध्ये च शिवकुम्भं च वर्धनीं तस्य वामके ।
तद्बाह्ये चाष्टविद्येशान् स्थापयेद् गुरुसत्तम ।।१२१।।
ततश्चैशे पदे कुर्याच्चतुष्कोणेषु सादरम् ।
चतुःस्तम्भमिदं ह्यन्तःसंचारपदनामकम् ।।१२२।।
शुद्धमायापदस्यापि तथा गणपदस्य च ।
मध्ये कुण्डानि वै कुर्यादागमोद्दिष्टमार्गतः ।।१२३।।
तद्बाह्ये बाह्यसंचारपदं चेति प्रकीर्तितम् ।
अशुद्धे द्वादशस्तम्भं तोरणं च घटस्थितिः ।।१२४।।
मनुसूत्रमिदं प्रोक्तं रविसूत्रं ततः शृणु ।

[रविसूत्रविधिः]

अथातः संप्रवक्ष्यामि रविसूत्रं विधानतः ॥१२५॥
विधानं यागशालायाः शृणु देशिकपुङ्गव ।
प्रागुदक्समरेखां वै कुर्याद् द्वादशसूत्रकम् ॥१२६॥
एकविंशाधिकशतं पदमत्र समीहितम् ।
मध्ये ब्रह्मपदं चैकं प्रोक्तं तत्परितो ह्यथ ॥१२७॥
अष्टविद्येश्वरस्थानं पदान्यष्टौ हि दैविकम् ।
पैशाचं च ततः प्रोक्तं पदं षोडशसंमितम् ॥१२८॥
ततो मानुषमाख्यातं चतुर्विंशतिकैः पदैः ।
ततोऽशुद्धं मायिकं च द्वात्रिंशत्पदमण्डितम् ॥१२९॥
चत्वारिंशत्पदं प्रोक्तं राक्षसे तु पदे गुरो ।
ब्राह्मे तु कल्पयेत्कुम्भं प्रधानं वर्धनीं तथा ॥१३०॥
तद्बाह्ये चाष्टविद्येशान्स्थापयेद्दैविके पदे ।
पैशाचे तु ततो बाह्ये चान्तःसंचारसंज्ञके ॥१३१॥
चतुःस्तम्भांश्चतुष्कोणे कारयेच्चाष्टमङ्गलम् ।
ततो मानुष्यके चैव पदे कुण्डानि कल्पयेत् ॥१३२॥
प्रतिष्ठादौ क्रियाकाले मानुषं च परित्यजेत् ।
ततोऽशुद्धं पदं प्रोक्तं बहिःसंचारनामतः ॥१३३॥
राक्षसे तु पदे कुर्यात्परितो भित्तिमण्डलम् ।
पदस्यार्धप्रमाणेन परितः सादरेण हि ॥१३४॥
सप्ताङ्गुलसमुत्सेधां भित्तिं साधु निवेशयेत् ।
पूर्वादिषु चतुर्दिक्षु मध्ये सार्धद्वयं पदम् ॥१३५॥
द्वारार्थं कल्पयेत्तत्र चतुष्कोणेषु सादरम् ।
निखनेच्चतुरः स्तम्भांस्तथा द्वारेषु पार्श्वतः ॥१३६॥
द्विद्विस्तम्भांश्च निखनेद्दृढं देशिकपुङ्गव ।
नंद्यादीन्यष्टकुम्भांश्च इन्द्रादीनि तथैव च ॥१३७॥
वज्राद्यायुधजालानि भित्त्यूर्ध्वे परितः क्रमात् ।
स्थापयेत्तु विशेषेण पूजयित्वा यथाविधि ॥१३८॥
षोडशस्तम्भसंयुक्तं षड्भागसहितं तथा ।
रविसूत्रं समाख्यातं कल्पयेद्देशिकोत्तम ॥१३९॥
स्थापने शान्तिहोमे च प्रायश्चित्ते तथैव च ।
दीक्षायामुत्सवे चैव रविसूत्रं प्रकीर्तितम् ॥१४०॥
प्रतिष्ठादिषु कालेषु रविसूत्रं विवर्जयेत् ।
अन्यथा कुरुते मोहाद्राजा राष्ट्रस्य दोषकृत् ॥१४१॥
तस्मात्सर्वप्रयत्नेन उक्तमार्गेण कारयेत् ।

[उत्तमादिभेदेन चतुर्विधकुण्डसंख्या]

त्रयस्त्रिंशतिकुण्डानि चोत्तमं चेति कीर्तितम् ॥१४२॥

पञ्चविंशतिकुण्डानि मध्यमं च प्रकीर्तितम् ।
दशसप्त च कुण्डान्यप्यधमं च प्रकीर्तितम् ॥१४३॥
अधमाधममेवोक्तं नवकुण्डस्य कल्पने ।

[रुद्रादिपञ्चसूत्रक्रमेण निर्मितयागशालासु कल्पनीयकुण्डसंख्या]

त्रयस्त्रिंशतिकुण्डानि रुद्रसूत्रे प्रकल्पयेत् ॥१४४॥
पञ्चविंशतिकुण्डानि विष्णुसूत्रे सुयोजयेत् ।
दशसप्तककुण्डानि ब्रह्मसूत्रे प्रकल्पयेत् ॥१४५॥
नवकुण्डं मनोःसूत्रे कल्पयेद् देशिकोत्तम ।
दीक्षायामुत्सवे चैव प्रायश्चित्तादिकर्मणि ॥१४६॥
रविसूत्रं प्रकर्तव्यं प्रतिष्ठादौ न कारयेत् ।
पञ्चाग्न्यायतनं कुण्डमेकाग्न्यातनं तु वा ॥१४७॥
प्रायश्चित्तेषु कर्तव्यं प्रतिष्ठादौ विवर्जयेत् ।

[आवर्तादौ कुण्डविधिः]

अनावर्ते तथावर्ते पुनरावर्तकेऽपि च ॥१४८॥
उत्तमं मध्यमं चैवाप्यधमं चाधमाधमम् ।
चतुर्भेदयुतान्कुण्डान्कल्पयेत्कल्पवित्तमः ॥१४९॥

[कर्मानुसारेण कल्पनीया वेदिका]

वेदिकाङ्गं प्रकल्प्याथ समायतसमुच्छ्रयम् ॥१५०॥
प्रतिष्ठादौ प्रकल्पेत दीक्षाद्युत्सवकर्मणि ।
विस्तारार्धसमोत्सेधं वेदिकाङ्गं सुनिर्मितम् ॥१५१॥
प्रायश्चित्तादिके चैव वास्तुशान्तौ क्रमाच्छृणु ।
उत्सेधवेदभागं चाप्येकभागेन कल्पितम् ॥१५२॥
तस्मात्सर्वप्रयत्नेनाप्युक्तमार्गेण कारयेत् ।
अन्यथा कुरुते मोहात् कर्ता कर्म च नश्यति ॥१५३॥

[वेदिपरितः कुण्डकल्पनप्रकारः]

वेद्याश्च परितश्चापि तुरीयपदमध्यमे ।
पूर्वादीशानपर्यन्तमष्टौ कुण्डान् क्रमाद्गुरो ॥१५४॥
पदैकांशे मध्यमे च कल्पयेद्गुरुपुङ्गव ।
इन्द्रईशानयोर्मध्ये वृत्तकुण्डं प्रधानकम् ॥१५५॥
चतुष्पदानां बाह्ये तु पदैके भित्तिकं करु ।

पदार्धे चाथवा कुर्याद् भित्तिं चैव विशेषतः ॥१५६॥
तद्बाह्ये तु तुरीये च पदमध्ये तथा पुनः ।
कुण्डान्यष्टौ प्रकल्प्याथ तद्बाह्ये भित्तिकं क्रमात् ॥१५७॥
तद्बाह्ये चाष्टकुण्डं च बाह्ये भित्त्यावृतं कुरु ।
तद्बाह्ये चाष्टकुण्डानि बाह्ये भित्तिं प्रकल्पयेत् ॥१५८॥
वेद्यादिबाह्यभित्त्यन्तं पञ्चावरणकल्पितम् ।
भित्तेश्च मध्यभागे तु चतुर्द्वारं पृथक् पृथक् ॥१५९॥
पञ्चमावरणस्यान्तश्चतुर्थावरणस्थलम् ।
उत्सेधं द्वादशाङ्गुल्यं तस्यान्ते च तृतीयके ॥१६०॥
उत्सेधं च तथा प्रोक्तं द्वितीयावरणे तथा ।
प्रथमावरणे तद्वदौन्नत्यं च प्रकल्पयेत् ॥१६१॥

[वेदिकालक्षणं तद्भेदश्च]

अथातः संप्रवक्ष्यामि वेदिकालक्षणं शृणु ।
अश्रं वा वृत्तमेवाथ वस्वश्रं च षडश्रकम् ॥१६२॥
चतुर्भैदैश्च विधिवद्वेदिकाङ्गं प्रकल्पयेत् ।
अष्टाश्रं शयनं प्रोक्तमश्रवेदिस्थितिर्भवेत् ॥१६३॥
षडश्रं यानमेवोक्तमासनं वर्तुलं स्मृतम् ।
अश्रपीठेऽश्रवेदिश्च वर्तुले वर्तुलं शुभम् ॥१६४॥
अष्टाश्रे पद्मपीठं च त्र्यश्रे चैव षडश्रकम् ।
पिण्डिकाङ्गं प्रकल्पेत नान्यथा परिकल्पयेत् ॥१६५॥
अधःपट्टे कुर्ममूर्तिं मध्यपट्टे तु धारिकाम् ।
भुजाष्टकमतो वापि शुद्धमायास्वरूपकम् ॥१६६॥
तस्योर्ध्वे चाष्टनागं चाप्यूर्ध्वपट्टे तु [१]केसरी ।
कारयेत्कुम्भकण्ठे च धर्मादीनां प्रकल्पयेत् ॥१६७॥
युगानामूर्ध्वपट्टे च तदूर्ध्वे जघनत्रयम् ।
तथोर्ध्वे पङ्कजं कल्प्यं मध्यदेशे शिवासनम् ॥१६८॥

[वेदिकावर्गाः]

वेदिकोत्सेधसूत्रं चाप्यष्टाचत्वारि संख्यया ।
विभजेद्वेदिकावर्गांस्तत्तद्भागान्क्रमाच्छृणु ॥१६९॥
द्व्यंशमधःपट्टी च दलवेदी षडंशकम् ।
एकांशमूर्ध्वपट्टी च अनुकण्ठं त्र्यांशकम् ॥१७०॥
इत्येवं वेदिकावर्गाः; कर्णवर्गाकृतिं शृणु ।

---

[१] अत्र 'केसरी' इत्यनन्तरं कल्पनीय इति शेषः ।

[कर्णवर्गाः]

कर्णविस्तारसूत्रं च चतुर्भागं प्रकल्पयेत् ।।१७१।।
एकांशं वेदसंख्यां च विभजेत्कर्णकल्पने
द्विकर्णं मध्यदेशे तु द्विकर्णं कोणदेशयोः ।।१७२।।
अन्यांशमन्तराले च कारयेत्कल्पवित्तमः ।
एवं कर्णाकृतिः प्रोक्ता; कपोताङ्गं ततः शृणु ।।१७३।।

[कपोताङ्गः]

तत्क्षेत्रे कर्णवत्कृत्वा नासिकाङ्गानि कारयेत् ।
कर्णोर्ध्वे नासिकां कृत्वा ह्यन्यान्युक्त्या प्रकल्पयेत् ।।१७४।।
इत्येवं वेदिकावर्गमश्रं वा वृत्तमेव वा ।
अन्यच्च वेदिकारूपं कल्पयेत्कल्पवित्तमः ।।१७५।।

[वेदिकाङ्गे प्रकारान्तरम्]

अथवान्यप्रकारेण वेदिकाङ्गं शृणुष्व हि ।
विस्तारस्य समोत्सेधं कल्पयेत्तु विशेषतः ।।१७६।।
वेदिकामध्यभागे तु रत्निमात्रं समं भवेत् ।
विस्तारमिति विज्ञेयमुत्सेधं च षडङ्गुलम् ।।१७७।।
दर्पणोदरसंकाशमुपवेदीं प्रकल्पयेत् ।

[नवकुण्डानि]

पूर्वे तु चतुरश्रं स्यादाग्नेय्यां वै भगाकृति ।।१७८।।
दक्षिणे चार्धचन्द्रं च नैर्ऋते तु त्रिकोणकम् ।
पश्चिमे वृत्तकुण्डं च वायुदेशे षडश्रकम् ।।१७९।।
उत्तरे पद्मकुण्डं च ईशाने चाष्टकोणकम् ।
इन्द्रईशानयोर्मध्ये वृत्तकुण्डं प्रधानकम् ।।१८०।।

[त्रयस्त्रिंशत्कुण्डानि]

चतुरश्रचतुष्कं च चतुष्टयभगाकृति ।
अर्धचन्द्रचतुष्कं च त्रिकोणचतुष्कं भवेत् ।।१८१।।
चतुर्वृत्तं समालिख्य षडश्रस्य चतुष्टयम् ।
पद्मकुण्डचतुष्कं च अष्टाश्रस्य चतुष्टयम् ।।१८२।।
एवंविधं त्रयस्त्रिंशत्कुण्डानि परिकल्पयेत् ।

[पञ्चविंशतिकुण्डानि]

चतुरश्रत्रयं चैव त्रयं पिप्पलपत्रवत् ।।१८३।।
अर्धचन्द्रत्रयं चैव त्रिकोणं च तथा भवेत् ।
वृत्तत्रयं त्रयं चापि षडश्रस्य प्रकल्पयेत् ।।१८४।।
पद्मकुण्डत्रयं प्रोक्तमष्टाश्रं च तथा भवेत् ।
प्रधानकुण्डसहितं पञ्चविंशतिकुण्डकम् ।।१८५।।

[सप्तदशकुण्डानि]

द्विद्विकुण्डं प्रकल्प्याथ प्रधानकुण्डसंयुतम् ।
दश सप्त च कुण्डानि कल्पयेद्देशिकोत्तमः ।।१८६।।

[नवकुण्डानां शिवाष्टमूर्तित्वकल्पनम्]

पृथिवी चतुरश्रं च यजमानं भगाकृति ।
आप्यस्थानं चार्धचन्द्रं तेजःस्थानं त्रिकोणकम् ।।१८७।।
वृत्ताकारं तथाकाशं वायुतत्त्वं षडश्रकम् ।
सौरं पद्माकृति प्रोक्तं सौम्यमष्टाश्रकं तथा ।।१८८।।
प्रधानं च चिदाकाशं शिवस्थानं प्रकीर्तितम् ।
तन्वष्टकं चाष्टकुण्डमङ्गरूपेण कीर्तितम् ।।१८९।।
चिदाकाशस्वरूपं च कुण्डमङ्गीति कथ्यते ।
अङ्गाङ्गिभावभेदेन कुण्डं तन्नवधोच्यते ।।१९०।।

[कुण्डेषु तत्त्वतत्त्वेश्वरन्यासकल्पनं मूर्तिमूर्तीश्वरन्यासकल्पनं च]

मूर्तिं मूर्तीश्वरं चैव ह्यष्टकुण्डेषु होमयेत् ।
प्रधाने तु शिवं ध्यात्वा पराशक्त्यादिभिः क्रमात् ।।१९१।।
विद्यादेहं च नेत्रं च अस्त्रं चैव प्रधानके ।
तद्बाह्ये चाष्टकुण्डेषु तथा मूर्तीश्वरीं क्रमात् ।।१९२।।
तत्त्वं तत्त्वेश्वरं चैव तद्बाह्ये विन्यसेत्क्रमात् ।
तत्त्वेश्वरीं ततो बाह्ये विन्यसेत्तु विशेषतः ।।१९३।।
त्रयस्त्रिंशत्कुण्डकेषु तत्तन्मूर्तिं हुनेत्क्रमात् ।
मूर्तीश्वरं च मूर्तिं च प्रथमावरणे न्यसेत् ।।१९४।।
मूर्तीश्वरीं तथा बाह्ये तद्बाह्ये तत्त्वकं तथा ।
तत्त्वेश्वरं च तत्त्वेशीं विन्यसेत्तु विशेषतः ।।१९५।।
पञ्चविंशतिकुण्डेषु तत्तन्मूर्तिं च विन्यसेत् ।
मूर्तीश्वरीं च मूर्तीशं मूर्तिं चैव क्रमान्न्यसेत् ।।१९६।।
प्रथमावरणे न्यस्त्वा तत्त्वादींश्च द्वितीयके ।
कुण्डेषु सप्तदशसु तत्तन्मूर्तिं विभावयेत् ।।१९७।।

मूर्तीश्वरीं च मूर्तीशं मूर्तितत्त्वं तथैशकम् ।
तत्त्वेश्वरीं षडेतानि नवकुण्डेषु होमयेत् ।।१९८।।
पृथिव्यादि यजमानान्तं तत्त्वं चेति प्रकीर्तितम् ।
भवादि च महेशान्तं तत्त्वेश्वरमुदाहृतम् ।।१९९।।
वामादि च दमन्यन्तं तत्त्वेश्वर्या उदाहृतम् ।
पृथिवीमूर्तिमारभ्य यजमानान्ततो गुरो ।।२००।।
मूर्त्यष्टकमिति ख्यातं मूर्तीशं च ततः शृणु ।
पुरुषादि समारभ्य कवचान्तं क्रमाच्छृणु ।।२०१।।
मूर्तीशमिति विख्यातं ततो मूर्तीश्वरीं शृणु ।
धारिकादि समारभ्य विभ्व्यन्तं च तथेश्वरीम् ।।२०२।।
पूर्वे तु पृथिवीस्थानमाग्नेय्यां यजमानकम् ।
जीवस्थानमिति ख्यातं तदूर्ध्वे चाम्बुतत्त्वकम् ।।२०३।।
त्रिकोणे चाग्नितत्त्वं च तत्परं वायुतत्त्वकम् ।
जडाकाशं च तत्पश्चात् सौरतत्त्वं ततः परम् ।।२०४।।
तत्परं सौम्यमित्युक्तं चिदाकाशं प्रधानकम् ।
शिवतत्त्वमिति ख्यातमीशानादीन्क्रमाद्धुनेत् ।।२०५।।
शिवतत्त्वं महादेवं तत्त्वेशीं च मनोन्मनीम् ।
चिदाकाशं च मूर्तिं च ईशानं मूर्तिमीशकम् ।।२०६।।
विद्यादेहं च नेत्रं चाप्यस्त्रं शक्तिः शिवस्तथा ।
तत्त्वं तत्त्वेशतत्त्वेशीं मूर्तिमूर्तीशकं भवेत् ।।२०७।।
मूर्तीशांश्च पराशक्तिं सर्वव्यापकमीश्वरम् ।
विद्यादेहं च नेत्रं च प्रधाने विन्यसेत्क्रमात् ।।२०८।।
पृथिवीं पुरुषं चैव अम्बुस्थानमघोरकम् ।
तेजःस्थाने शिखां चैव कवचं वायुतत्त्वके ।।२०९।।
सद्योजातं तथाकाशे सौरे वै वामदेवकम् ।
शिरश्चैव तथा सौम्ये हृदयं यजमानके ।।२१०।।
ईशानं च चिदाकाशे नवाग्निं च विभाजितम् ।
पृथिवी वै समारभ्य सौम्यान्तं व्यापकं तथा ।।२११।।
व्याप्यव्यापकभेदेन यजमानमिति स्मृतम् ।
शिरोर्ध्वे हृदयं न्यस्त्वा हृदयोर्ध्वे शिवं न्यसेत् ।।२१२।।
स्पर्शाहुतिविधानेन तत्तन्मूर्तिं च विन्यसेत् ।
पृथिवीं वै समारभ्य अग्न्यन्तं पिण्डवत्तथा ।।२१३।।
आकाशं व्यापकं प्रोक्तं तस्योर्ध्वे सर्वव्यापकम् ।
सर्वभूतस्य चाकाशमाधारमिति कीर्तितम् ।।२१४।।
आकाशस्याश्रितं प्रोक्तं वायुतत्त्वं प्रकीर्तितम् ।
एवमेव प्रकारेण कुण्डसंयोजनं परम् ।।२१५।।

[द्विविधं पद्मकुण्डम्]

पद्मकुण्डं द्विधा प्रोक्तं बाह्याभ्यन्तरभेदतः ।

बहिर्बिसनिकं कुण्डं प्रतिष्ठादौ प्रकल्पयेत् ।।२१६।।
अन्तर्बिसिनिकं कुण्डं क्षुद्रकर्मसु योजयेत् ।

[प्रतिष्ठादौ वर्जनीयानि कुण्डानि]

पञ्चाश्रं चैव सप्ताश्रं नवाश्रं च दशाश्रकम् ।।२१७।।
एकादशाश्रकं चैव द्वादशाश्रादिकं क्रमात् ।
प्रतिष्ठादौ वर्जनीयं कृतं चेदशुभावहम् ।।२१८।।

[क्षुद्रकर्मसु कर्तव्यानि कुण्डानि]

क्षुद्रकर्मसु कर्तव्यमन्यस्मिन्न कदाचन ।
अष्टाश्रं च षडश्रं च त्रिकोणं च क्रमाच्छृणु ।।२१९।।
कोणं बाह्ये प्रकर्तव्यमन्ते च परिवर्जयेत् ।

[प्रायश्चित्तादौ करणीयकुण्डानि]

प्रायश्चित्ते तथा दीक्षापवित्रारोहणेऽपि च ।।२२०।।
अन्तःकोणं प्रकर्तव्यं प्रतिष्ठादौ विवर्जयेत् ।
व्यामोहात्कुरुते मर्त्यो राजराष्ट्रं विनश्यति ।।२२१।।
तस्मात्सर्वप्रयत्नेन चोक्तमार्गेण कारयेत् ।
शिरोहृदयं नाभिश्च कण्ठयोनित्रिमेखलाः ।।२२२।।
अष्टौ कुण्डाकृतिः सा तु अष्टमूर्तिस्वरूपकम् ।
एकभागविहीनं चेत् तत्कुण्डं परिवर्जयेत् ।।२२३।।

[कुण्डेषु खातकल्पनप्रकारः]

यावद्विस्तारकं कुण्डं तावत्खातं प्रकीर्तितम् ।
कुण्डखातं द्विधा प्रोक्तं भूमेरधःप्रदेशके ।।२२४।।
चतुरश्रं समं खातं तस्योर्ध्वे च नवांशकम् ।

[मेखलात्रितयकल्पनप्रकारः]

मेखलात्रितयं कृत्वा ह्यधस्ताच्चतुरङ्गुलम् ।।२२५।।
मध्ये च त्र्यङ्गुलं प्रोक्तमग्रे चैव द्वयाङ्गुलम् ।
प्रतिष्ठादौ प्रकर्तव्यं दीक्षायामुत्सवेऽपि च ।।२२६।।
प्रायश्चित्तादिकार्ये च पवित्रारोहणेऽपि च ।
खातं पक्षाङ्गुलं प्रोक्तं मेखला च नवांशकम् ।।२२७।।
चतुर्विंशत्यङ्गुलं च कुण्डखातं प्रकल्पयेत् ।

ऊर्ध्वे च चतुरङ्गुल्यं मध्ये चैव त्र्याङ्गुलम् ।।२२८।।
अधस्ताद् द्व्यङ्गुलं प्रोक्तं मेखलाङ्गं सुनिर्मितम् ।
दीक्षादौ च प्रकर्तव्यं प्रतिष्ठादौ न कारयेत् ।।२२९।।
कुण्डस्याभ्यन्तरे देशे कुण्डार्धं च प्रमाणतः ।
तद्भागं भूतसंख्याभिः कल्पयेत्कल्पवित्तमः ।।२३०।।

[कुण्डेषु कर्णिकाकारकल्पनप्रकारः]

सार्धैकं कुण्डमध्ये च कर्णिकाकारकल्पनम् ।
भूताङ्गुलसमोत्सेधं कर्णिकां च प्रकल्पयेत् ।।२३१।।
सार्धद्वयं दलं चैव वेदाङ्गुलसमोन्नतम् ।
दलाष्टकं प्रकल्प्याथ कर्णिकां च समायतम् ।।२३२।।
हृदयं चेति विख्यातं तद्बाह्ये परितः क्रमात् ।
शेषमेकाङ्गुलं वृत्तं त्र्याङ्गुलसमोन्नतम् ।।२३३।।
नाभिरेवं समाख्याता प्रतिष्ठादौ सुनिर्मितम् ।
चतुर्विंशतिभागं च कुण्डगर्तं विभज्य च ।।२३४।।
त्रयोविंशत्यङ्गुलोर्ध्वे चैकभागं च कर्णकम् ।
कङ्कणाकारकं प्रोक्तं कुण्डकर्णं प्रकल्पयेत् ।।२३५।।
कर्णस्योर्ध्वे प्रकर्तव्यं मेखलां च विशेषतः ।
ऊर्ध्वे च मेखलादूर्ध्वे पृष्ठभागं प्रकल्पितम् ।।२३६।।
कर्णस्याधःप्रदेशान्तं द्व्याङ्गुलसमश्रकम् ।
नवाङ्गुलसुविस्तारं द्व्याङ्गुलसमोन्नतम् ।।२३७।।
त्रयोदशसमाङ्गुल्यं दीर्घं चेति प्रकीर्तितम् ।
अश्वत्थपत्रसदृशं योनिं चैव प्रकल्पयेत् ।।२३८।।
एवमेव क्रमेणाथ प्रतिष्ठादौ सुनिर्मितम् ।
दीक्षायां काम्यकर्मादौ पक्षाङ्गुलमथोर्ध्वके ।।२३९।।
कर्णाकृतिं प्रकल्प्याथ तस्योर्ध्वे च त्रिमेखलाम् ।
कुण्डस्याभ्यन्तरे देशे कुण्डार्धं च प्रमाणतः ।।२४०।।

[नाभियोनिकल्पनप्रकारः]

पद्माकारं यथा नाभिं कुर्यात्कुण्डस्य मध्यमे ।
द्विभागं दलमानं स्यादेकभागं तु कर्णिकाम् ।।२४१।।
त्र्याङ्गुलसमोन्नत्यं कर्णिकाङ्गं सुनिर्मितम् ।
उन्नतं च द्व्याङ्गुल्यं दलानि परिकल्पयेत् ।।२४२।।
हृदयं चेति विख्यातं शेषं वृत्ताकृतिर्भवेत् ।
नाभिश्चेति समाख्यातः कुण्डस्याभ्यन्तरे तथा ।।२४३।।
ऊर्ध्वे च मेखलादूर्ध्वे पृष्ठभागं प्रकल्पितम् ।
कर्णस्याभ्यन्तरे देशे चैकांशमग्रसंयुतम् ।।२४४।।

कर्णान्तमथवा कार्यं पृष्ठं वस्वङ्गुलायतम् ।
द्वादशाङ्गुलदीर्घं चाप्येकाङ्गुलसमोन्नतम् ।।२४५।।
अश्वत्थपत्रसदृशं योनिं चैव प्रकल्पयेत् ।
चतुरश्रं समारभ्य वृत्तकुण्डसमावधि ।।२४६।।
सौम्याभिमुखमग्रं च योनिं च परिकल्पयेत् ।
षडश्रं च समारभ्य चिदाकाशान्तमेव च ।।२४७।।
योनिं पूर्वाग्रगां कुर्यादन्यथा कर्मनाशनम् ।
योनौ योनिर्न कर्तव्या पद्मे पद्मं न कारयेत् ।।२४८।।
चतुरश्रां धरित्रीं वै सर्वात्मान्तरगर्भिताम् ।
चतुरश्रा भवेद्योनिर्योनिकुण्डे प्रकल्पयेत् ।।२४९।।
वृत्ताकारं विशेषेण पद्मकुण्डे प्रकल्पयेत् ।
पद्मे च हृदयं त्यक्त्वा योनौ योनिं परित्यजेत् ।।२५०।।
योनिर्नाभिरिति ख्याता कुण्डयोर्द्वितयोरपि ।
दीक्षायां काम्यकर्मादौ विना नाभिं प्रकल्पयेत् ।।२५१।।
हृदयं च तदेतद्धि उपचारप्रभेदतः ।
नाभिश्चेति समाख्यातः मुख्यता च न नाभिके ।।२५२।।
योनौ योनिर्नकर्तव्या पद्मे नाभिं न कारयेत् ।
चतुरश्रा भवेद्योनिर्योनिकुण्डे प्रकल्पयेत् ।।२५३।।
वृत्ताकारो भवेन्नाभिः पद्मकुण्डे प्रकल्पितः ।
पद्मे च हृदयं त्यक्त्वा योनौ योनिं परित्यजेत् ।।२५४।।
योनिर्नाभिरिति ख्यातः कुण्डयोर्द्वितयोरपि ।
हस्तमात्रस्य कुण्डस्य हृदयादिप्रकल्पनम् ।।२५५।।
हस्तादूर्ध्वस्य कुण्डस्य तत्तदाकारवृद्धिदम् ।

[कुण्डमानम्]

हस्तादि अष्टहस्तान्तं कुण्डमानं प्रकीर्तितम् ।।२५६।।
अष्टहस्तात्परं नास्ति कृतं चेदशुभावहम् ।

[शिवाग्नौ पञ्चावरणकल्पनप्रकारः]

शिवाग्निं च समारभ्य परिस्तरणकावधि ।।२५७।।
पञ्चावरणकं प्रोक्तं तत्तत्स्थानं क्रमाच्छृणु ।
प्रथमं तु शिवाग्निं च द्वितीयं चोर्ध्वमेखला ।।२५८।।
तृतीयावरणं चाथ मध्यमा मेखला भवेत् ।
अधस्थमेखलायास्तु तुरीयमिति कीर्तितम् ।।२५९।।
परितो मेखलायास्तु पञ्चमावरणं स्मृतम् ।
अग्निं च विष्टरं चैव परिधिं कूर्चकं तथा ।।२६०।।
परिस्तरणकं चाथ पञ्चस्थानं प्रकीर्तितम् ।

साङ्गोपाङ्गं च प्रत्यङ्गं त्रिधा भिन्नं शिवाग्निकम् ।।२६१।।
शिवाग्नि साङ्गमित्युक्तं विद्येशादि गणान्तकम् ।
उपाङ्गमिति विख्यातं लोकपालास्त्रकावधि ।।२६२।।
प्रत्यङ्गं च तथा प्रोक्तं त्रिधा चाङ्गमिति स्मृतम् ।
शिवाग्नेस्त्रिविधो भेदो बाल्ययौवनवृद्धतः ।।२६३।।
नामान्तं बालमनलं व्रतान्तं यौवनानलम् ।
विवाहान्तं तु वृद्धाग्निमग्निमाहुस्त्रिभेदतः ।।२६४।।
एक एव शिवाग्निस्तु तत्तत्संस्कारभेदतः ।
बाल्ययौवनवार्धक्यसंस्कारस्यानुसारतः ।।२६५।।
त्रेताग्नीनां शिवाग्नीति नाम वै सामुदायिकम् ।
शिवाग्नेः परितश्चापि अङ्गरूपप्रकल्पनम् ।।२६६।।
आहवनीयं च वृद्धाग्निं दक्षिणं यौवनं तथा ।
गार्हपत्यं च बालाग्निं केवलं चाष्टसंख्यकम् ।।२६७।।
अङ्गभाव इति प्रोक्तः शिवस्त्वङ्गीति कथ्यते ।
अङ्गाङ्गिभावसंयोगादग्निश्च नवधा भवेत् ।।२६८।।
वृद्धरूपं प्रतिष्ठाग्निं नित्याग्निं च तथा भवेत् ।
यौवनं चोत्सवाग्निं च दीक्षायां वास्तुकर्मणि ।।२६९।।
प्रायश्चित्तादिकार्येषु बालाग्निमिति कथ्यते ।
अन्यथा कुरुते मोहाद् राष्ट्रनाशो भवेद् ध्रुवम् ।।२७०।।
तस्मात्सर्वप्रयत्नेनाप्युक्तमार्गेण कारयेत् ।
चतुरश्रे तथा कुण्डे वह्निं चाहवनीयकम् ।।२७१।।
अर्धचन्द्रे दक्षिणाग्निं पद्मे केवलनामकम् ।
गार्हपत्यं वृत्तकुण्डे योनौ वृद्धाग्निमुत्तमम् ।।२७२।।
सामान्याग्निं चाष्टकोणे त्रिकोणे यौवनानलम् ।
बालाग्निं च षडश्रे तु चिदाकाशे शिवाग्निकम् ।।२७३।।
एवमुक्तक्रमेणाथ नवाग्नीन्स्थापयेद् गुरो ।
चतुर्विंशतिमानेन विभजेत्कुण्डमण्डलम् ।।२७४।।
चतुर्विंशत्यङ्गुलात्तु न्यूनं चेद्वर्जयेत्सदा ।
प्रायश्चित्तादिकार्येषु न्यूनहस्तं न बाधितम् ।।२७५।।
तेन मानेन कर्तव्यं समन्ताच्चतुरश्रकम् ।

[सर्वं कुण्डं चतुरश्रोद्भवम्]

चतुरश्रोद्भवं सर्वं कुण्डं सम्यक्प्रकल्पयेत् ।।२७६।।
पञ्चभागकृतं क्षेत्रं भागैकं तु बहिर्न्यसेत् ।
कोणसूत्रं चतुर्भागं चैकैकं पार्श्वकोणयोः ।।२७७।।
क्षेत्रार्धकोणं संगृह्य क्षेत्रार्धाद् भ्रामयेत्ततः ।
क्षेत्रार्धावधिकं यावत्तथान्यद् भ्रामयेत्पुनः ।।२७८।।
सूत्रे संयोजिते योनिर्भवेत् पिप्पलपत्रवत् ।

उत्तराभिमुखाग्रं च योनिमाग्नेयकोणके ॥२७९॥
पञ्चभागकृतं क्षेत्रं भागैकं पार्श्वयोः क्रमात् ।
क्षेत्रं च नवधा भज्य क्षेत्रान्ते चैकभागकम् ॥२८०॥
आयामोत्तरकं त्यक्त्वा शेषभागे तथा पुनः ।
सप्तांशं समसूत्रेण भ्रमणादर्धचन्द्रकम् ॥२८१॥
खण्डं दक्षिणभागे तु अखण्डं चोत्तराग्रकम् ।
अर्धचन्द्रमिति ख्यातं दक्षिणे च प्रकल्पयेत् ॥२८२॥
दीक्षायां काम्यकर्मादौ खण्डमुत्तरतो न्यसेत् ।
अखण्डं दक्षिणाग्रं च भ्रामयेदर्धचन्द्रकम् ॥२८३॥
खण्डमिन्दुरिति ख्यातमखण्डं सूत्रनामकम् ।
प्रतिष्ठादिषु कार्येषु ह्युत्तरे सूत्रपातनम् ॥२८४॥
सप्तभागकृतं क्षेत्रं चैकैकपार्श्वयोर्न्यसेत् ।
क्षेत्रस्योत्तरबाह्ये वाप्येकभागं बहिर्न्यसेत् ॥२८५॥
पार्श्वयोर्द्विकयोश्चापि रेखासंयोजितं तु यत् ।
त्रिकोणमिति विख्यातमुत्तराग्रं प्रकल्पितम् ॥२८६॥
कुण्डं नैर्ऋतिदेशे तु कल्पयेत्कल्पवित्तमः ।
सप्तभागकृतं क्षेत्रं चैकभागं बहिर्न्यसेत् ॥२८७॥
कुण्डमध्यं समारभ्य अन्तसूत्रान्ततः क्रमात् ।
भ्रामयेद्वर्तुलाकारं वारुणे च प्रकल्पयेत् ॥२८८॥
क्षेत्रं च सप्तधा कृत्वा चान्ते चैकैकभागकम् ।
रेखाद्वितयमालिख्य क्षेत्रबाह्यैकभागकम् ॥२८९॥
द्विद्विरेखामेलनं यत् षडश्रमिति कीर्तितम् ।
पूर्वाग्रं पश्चिमाग्रं च षडश्रं वायुदेशके ॥२९०॥
दीक्षायां काम्यकर्मादावुत्तराग्रं प्रकल्पयेत् ।
प्रतिष्ठादिषु कार्येषु पूर्वाग्रमिति कीर्तितम् ॥२९१॥
वृत्तकुण्डं पुरा कृत्वा कर्णिकां च द्व्यङ्गुलाम् ।
कर्णिकाया ह्यधोभागे तथाधो मेखलोपरि ॥२९२॥
षडङ्गुलसमं दीर्घमग्रे चैकाङ्गुलोन्नतम् ।
अथवा द्व्यङ्गुलं प्रोक्तं कल्पयेद्दलमष्टकम् ॥२९३॥
उत्तरे पद्मकुण्डं च कल्पयेत्कल्पवित्तमः ।
दीक्षायां काम्यकर्मादौ कर्णिका चतुरङ्गुला ॥२९४॥
शेषमंशेन कर्तव्यं दलाष्टकमिति स्मृतम् ।
क्षेत्रं षोडशधा भज्य क्षेत्रान्ते चैकभागकम् ॥२९५॥
चतुरश्रं पृथक् कल्प्य तत्क्षेत्रं वसुधा भजेत् ।
सप्तभागं परित्यज्य भागमेकं च संग्रहेत् ॥२९६॥
बाह्यक्षेत्रस्य बाह्ये तु एकभागं च विन्यसेत् ।
चतुर्दिक्षु चतुश्चिह्नं सूत्रसंयोजितं तु यत् ॥२९७॥
अष्टकोणमिति ख्यातं प्रतिष्ठादौ प्रकल्पयेत् ।
दीक्षायां काम्यकर्मादावष्टकोणं प्रकल्पयेत् ॥२९८॥

अष्टाश्रमीशकोणे तु कल्पयेत्तु विशेषतः ।
इन्द्रईशानयोर्मध्ये पूर्ववद्वृत्तमालिखेत् ।।२९९।।
प्रधानकुण्डमाख्यातं चिदाकाशमिति स्मृतम् ।
एवमेव प्रकारेण तत्तत्कुण्डानि कल्पयेत् ।।३००।।
चतुरश्रावृतं सूत्रं सर्वकुण्डसमावृतम् ।
सूत्रन्यूनाधिकं चेत्तु तत्कुण्डं परिवर्जयेत् ।।३०१।।
अष्टाश्रं चतुरश्रं च वृत्तं चैव षडश्रकम् ।
पुँल्लिङ्गमिति विख्यातं योनिः पद्मं च देशिक ।।३०२।।
स्त्रीलिङ्गमिति संप्रोक्तं नपुंसकमतः शृणु ।
त्रिकोणं चार्धचन्द्रं च नपुंसकमितीरितम् ।।३०३।।
चतुरश्रे तथा योनावर्धचन्द्रे त्रिकोणके ।
जडाकाशस्वरूपे च वृत्ते चैव क्रमाच्छृणु ।।३०४।।
कुण्डस्थानोर्ध्वके चैव मेखलोर्ध्वे विशेषतः ।
योनौ सौम्याग्रकं कृत्वा ह्यन्ये पूर्वाग्रकं भवेत् ।।३०५।।
षडश्रे च विशेषेण किंचिद्भेदं शृणुष्व हि ।
दीक्षायां काम्यकर्मादावुत्तराग्रं प्रकल्पयेत् ।।३०६।।
प्रतिष्ठादिषु कार्येषु योनिः पूर्वाग्रका भवेत् ।
चतुरश्रादिवृत्तान्तमुत्तराभिमुखं मतम् ।।३०७।।
षडश्रं च समारभ्य चिदाकाशान्तकं क्रमात् ।
पूर्वाभिमुखमाकल्प्य होमयेत्तु विशेषतः ।।३०८।।
दीक्षायां काम्यकर्मादौ षडश्रे चोत्तरास्यकम् ।
अथातः संप्रवक्ष्यामि शक्तीनां कुण्डलक्षणम् ।।३०९।।
स्वतन्त्रा सहजा मिश्रा केवला च चतुर्भवेत् ।
पञ्चप्राकारसंयुक्ते मर्यादाभ्यन्तरेऽपि च ।।३१०।।
पुर्वाभिमुखमाश्रित्य द्वारादीनि प्रकल्पयेत् ।
वृषादिपरिवारैश्च उक्तमार्गप्रतिष्ठिता ।।३११।।
अधिष्ठानस्य सौम्ये वा दक्षिणे वा प्रकल्पिता ।
स्वतन्त्रा चेति विख्याता सहजां च ततः शृणु ।।३१२।।
परिवारविहीने च स्वतन्त्रोक्ते प्रतिष्ठिता ।
सहजा चेति विख्याता मिश्रां चैव ततः शृणु ।।३१३।।
दक्षिणाभिमुखं द्वारमधिष्ठानस्य संनिधौ ।
गर्भावरणके चापि अन्तर्हारेऽथवा गुरो ।।३१४।।
आलयं संप्रकल्प्याथ मिश्रा चेति प्रकीर्तिता ।
अधिष्ठानं विना शक्तिः केवला च प्रतिष्ठिता ।।३१५।।
यत्र द्वारमुखं लिङ्गं तद्वद्द्वारं च शक्तिकम् ।
अथवा सिंहं हंसं च द्वाराग्रे तु प्रतिष्ठितम् ।।३१६।।
पूर्वोक्तविधिमार्गेण रुद्रसूत्रादिकं क्रमात् ।
दिक्षु योनिः प्रकर्तव्या विदिक्ष्वब्जं प्रकल्पयेत् ।।३१७।।
ईशानशक्रयोर्मध्ये वृत्तं चैव प्रधानकम् ।

त्रयस्त्रिंशत्पञ्चविंशद् दशसप्तनवादिकम् ।।३१८।।
पूर्वोक्तविधिमार्गेण कुण्डं सर्वं प्रकल्पयेत् ।
स्वतन्त्रायास्तथा शक्तेः कुण्डानि परिकल्पयेत् ।।३१९।।
पूर्वे तु चतुरश्रं स्याद् दक्षिणे चार्धचन्द्रकम् ।
पश्चिमे वृत्तकुण्डं च उत्तरे पद्मकुण्डकम् ।।३२०।।
आग्नेयादीशकोणान्तं योन्याकाराणि कल्पयेत् ।
ईशानशक्रयोर्मध्ये पद्मं चैव प्रधानकम् ।।३२१।।
सहजायाः प्रकर्तव्यं मिश्रशक्तेस्ततः शृणु ।
पूर्वे तु चतुरश्रं स्यादाग्नेय्यां तु भगाकृति ।।३२२।।
दक्षिणे चार्धचन्द्रं च नैर्ऋते तु त्रिकोणकम् ।
पश्चिमे वृत्तकुण्डं च वायुदेशे षडश्रकम् ।।३२३।।
उत्तरे पद्मकुण्डं च ईशाने चाष्टकोणकम् ।
ईशानशक्रयोर्मध्ये चाब्जं चैव प्रधानकम् ।।३२४।।
मिश्रशक्तेः प्रकर्तव्या केवलायास्ततः शृणु ।
चतुर्दिक्षु तथा योनिं विदिक्ष्वब्जं प्रकल्पयेत् ।।३२५।।
ईशानशक्रयोर्मध्ये योनिकुण्डं प्रधानकम् ।
केवलायास्तथा शक्तेः कुण्डान्येवं प्रकारयेत् ।।३२६।।
तत्तच्छक्तिक्रमेणैव कुण्डानि रचयेत्तथा ।
अन्यथा कुरुते मोहात् कर्म कर्ता च नश्यति ।।३२७।।
तस्मात्सर्वप्रयत्नेनाप्युक्तमार्गेण कारयेत् ।
मारणादिप्रतिष्ठार्थकुण्डानि च शृणुष्व हि ।।३२८।।
पञ्चाश्रादि प्रकर्तव्यं तत्तल्लक्षणकं शृणु ।
रसभागकृतं क्षेत्रं क्षेत्रान्ते चैकभागकम् ।।३२९।।
वृत्ताकारं विलिख्याथ तद्वृत्तं पञ्चभागकम् ।
वृत्तं द्वादशधा भज्य सार्धैकं भागमध्यमे ।।३३०।।
परितो तुङ्गचिह्नं च सूत्रसंयोजितं तु यत् ।
पञ्चाश्रमिति विख्यातं मारणे तु प्रकल्पयेत् ।।३३१।।
चतुर्भागकृतं क्षेत्रं क्षेत्रान्ते चैकभागकम् ।
वृत्ताकारं प्रकल्प्याथ परितः सप्तभागकम् ।।३३२।।
वृत्तं द्वादशधा भज्य त्रिपादैकेन संयुतम् ।
तन्मानं भागमध्ये तु परितस्तुङ्गलाञ्छितम् ।।३३३।।
सूत्रे संयोजितं यत्तु सप्ताश्रमिति कीर्तितम् ।
क्षेत्रे चतुष्टयं भागं क्षेत्रान्ते चैकभागकम् ।।३३४।।
वृत्ताकारं च विलिखेत्परितो नवभागकम् ।
वृत्तं द्वादशधा भज्य सार्धैकं भागमध्यमे ।।३३५।।
परितस्तुङ्गचिह्नं च सूत्रे संयोजितं क्रमात् ।
नवाश्रमिति विख्यातं क्षुद्रकर्मसु योजयेत् ।।३३६।।
चतुर्भागकृतं क्षेत्रं क्षेत्रान्ते चैकभागकम् ।
पूर्ववद्वृत्तमालिख्य तद्वृत्तं दशभागकम् ।।३३७।।

वृत्तं द्वादशधा भज्य पादार्धेनैकभागकम् ।
भागमध्ये तुङ्गचिह्नं सूत्रे संयोजितं तु यत् ।।३३८।।
दशाश्रमिति विख्यातं स्थापने च विवर्जयेत् ।
क्षेत्रांशेन समं वृत्तं वसुभागं क्रमात् कुरु ।।३३९।।
क्षेत्रे तुरीयभागैकं वृत्ते वृत्तं समालिखेत् ।
तद्वृत्तमष्टभागं च बाह्यभागं बहिर्न्यसेत् ।।३४०।।
दलाष्टकं प्रकल्प्याथ कर्णिकया विहीनकम् ।
अन्तर्बिसिनिकं कुण्डं प्रतिष्ठादौ विवर्जयेत् ।।३४१।।
अन्यथा कुरुते मोहाद्राजराष्ट्रस्य दोषकृत् ।
तस्मात्सर्वप्रयत्नेन उक्तमार्गेण कारयेत् ।।३४२।।

इत्यजिते प्रतिष्ठातन्त्रे [क्रियापादे] यागशालालक्षणविधिः [अष्टनवतितमः] पटलः ।

[एकोनशततमः पटलः]

[रथोद्धारलक्षणविधिः[1]]

[रथवीथी]

देवालयस्य वीथी सा रथवीथीति कथ्यते ।

[रथलक्षणम्]

सप्तकोटिमहामन्त्रमन्त्रराजोपशोभितः ।।१।।
रथाङ्गमेकविस्तारमूर्ध्वाधोयोगसंपुटः ।
ब्रह्मासनसमायुक्तो ह्यनन्तासनसंयुतः ।।२।।
योगासनसमायुक्तः पद्मासनसमन्वितः ।
मन्त्रसिंहासने मूर्तिर्विमलासनसंयुतः ।।३।।
चिच्छक्त्यासनसंयुक्तः सोमास्कन्दमयः शिवः ।
मन्त्रप्रासादमेरोश्च देहमध्ये महेश्वरः ।।४।।
दहराकारहृदये भूपुराकारमण्डले ।
मेरुशक्तिमये देहे चित्रशक्त्या परिष्कृतः ।।५।।
अस्त्ररज्जुसमायुक्तवेदवाजिसमन्वितः ।
ब्रह्मसारथिसंयुक्तो वाद्यतालसमन्वितः ।।६।।

[रथयात्रा]

झल्लरीदुन्दुभीवाद्यशङ्खकाहलनिस्वनैः ।
ढक्काडमरुनादैश्च नलिकायन्त्रघोषकैः ।।७।।
गोपालकृतरज्ज्वङ्गो ह्यक्षान्तर्बहिरर्चितः ।
चण्डालगणसंकीर्णशृङ्गवाद्यसमन्वितः ।।८।।
पटहध्वनिसंघैश्च क्षुद्रघण्टारवैर्युतः ।
राजवीथ्यां परिभ्राम्य रुद्रकोणे रथे स्थिते ।।९।।
ऋग्यजुःसामगानैश्च पृथग्वन्दनकारिभिः ।
शैववैष्णवसंघैश्च ब्राह्मणैर्वेदपारगैः ।।१०।।
स्वस्तिवाचनसंयुक्तं रथवीथ्यां जनार्दन ।

---

[1] अयं पटलः 'आर-इ. ४५९५९' कोशे दृश्यते ।

[स्नपनम्]

रथासीनस्य देवेश सोमास्कन्दविभोः प्रभोः ।।११।।
रथाकर्षणचण्डालस्पर्शदोषनिवृत्तये ।
महासंप्रोक्षणं कृत्वा तद्रीत्या स्नानमाचरेत् ।।१२।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] रथोद्धारलक्षणविधिः
[एकोनशततमः] पटलः ।

[शततमः पटलः]

[भैरवीपूजा[1]]

[भगवतीलक्षणम्]

अघोरचक्रमूर्ध्नी च पीतवक्त्रा चतुर्भुजा ।
कोलद्वीपा भगवती कुटजे सर्वकामदा ॥१॥
पीतवस्त्रा त्रिनयना चार्धचन्द्राङ्कमालिनी ।
[एवं लक्षणमाख्यातं] भैरवीलक्षणं शृणु ॥२॥

[भैरवीलक्षणम्]

उद्वीक्षणा रक्तदंष्ट्रा स्वदन्तैर्दंशिताधरा ।
रक्ताम्बरधरा रक्ता विशुद्धा साम्बुजा शिवा ॥३॥
सहस्रसर्पाभरणा रक्तपुष्पानुलेपना ।
अतिरिक्तकेशनेत्रजिह्वा सा चाटिकासना ॥४॥
ज्वलत्संहारकालाग्निमूर्तिर्भैरवरूपिणी ।
सिंहताक्ष्याहिमहिषसालावृकादिवाहिनी ॥५॥
चक्रं शङ्खं शरं चापं वज्राग्निं मुसलं हलम् ।
अलसां खड्गखेटौ च छत्रपाशकपालकम् ॥६॥
नागनाराचपरशुरथस्तम्भाभयं वरम् ।
सदा हि दक्षिणैर्वामैर्धरन्ती करपङ्कजैः ॥७॥
ऊर्ध्वानना भिन्नकरा चानन्ताद्यधिका क्रमात् ।
संहारचक्रमध्यस्था सायातु प्रधने द्विषाम् ॥८॥
सहस्रकोटिसन्दोहसेनास्तम्भनकारिणी ।
पृथक् पृथक् कोटिकोटिभैरवीभैरवावृता ॥९॥
सेव्या सदा वसापूर्णकपालधरपाणिभिः ।
[भैरव्येवं समाख्याता'

[कालरुद्रभैरवीलक्षणम्]

'कालरुद्राख्यभैरवी ॥]१०॥
पञ्चवक्त्रा प्रतिमुखं त्र्यक्षा दंष्ट्रासमन्विता ।
रक्तासृक्चर्ममेदोऽस्थिजनप्राणरतानिशम् ॥११॥
दशायुधावरणेन दिग्देवावरणेन च ।

---

[1] अयं पटलः (टि० २३९) मातृकायां २१३—२१६ पृष्ठेषु दृश्यते।

सदा समन्विता भीमरूपिणी परमेश्वरी ॥१२॥
आपदि स्मरणीया च कालरुद्राख्यभैरवी ।
सद्भक्तस्य सदा शीघ्रं सर्वकामफलप्रदा ॥१३॥
द्वेषिणां तु शिरोमज्जाः शोषयित्री निकृत्त्वचा ।
एकान्ते सहजायाता वर्णावर्णस्वरूपिणी ॥१४॥
स्वभक्तानां सपक्षस्था सन्देहनिधनाय च ।
अर्घ्यैर्निषेविता साये स्वदन्तैर्मनुजं भुजेत् ॥१५॥
लम्बमानद्विरदा च साट्टहासा च सर्वदा ।
सर्पैरुपावृता देवी प्रेतासनसमन्विता ॥१६॥

[भैरवस्य भैरव्याश्च मालामन्त्रः]

लं इन्द्राग्निभैरवाय नन्दाय स्वाहा। अघोराग्निभैरवि चाप्यन्ते कालाग्निभैरवी कालभैरवो महाश्वानः सर्वसंहारभैरवः।

प्रचण्डभैरवि आनन्दचण्डभैरवोग्रचण्डभैरव क्रूरचण्डभैरव सर्ववाहनेभ्यः स्वाहा। सर्वायुधेभ्यः स्वाहा। देवीपुत्र कोटिभट्टारक भैरवनाथ पञ्चानन कपिलजटाभासुर त्रिनेत्र ज्वालामालिन् इमं बलिं गृहणीष्व स्वाहा।

चण्डिकायै नमः। वसुपिशाचसर्वप्राणिप्रियाय सर्वजनमोहाय ज्वल ज्वल प्रज्वल प्रज्वल सर्वजनस्य हृदयं मम वशं कुरु कुरु स्वाहा। ईं षैं रैं क्ष्यों ईं ह्रीं ईं हौं गं गीं रं स्यां रं रं वौं रं हौं रं क्षौं क्ष्यां ईं भूं इं ईं ह्वां रं भ्रं व्यां चं भ्रां ओं नमो भगवति वां कालि रुद्राग्निभैरवि सर्वसंहाररूपिणि भृत्यं सर्वशत्रुक्षयकारि ईं भ्रों सर्वभूतपिशाचिनि रुद्रि ज्वालामालिनि ईं रुं अस्त्रैरावृते ईं रुं घुं ईं घुं उच्छ्रे बृहदवतारे सों वार्तालि अस्त्रे रं ह्रीं ईं रं ओं नमः।

[श्रीमन्त्रः]

त्रिपुरभैरव्याः सर्वमन्त्रान् जपेत्।
श्रीमन्त्रः—ईं त्रों ईं हौं रं त्रों रं त्रों खं॥

[भैरवमन्त्रः]

रं लं रं गन्धरं गण्डक्यं रं आत्वष्टिरं कर इषिरं विद्वेषिरं क्षौं ग्रों ईं ग्रों क्लीं भ्रं रं क्षां हैं सर्वदुष्टानां सर्वस्य तत्चित्तचक्षुमुखगतजिह्वा स्तम्भनं कुरु कुरु ग्रीं श्रीं क्लीं ईं भ्रैं रं ग्रैं कुरु कुरु क्षं रं लं यं रं प्तां ईं ठं रं वं क्षुं रं हं रिं नों रौं क्षौं रं स्यों रं स्वाहा रं स्वें रं रिं रं श्रीं नमः॥

[अष्टत्रिंशत्कलान्यासक्रमः]

अष्टत्रिंशत्कलान्यासे पञ्चमूर्धसु पञ्च च।
पञ्चवक्त्रेषु च न्यासो हृद्ग्रीवांसनाभिकुक्षिषु ॥१७॥

पृष्ठे पार्श्वे करे लिङ्गे वक्षोगुह्योरुनितम्बके ।
जानुजङ्घास्फिग्घ्राणशिरःपादेऽष्टत्रिंशके ॥१८॥

इत्यजिताख्ये महातन्त्रे [क्रियापादे] भैरवीपूजाविधिः
[शततमः] पटलः ।

[एकाधिकशततमः पटलः]

[मुहूर्तनिर्णयविधिः[1]]

अथातस्ते गुरुश्रेष्ठ देवतास्थापने नवे ।
मुहूर्तनिर्णयं वक्ष्ये सावधानमनाः शृणु ।।१।।

[लिङ्गप्रतिष्ठाकालः]

उत्तरायणकाले तु लिङ्गसंस्थापनं वरम् ।
दक्षिणायनकाले तु वर्जयेत्तु विशेषतः ।।२।।
मेषे च वृषभे चैव मिथुने सिंहमासके ।
चतुर्मासेषु कर्तव्या प्रतिष्ठा चोत्तमा भवेत् ।।३।।
मध्यमा चेति विख्याता पुष्यफाल्गुनमासयोः ।
तुलाकन्यावृश्चिकेषु मासेष्वधम ईरितः[2] ।।४।।
चापं कुम्भं च कटकं त्रिमासं परिवर्जयेत् ।
शुक्लपक्षेषु कर्तव्यं कृष्णपक्षं परित्यजेत् ।।५।।
कृष्णपक्षे विशेषेण पञ्चम्यन्तं शुभावहम् ।
पञ्चम्याश्चापि परतः कृतं चेदशुभावहम् ।।६।।
त्रयोदशी द्वादशी च दशमी च चतुर्दशी ।
उत्तमा चेति विख्याता मध्यमां तु ततः शृणु ।।७।।
एकादशी द्वितीया च प्रतिपत्पञ्चमी तथा ।
मध्यमत्वेन संप्रोक्ता प्रतिष्ठायां गुरूत्तम ।।८।।
तृतीया च चतुर्थी च षष्ठी चैव तु सप्तमी ।
एताश्चैवाधमाः प्रोक्ता ह्यष्टमी त्वधमाधमा ।।९।।
नवमी सर्वथा वर्ज्या प्रतिष्ठायां विशेषतः ।
सोमः शुक्रो बुधो जीवः प्रतिष्ठावार उत्तमः ।।१०।।
भानुवारश्च भौमश्च मन्दवारोऽशुभो भवेत् ।
भानौ कर्तृविनाशः स्याद् भौमे कर्मविनाशनम् ।।११।।
मन्दे भोक्तृविनाशश्च त्रिवारं परिवर्जयेत् ।
अश्विनी रोहिणी चार्द्रा पुष्या चैव पुनर्वसूः ।।१२।।
ताराश्चैवोत्तमाः प्रोक्ता मध्यमं तु ततः शृणु ।
मृगशीर्षस्तथा हस्तश्चित्रा चैवानुराधिका ।।१३।।
उत्तराषाढा [3]चैतानि मध्यमानि भवन्ति हि ।
प्रोष्ठपद्युत्तराद्या च तथैवोत्तरफल्गुनी ।।१४।।

---

[1]अयं पटलः मुद्रिते सद्योजातशिवाचार्यसम्पादित-*अघोरशिवाचार्यपद्धतौ* ६—१६ पृष्ठेषु दृश्यते।

[2]अत्र प्रतिष्ठाविधिरिति शेषः ।

[3]एतानि इत्यस्य एतद्युक्तानि दिनानीति व्याख्येयम् ।

श्रवणा रेवती चैव ह्यधमत्वेन कीर्तिताः ।
अधमाधमा श्रविष्ठा च प्रोक्ता शतभिषक्तथा ॥१५॥
उत्तमास्तु स्थिराः प्रोक्ता मध्यमाश्चोभयात्मकाः ।
स्थिरे तु वृश्चिकं कुम्भमुभये चापमेव च ॥१६॥
राशीनेतान्विवर्जेत प्रतिष्ठायां गुरूत्तम ।
उच्चस्थानगतश्चन्द्रो यजमानसुखप्रदः ॥१७॥
चन्द्रस्तु नीचराशिस्थो दारिद्र्यं संप्रयच्छति ।
मित्रस्थानगतश्चन्द्रो धनमित्रप्रवृद्धिकृत् ॥१८॥
शत्रुक्षेत्रगते चन्द्रे शत्रुवृद्धिर्भविष्यति ।
सूरराह्विन्दुसौराश्चेत् स्थापने लग्नसंस्थिताः ॥१९॥
नाशयन्त्यचिरादेव ग्रामाञ्जनपदांस्तथा ।
शुभास्तूदयसंस्थाश्चेत् सर्वसौख्यधनप्रदाः ॥२०॥
धनस्थानगताः पापाः कुर्वन्ति धननाशनम् ।
'शुभास्तु चन्द्रसंयुक्ता धनदास्तत्र संस्थिताः ॥२१॥
भ्रातृस्थानगतश्चन्द्रो भ्रातृवृद्धिकरो भवेत् ।
इन्दुस्थानगताः पापाः कुर्वन्ति सुखनाशनम् ॥२२॥
तदेव वर्धयिष्यन्ति सौम्याश्चन्द्रविवर्जिताः ।
सुखस्थानगताः क्रूराः कुर्वन्ति सुखनाशनम् ॥२३॥
तत्र स्थिताः शुभाः सर्वे पुत्रकर्मसुखप्रदाः ।
पुत्रस्थानगतः कुर्यात् सौख्यनाशं निशाकरः ॥२४॥
नाशयन्ति रिपून् क्रूराः शत्रुक्षेत्रं समाश्रिताः ।
शत्रुस्थानगते जीवे शत्रुवृद्धिर्भविष्यति ॥२५॥
स्थानभ्रंशकरौ तत्र संस्थितौ चन्द्रभार्गवौ ।
कुर्याज्जामित्रगः सूर्यो यजमानविमोचनम् ॥२६॥
कुजस्त्वग्निभयं कुर्यात् पिशाचभवनं भृगुः ।
जीवेन्दू सप्तमस्थौ चेद् धनधान्यागमो भवेत् ॥२७॥
अष्टमस्था ग्रहाः सर्वे कुर्वन्ति कुलनाशनम् ।
धर्मस्थानगताः सौम्याः कुर्युर्धर्मविवर्धनम् ॥२८॥
'पापाश्चन्द्रयुताः कुर्युः सौख्यधर्मधनक्षयम् ।
कर्मस्थानगताः क्रूराः कुर्वन्ति स्थाननाशनम् ॥२९॥
चन्द्रेण संयुताः सौम्याः पुत्रमित्रसुखप्रदाः ।
लाभस्थानगताः सर्वे पुत्रायुःश्रीसुखप्रदाः ॥३०॥
द्वादशस्था ग्रहाः सर्वे ह्यत्र दारिद्र्यदाः स्मृताः ।
नक्षत्रान्ते च तिथ्यन्ते वर्षान्ते च धनक्षयः ॥३१॥
व्यतिरिक्ते व्यतीपाते ग्रहदोषसमन्विते ।
मासशून्यदिने राशौ परिवेषे च दुर्दिने ॥३२॥
षडशीतिमुखे चैव स्थापनं वर्जयेत्सुधीः ।
बुधः शुक्रो गुरुश्चैवाप्युदये देशिकोत्तम ॥३३॥
वैनाशे त्वष्टमे राशावयने दक्षिणे तथा ।

विपत्प्रत्यग्वधर्क्षे च प्रतिष्ठा मारणावहा ।।३४।।
कुलक्षयः स्याद् ग्रहणे त्वयने मरणप्रदम् ।
विषुवे वित्तहीनत्वं संक्रान्तौ मूलनाशनम् ।।३५।।
ऋक्षान्ते सुखहीनत्वमयने धर्मनाशनम् ।
मासान्ते बिम्बनाशः स्याद् वत्सरान्तेऽशुभप्रदम् ।।३६।।
विष्कम्भे तु न सान्निध्यं व्याघाते कर्तृनाशनम् ।
शूले श्रियो विहीनत्वं वज्रे वज्रेण बाधनम् ।।३७।।
परिघे कर्तृनाशः स्यात् कालकण्ठे रिपुक्षयः ।
शकुनादौ च वृष्टिः स्याद् वर्जयेत्करणादि च ।।३८।।
वैष्णवे चन्द्रसूर्यौ च वायव्ये चाथ मैत्रके ।
सिद्धयोगे प्रतिष्ठा चेदुत्तमेति प्रकीर्तिता ।।३९।।
मध्यमस्त्वमृतो योगः प्रतिष्ठायां गुरूत्तम ।
योगेषु प्रीतिरायुष्मान्सौभाग्यं च शुभप्रदम् ।।४०।।
सुकर्मा च धृतिः प्रीतिर्ध्रुवो वृद्धिः सुखप्रदः ।

[द्वादशराश्यधिपाः]

मेषवृश्चिकयोर्भौमः कन्यामिथुनयोर्बुधः ।।४१।।
धनुर्मीनद्वयोर्मन्त्री तुलावृषभयोः कविः ।
मकरकुम्भयोः सौरिः कटकस्य च शीतगुः ।।४२।।
मृगेन्द्रस्य तथादित्यो राशीनामधिपाः स्मृताः ।

[लग्नस्य पञ्चदोषाः]

नक्षत्रदोषसंयुक्तं तिथिदोषसमन्वितम् ।।४३।।
वारदोषसमायुक्तं गण्डदोषसमन्वितम् ।
मुहूर्तदोषसंयुक्तं लग्नं पञ्चाङ्गदोषकम् ।।४४।।

[लग्नदोषनिवारका ग्रहाः]

दिवासूर्ये निशाचन्द्रे लग्नादेकादशस्थिते ।।४५।।
कोटिदोषा विनश्यन्ति शिवेन परिकीर्तितम् ।
वारेश्वरे बलोपेते योगदोषो न विद्यते ।।४६।।
वारेश्वरो दुर्बलश्चेद् योगदोषो बलो भवेत् ।
नीचस्थाः शत्रुगेहस्था वृद्धबालग्रहाः पुनः ।।४७।।
क्रूराः शीघ्राः शुभा वक्रा ज्ञेया बलविवर्जिताः ।
राहुदोषं बुधो हन्ति उभये संस्थिते चरन् ।।४८।।
त्रयाणां भूमिजो हन्ति चतुर्णां भृगुपुङ्गवः ।
पञ्चानां देवमन्त्री च षण्णां दोषं च चन्द्रमाः ।।४९।।

सप्तदोषान् रविर्हन्ति विशेषाद्दक्षिणायने ।
रविर्मेषे तुलायां च चन्द्रस्तु वृषवृश्चिके ॥५०॥

[ग्रहाणामुच्चनीचस्थानम्]

कुजश्च मकरकर्के कन्यामीने बुधस्य च ।
गुरोश्च कर्किमकरौ मीनकन्ये भृगुस्तथा ॥५१॥
तुलामेषौ च मन्दस्य उच्चनीचमुदाहृतम् ।
पर्वद्वयमतिक्रम्य यदा संक्रमणं रवेः ॥५२॥

[अधिमासादिदोषाः]

अधिमासः स विज्ञेयः शुभकर्म विवर्जयेत् ।
यस्मिन्मासि न संक्रान्तिः संक्रान्तिद्वयमेव वा ॥५३॥
संसर्पकः स विज्ञेयः सर्वकर्मसु गर्हितः ।
अहस्पतिरवन्त्यां च संसर्पः केरलेषु च ॥५४॥
मलमासस्तु पाञ्चाले चोलदेशे च विद्यते ।

[सौरादिमानत्रयम्]

सौरं चान्द्रं च भेदेन बार्हस्पत्यमिति त्रिधा ॥५५॥
कारणं सौरमानं स्यात् चान्द्रमानं तु सूक्ष्मकम् ।
बार्हस्पत्यं तथा स्थूलं मासत्रयमुदाहृतम् ॥५६॥
स्थूलं सूक्ष्मं परित्यज्य कारणं संग्रहेद्गुरुः ।
सौरमाने प्रकर्तव्यं सर्वं कर्म सुखावहम् ॥५७॥

[द्वादशभावस्थानानि]

देहं तु प्रथमं विद्याद् द्वितीयं धनमेव च ।
भ्रातृस्थानं तृतीयं तु मातृस्थानं चतुर्थकम् ॥५८॥
पञ्चमं तु सुतस्थानं षष्ठं वै ऋणमुच्यते ।
जामित्रं सप्तमं प्रोक्तमायुःस्थानं तथाष्टमम् ॥५९॥
धर्मस्थानं तु नवमं कर्म वै दशमं स्मृतम् ।
लाभमेकादशं विद्याद् द्वादशं व्ययमेव च ॥६०॥

[ग्रहप्रवेशादिकर्मानुसारेण लग्नशुद्धिनिरूपणम्]

प्रवेशे द्वादशे शुद्धिरेकादशे तु पैतृके ।
दशमे भोजने शुद्धिर्नवमे चौलकर्मणि ॥६१॥

उपनीतावष्टमे च विवाहस्य तु सप्तमे ।
षष्ठे तु नववस्त्राणां प्रयाणे पञ्चमे तथा ।।६२।।
विद्यारम्भे चतुःशुद्धिरौषधे च तृतीयके ।
द्वये धान्यसंग्रहणे लग्नशुद्धिश्च संगमे ।।६३।।
द्वादशे तु प्रतिष्ठायामुत्तमा परिकीर्तिता ।
मध्यमा त्वष्टमे शुद्धिः पञ्चमे त्वधमा भवेत् ।।६४।।
कलासंग्रहणे काले दशमे शुद्धिरिष्यते ।
अष्टमे चाष्टबन्धस्य सप्तमे च मृदो ग्रहे ।।६५।।
बीजावापनके युग्मस्थानानां शुद्धिरिष्यते ।
रक्षाबन्धे च नवमं शुद्धमिष्टं गुरूत्तम ।।६६।।
कुम्भादृभिरभिषेके च द्वादशे शुद्धिरिष्यते ।
शुभेन वीक्षितो युक्तो लग्नो वै शुभदः स्मृतः ।।६७।।
अशुभैर्वीक्षितो युक्तो लग्नश्चाशुभ ईरितः ।
लग्नस्य होरा द्रेक्काणं नवांशं द्वादशांशकम् ।।६८।।
त्रिंशांशश्चापि विजयः षड्वर्गाश्चैवमीरिताः ।
ओजभाश्चैव पूर्वार्धे सूर्यहोराः प्रकीर्तिताः ।।६९।।

[केन्द्रत्रिकोणस्थानानि]

चतुर्थं सप्तमं लग्नं दशमं केन्द्रसंज्ञितम् ।
नवमं पञ्चमं चापि त्रिकोणं समुदाहृतम् ।।७०।।

[दग्धयोगादिषुवर्ज्यकालनिरूपणम्]

दग्धयोगे षड्घटिकामष्टौ ज्वालामुखे तथा ।
उत्पाते मृत्युयोगे च घटिकात्रयपञ्चकम् ।।७१।।
यमगण्डे तु नवमीं घटिकां तु परित्यजेत् ।
ग्रहणे वर्जनीयानि दिनानि प्रवदाम्यहम् ।।७२।।
पूर्णग्रासे तु सप्ताहमर्धग्रासे दिनत्रयम् ।
त्रिभागे तु सति ग्रस्ते द्विदिनं परिवर्जयेत् ।।७३।।
पादोनमण्डले ग्रस्ते त्वेकरात्र्या शुभं भवेत् ।
घटिकाद्वयं तु ऋक्षान्ते मासान्ते तु दिनत्रयम् ।।७४।।
वर्षान्ते वर्जयेत्पक्षं सर्वस्मिन्नपि कर्मणि ।

[लग्नशुद्धिः]

लग्नशुद्धिं प्रवक्ष्यामि समासाच्छृणु सांप्रतम् ।।७५।।
शतदोषैश्च दुष्टे च लग्ने चापि विशेषतः ।
चन्द्रात्मजे लग्नगे चेत् केन्द्रस्थानं गतेऽपि वा ।।७६।।

शतं लग्नगतं दोषं हन्ति भानुस्तमो यथा ।
भार्गवे लग्नसंस्थे च लग्नदोषो विनश्यति ।।७७।।
वाक्पतिर्द्विगुणं हन्ति लग्नदोषांस्तथामितान् ।
दिनेशे केन्द्रगे चैव देवेड्ये केन्द्रगे तथा ।।७८।।
लग्नदोषशतं हन्ति द्विगुणं त्रिगुणं तु वा ।
स्नाने दाने जपे होमे स्वाध्याये पितृकर्मणि ।।७९।।
देवताराधने चैव त्याज्यदोषो न विद्यते ।

[नक्षत्रविषये अन्धादिनिरूपणम्]

चतुर्भीरविमुक्ताभिरन्धं नक्षत्रमुच्यते ।।८०।।
षड्भिश्चापि द्विनेत्रं तु नवभिस्त्वेकलोचनम् ।
पञ्चभिर्युग्मनेत्रं स्यात् त्रिभिरन्धं भवेत्ततः ।।८१।।
रविमुक्ते स्थिता तारा मृतास्तिस्रो ग्रहे तथा ।
सप्तस्थास्त्वर्धजीवाश्च एकेऽपि च तथा मृताः ।।८२।।
पूर्णजीवास्त्वष्टमे च पादजीवास्तु सप्तमे ।
त्रिगुण्ये सूर्यवारादीनश्विन्यादिषु संत्यजेत् ।।८३।।
शिष्टे नवसु सूर्यश्चेत् षट्कोणेषु द्वयान्धकः ।

[ग्रहविषये दृष्टिनिरूपणम्]

पादैकदृष्टिर्नवमे दशमे च तृतीयके ।।८४।।
द्विपाददृष्टिर्नवके पञ्चके तु त्रिपाददृक् ।
चतुर्थे वाष्टमे चापि पूर्णा दृष्टिश्च सप्तमे ।।८५।।
पाददृष्टिर्बली मन्दश्चार्धदृष्टिर्बली गुरुः ।
त्रिपाद्दृष्टिर्बली भौमः पूर्णः सप्तमकेन तु ।।८६।।

[राशिविषये अन्धादिनिरूपणम्]

अन्धश्च बधिरः पङ्गुरेवं राशिस्त्रिधा मता ।
मेषवृश्चिककुम्भाश्च दिवान्धास्ते प्रकीर्तिताः ।।८७।।
दिवा तुलाली बधिरौ रात्रौ मकरधन्विनौ ।
मिथुनं कटककन्ये च रात्र्यन्धत्वेन कीर्तिताः ।।८८।।
दिवाकुम्भो निशामीनः पङ्गुश्चापि प्रकीर्तितः ।
अन्धश्च निष्फलं यत्र बधिरो मरणप्रदः ।।८९।।
पङ्गुना कार्यहानिः स्यात्सर्वकर्माणि वर्जयेत् ।
मेषो मीनो धनुश्चैव गमनं चेति कीर्तिता ।।९०।।
कर्किवृश्चिकसिंहाश्च स्थानं चापि प्रकीर्तितम् ।
कुम्भं मिथुनतौली चाप्यासीनं चेति कीर्तितम् ।।९१।।

कन्यावृषभनक्राश्च शयनं चेति भाषितम् ।
गच्छता कलहं घोरं स्थिता लाभं विशेषतः ।।९२।।
आसीनात्कार्यसिद्धिः स्याच्छयनान्मृत्युरेव च ।
अतः परं प्रवक्ष्यामि आसां चामृतकालकम् ।।९३।।
मेषवृश्चिकयोः प्रातः स्त्रीकर्की द्वंद्वसंगमे ।
सिंहकुम्भधनुर्मध्ये त्वपराह्ने तुलावृषौ ।।९४।।
सायाह्ने मीनमकरौ मृतवेला समीरिता ।
सर्वकार्येषु हानिश्च प्राणहानिर्भविष्यति ।।९५।।
कृते चैवाग्निनक्षत्रे अग्निबाधा भविष्यति ।
अयनं मासमेवं च पक्षर्क्षतिथयोऽपि च ।।९६।।
लग्नद्रेक्काणहोराश्च वेला दृष्टिश्च जीवितम् ।
योगश्च करणं चैव शुभाश्चैव विशेषतः ।।९७।।
उत्तमं चाप्यनावर्ते त्वावर्ते मध्यमं स्मृतम् ।
अधमं पुनरावर्ते कन्यसं त्वन्तरीयके ।।९८।।
पुनरावर्तकस्याप्यन्तरीयस्य वै तथा ।
अनयोस्तु विना कालं विना पक्षं दिनं विना ।।९९।।
सर्वकालेषु कर्तव्यं विधिदृष्टेन कर्मणा ।
अन्यथा कुरुते पुंसामायुःश्रीपुत्रनाशनम् ।।१००।।
एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] मुहूर्तनिर्णयविधिः
[एकाधिकशततमः] पटलः ।

[द्व्यधिकशततमः पटलः]

[षडध्वन्यासविधिः[१]]

[षडध्वा परमेशस्य स्थानागमनमार्गः]

अथातः संप्रवक्ष्यामि षडध्वन्यासकं विधिम् ।
षडध्वा तु परेशस्य स्थानागमनयोः सृतिः ।।१।।
सर्वेषां व्यापकस्यास्य व्याप्यव्यापकभेदतः ।
षडध्वाङ्गं तथाङ्गी स्यादध्वातीतः परः शिवः ।।२।।
ब्रह्मा विष्णुश्च रुद्रश्च महेशश्च सदाशिवः ।
नादो बिन्दुस्तथा शक्तिः शिवश्चेति विभागतः ।।३।।
नवधा मूर्तिभेदेन प्रोक्तः सर्वेश्वरो हरः ।
तथा च त्रिविधं प्रोक्तमङ्गं सर्वेश्वरस्य तु ।।४।।
भोगाङ्गमधिकाराङ्गं लयाङ्गमिति सत्तम ।
ब्रह्मा विष्णुश्च रुद्रश्च भोगाङ्गत्वेन कीर्तिताः ।।५।।
अधिकाराङ्गकौ प्रोक्तौ महेशानसदाशिवौ ।
नादो बिन्दुस्तथा शक्तिः शिवश्चेति लयाङ्गकम् ।।६।।
षडध्वा चैव भोगाङ्गाद्यधिकारान्तमिष्यते ।
अध्वातीतो लयाङ्गं स्यात्तस्य न्यासो हि निष्कले ।।७।।
कला तत्त्वं च भुवनं वर्णाः पदमनन्तरम् ।
मन्त्रश्चेति समाख्यातो न्यासस्तस्य षडध्वनः ।।८।।
शीर्षं वक्त्रं च हृदयं गुह्यं च चरणं तथा ।
कल्पयेच्च कलान्यासादिति देशिकसत्तम ।।९।।
भुवनेन शरीरं च कल्पयेच्चिन्मयं तथा ।
वर्णाध्वना त्वचं चैव चिन्मयीं परिकल्पयेत् ।।१०।।
मन्त्राध्वना च रुधिरं चिन्मयं च प्रकल्पयेत् ।
तत्त्वपदाध्वना मज्जाशुक्लादीन्यपि कल्पयेत् ।।११।।
त्वग्रक्तमांसमज्जादि नास्ति वै परमेश्वरे ।
मन्त्रात्मनश्चिद्घनस्य त्वगादि ह्युपचर्यते ।।१२।।
क्रियते नो षडध्वा चेच्छिवस्त्वव्यापको भवेत् ।
तस्मात्सर्वप्रयत्नेन षडध्वन्यासमाचरेत् ।।१३।।
कुम्भं वा बिम्बमेवाथ षडध्वकविहीनकम् ।

मूर्तेरावाहनात्पूर्वं षडध्वानं प्रकल्पयेत् ।
षडध्वानस्त्रिधा भिन्नाश्चैषां लक्षणमुच्यते ।।१५।।

---

[१]अयं पटलः सद्योजातशिवाचार्यसंपादित*शिवप्रतिष्ठाकारिकायाम्* २१४—२१६ पृष्ठेषु दृश्यते

निष्कलं सकलं चैव तथा सकलनिष्कलम् ।
कलाध्वानं समारभ्य मन्त्रान्तं सकलं भवेत् ।।१६।।
मन्त्राध्वानं समारभ्य कलान्तं निष्कलं स्मृतम् ।
वर्णं च भुवनं चैव तत्त्वं चैव कलां तथा ।।१७।।
पदं मन्त्रं च विन्यस्यमेतत्सकलनिष्कलम् ।
कुम्भे भोगाङ्गमूर्तेस्त्वाकर्षणे सकलं स्मृतम् ।।१८।।
अधिकाराङ्गमूर्तेस्त्वाकर्षणे सकलनिष्कलम् ।
लयाङ्गमूर्तेः संधाने निष्कलं समुदीरितम् ।।१९।।
अतः कुम्भे तथा बिम्बे तत्तदावाहनादिके ।
पूर्वोक्तविधिनानेन षडध्वानं प्रकल्पयेत् ।।२०।।

इत्यजिताख्ये महातन्त्रे [क्रियापादे] षडध्वन्यासविधिः
[द्व्यधिकशततमः] पटलः ।

[त्र्यधिकशततमः पटलः]

[[1]शैवश्राद्धविधिः]

[शैवश्राद्धस्य मुख्यत्वम्[2]]

अथातः संप्रवक्ष्यामि शैवश्राद्धविधिं शृणु ।
शैवश्राद्ध[3]विधिर्मुख्यो ह्यादिशैवैरनुष्ठितः[4] ॥१॥
अन्यैश्च कथितं श्राद्धमसद्भावविधानकम् ।
[5]शैवश्राद्धमकृत्वा यो वैदिकश्राद्धमाचरेत् ॥२॥
दीक्षितश्च मृतश्चैतावुभौ निरयगामिनौ ।

[प्रत्याब्दिकश्राद्धकालः]

मुक्तात्मा च शिवे [6]लीनः [7]काले प्रत्याब्दिकं क्रमात् ॥३॥
[8]तस्मिन्मासे च तत्तिथ्यां शैवश्राद्धं क्रमाच्चरेत् ।
तद्दिने तु[9]पितृश्राद्धं कुलकोटिं समुद्धरेत् ॥४॥

[श्राद्धतिथिनिर्णयः[10]]

उदयाद्यस्तमनान्तं पञ्चभागं विभावयेत् ।

---

[1]अयं पटलः तिरुच्चेन्दूर् आलालसुन्दरशिवाचार्यसङ्घ-प्रकाशितमुद्रितपुस्तके परं दृश्यते; एतद्विषये *उत्तर-कामिके* २९, *किरणे* योगपादे ४ पटलश्च द्रष्टव्यौ ।

[2]'लिङ्गी च ब्राह्मणादिश्च श्रद्धया शिवदीक्षितः ।
शैवश्राद्धविहीनश्चेत्पिशाचत्वं स विन्दति ॥
द्वारे वै भस्मनिचये चान्तरिक्षे तथैव च ।
ऋक्षाणि त्रीणि चैकं च प्रेतभूतः स तिष्ठति ॥'
(*अचिन्त्यविश्वसादाख्ये* (टि० ७) ६८.१०, ११)

[3]विधिं मुख्यं—ग

[4]०रनुष्ठितम्—ग

[5]शिवश्राद्ध—ग

[6]लीनं—ग

[7]काले इत्यतः पूर्वं 'यस्मिन्' इति पदमध्याहृत्य यस्मिन् काले मुक्तात्मा शिवे लीनस्तस्मिन्काले इति व्याख्येयम् ।

[8]तन्मासे तथा तिथ्यां—ग

[9]अत्र 'कृतम्' इति पदमध्याहृत्य व्याख्येयम् ।

[10]'पञ्चधा विभागं व्यास आह—
मुहूर्तत्रितयं प्रातस्तावानेव तु संगवः ।
मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णोऽपि तादृशः ॥
सायाह्नस्त्रिमुहूर्तस्तु सर्वकर्मबहिष्कृतः । इति ।
वृद्धपराशरोऽपि—
लेखाप्रभृति सूर्यस्य मुहूर्तास्त्रय एव तु ।
प्रातस्तु संस्मृतः कालो भागश्चाह्नः स पञ्चमः ॥
संगवस्त्रिमुहूर्तोऽथ मध्याह्नस्तत्समः स्मृतः ।
ततस्त्रयो मुहूर्ताश्च ह्यपराह्णो विधीयते ॥
पञ्चमोऽथ दिनांशो यः सायाह्न इति स स्मृतः । इति ।'
(*स्मृतिमुक्ताफले* श्राद्धकाण्डे पृ० २७५);
'उभयत्रापराह्णव्यापित्वे बोधायन आह—
अपराह्णद्वयव्यापिन्यतीतस्य च या तिथिः ।
क्षये पूर्वा तु कर्तव्या वृद्धौ कार्या तथोत्तरा ॥ इति ।'
(*स्मृतिमुक्ताफले* श्राद्धकाण्डे पृ० २८४)

प्रातः संगव[11]मध्याह्नावपराह्णस्तथैव च ॥५॥
[12]सायाह्न इति संज्ञेयः सायाह्नव्यापिनी यदि[13]।
परेऽहनि [14]तत्तिथ्यास्तु यत्राधिक्यं [15]दिने भवेत् ॥६॥
तद्दिने च पितृश्राद्धं तथाभावे तिलोदकम् ।

[पञ्चविधं श्राद्धम्[16]]

नित्यं नैमित्तिकं काम्यं वृद्धिः पार्वणमेव च ॥७॥
एवं पञ्चविधं श्राद्धं ज्ञात्वा च गुरुपुङ्गवः[17]।
पार्वणं सृष्टिरित्युक्तं वृद्धिः [18]स्थितिरुदाहृता ॥८॥
काम्यं [19]संहार इत्युक्तं [20]नैमित्तं च तिरोहितम् ।
नित्यमनु[21]ग्रहः प्रोक्तं श्राद्धं पञ्चप्रकारतः ॥९॥
दिवसे दिवसे कुर्यादेतन्नित्यमितीरितम् ।
दिवसं प्रति यत्कर्म पितृनुद्दिश्य देशिकः[22] ॥१०॥
[23]तर्पणादि कृतं कार्यं नित्यश्राद्धमुदीरितम् ।
मृतेऽहनि तिथौ [24]कार्यं नैमित्तिकमुदाहृतम् ॥११॥
अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
पुण्यक्षेत्राटनादौ च [25]श्राद्धं काम्यमुदीरितम् ॥१२॥
प्रति[26]दर्शं कृतं श्राद्धं पार्वणं समुदीरितम् ।
वृद्धिश्राद्धं विवाहादौ[27] पञ्चधा श्राद्धमुच्यते ॥१३॥

[अन्नश्राद्धामश्राद्धाधिकारिणः[28]]

[29]आदिशैवो महाशैवो [30]ह्यनुशैवस्त्रयं[31] गुरो ।

---

[11]माध्याह्नं अपराह्नं —ग

[12]सायाह्नमिति —ग

[13]अत्र तिथिः इति शेषः ।

[14]तिथिव्यान्तु —ग

[15]दिनं —ग

[16]'ततः श्राद्धविधिर्लेशात्कथ्यते दीक्षितात्मनाम् ।
नित्यं नैमित्तिकं काम्यं वृद्धिः पार्वणमेव च ॥
प्रोक्तं पञ्चविधं श्राद्धं ज्ञात्वा कर्म समाचरेत् ।
नित्यं दद्यादहरहर्नैमित्तं स्यान्मृतेऽहनि ॥
कामाय विहितं काम्यं कुहौ पार्वणमिष्यते ।
वृद्धिश्राद्धं विवाहादावेवं पञ्चविधं भवेत् ॥'
(*उत्तरकामिके* २९.१—३)

[17]अत्र कुर्यादिति शेषः ।

[18]स्थितिमुदाहृतम् —ग

[19]संहारमित्युक्तं —ग

[20]नैमित्यं च तिरोधकम् —ग

[21]ग्रहं —ग

[22]अत्र कुर्यादिति शेषः ।

[23]तर्पणानि —ग

[24]अत्र कृतमिति शेषः ।

[25]अत्र —ग

[26]दर्शे —ग

[27]अत्र भवेदिति शेषः ।

[28]'आमश्राद्धं प्रकर्तव्यं पूर्वाह्णे द्विजसत्तमाः ।
आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा ॥
आमश्राद्धमशक्तौ स्याच्छूद्राद्यैस्तु सदैव हि ।'
(*उत्तरकामिके* २९.४१ उ०, ४२);

होमं च चरुभुक्तं[32] च आवाहनं विधानतः ॥१४॥
शैव[33]श्राद्धे प्रकुर्यात्तु आमरूपं न कारयेत् ।
आम[34]रूपकृतं श्राद्धमन्त्यशैवैरनुष्ठितम्[35] ॥१५॥

[भोक्त्रनुसारेण श्राद्धफलम्[36]]

चतुर्वेदार्थविदुषां ब्राह्मणानां महात्मनाम् ।
[37]आचार्यैकैकभुक्तेन[38] [39]कोटिं [40]भुञ्जीत यो नरः ॥१६॥
लक्षं तु [41]साधके [42]भुक्ते पुत्रे[43] दशसहस्त्रकम् ।
समयस्थे सहस्त्रं [44]स्याद्भुक्ते चैवं फलप्रदम् ॥१७॥

[श्राद्धे प्रशस्ताः[45]]

[46]शैवाः [47]सप्तविधा [48]मध्ये आदिशैवो विशेषतः[49] ।

'उशनाः —
अपत्नीकः प्रवासी च यस्य भार्या रजस्वला ।
सिद्धाग्नौ न च कुर्वीत आमं तस्य विधीयते ॥'
'सुमन्तुः —
सदा चैव तु शूद्राणामामश्राद्धं विदुर्बुधाः ।'
(*सकलागमसारसंग्रहे* (टि० १४०) पृ० १४३)

[29] आदिशैवादिविषये *अजिते* ६३.८—१० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[30] अनुशैवो —ग

[31] अत्र 'एतेषाम्' इति पदमध्याहृत्य व्याख्येयम् ।

[32] भुक्तमित्यत्र भावार्थे क्तप्रत्ययः । भुक्तिमित्यर्थोऽत्र व्याख्येयः ।

[33] श्राद्धं प्रकर्तव्यं —ग

[34] रूपं कृतं —ग

[35] अत्र भवेदिति शेषः

[36] ''भौतिको ब्रह्मचारी च श्रेष्ठोऽसौ श्राद्धकर्मणि ।
शैवं सान्तानिकं लब्ध्वा पितृदेवार्थमिष्टदम् ॥
नैष्ठिकं त्वतिथित्वेन लब्ध्वा सीदति कः पुमान् ।
चतुर्वेदार्थविदुषां ब्राह्मणानां महात्मनाम् ॥
आचार्येण तु भुक्तेन कोटिर्भवति भोजिता ॥
लक्षं तु साधके भुक्ते दीक्षितेऽयुतमेव तु ।
समयस्थे सहस्त्रं स्याच्छतं माहेश्वरे नरे ॥'
(*उत्तरकामिके* २९.७५—७८ पू०)

[37] आचार्यैककभक्तेन —ग

[38] भुक्तेन इत्यत्र भावे क्तप्रत्ययः ।

[39] कोटिः —ग

[40] अत्र 'भुञ्जीत' इति पदमन्तर्भावितणिजर्थकम् । 'भोजयीत' इत्यर्थः । अत्र यो नरो महात्मनां कोटिं भोजयीत तस्य फलमेकैकाचार्यभोजनेन लभ्यत इति व्याख्येयमिति भाति ।

[41] शाधकं भुक्तं —ग

[42] 'भुक्ते' इति पदमन्तर्भावितणिजर्थकम् । भोजिते इत्यर्थः ।

[43] अत्र 'पुत्रके' इत्यस्य स्थाने पुत्रे इति प्रयोगः । एतदनन्तरं भुक्ते इति पदमध्याहार्यम् ।

[44] स्याद्भुक्तं चैव फलप्रदम् —ग

[45] 'द्विजोत्तमादयः सर्वे प्रशस्ताः श्राद्धसंपदि ।
स्वजात्युत्कर्षतो ग्राह्याः स्वस्वजात्युद्भवाश्च वा ॥
आचार्यलक्षणप्रोक्तलक्षणा न तु निन्दिताः ।'
'मातामहो मातुलश्च स्वस्त्रीयः श्वश्रुरो गुरुः ।
दौहित्रस्तत्पतिर्बन्धुर्ऋत्विगाद्योऽपि वा मताः ॥
व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन योजयेत् ।'
(*उत्तरकामिके* २९.४३, ४४ पू०; ५१ उ०, ५२)

[46] सप्तविधशैवविषये *अजिते* ६३.८—१० श्लोकास्तदीयटिप्पणी च द्रष्टव्याः ।

[47] सप्तविधौ —ग

[48] अत्र 'तेषाम्' इति पदमध्याहृत्य व्याख्येयम् ।

[49] अत्र ग्राह्य इति शेषः ।

शिवद्विजादयः सर्वे प्रशस्ताः श्राद्धसंपदि[५०] ।।१८।।
स्वजात्युत्कर्षतो ग्राह्याः स्वस्वजात्युद्भवाश्च वा ।
तदलाभे [५१]महाशैवस्तथा दान[५२]प्रतिग्रहे ।।१९।।
दानप्रतिग्रहादीनां[५३] सच्छूद्रं परिवर्जयेत् ।
सर्वेषां जातिभेदानामादिशैवो विशेषतः[५४] ।।२०।।
श्रोत्रियो वेदविदुषां[५५] शास्त्रज्ञो ज्ञानवांस्तथा ।
शिवपूजापरो विप्रः शिवद्विजकुलोद्भवः ।।२१।।
शिवदीक्षायुतश्चैव [५६]उत्तमः परिकीर्तितः ।

[श्राद्धे वर्ज्याः[५७]]

अपत्नीको वनस्थश्च पाण्डित्यज्ञानहीनकः ।।२२।।
अदीक्षितश्चाङ्गहीनः काणः पिशुन[५८]शुण्डकौ ।
गोलको दत्तपुत्रश्च ऋतुपत्नीकवर्जितौ ।।२३।।
दन्तहीनो दुराचारो लोके भवति निन्दितः ।
धूर्तो बह्वग्निसंतप्तः क्रूरो वाप्यन्य[५९]जातिकः ।।२४।।
दीक्षाविहीनविप्राद्यः पाञ्चरात्रादितन्त्रकः ।
बौद्धः [६०]पाषण्डकः [६१]सर्वान्शैवश्राद्धे परित्यजेत् ।।२५।।
अन्यथा कुरुते मोहात्तत्कर्म निष्फलं भवेत् ।
अभावे ब्रह्मचारी च देशिकः [६२]पत्निहीनकः[६३] ।।२६।।
तस्मात्सर्वप्रयत्नेन आदिशैवं तु कारयेत् ।

[आचार्यादिश्राद्धे वरणीयाः]

आचार्याणां[६४] कृते[६५] श्राद्धे आचार्यं वरयेद्गुरुः ।।२७।।

---

[५०] श्राद्धपूरणे इत्यर्थः ।
[५१] महाशैवं —ग
[५२] प्रतिग्रहम् —ग
[५३] अत्र 'विषये' इत्यध्याहृत्य व्याख्येयम् ।
[५४] अत्र ग्राह्य इति शेषः ।
[५५] अत्र 'मध्ये' इति पदमध्याहृत्य वेदविदुषां मध्ये श्रोत्रिय इति व्याख्येयमिति भाति ।
[५६] उत्तमं परिकीर्तितम् —ग
[५७] 'वर्ज्यलक्षणमुक्तं श्रीमत्*स्वायंभुवे*—
काणः केकरपिङ्गाक्षः पिशुनो मत्सरी तथा ।
शास्त्रदेवगुरूणां च निन्दकास्तार्किकाः शठाः ।।
आचाररहिताः क्रूराः श्राद्धे वर्ज्याः प्रयत्नतः ।' इति ।
(*प्रभाव्याख्यायाम्* पृ० ४६७)
[५८] शुण्डकः —ग
[५९] जातयः —ग
[६०] पाषाणकान् सर्वे —ग
[६१] अत्र एतान् इति शेषः ।
[६२] वृत्तार्थं पत्नीशब्दस्य ह्रस्वान्ततया प्रयोगः ।
[६३] अत्र ग्राह्य इति शेषः ।
[६४] अत्र 'विषये' इति शेषः ।
[६५] कृतं श्राद्धं —ग

अनाचार्यं [66]वरयेच्चेदायुःश्रीपुत्रनाशनम्[67]।
निर्वाण[68]दीक्षितः श्राद्धे [69]विशेषं समयं त्यजेत् ॥२८॥
[70]समयी च विशेषी च निर्वाणी च त्रिधा भवेत् ।
तत्तत्संस्कारभेदैश्च भुवने तारतम्यतः ॥२९॥
पदप्राप्तिक्रमात्सम्यक् तत्तद्भेदविधानतः ।
आवाहये[71]त्पितृन्देवाञ्श्राद्धेऽत्वरो[72] विचक्षणः ॥३०॥

[आचार्यश्राद्धे देवपितरः[73]]

आचार्यार्थं कृते [74]श्राद्धे [75]शिव ईशसदाशिवौ ।

---

[66]परिष्यश्चेत् —ग

[67]अत्र भवेदिति शेषः ।

[68]दीक्षिता श्राद्धे —ग

[69]विशेषं=विशेषदीक्षायुतं, समयं समयिनं इत्यर्थो- व्याख्येयः ।

[70]समयं च विशेषं च निर्वाणं च —ग

[71]पितृदेवान् श्राद्धत्वर्यो विचक्षणः —ग

[72]न विद्यते त्वरा यस्य सः अत्वरः; त्वरा=वेगः ।

[73]'साधकद्वितयं देवे पित्रर्थं देशिकत्रयम् ।
संभवे कथितं श्राद्धे सर्वे सर्वत्र वा मताः ॥
ईशः सदाशिवः शान्तः शिवश्राद्धे प्रकीर्तिताः ।
रुद्रोऽनन्तश्च कथितौ विश्वेदेवा इति द्विजाः ॥
दीक्षितानाममी प्रोक्ता रुद्रांशानामथोच्यते ।
स्कन्दचण्डगणेशास्तु त्रयः पित्रर्थमीरिताः ॥
तत्र नन्दिमहाकालौ द्वौ गणौ द्वितयस्थितौ ।
तृप्तैस्तैर्निखिलं तृप्तं शिवान्तमभवद्भुवि ॥
पञ्चाभावो यदा तत्र तदा तद्द्वयकल्पना ।
बाहुमूलशिरस्थाने भवेत्त्रितयकल्पनम् ॥
एकत्रान्यत्र कर्तव्यं स्थानमंसद्वयं द्वयोः ।
एकत्र बाहुयुग्मेन सह वा पञ्च कल्पयेत् ॥
षड्दैवतं गृहस्थानां लिङ्गिनां तु त्रिदैवतम् ।
इत्येवमभिसंधाय श्राद्धकर्म समाचरेत् ॥'
(*उत्तरकामिके* २९.७८ उ० —८५ पू०);
'साधकद्वितयं गृह्य देशिकत्रितयं पुनः ।
एवं कृते भवेत्तस्य विधिना भोजनं खग ॥
सामान्यं पितृदेवार्थं विभोरत्र विधीयते ।
ईशः सदाशिवः शान्तो देशिकत्रितयं भवेत् ॥
साधकद्वितयं वाथ रुद्रानन्ताभिधौ स्थितौ ।
तपस्विभ्यो द्विजेन्द्रार्थं शूद्रार्थं प्रतिकल्पयेत् ॥
कुर्वन्ति ये सदा भक्त्या रुद्रेणैक्यं व्रजन्ति च ।
तृप्तैस्तैर्निखिलं तृप्तं शिवान्तमभवत्स्वयम् ॥
दीक्षितानां शिवश्राद्धं रुद्रांशानां तदात्मकम् ।
ततश्चण्डमहाकालौ द्वौ गणौ द्वितये स्थितौ ॥
रुद्रस्कन्दगणाधीशास्त्रिष्विमे संस्थितास्त्रयः ।
लौकिकं ब्रह्मविष्ण्वीशसूर्यान्तकविकल्पितम् ॥
पूर्ववत्त्रितयं कल्प्य द्वितीयं च विशेषतः ।
प्रागुच्यते शिवश्राद्धं पवित्रं शिवमन्त्रकम् ॥
साधकः पुत्रकाभावे रुद्रभक्तो द्विजोऽथवा ।
अद्विजा वा यथा भक्त्या चोदितान् ब्रह्म कल्पयेत् ॥
पञ्चाभावो यदा तस्य तदा तद्द्वयकल्पनात् ।
कार्या विकल्पनास्त्वेवं बाहूमूलांसयोर्द्वयोः ॥
एकैकस्य तथान्यस्य बाहुमूलं शिरस्तथा ।
त्रितयं कल्प्य विन्यासं कर्तव्यं पूर्ववत्क्रमात् ॥'
(*किरणे* योग० ४.५ —१४);
'अनन्तेशश्च सूक्ष्मश्च शिवेशश्च सुसंज्ञकः ।
एकनेत्रैकरुद्रौ च त्रिमूर्तिरिति भौतिके ॥
त्रिमूर्त्यादिविलोमेन मात्रादित्रितयं भवेत् ।
शिवोत्तमाद्यनन्तेशात्पित्रादित्रितयं भवेत् ॥
श्रीकण्ठश्च शिखण्डी च विश्वेदेवौ समीरितौ ।
षड्दैवतं गृहस्थानां लिङ्गिनां तु त्रिदैवतम् ॥ . . .
नैष्ठिकानां विशेषेण नैष्ठिकाश्च भवन्ति वै ।
ईशः सदाशिवः शान्तः शिवश्राद्धे तपस्विनः ।
रुद्रश्चानाथनामा च विश्वेदेवौ स्थितौ द्वयोः ॥
निर्वाणदीक्षितानां च रुद्रांशानामतोऽन्यथा ।

[76]शान्तः स्कन्दगणाधीशौ [77]चण्डिकेशश्च सप्त च ।।३१।।
[78]शिवः प्रथमतः [79]पूज्यः ईशः शान्तसदाशिवौ ।
द्वितीये च समावाह्याः [80]स्कन्दश्च गण[81]चण्डकौ ।।३२।।
तृतीये च समावाह्या एवमाचार्य[82]संस्कृते ।
वरयेद्देशिकान्सप्त [83]अलाभे स्यात्तु पञ्चकम् ।।३३।।
[84]साधकद्वितयं देवे पित्रर्थं देशिकत्रयम् ।
तस्यालाभे द्वयं प्रोक्तं [85]देवपित्रोश्च पूजने ।।३४।।
रुद्रोऽनन्तश्च कथितौ विश्वेदेवा इति द्विजाः ।
ईशः सदाशिवः शान्तः शिवश्राद्धे प्रकीर्तिताः ।।३५।।
[86]पूजने च समावाह्या एवं निर्वाण[87]संस्कृते ।

[समयिनि विशेषदीक्षिते च देवपितरः]

[88]समयिविशेषिणोश्च[89] विश्वे[90]देवान्पुरो यजेत् ।।३६।।
तत्र नन्दिमहाकालौ द्वौ [91]गणद्वितयस्थितौ ।
स्कन्दचण्ड[92]गणेशानास्त्रयः पित्रर्थमीरिताः ।।३७।।

[नैमित्तिकश्राद्धविधिः]

नैमित्तिकविधानेन श्राद्धं सम्यक् शृणुष्व वै ।

तत्र नन्दिमहाकालौ विश्वेदेवौ गणौ द्वयोः ।।
स्कन्दचण्डगणाधीशा गणास्त्रिषु यथाक्रमम् ।
एवं च विधिविष्ण्वीशा विश्वेदेवा यमारुणौ ।।
सर्वत्र पञ्चाभावेऽपि पुरुषद्वयमुच्यते ।
शिरोहस्तविभागेन त्रयमेकत्र कल्पयेत् ।।'
(*अचिन्त्यविश्वसादाख्ये* ६८.७–९; १२–१६पू०)

[74] श्राद्धं —ग
[75] ईशशिवसदा —ग
[76] शान्तं —ग
[77] चण्डिकेशं च सप्तधा —ग
[78] शिवं —ग
[79] पूज्यं —ग
[80] स्कन्दं च —ग
[81] चण्डिकौ —ग
[82] संस्कृतः —ग
[83] अलाभस्य तु —ग
[84] साधकं द्विधयं देवं —ग
[85] देवं पितृं च पूजनम् —ग
[86] पूजनं —ग
[87] संस्कृताः —ग
[88] समयं च विशेषं च —ग
[89] अत्र 'विषये' इति शेषः ।
[90] देवं पुरा यजेत् —ग
[91] गणौ द्वि —ग
[92] गणेशानं —ग

[निमन्त्रणाय ब्राह्मणवरणम्[९३]]

ब्राह्मणानग्राहयेद्भक्त्या स्नानानुष्ठानपूर्वकम् ।।३८।।
नित्यकर्म प्रकुर्वीत तदैव ब्राह्मणान्वरेत् ।
[९४]निमन्त्रितान्वरेत्पूर्वं पवित्रं धारयेत्ततः ।।३९।।
प्रदक्षिणत्रयं[९५] पश्चात्कृसराभ्यञ्जनं[९६] परम् ।
विघ्नेशयजनं चैव पुण्याहं[९७] पञ्चगव्यकम्[९८] ।।४०।।
[९९]शिवस्य प्राङ्मुखं स्थानमन्येषां च उदग्दिशि ।
[१००]कूर्मासने तु संस्थाप्य त्रिःप्रदक्षिणमाचरेत् ।।४१।।

[प्रदक्षिणमन्त्रः]

[१०१]देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वधायै स्वाहायै नित्यमेव नमो नमः ।।४२।।
सायुज्यादिपदप्राप्तमीशादिपितृदैवतम् ।
वंशवृद्धिकरं देवं नित्यमेव नमो नमः ।।४३।।
शिवज्ञानप्रतीकाशं शिवं सप्तगुरूनसदा ।
अहं वन्दे महादेवं नित्यमेव नमो नमः ।।४४।।
देवानां च पितॄणां च गुरूणां शिवयोगिनाम् ।
प्रदक्षिणत्रयं [१०२]कुर्वे नित्यमेव नमो नमः ।।४५।।
इति मन्त्रान्समुच्चार्य प्रदक्षिणत्रयं कुरु ।

---

[९३]'निमन्त्रयेत पूर्वेद्युर्यथावृद्धमतन्द्रितः ।
वृद्धान्संस्पृश्य जङ्घे द्वे समानान्करपल्लवौ ।।
यवीयसः प्रियोक्त्या तु समाश्वास्य क्षणेदमून् ।।
ताम्बूलदानसहितं श्राद्धकृद्देशिकोत्तमः ।
वसेयू रजनीं तां च स्मरन्तः परमेश्वरम् ।।
संयम्य चेन्द्रियग्राममनुग्राह्यानुकम्पया ।
अन्येद्युः स्नानपूजादिक्रियानिर्वर्तितानथ ।।
व्याहरेदपराह्णे तु कृतस्नानादिकर्मणः ।
अभ्युत्थानासनाद्येन स्वागतेनागतानथ ।।
संभाव्य'
(*उत्तरकामिके* २९.८५ उ० — ९० पू०);
'पूर्वेद्युरादरेणैव गौरवेण निमन्त्रयेत् ।
आह्वाययेत्ततोऽन्यस्मिन्दिने सायाह्नकेऽपि वा ।।
शुक्लपक्षे तु पूर्वाह्णे कृष्णे स्याद्यपराह्णके ।
कृतनित्यविधिः शुद्धभावो वै'
(*अचिन्त्यविश्वसादाख्ये* ६८.१७, १८)

[९४]निमन्त्रेण वरं पूर्वं — ग

[९५]अत्र 'कर्तव्यम्' इति पदमध्याहृत्य व्याख्येयम् ।

[९६]अत्र दद्यादिति शेषः; 'अन्तःकायशुद्ध्यर्थं वः कृसरः । देहशुद्ध्यर्थं वोऽभ्यञ्जनम् ।'
(*बोधायनश्राद्धप्रयोगे* पृ० ३४)

[९७]अत्र 'कृत्वा' इति पदमध्याहृत्य व्याख्येयम् ।

[९८]अत्र संपादयेदिति शेषः ।

[९९]शिवं प्राङ्मुखमुत्ताप्य — ग;
'उपलिप्ते शुचौ देशे दक्षिणप्रवणान्विते ।
आसनेषु सुधौतेषु ज्ञात्वा तानुपवेशयेत् ।।'
(*उत्तरकामिके* २९.२०३);
'द्वयं पूर्वाननं पूर्वं ततस्त्रयमुदङ्मुखम्'
(*अचिन्त्यविश्वसादाख्ये* ६८.२५ पू०)

[१००]कूर्मासनेन — ग

[१०१]शिवदेव — ग

[१०२]कृत्वा — ग

[अनुज्ञाप्रार्थनम्[१०३]]

विज्ञाप्य देशिकान्पश्चाच्छ्राद्ध[१०४]भूमिं विशेषतः ।।४६।।
कैलासवत्क्रमाद्ध्यात्वा ध्यात्वा देवं महेश्वरम् ।
ईशादींश्च पितॄन्ध्यात्वा ततः श्राद्धं प्रवर्तये ।।४७।।

[अनुज्ञानन्तरं करणीयक्रियाः]

अनुज्ञानन्तरं पश्चात्सकलीकरणं तथा[१०५] ।
विघ्नेशं प्रार्थयेच्चैव संकल्पं तु ततः परम्[१०६] ।।४८।।
सामान्यार्घ्यं ततः पश्चाद्यागेश्वरस्य पूजनम् ।
प्रोक्षणं च ततः पश्चाच्चरुशुद्धिं तथैव च[१०७] ।।४९।।

[देवपित्रर्थमर्घ्यकल्पनम्]

[१०८]कल्पयेद्देवपित्रर्थमर्घ्यं पात्रेषु पञ्चसु ।
देवार्थं यवसंयुक्तैः पित्रर्थं तिलसंयुतैः ।।५०।।
अर्घ्ये चाप्यमृतं योज्य स्थलशुद्धिं च कारयेत् ।

[देवपितॄणामावाहनम्[१०९]]

ज्ञात्यादिगोत्रसंज्ञाश्च दीक्षानामपुरःसरम् ।।५१।।

---

[१०३]ततः श्राद्धं करिष्येऽहमितीमान्प्रार्थयेदथ ।
कुरुष्वेत्यभ्यनुज्ञातो दद्याद्दर्भासनं द्वयोः ।।
न तु हस्तेषु दातव्यं पितॄणां विश्वदेवयोः ।
उदगग्रमजातेन सव्ये कृत्वोत्तरीयकम् ।।'
(*उत्तरकामिके* २९.१०४, १०५);
'द्रव्यमर्घ्याम्बुना प्रोक्ष्य प्रार्थयेत्तान्समाहितः ।
यथाश्राद्धं करिष्येऽहं कुरुष्वेति समासतः ।।
द्वाभ्यां दद्यादजातेन सव्येनासनयोः कुशान् ।
त्रयाणामपसव्येन सर्वत्रैवंविधो विधिः ।'
(*अचिन्त्यविश्वसादाख्ये* ६८.२६, २७)

[१०४]भूमौ —ग

[१०५]अत्र कुर्यादिति शेषः ।

[१०६]अत्र कुर्यादिति शेषः ।

[१०७]अत्र कुर्यादिति शेषः ।

[१०८]'कल्पयेद्देवपित्रर्थमर्घ्यं पात्रेषु पञ्चसु ।
गन्धपुष्पकुशाम्भोभिर्विद्याङ्गैर्ब्रह्मसंयुतैः।।
देवार्थं यवसंयुक्तैः पित्रर्थं तिलसंयुतैः ।
अभ्युक्ष्यार्घ्याम्भसा मन्त्रैर्विद्याङ्गैरभिमन्त्रयेत् ।।
पुरुषेण च वस्त्राणि गन्धं हृदयमन्त्रतः ।
पुष्पाणि ब्रह्मशिरसा शिखया धूपदीपकौ ।।
अनुक्तमन्यच्छ्राद्धाङ्गं हृदयेनाभिमन्त्रयेत् ।
एवं द्रव्याणि संशोध्य ततः कर्म समाचरेत् ।।'
(*उत्तरकामिके* २९.९३ उ० —९७ पू०)

[१०९]'आवाहयामीति वदेदुक्तस्त्वावाहयेति तैः ।
आवाहयेदनुज्ञातः स्वनाम्ना प्रणवादिना ।।
स्थापनादित्रयं कृत्वा वामदेवेन मन्त्रवित् । . . .
कृत्वा ततोऽपसव्यं तु पितॄणामप्रदक्षिणम् ।
कुशांस्तु द्विगुणान्दत्त्वा सद्योजातेन मन्त्रतः ।।
आवाहयेदनुज्ञातः पितॄंस्तत्तन्मनुं स्मरन् ।
स्थापनादित्रयं कृत्वा वामेनैव प्रदक्षिणम्' ।।
(*उत्तरकामिके* २९.१०६ —१०७ पू; ११३, ११४);

पुरतः शिवमावाह्य यज्ञसूत्रं च सव्यकम्[११०] ।
प्राचीना[१११]वीतकं कृत्वा ईशादिगणपान्तकम् ।।५२।।
आवाहयेत्क्रमात्सम्यक् पूर्वोक्तविधिमार्गतः ।

[पाद्यवस्त्रोपवीतभूषणाद्यलंकारकरणम्]

[११२]पाद्यार्थं शुद्धदेशे तु उत्तरे चतुरश्रकम् ।।५३।।
वृत्तानि दक्षिणे कृत्वा पूजयेच्च पृथक् पृथक् ।
पाद्यं च विधिवत्सम्यगलंकारं ततः परम् ।।५४।।
वस्त्रयज्ञोपवीतं च भूषणादीनि दापयेत् ।

'शुचीकृत्वा तु संस्थाप्य पूर्वास्यं यद्द्वयं परम् ।
तृतीयमुत्तरास्यं तु स्थापयेत्सर्वगेन तु ।।
सव्येन कुशक्लृप्तिः स्यात्पुनश्चावाहनं भवेत् ।
आवाहनं स्वनामाङ्कं कार्यमावाहयेदिति ।।
वक्तव्यं तैरिदं वाक्यं भक्तियुक्तैः समाहितैः ।।
सव्यक्रिया द्वयस्योक्ता अपसव्यं त्रयस्य तु ।'
(*किरणे* योगपादे ४.१७—१९);
आवाहयेद्यथानाम्नः पञ्चापि तदनन्तरम् ।
(*अचिन्त्यविश्वसादाख्ये* ६८.२७ उ०)

[११०]अत्र कृत्वेति शेषः ।

[१११]वीतिनं—ग

[११२] 'पादशौचाय कुर्यान्मण्डलकानि तु ।
सुसमे गोमयाम्भोभिः सुप्रलिप्ते गृहाजिरे ।।
समन्ताद्रङ्गरेखाभिराकीर्णपदवीपदे ।
द्वे चतुष्कोणके प्राच्यां प्रतीच्यां द्वे सुवर्तुले ।।
दक्षिणोत्तरसंस्थाने हस्तमात्रे तदन्तरे ।
प्रतिमण्डलमग्रे वावटं स्याद्द्वादशाङ्गुलैः ।।
मातृश्राद्धे पितृश्राद्धे मण्डलं चावटं तु वा ।'
'साश्रयोरवकीर्याथ यवान्सद्वृत्तयोस्तिलान् ।
तिर्यङ्मध्ये कुशान्न्यस्त्वा मृत्पिण्डं दक्षिणे न्यसेत् ।।
विद्याङ्गास्त्रेण दक्षस्थं मण्डलं साश्रमर्चयेत् ।
सुगन्धैः श्वेतपुष्पाद्यैर्विद्याङ्गहृदयेन तु ।।
सौम्यस्थं प्रणवास्त्रेण स्वस्वनाम्ना समन्वितम् ।
स्वाहान्तेनापसव्यस्थयज्ञसूत्रेण पश्चिमे ।।
मण्डले करपृष्ठेन स्वधान्तेन समर्चयेत् ।।
पात्रेभ्यः पृथगादायार्घ्योदकं पादयोः क्रमात् ।
दत्त्वार्घ्यं मृदमादाय पादौ प्रक्षालयेदनु ।।
सौम्यमण्डलयोरेवमेषां दत्त्वा सुशीतलैः ।
तोयैराचमनं पश्चादाचान्तः संप्रवेश्य तु ।।' . . .
'अथ रक्षार्थमादाय यवानवकिरेत्परि ।
प्रदक्षिणान्तरेणैव दद्यादर्घ्यमथाञ्जलौ ।।
रूपिणा संनिधानाय द्वितयस्य सकृत् सकृत् ।
प्रतिगृह्य तदर्घ्यं तु पात्रे संस्थाप्य तं भुवि ।।
जानुभ्यामवनौ स्थित्वा घोरेणाभ्यर्चयेद्यवैः ।
पद्भ्यां प्रभृति विश्वाङ्गमाक्रम्याक्रम्य सादरम् ।।
गन्धैरालिप्य सर्वाङ्गं भूषयेत्पुष्पदामभिः ।
वामदेवानुणा धीमान्देयो धूपोऽपि रूपिणा ।।
दीपं च तेन संदद्यादीशानेन पवित्रकम् ।
वस्त्रं प्रावरणोपेतमङ्गुलीयकमादरात् ।।
तदङ्गमपरं दद्यादुपवीतिक्रमेण तु ।'
'रक्षां तिलैरथेशेन दद्यादर्घ्योदकं पुनः ।
त्रयाणां संनिधानार्थमघोरेणाञ्जलौ पृथक् ।।
पूर्ववत्प्रतिगृह्यार्घ्यं स्थापयेदञ्जलौ स्थितम् ।
भूमिष्ठजानुरीशेन शिरसः प्रभृति क्रमात् ।।
तिलैरभ्यर्चयेद्वामदेवमन्त्रमनुस्मरन् ।
गन्धाद्यं धूपदीपौ च रूपिणा दापयेत्ततः ।।
ईशानेन पवित्राद्यमपसव्यं स्वधान्तकम् ।
पूर्णमस्त्विति वक्तव्यं पूर्णमस्त्वितरैरपि ।।
ततस्तान्संस्रवांस्तेषां पात्रे कृत्वा विधानतः ।
पितृस्थानमसीत्येवं न्युब्जं पात्रमधो न्यसेत्' ।।
(*उत्तरकामिके* २९.९०—९३ पू०, ९७ उ०—१०२, १०७ उ०—११२, ११५—११९)

[अग्निकार्यविधिः]

पितृ[११३]कार्ये विधानेन वह्निकार्यं पुरा [११४]कुरु ।।५५।।
अग्निसंधानविषये किंचिद्भेदः[११५] प्रचक्ष्यते ।
[११६]निर्वाणिनः समारभ्य [११७]आचार्यान्तं क्रमाच्छृणु ५६।।
शिवाग्निमुखं संकल्प्य होमयेत्तु विशेषतः ।
समय्यादिविशेष्यन्तं [११८]बालाग्नौ होमयेत्ततः ।।५७।।
[११९]सर्वपाकविशुद्ध्यर्थं [१२०]शिवाग्न्याहुतिपूर्वतः ।
शिवानले करिष्येऽहं तस्माद्धोममिति द्विजाः ।।५८।।
कुरुष्वेत्यभ्यनुज्ञातो वह्नौ होमं समाचरेत् ।
चरुं समिधमाज्यं च [१२१]विशेष[१२२]पितृदैवेते ।।५९।।
सोमश्च [१२३]पितृमांश्चैव [१२४]अङ्गिरो यम एव च ।
अग्निश्च [१२५]कव्यवाहाद्यः अर्यम्णेऽग्निष्वात्ताय च ।।६०।।
बर्हिषिभ्य आज्यपाय पितरः सोमपाय च ।
सोमाय पितृमच्छब्दं चतुर्थ्यन्तं स्वधा नमः ।।६१।।
ततो यमायेत्युच्चार्य अङ्गिरस्वते स्वधा नमः ।
[१२६]उक्त्वाग्नये ततः कव्यवाहनाय स्वधा नमः ।।६२।।
अर्यम्णे चाग्निष्वात्ताय बर्हिषिभ्यः स्वधा नमः ।
सोमपाय च पितृणामाज्यपाय स्वधा नमः ।।६३।।

---

[११३]कार्यं —ग

[११४]कृतम् —ग

[११५]भेदं —ग

[११६]आचार्यादि समा —ग

[११७]निर्वाणान्तं —ग क्रमान्

[११८]बालाग्निं —ग;
'द्विमुखं चैकहृदयं चतुःश्रोत्रं द्विनासिकम् ।
आस्यद्वयं च षण्णेत्रं पिङ्गलं सप्तहस्तकम् ।।
त्रिमेखलात्रिपादं च सप्तजिह्वासमायुतम् ।
चतुःशृङ्गं वृषारुढं बालाग्निं संप्रपूजयेत् ।।'
(टि० १०२ मातृकायां पृ० ५०, ५१)

[११९]'पङ्क्तिदोषनिवृत्त्यर्थं कृत्वा तु परिहारकान् ।
सर्वपाकविशुद्धयर्थं शिवाग्न्याहुतिपूर्वतः ।।
शिवालने करिष्येऽहं पृच्छेद्धोममिति द्विजाः ।
कुरुष्वेत्यभ्यनुज्ञातो वह्नौ होममथाचरेत् ।।
सोमाय पितृमच्छब्दं चतुर्थ्यन्तं स्वधा नमः ।
ततो यमायेत्युच्चार्याङ्गिरस्वते स्वधा नमः ।।
उक्तवाग्नये ततः कव्यवाहनाय स्वधा नमः ।'
(*उत्तरकामिके* २९.१२१ उ० —१२४);
उत्तरे शिवपूजा च दक्षिणे पिण्डयोजनम् ।
मध्ये वह्निसपर्या वै कर्तव्या नन्दिकेश्वर ।।
अपसव्योपवीती च पित्रर्थे च विशेषतः ।
ओं सोमाय पितृमते ।
सर्वपाकाग्रमादाय हुत्वाग्नौ पितृयज्ञके ।।
ओं कव्यवाहनाय स्वधा नमः ।
एतेन जुहुयादग्नौ पिण्डत्रयमनन्तरम् ।।
पात्रेषु हुतशेषान्नमाददीत नरं जपन् ।
एवमग्नौ च करणम् ।'
(*अचिन्त्यविश्वसादाख्ये* ६८.४० —४४ पू०)

[१२०]शिवाग्न्याकृति —ग; उत्तरकामिकागममनुसृत्यात्र पाठः साधितः ।

[१२१]विशेषपितृदेवताविषये इत्यर्थः ।

[१२२]पितृदेवताः —ग

[१२३]पितृमश्चैव —ग

[१२४]अङ्गिरर्यम —ग

[१२५]हव्यवाहाद्य —ग

[१२६]उक्त्वाग्ने ततः —ग

[127]आवाहनाद्यैः संपूज्य प्रत्येकं होमयेत्ततः ।
[128]चतुर्विंशतिपितॄणां स्वधान्तं होममाचरेत् ।।६४।।

[हुतशेषान्नविनियोगः]

[129]हुतशेषं प्रदद्यात्तु भोजनेषु नरं [130]स्मरन् ।
पित्रर्थं चैव [131]पिण्डार्थं दद्याद्विश्वस्य [132]देवयोः ।।६५।।
अर्घ्यं[133] च स्थालीपाकं[134] च ब्राह्मणान्भोजयेत्ततः ।

[भोजनदानप्रकारः[135]]

चतुरश्रं त्रयं वृत्तं[136] गोमयेनैव शुद्धितम् ।।६६।।

---

[127]आवाहनं च सं—ग

[128]'अथ चरोरेकदेशमुद्धृत्य, पात्रान्तरे निधाय, शेषमोदनं यवागूतिलाज्यैः समुदायित्यौदुम्बर्या दर्व्योपघातं जुहोति। 'पितृभ्यः स्वधा नमः स्वाहा। (उद्दिश्य त्यागः कृताकृतः) पितामहेभ्यः स्वधा नमः स्वाहा। प्रपितामहेभ्यः स्वधा नमः स्वाहा। मातृभ्यः स्वधा नमः स्वाहा। पितामहीभ्यः स्वधा नमः स्वाहा। प्रपितामहीभ्यः स्वधा नमः स्वाहा। मातामहेभ्यः स्वधा नमः स्वाहा। मातृपितामहेभ्यः स्वधा नमः स्वाहा। मातृप्रपितामहेभ्यः स्वधा नमः स्वाहा। मातामहीभ्यः स्वधा नमः स्वाहा। मातृपितामहीभ्यः स्वधा नमः स्वाहा। मातृप्रपितामहीभ्यः स्वधा नमः स्वाहा। आचार्येभ्यः स्वधा नमः स्वाहा। आचार्यपत्नीभ्यः स्वधा नमः स्वाहा। गुरुभ्यः स्वधा नमः स्वाहा। गुरुपत्नीभ्यः स्वधा नमः स्वाहा। सखिभ्यः स्वधा नमः स्वाहा। सखिपत्नीभ्यः स्वधा नमः स्वाहा। ज्ञातिभ्यः स्वधा नमः स्वाहा। ज्ञातिपत्नीभ्यः स्वधा नमः स्वाहा। अमात्येभ्यः स्वधा नमः स्वाहा। अमात्याभ्यः स्वधा नमः स्वाहा। सर्वेभ्यः स्वधा नमः स्वाहा। सर्वाभ्यः स्वधा नमः स्वाहा। इति चतुर्विंशत्या मन्त्रैः प्रत्येकं जुहुयात्।
(*बोधायनश्राद्धप्रयोगे* पृ० ५५, ५६)

[129]'हुतशेषं प्रदद्यात्तु भोजनेषु नरं स्मरन्।
पित्रर्थं चैव पिण्डार्थं दद्याद्विश्वस्य देवयोः ।।'
(*उत्तरकामिके* २९, १२५)

[130]स्मरेत्—ग

[131]पिण्डानां—ग

[132]देवताः—ग

[133]अत्र दद्यादिति शेषः।

[134]अत्र कृत्वेति शेषः।

[135]'सौवर्णं राजतं पात्रं ताम्रजं दलसंभवम्।
भाजनं शुद्धमादाय भोजनायोपपादयेत् ।।
हस्तप्रक्षालनायापो दत्त्वा भूयश्च शोधयेत्।'
'अन्नमिष्टं हविष्यं च दद्यादक्रोधनो नरः।
दत्त्वा तु मधुरान्नं च पुरुषेण घृतप्लुतम् ।।
संस्पृश्याघोरमन्त्रेण तत्पात्रमभिमन्त्रयेत्।
पवित्रीकरणायेति ततः सव्यमधोमुखम् ।।
तदङ्गुष्ठं स्वहस्तेन गृहीत्वान्ते निवेश्य च।
गुह्यमन्त्रं जपेद्वाथ मृत्युजिन्मन्त्रमेव वा ।।
अमृतत्वाय परितः पाणिना भ्रामयेज्जलम्।
आपोशनार्थमाज्येन प्रदद्यात्पाणिपङ्कजे ।।
शुभं भुञ्जीध्वमित्युक्ते भुञ्जीरंस्तेऽपि वाग्यताः।
अतिथिं पूजयेच्छक्त्या तत्काले तु विचारयेत् ।।
देवो देवी गुहो विष्णुर्धर्मः साक्षाच्छरीरवान्।
चरन्त्यतिथिरूपेण तस्मात्तांश्च विचारयेत् ।।
जपन्नीशानमातिष्ठेदातृप्तेरुदगाननः।
तृप्ताःस्थेति धृतान्नस्सन्तृप्ताःस्म इति कीर्तिते ।।
तदन्तं प्रक्षिपेद्भूमौ सकृदद्भिः समन्वितम्।'
(*उत्तरकामिके* २९.१२०, १२१ पू० ; १२६—१३३ पू०)

[136]अत्र कुर्यादिति शेषः।

कदलीपर्णमादाय [137]साग्रं वामे तु निक्षिपेत् ।
उपपात्रसहोपेतं प्रोक्षयेदस्त्रमन्त्रतः ॥६७॥
अन्नं [च] दापयेच्चैव दद्याल्लवणपूर्वकम् ।
सर्पिषा पयसा चैव दधि मधु फलत्रयम् ॥६८॥
व्यञ्जनं पायसान्नं च परमान्नं पृथक् पृथक् ।
दापयेत्कदलीपर्णे [138]पात्रशुद्धिं च पूर्वतः ॥६९॥
अस्त्रेण प्रोक्षयेच्चैव पात्रं वामेन संस्पृशेत् ।
अपसव्यक्रमेणैव एकवारं प्रदक्षिणम् ॥७०॥
ईशानेनैव मन्त्रेण परिषिच्य विशेषतः ।
त्रियम्बकेति मन्त्रेण अभ्युक्षणं च कारयेत् ॥७१॥
हव्यं च [139]दैवमन्त्रं च कव्यं च पितुरन्नकम् ।
स्वाहां चैव स्वधां चैव [140]शम्भोरन्नं च रक्षयेत् ॥७२॥
[141]तिलाक्षतैः समोपेतमुदकेनैव [142]पूर्वतः ।
[143]दैवं स्वर्णमयं पात्रं [144]राजतं पितृपात्रकम्[145] ॥७३॥
एकः शम्भुर्महद्भूतं प्रीयतां च महेश्वरः[146] ।
दत्तं ददेद्विशेषेण उदकं प्राश्य बुद्धिमान् ॥७४॥
प्राणाहुतिं ततः [147]कृत्वा [148]सद्यं जप्त्वा श्रुतिं जपेत्[149] ।
भोजनानन्तरं [150]तेषां तृप्त्यै विकिरमाचरेत् ॥७५॥
[151]वायसं पिण्डमादाय [152]प्रदद्यान्मन्त्रमुच्चरन्[153] ।
उच्छिष्टक्षालनं[154] पश्चात्ताम्बूलं दक्षिणां तथा[155] ॥७६॥

---

[137]अश्रं वामे तु प्रोक्षयेत् —ग

[138]अत्र कृत्वा इति पदमध्याहृत्य पूर्वतः पात्रशुद्धिं कृत्वेति व्याख्येयमिति भाति। अत्र ७१ श्लोके 'ईशानेनैव मन्त्रेण' तै० आ० १० —४७.१; त्रियम्बकेति मन्त्रेण' तै० आ० १०.६७.१।

[139]देवमन्त्रं —ग

[140]शम्भुमन्त्रं च —ग

[141]तिलाक्षतसहोपेतं —ग

[142]पूर्वकम् —ग

[143]देवं —ग

[144]रजतं —ग

[145]अत्र ग्रन्थानुस्यूतिर्नास्ति। ग्रन्थपातः स्यादिति भाति।

[146]अत्र 'इति' पदमध्याहृत्य व्याख्येयमिति भाति।

[147]अत्र कृत्वा इति पदस्य कारयित्वेत्यर्थो व्याख्येय इति भाति।

[148]सदा —ग

[149]जपन् —ग

[150]पश्चात् तृप्तिं —ग

[151]पायसं —ग

[152]पाद्यादौ मन्त्र —ग

[153]अत्र काकेभ्य इति शेषः।

[154]अत्र कृत्वेति शेषः।

[155]अत्र दद्यादिति शेषः।;
पूर्वमाचमनं त्रिभ्यो द्वाभ्यां दद्यादनन्तरम्।
प्रदद्याच्छुद्धहस्तेभ्यस्ताम्बूलं चास्यशुद्धये॥
सकर्पूरं तदङ्गं यद्गृहोपकरणं तथा।
गोभूदास्यादिकं दद्याद्दक्षिणां तेषु तृप्तये॥
(*उत्तरकामिके* २९.१३८ उ० —१४० पू०)

[तृप्तिवचनानि, ब्राह्मणानां विसर्जनं च]

[156][वर्धनीमुदकापूर्णां श्राद्धदो दक्षिणाननः] ।
[157]धृत्वा पठेत्स्वधाकारं वदेयुर्वाच्यतामिति ॥७७॥
ईशादित्रितयं पश्चाच्चतुर्थ्यन्तमुदीरयेत् ।
स्वधान्तं श्राद्धकृत्पश्चादीशाद्याः सर्व एव च ॥७८॥
अस्तु स्वधेति [158]ब्रूयुस्ते भूमौ[159] सिञ्चेत्ततो जलम् ।
प्रदक्षिणत्रयं कृत्वा नमस्कारं क्रमाद्गुरो[160] ॥७९॥
प्रार्थयेद्दिवसे [161]श्राद्धं शैवश्राद्धफलप्रदम्[162] ।
अन्नशेषैः किं क्रियतामित्युक्ते श्राद्धकारिणा ॥८०॥
इष्टैः सहैव भोक्तव्यमिति ते ब्रूयुरिष्टदाः ।
दातारो नोऽभिवर्धन्तां शैवसंततिरेव च ॥८१॥
श्रद्धा च नो मा व्यपगाद्बहु देयं च नोऽस्त्विति ।
इत्युक्त्वा च प्रिया वाचः प्रणिपत्य क्षमापयेत् ॥८२॥

[शैवश्राद्धफलम्]

सर्वपापक्षयार्थं[163] हि सर्वशत्रुविनाशनम् ।
पञ्चपातकनाशार्थं[164] परचक्राद्भयं विना ॥८३॥

---

[156]'वर्धनीमुदकापूर्णां श्राद्धदो दक्षिणाननः ।
धृत्वा पठेत्स्वधाकारं वदेयुर्वाच्यतामिति ॥
ईशादित्रितयं पश्चाच्चतुर्थ्यन्तमुदीरयेत् ।
स्वधान्तं श्राद्धकृत्पश्चादीशाद्याः सर्व एव च ॥
अस्तु स्वधेति ब्रूयुस्ते भूमौ सिञ्चेत्ततो जलम् ।
एवं त्रिवारं कर्तव्यं पठेयुस्तदनन्तरम् ॥
देवा रुद्राश्च तृप्यन्तामित्युक्ते च स्वयं पठेत् ।
दातारो नोऽभिवर्धन्तां शैवसन्ततिरेव च ॥
इत्युक्ते तैरिदं वाक्यं वक्तव्यं द्विजसत्तमाः ।
पुनश्चैवं वदेत्कर्ता उत्तरे श्राद्धकृत्ततः ॥
श्रद्धा च नो मा व्यपगाद्बहुदेयं च नोऽस्त्विति ।
इत्युक्त्वा च प्रिया वाचः प्रणिपत्य क्षमापयेत् ॥
यस्मिंस्ते संस्रवाः पूर्वमर्घ्यपात्रे निवेशिताः ।
पितृपात्रं तदुत्तानं कृत्वा पश्चाद्विसर्जयेत् ॥
सद्योजातेन मन्त्रेण पितृपूर्वमनुव्रजेत् ।
अन्नशेषैः किंक्रियतामित्युक्ते श्राद्धकारिणा ॥
इष्टैः सहैव भोक्तव्यमिति ते ब्रूयुरिष्टदाः ॥'
(*उत्तरकामिके* २९.१४० उ० —१४८);
'पूर्वमाचमनं दद्यात्त्रिभ्यः पश्चाद्ददेद्द्वयोः ।
आचम्योन्मृज्य संकल्प्य नमस्कृत्वा क्षमापयेत् ॥
दानं दत्त्वा यथाशक्त्या भक्तितोऽन्ते विसर्जयेत् ।
(*किरणे* योगपादे ४.३३, ३४ पू०);
'पूर्वमाचमनं त्रिभ्यो द्वाभ्यां दद्यादनन्तरम् ।
दद्याच्च दक्षिणां तेभ्यः कुर्यात्पात्रमुदाननः ॥
सर्वान्प्रदक्षिणीकृत्य प्रणम्य विसृजेत्पुनः ।
(*अचिन्त्यविश्वसादाख्ये* ६८, ५२ उ० —५३)

[157]स्मृत्वा —ग

[158]ब्रूयास्ते —ग

[159]सिञ्चै तदोज्वलम् —ग

[160]गुरो इति विष्णुसंबोधनम् ।

[161]अत्र 'मया कृतम्' इति पदद्वयमध्याहृत्य व्याख्येयम् ।

[162]अत्र 'भवतु' इति पदमध्याहृत्य प्रार्थयेदित्यन्वयः कर्तव्यः ।

[163]अत्र भवेदिति शेषः ।

[164]अत्र भवेदिति शेषः ।

सर्वदुःखप्रशमनं सर्वव्याधिनिवारणम् ।
सर्वोपद्रव[165]दारिद्र्याद्यपमृत्युविनाशनम् ।।८४।।
आयुरारोग्य[166]कैश्वर्यधर्मार्थकाममोक्षदम् ।
पुत्रपौत्र[167]विवर्धनं सर्वकामफलप्रदम्[168] ।।८५।।
आशीर्वादं विशेषेण भस्माक्षतपुरःसरम्[169] ।
यस्मिंस्ते [170]संस्रवाः पूर्वमर्घ्यपात्रे निवेशिताः ।।८६।।
पितृपात्रं [171]तदुत्तानं कृत्वा पश्चाद्विसर्जयेत् ।
गृहीत्वा दर्भपत्रैश्च उद्वासनं तथैव च ।।८७।।

[पिण्डप्रदानम्[172]]

कुक्कुटाण्डप्रमाणेन चतुर्विंशतिसंख्यया ।

---

[165]दारिद्र्यम् अप—ग

[166]मैश्वर्यं धर्मार्थं काम—ग

[167]विवर्धश्च—ग

[168]अत्र भवेदिति शेषः ।

[169]अत्र कुर्यादिति शेषः ।

[170]संश्रवाः—ग

[171]तदुक्तानां—ग

[172]'अत्रशेषैश्चतुर्विंशतिपिण्डान्कृत्वा चतुर्विंशतिपिण्डांश्चतसृषु पङ्क्तिषु षट्षट्संख्यया दक्षिणान्तं प्रत्यगपवर्गं ददाति। पितृभ्यः स्वधा नमः। पितामहेभ्यः स्वधा नमः। प्रपितामहेभ्यः स्वधा नमः। मातृभ्यः स्वधा नमः। पितामहीभ्यः स्वधा नमः। प्रपितामहीभ्यः स्वधा नमः। मातामहीभ्यः स्वधा नमः। मातृपितामहेभ्यः स्वधा नमः। मातृप्रपितामहेभ्यः स्वधा नमः। मातामहीभ्यः स्वधा नमः। मातृपितामहीभ्यः स्वधा नमः। मातृप्रपितामहीभ्यः स्वधा नमः। आचार्येभ्यः स्वधा नमः। आचार्यपत्नीभ्यः स्वधा नमः। गुरुभ्यः स्वधा नमः। गुरुपत्नीभ्यः स्वधा नमः। सखिभ्यः स्वधा नमः। सखिपत्नीभ्यः स्वधा नमः। ज्ञातिभ्यः स्वधा नमः। ज्ञातिपत्नीभ्यः स्वधा नमः। अमात्येभ्यः स्वधा नमः। अमात्याभ्यः स्वधा नमः। सर्वेभ्यः स्वधा नमः। सर्वाभ्यः स्वधा नमः। उपरि तिलोदकं पूर्ववत्। मार्जयन्तां पित्रादयः। मार्जयन्तां मातामहादयः। मार्जयन्तामाचार्यादयः। मार्जयन्तां ज्ञात्यादयः। पितृभ्यो ज्ञात्यादयः। पितृभ्यो नमः। आञ्जनं ददामि। अभ्यञ्जनं नमः। आञ्जनं ददामि। अभ्यञ्जनं ददामि। मधु ददामि। वासो ददामि। गन्धपुष्पधूपदीपान् ददामि।'
(*बोधायनश्राद्धप्रयोगे* पृ० ७०, ७१);

'उच्छिष्टसंन्निधौ कुर्याद्गोमयेनैव मण्डलम् ।
कुशानास्तीर्य दक्षाग्रानजातेन तिलं तथा ।।
वामेन तिलसंयुक्तं सर्वोदनसमन्वितम् ।
दक्षिणाभिमुखो भूत्वा पिण्डत्रितयमुद्धरन् ।।
मध्वाज्यतिलसंयुक्तं भूमिष्ठः सव्यजानुना ।
दद्यादुपरि दर्भाणां क्रमादीशादिशम्बरैः ।।
विधाय वारिणो धारां वामदेवमुदीरयन् ।
क्षौमं कार्पाससूत्रं वा दद्याद्वस्त्रार्थमञ्जनम् ।।
संपूज्य गन्धपुष्पाद्यैः प्रणिपत्य क्षमापयेत् ।'
'पिण्डांश्च गोषु विप्रेभ्यो दद्यादग्नौ जलेऽपि वा ।
प्रक्षिपेत्कुलपत्नी वा मध्यमं पिण्डमश्नुयात् ।।
ततोऽस्यां जायते पुत्रो रुद्रांशो लक्षणान्वितः ।
धीरः श्रीमान्यशस्वी च विद्यासन्तानपारगः ।।'
(*उत्तरकामिके* २९, १३३ उ०—१३७; १४९, १५०);

'तदोदकं तु संगृह्य मण्डलं दक्षिणाननम् ।
सव्येनास्तरणं दद्यादपस्तत्र विनिक्षिपेत् ।।
पूर्वमाचमनं दद्याद्गुह्यकेन तिलोदकम् ।
पिण्डत्रयं ततः कृत्वा सर्वान्नपरिकल्पितम् ।।
नरेण सर्वतो दद्यादन्नं पिण्डत्रयं क्रमात् ।
दत्त्वा वामेन गन्धं च तेनैवार्घ्यं प्रकल्पयेत् ।।
पुत्रार्थं वनिता शुद्धा पिण्डमश्नाति मध्यमम् ।

पितॄणां पिण्डमादाय[173] तस्योपरि तिलोदकम्[174] ॥८८॥
पितॄणां बलिदानं च पिण्डसंयोजनात्परम्[175] ।
पिण्डांश्च गोषु विप्रेभ्यो दद्यादग्नौ जलेऽपि वा ॥८९॥
प्रक्षिपेत्कुल[176]पत्न्या वा भक्ष्यं पिण्डं पितामहम् ।

[कर्मसिद्ध्यर्थहोमः]

[177]एतदग्निं समभ्यर्च्य कर्मसिद्ध्यर्थ[178]होमकम्[179] ॥९०॥
[180]तत्त्वानि पदमन्त्रादीन्स्वाहान्तं होमयेद्गुरो[181] ।
भवादीञ्शक्तिनामानि [182]सुतपत्नीसमन्वितान्[183] ॥९१॥
पञ्चब्रह्मादिनामान्तं हुत्वा पूर्णां समाचरेत् ।
प्रायश्चित्तविधानेन अघोरेण शतं हुनेत् ॥९२॥
अन्तर्बलिं क्रमाच्चैव उपस्थानं तथैव च[184] ।
तद्देवोद्वासनं [185]पश्चाद्वह्नेरुद्वासनं चरेत् ॥९३॥
पवित्रं विसृज्याचम्य होमरक्षां च धारयेत् ।
[186]यत्किंचित्कर्म हे देव[187] [188]समर्पयेत्सदाशिवे ॥९४॥

तदा तस्याः सुतो धीरो रुद्रांशः श्रीयुतो भवेत् ॥
अथवा तद्गवां दद्यादग्नावप्सु विनिक्षिपेत् ।'
(*किरणे* योगपादे ४.२८ उ० —३२);
'उच्छिष्टनिकटे कुर्याद्गोमयेनाथ मण्डलम् ।
अजातेन च सद्दर्भान्वामेन विकिरेत्तिलान् ॥
त्रयं सर्वान्नपिण्डानां सतिलं दक्षिणामुखः ।
दर्भैः परिक्रमाद्द्यादीशाद्यैर्मन्त्रकैः क्रमात् ॥
वामदेवेन मन्त्रेण तोयधारां विनिक्षिपेत् ।
पूजयेद्गन्धपुष्पाद्यैः प्रणमेन्नन्दिकेश्वर ॥
क्षमयित्वोपसंहृत्य समाचम्य विधानवित् ।
पत्नीभ्यो मध्यपिण्डं च दद्याद्रुद्रसुतृप्तये ॥
ब्राह्मणायाथवा तोये वह्नौ गोवृषभे तथा ॥
पिण्डांस्त्रीनपि दद्याद्वै निक्षिपेन्नन्दिकेश्वर ॥'
(*अचिन्त्यविश्वसादाख्ये,* ६८.४९ —५२ पू० ; ५४, ५५ पू०)

[173] अत्र आदाय इति पदस्य प्रदाय इत्यर्थो व्याख्येयः; धातूनामनेकार्थत्वात् ।

[174] अत्र दद्यादिति शेषः ।

[175] अत्र भवेदिति शेषः ।

[176] पत्नी वा —ग

[177] पूर्वं होमाय साधितमग्निमित्यर्थः ।

[178] मोहकम् —ग

[179] अत्र कुर्यादिति शेषः ।

[180] तत्त्वादिपद —ग; तत्त्वानि=तत्त्वत्रयम् । पदमन्त्रादीन् व्योमव्यापिपदमन्त्रादीन् ।

[181] गुरो इति विष्णुसंबोधनम् ।

[182] सुतपत्नीसमान्वितान् इति भवादीन् इत्यस्य विशेषणम् ।

[183] समन्वितम् —ग

[184] अत्र कुर्यादिति शेषः ।

[185] पश्चाद्वह्निमुद्वासनं —ग

[186] यत्किञ्चित्कर्म हे देव सदा सुकृतदुष्कृतम् ।
तन्मे शिवपदस्थस्य भुङ्क्ष्व क्षपय शंकर ॥
शिवो दाता शिवो भोक्ता शिवः सर्वमिदं जगत् ।
शिवो यजति सर्वत्र यः शिवः सोऽहमेव तु ॥
एवं मन्त्रं समुच्चार्य'
(*अजिते* २०.२४२ उ० —२४४)

[187] इति मन्त्रम् इति शेषः ।

[188] समर्प्य च सदाशिवम् —ग

[परेऽहनि कर्तव्यं तर्पणम्]

परेऽहनि विशेषेण तर्पणं च समाचरेत् ।
अथवा तद्दिने वापि तर्पणं च[१८९] क्रमाद्गुरो ॥९५॥
सव्योपवीतिनं पश्चादिष्टं [१९०]भुञ्जीत यो नरः ।

[श्राद्धकरणेन सप्तविधानां तृप्तिः[१९१]]

[१९२]अग्नौ हुतेन [१९३]देवस्थाः [१९४]स्वर्गस्थाः श्राद्धभोजनात्[१९५] ॥९६॥
[१९६]यमस्थाः पिण्डदानेन [१९७]नारका विकिरेण तु ।
[१९८]उच्छिष्टैरपि पैशाचा [१९९]असुरा भूरिभोजनात्[२००] ॥९७॥
[२०१]दक्षिणाभिर्मनुष्याश्च [२०२]श्राद्धे सप्तविधास्तथा[२०३] ।
[२०४]शिवश्राद्धे यदा भुङ्क्ते दोषस्तत्र न विद्यते ॥९८॥
[२०५]पितृशेष इति प्रोक्तः [२०६]पितृणामक्षयो भवेत् ।
श्राद्धहीनश्च यो मर्त्यः[२०७] अपुत्रो वा [२०८]दरिद्रकः[२०९] ॥९९॥
एवं यः [२१०]कुरुते मर्त्यः शिवसायुज्यमाप्नुयात्[२११] ।
अन्यथा कुरुते मोहात्तत्कर्म निष्फलं भवेत् ।
तस्मात्सर्वप्रयत्नेन आगमोक्तविधानतः[२१२] ॥१००॥

[२१३]इत्यजिताख्ये [महातन्त्रे] चर्यापादे शैवश्राद्धविधिः
[त्र्यधिकशततमः] पटलः

---

[१८९]अत्र कर्तव्यमिति शेषः ।
[१९०]'भुञ्जीत' अन्तर्भावितणिजर्थः । भोजयीत इत्यर्थः । स नरः पूर्वोक्तश्राद्धफलं समाप्नुयादिति व्याख्येयम् ।
[१९१]'अग्नौ हुतेन देवस्थाः स्वर्गस्था विप्रभोजनात् ।
यमस्थाः पिण्डदानाद्यैर्नारका विकिरेण तु ॥
दक्षिणाभिर्मनुष्याणामसुरा भूरिभोजनात् ।
उच्छिष्टेन तु पैशाचाः सप्तस्थानेषु तृप्तये ॥'
(*सकलागमसंग्रहे* (टि० १४०) पृ० १४४)
[१९२]अग्निहुतेन देवस्यान् —ग
[१९३]देवस्थाः =ब्रह्मलोकवासिनः
[१९४]स्वर्गस्थान् —ग
[१९५]भोजनम् —ग
[१९६]यमायपिण्ड —ग; यमस्थाः =पितृलोकवासिन इत्यर्थः ।
[१९७]नरके —ग; नारकाः =नरकवासिन इत्यर्थः ।
[१९८]उच्छिष्टा अपि —ग
[१९९]असुरात् —ग
[२००]भोजनम् —ग
[२०१]दक्षिणापि मनुष्यञ्च —ग
[२०२]श्राद्धं सप्तविधं तथा —ग
[२०३]अत्र तृप्ता भवन्तीति शेषः ।
[२०४]'शिवश्राद्धे यदा भुङ्क्ते दोषस्तत्र न विद्यते ।'
(*सकलागमसंग्रहे* (टि० १४०) पृ० ८५)
[२०५]पितृश्रेष्ठमिति —ग
[२०६]पितृनामक्षयं —ग
[२०७]अत्र स इति शेषः ।
[२०८]दरिद्रतः —ग
[२०९]अत्र भवेदिति शेषः ।
[२१०]कुमर्त्यञ्च —ग
[२११]'श्राद्धमेवं विधं शैवं शिवसायुज्यदं परम् ।'
(*किरणे* योगपादे ४.३४ उ०)
[२१२]अत्र श्राद्धं कुर्यादिति शेषः ।
[२१३]इत्यजिते चर्यापादे शैवश्राद्धविधिपटलः —ग

अनुबन्धः (१)

[रक्षाबन्धनविधिः[1]]

अथ वक्ष्ये विशेषेण रक्षाबन्धविधिक्रमम् ।
स्थापने प्रोक्षणे चैव अयने विषुवे तथा ।।१।।
देवस्य चोत्सवारम्भे देवदेव्योश्च कौतुकम् ।
आचार्यो मन्त्रसिद्ध्यर्थं रक्षाबन्धक्रमेण च ।।२।।
कौतुकं बन्धयेद्रज्जुं पञ्चसप्तनवत्रिधा ।
[2]विश्वेभ्य इति मन्त्रेण बृहत्सामक्षमन्त्रतः ।।३।।
पुत्रवान् रोगनाशार्थमार्तश्चौषधमीप्सितम् ।
विश्वस्य परिरक्षार्थं रक्षाबन्धं समाचरेत् ।।४।।

विघ्नेश्वरपूजासंकल्पं कृत्वा रक्षाबन्धकर्म करिष्ये। पुण्याहवाचनं वरुणकुम्भस्थापनं च करिष्ये इति संकल्प्य, अष्टदलपद्ममालिख्य धान्यतण्डुलतिलमाषलाजदर्भानास्तीर्य तेषूपरि कुम्भं निधाय जलं पूरयित्वा कुम्भमलङ्कृत्य नालिकेरफलेन पिधाय वरुणमावाह्य षोडशोपचारपूजां कृत्वा स्वर्णरजतताम्रनिर्मितपात्रे शुद्धतण्डुलमापूर्य अष्टदलपद्मं विलिख्य मध्ये नालिकेरताम्बूलं स्वर्णकार्पासनिर्मितनवतन्तून् क्रमेण संस्थाप्य, प्रोक्ष्य हृदयेन परमीकृत्य संरक्ष्य पुण्याहपञ्चगव्यार्घ्यजलेनास्त्रेण स्थण्डिले ओं हां आधारशक्तये नमः यन्त्रिकायां त्रियम्बकाय नमः स्थलिकायां पृथिवीतत्त्वाय नमः, तण्डुले सप्तकोटिमहामन्त्रेभ्यो नमः, स्वर्णरजतकार्पाससूत्रे आत्मतत्त्वाय नमः विद्यातत्त्वाय नमः शिवतत्त्वाय नमः, नालिकेरे मायाशक्त्यै नमः, भस्मनि लकुलीश्वराय नमः इति गन्धपुष्पनैवेद्यफलताम्बूलधूपदीपं घण्टारवेण दत्त्वा प्रतिसरजपं कुरुध्वं इति प्रार्थयेत् 'वयं कुर्मः' इति प्रतिवचनम् । प्रतिसरजपः । [3]ॐ तत्सवितुर् + त् । ओं अग्निमीळे पुरोहितं + स्रवन्तु नः । कृणुष्वपाजः प्रसितिन्नपृथ्वीं, अदेवी इत्यादि जपित्वा ॐ नमो ब्रह्मणे + करोमि । इति त्रिः । प्रणवेनास्थाप्य सुरभिमयाब्लिङ्गाभिः प्रतिसरसूत्रं कर्तारं च प्रोक्ष्य प्रतिसरसूत्रमादाय त्र्यम्बकं यजामहे इति भस्मना त्रिरूर्ध्वमुन्मृज्य अग्निरायुष्मान् इति नालिकेरं दक्षिणहस्ते निक्षिप्य बृहत्सामक्षत्रभृद् + रक्षा इति रक्षां कुर्यात् । यो ब्रह्मा ब्रह्मण उज्जहार + अक्षितम् । इत्यष्ट ऋग्भिः बन्धयेत् । रक्षाबन्धनमुहूर्तः सुमुहूर्तोऽस्तु इति प्रतिवचनम् ।

लिङ्गस्य रुद्रभागे तु पीठे च नालमध्यमे ।
देवानां दक्षिणे हस्ते शक्तीनां वामहस्तके ।।५।।

---

[1]अयं पटलः आर्-इ ३९७९३ कोशे दृश्यते ।
[2]'विश्वेभ्य' इति तै० आ० १०.६७.१
'बृहत्सामक्ष' इति तै० सं० ४.४.१२.२
[3]'ओं तत्सवितुः' तै० आ० १०.३५
'ओं अग्निमीळे पुरोहितं' ऋक्० १.१.१
'अदेवी' ऋक्० ८.११.३
'अदेवी' ऋक्० ८.१२.३
'ओं नमो ब्रह्मणे+करोमि' तै० आ० २.१३.२
'त्र्यम्बकं यजामहे' तै० आ० १०.५६
'अग्निरायुष्मान्' तै० सं० १.३.११.५
'बृहत्साम क्षत्रभृद्' तै० सं० ४.४.१.२
'यो ब्रह्मा ब्रह्मण उज्जहार' याजुषमन्त्ररत्नाकरे पृ० ८०—८१

शिवास्त्रमध्यमे भागे वृषस्य दक्षशृङ्गके ।
ध्वजदण्डस्थिते दण्डे रुद्रभागे तु निक्षिपेत् ॥६॥
रथे सिंहासने चैव पूर्वस्तम्भे तु बन्धयेत् ।
मण्डपादिषु सर्वेषु मुख्यस्तम्भे तु बन्धयेत् ।
इत्येवं सर्वमाश्रित्य सूत्रधारं तु कारयेत् ॥७॥

[इत्यजितागमे प्रथमतरङ्गे रक्षाबन्धनविधिपटलः]

अनुबन्धः (२)

[शिवमण्टपपूजाविधिः[1]]

[उत्तमादिचतुर्विधमण्टपाः]

ततो मण्टपपूजाया विधानं वक्ष्यते शृणु ।
उत्तमं मध्यमं चाथ अधमं चाधमाधमम् ॥१॥
इति भेदैश्चतुर्भिस्तु युक्तं तत्कुण्डसंख्यया ।
त्रयस्त्रिंशत्कुण्डयुक्तं पञ्चावरणसंयुतम् ॥२॥
मण्टपं यागशालाया उत्तमं परिकीर्तितम् ।
चतुःप्राकारसंयुक्तं पञ्चविंशतिभिस्तथा ॥३॥
कुण्डैस्तु[2] यागशालाया मण्टपं मध्यमं भवेत् ।
तथा कुण्डैः सप्तदशैः[3] प्राकारत्रयसंयुतम् ॥४॥
एकावरणसंयुक्तं नवकुण्डैः परिष्कृतम् ।
अधमं प्रोच्यते यागमण्टपं गुरुसत्तम ॥५॥
पञ्चकुण्डैस्तथैकेन कुण्डेनैव विनिर्मितम् ।
अधमाधममित्युक्तं यागमण्टपकल्पने ॥६॥
स्वार्थप्रतिष्ठादीक्षादौ अभावे गुरुसत्तम ।
पञ्चकुण्डैककुण्डानि गृह्णीयान्न तु शक्तिमान् ॥७॥
अन्तरीतप्रतिष्ठायां प्रायश्चित्तादिकर्मणि ।
अधमाधममित्युक्तं कृत्यसौलभ्यहेतुतः ॥८॥

[मण्डपार्चना त्रिविधा]

मण्टपस्यार्चनाप्येषा त्रिधा वै परिकीर्तिता ।
सशक्तिका विशक्तिश्च केवलेति विभेदतः ॥९॥
मण्टपाराधनोक्तानां देवतानां गुरूत्तम ।
सर्वासामपि च ध्यानावाहनादिपुरःसरम् ॥१०॥
पूजा या क्रियते सा तु सशक्तिः परिकीर्तिता ।
आसनैर्मूर्तिमूलैश्चावाह्य यत्पूजनं गुरो ॥११॥
विशक्तिः कीर्त्यते चाथ केवला च नमोऽन्ततः ।
सशक्तिका ह्यनावर्ते पुनरावर्तकेऽपि च ॥१२॥
आवर्तादौ च कर्तव्या ह्यन्तरीतेऽथ देशिक ।
दीक्षायामुत्सवे चैव प्रायश्चित्तादिकर्मणि ॥१३॥

---

[1]अयं पटलः *शिवप्रतिष्ठाकारिकायां* ५४५, ५४६ पृष्ठयोर्दृश्यते ।

[2]अत्र 'युक्तम्' इति शेषः ।

[3]अत्र 'युक्तम्' इति शेषः ।

स्वार्थलिङ्गप्रतिष्ठादौ विशक्तिः परिकीर्त्यते ।
अन्त्येष्टौ केवला प्रोक्ता इति तन्त्रविनिश्चयः ।।१४।।
उक्तमार्गेण सर्वत्र कुर्याद्देशिकसत्तम ।
अन्यथा यदि मोहेन कुर्याच्चेत्कर्तृनाशनम् ।।१५।।
कर्मनाशश्च देशस्य क्षोभश्चेह प्रजायते ।
तस्मादुक्तविधानेन कुरु सर्वं गुरूत्तम ।।१६।।

[इत्यजिताख्ये महातन्त्रे क्रियापादे शिवमण्टपपूजाविधिः]

अनुबन्धः (३)

[भैरवपूजाविधिः[१]]

अस्य श्री आपदुद्धारणभैरवमहामन्त्रस्य बृहदारण्यक ऋषिः। अनुष्टुप् छन्दः। आपदुद्धारणभैरवो देवता। ह्रां बीजम्। ह्रीं शक्तिः। भै ह्रूं कीलकम्। मम आपदुद्धारणभैरवप्रसादसिद्ध्यर्थे जपे विनियोगः। प्रणवेन प्राणायामः। मम आपदुद्धारणाय ह्रां वां अङ्गुष्ठाभ्यां नमः।ह्रीं वीं तर्जनीभ्यां नमः। ह्रूं वूं मध्यमाभ्यां नमः।ह्रैं वैं अनामिकाभ्यां नमः। ह्रौं वौं कनिष्ठिकाभ्यां नमः। ह्रः वः करतलकरपृष्ठाभ्यां नमः। ह्रां वां हृदयाय नमः। ह्रीं वीं शिरसे स्वाहा। ह्रूं वूं शिखायै वषट्। ह्रैं वैं कवचाय हुम्। ह्रौं वौं नेत्रत्रयाय वौषट्। ह्रः वः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बन्धः।

[भैरवध्यानम्]

रक्तज्वालजटाधरं शशिधरं रक्ताङ्गतेजोमयं
हस्ते शूलकपालपाशडमरुं लोकस्य रक्षाकरम्।
निर्वाणं शुनवाहनं त्रिनयनमानन्दकोलाहलं
वन्दे भूतपिशाचनाथवटुकं क्षेत्रस्य पालं शिवम्॥१॥

[यन्त्रपूजा]

बिन्दुत्रिकोणषट्कोणवस्वब्जं षोडशं तथा।
द्वात्रिंशद्दलसंयुक्तं भूपुरं च त्रयं लिखेत्॥२॥
बिन्दुमध्ये लिखेद्वह्निं त्रिकोणे वटुकं लिखेत्।

आपदुद्धारणं षट्कोणे, अजामलबद्धाय अष्टदले, मन्त्रशेषं षोडशदले कादिसान्तं द्वात्रिंशद्दले, भूपुरे इन्द्रादिबीजमिति यन्त्रविधानम्।

पूजाविधानमाह —

बिन्दुमध्ये आपदुद्धारणाय नमः। त्रिकोणे कालभैरवाय नमः। बडबानलभैरवाय नमः। रणरङ्गभैरवाय नमः।

षट्कोणे —

कालभैरवाय नमः। वीरभैरवाय नमः। महाकालभैरवाय नमः। भीषणभैरवाय नमः। शंकरभैरवाय नमः। उग्रभैरवाय नमः।

अष्टदले —

हेतुघ्नाय नमः। त्रिपुरघ्नाय नमः। वह्नये नमः। यमजिह्वाय नमः। कालाय नमः। करालाय नमः। एकाङ्घ्रये नमः। भीमाय नमः।

---

[१] अयं पटलः अस्मद्ग्रन्थालये विद्यमान टि-११२६ मातृकायां दृश्यते।

षोडशदले—असिताङ्गादि, ब्राह्म्यादि
द्वात्रिंशद्दले—तत्तन्मातृकादेवताः
भूपुरे—इन्द्रादि
बहिर्भूपुरे—वज्रादि

इति पूजाविधिः

तथा बिन्दुबिले—वं ह्रीं, त्रिकोणे—वं, टुं, कं, षट्कोणे—आपदुद्धारणाय, अष्टदले—अजामलबद्धाय, षोडशदले—योगीश्वराय मम दारिद्यद्वेषिणे महाभैरवाय हुं फट् स्वाहा ।

अन्त्यदले—षोडशाक्षरम्, द्वात्रिंशद्दले—कादिसान्तम्, भूपुरे—इन्द्रादिबीजम् लं, रं, हं, षं, वं, यं, सं, शं ।

[भैरवमालामन्त्रः]

ओं ह्रीं वं वटुकाय आपदुद्धारणाय अजामलबद्धाय योगीश्वराय मम दारिद्र्यद्वेषिणे महाभैरवाय हुं फट् स्वाहा ।

ओं हां भां महाकालभैरव ईशानमूर्धाय नमः ।
ओं हां भां महाबलभैरव तत्पुरुषवक्त्राय नमः ।
ओं हां भां अघोरभैरव अघोरहृदयाय नमः ।
ओं हां भां वज्रवीरभैरव वामदेवगुह्याय नमः ।
ओं हां भां क्रोधकालभैरव सद्योजातमूर्तये नमः ।

इति मूर्धादिपञ्चवक्त्रेषु विन्यसेत् ।

[कलान्यासः]

ॐ ह्रां भां वं नमः । पराय महाकालभैरव निवृत्तिकलात्मने नमः ।

ॐ ह्रीं भीं विं नमः । पराय महाकालभैरव प्रतिष्ठाकलात्मने नमः । ओं ह्रूं भूं वुं नमः पराय अघोरभैरव विद्याकलात्मने नमः । ॐ ह्रैं भैं वैं नमः पराय वज्रवीरभैरवशान्तिकलात्मने नमः

ॐ हौं भौं वौं नमः पराय क्रोधकालभैरवशान्त्यतीतकलात्मने नमः इति जानुगुह्यहृदयवक्त्रमूर्धसु कनिष्ठादिक्रमेण विन्यसेत् ।

ॐ हां भां अनन्तभैरवाय नमः
ॐ हां भां सूक्ष्मभैरवाय नमः
ॐ हां भां शिवोत्तमभैरवाय नमः
ॐ हां भां एकनेत्रभैरवाय नमः
ॐ हां भां एकरुद्रभैरवाय नमः
ॐ हां भां त्रिमूर्तिभैरवाय नमः
ॐ हां भां श्रीकण्ठभैरवाय नमः
ॐ हां भां शिखण्डिभैरवाय नमः

इत्यष्टविद्येश्वरभैरवान् विन्यसेत् । तदुक्तम्—

पञ्चमूर्तीः षडङ्गं च प्रथमावरणे स्मृतम् ।।३।।
अष्टविद्येश्वरांश्चैव द्वितीयावरणे तथा ।
ब्राह्म्यादि शक्तिसहितानसिताङ्गांस्तृतीयके ।।४।।
चतुरिन्द्रादिकं चैव वज्रादीन् पञ्चमे तथा ।
पञ्चावरणसंयुक्तं भैरवं तं प्रपूजयेत् ।।५।।

[वटुकध्यानम्]

नीलजीमूतसंकाशं नीलाञ्जनसमप्रभम् ।
शुद्धस्फटिकसंकाशमभिरक्तशिरोरुहम् ।।६।।
दंष्ट्राकरालवदनं किरीटमकुटोज्ज्वलम् ।
भुजङ्गमेखलोपेतं मणिरत्नविभूषितम् ।।७।।
खड्गं वामे सव्यपाणौ शूलं चैव तथा पुनः ।
कपालमभयं वरदं डमरुं भुजगं तथा ।।
दण्डपाणिं महाबाहुं ध्यात्वा मन्त्रं सदा जपेत् ।।८।।

[इत्यजिताख्ये महातन्त्रे (क्रियापादे) भैरवपूजाविधिपटलः]

अनुबन्धः (४)

[अन्तर्बलिबहिर्बलिविधिः[1]]

बलिदानं द्विधा प्रोक्तं बहिरन्तर्विभागतः ।
आदावन्तर्बलिं कुर्याद्बहिर्बलिमतः परम् ॥१॥
मेखलासु प्रकुर्वीत कुण्डस्यैव यथाविधि ।
कुण्डहीनप्रदेशे तु तस्य चाग्नेयकोणतः ॥२॥
मण्डलं परिकल्प्याथ कुर्याद्वै बलिदानकम् ।
प्रधानकुण्डे संप्रोक्तं नियमेन बलेर्द्वयम् ॥३॥
अष्टस्वन्येषु कुण्डेषु कुर्यादेकं बहिर्बलिम् ।
पञ्चावरणसंयुक्तो विभाति परमेश्वरः ॥४॥
प्रथमावरणे ब्रह्मपञ्चकं चैव देशिक ।
विद्यादेहश्च हृदयं नेत्रं मूर्धा शिखा तथा ॥५॥
कवचं च तथैवास्त्रं शिवाग्नौ जुहुयाद्गुरो ।
अन्येष्वावरणेष्वेवं स्थितानां तु दिवौकसाम् ॥६॥
बलिदानं प्रकुर्वीत न कुर्यादाहुतिं गुरो ।
द्वितीयस्मिन्नावरणे स्थितानां तु दिवौकसाम् ॥७॥
विद्येश्वराणामष्टानां तृतीयावरणे तथा ।
नंद्यादीनां तथाष्टानां कुर्यादन्तर्बलिं क्रमात् ॥८॥
चतुर्थावरणस्थानामिन्द्रादीनां सुपर्वणाम् ।
बहिर्बलिं प्रकुर्वीत विधिवद्देशिकोत्तम ॥९॥
प्रथमावरणं शुद्धं द्वितीयं मिश्रमुच्यते ।
तृतीयं च तथा मिश्रं चतुर्थावरणं पुनः ॥१०॥
अशुद्धमिति संप्रोक्तं पञ्चमं च तथा भवेत् ।
द्वितीयस्य तृतीयस्य मिश्रत्वेनैकता कृता ॥११॥
मेखलायां तथा चोर्ध्वे चाष्टविद्येश्वरान्सुरान् ।
मेखलायां तथा मध्ये नंद्यादीन्वै तथा सुरान् ॥१२॥
ध्यात्वान्तर्बलिना चैवं पूजयेद्गुरुपुङ्गव ।
मेखलायां तथा चाधश्चेन्द्रादीनां दिवौकसाम् ॥१३॥
बहिर्बलिं क्रमात्सम्यग्दापयेद्गुरुसत्तम ।
चतुर्थावरणस्थानामायुधान्येव पञ्चमे ॥१४॥
तदेतेषां न कुर्वीत पृथग्वै बलिकल्पनम् ।
कुण्डं विना स्थण्डिलादौ कल्पितस्याशुशुक्षणेः ॥१५॥
होमादौ पदपूजायां बलिदानविधिक्रमम् ।
वक्ष्यते श्रद्धया सार्धं शृणु नान्यमना गुरो ॥१६॥

---

[1] अयं पटलः सद्योजातशिवाचार्यसम्पादित *शिवप्रतिष्ठाकारिकायां* ३२४—३२७ पृष्ठेषु दृश्यते ।

स्थण्डिलादेस्तथाग्नेयभागे संस्कृतभूतले ।
हरिद्रारेणुभिः सम्यग्वृत्तं वा चतुरश्रकम् ।।१७।।
कारयेन्मण्डलं चान्तर्द्वादशाङ्गुलविस्तृतम् ।
चतुरङ्गुलं बाह्ये तु परितोऽन्यत्प्रकल्पयेत् ।।१८।।
अन्तर्मण्डलके क्षिप्तो बलिरन्तर्बलिर्भवेत् ।
बहिर्मण्डलके क्षिप्तो बलिश्चैव बहिर्बलिः ।।१९।।
पूर्वतोऽन्तर्मण्डलस्य रुद्रेभ्य इति मन्त्रतः ।
दक्षिणे मातृभ्य इति गणेभ्य इति पश्चिमे ।।२०।।
यक्ष्येभ्य इत्युत्तरे च ग्रहेभ्य इति चैशके ।
वसुभ्य इति चाग्नेये रक्षोभ्य इति नैर्ऋतौ ।।२१।।
नागेभ्य इति वायव्यामृक्षेभ्यश्चैशदक्षिणे ।
निर्ऋत्युत्तरतश्चैव राशिभ्य इति मध्यमे ।।२२।।
क्षेत्रपालायेति ततो ॐ हां पूर्वेभ्य एव च ।।
स्वाहान्तेभ्यो बलिं कुर्यादेवमन्तर्बलिक्रमः ।।२३।।
बाह्ये तु मण्डले चैवं मघवानं च पूर्वतः ।
आग्नेयेऽग्निं यमं चैव दक्षिणे निर्ऋतौ तथा ।।२४।।
निर्ऋतिं पश्चिमे चैव वरुणं वायुकोणतः ।
वायुं च उत्तरे सोममीशानं चैव तद्दिशि ।।२५।।
ईशानदिग्दक्षिणे च ब्रह्माणं च विभाव्य च ।
निर्ऋत्युत्तरतो विष्णुमों हां बीजसमन्वितम् ।।२६।।
चतुर्थ्यन्तान्वितं चैव स्वाहान्तं चैव देशिक ।
कल्पयेन्मन्त्रमुच्चार्य बहिरेवंविधो बलिः ।।२७।।
मेखलायां विनिक्षिप्तौ बहिरन्तर्बली गुरो ।
प्रतिष्ठादौ शिवादीनां कल्पयेतां विधानतः ।।२८।।
मण्डले कल्पितावेतौ बहिरन्तर्बली क्रमात् ।
नियमेन विधीयेतां वास्तुशान्त्यादिकर्मणि ।।२९।।

[इत्यजिताख्ये महातन्त्रे क्रियापादे अन्तर्बलिबहिर्बलिविधिः]

अनुबन्धः (५)

[प्रायश्चित्तविधिः[१]]

[मर्त्यानामालयप्रदेशेषु जननमरणसंभवे]

**प्रासादे मनुजे जाते मृते राज्ञो भयं भवेत् ।
मृतादि तत्प्रदेशात्तु विसृज्याथ बहिस्ततः ।।१।।
प्रोक्षयेद्गोमयाम्भोभिर्येन देशेन ते गताः ।
ततो विशेषतः कुर्यात्पुण्याहप्रोक्षणं च वै ।।२।।
मृतप्रसूतदेशे तु खानयोग्यं खनेत्तु वै ।
परित्यज्य मृदोऽशुद्धाः शुद्धाभिः पूरयेत्ततः ।।३।।
प्रक्षाल्यासन्नकुड्याद्यं गोमयालेपिते स्थले ।
पुण्याहं तत्र गव्येन प्रोक्षणं च क्रमान्नयेत् ।।४।।
शैवसंभोजनं चान्ते[२] जलसंप्रोक्षणं नयेत् ।
स्नपनं शान्तिहोमं च यदि गर्भगृहे भवेत् ।।५।।
शान्तिहोमादिकं कुर्यादर्धमण्डपके सति ।
प्रतिमामण्डपे शान्तिहोमं च स्नपनं विना ।।६।।
अन्तःसालान्तरे चेद्धि जलसंप्रोक्षणं नयेत् ।
अन्तःसालास्थदेवानां स्नपनं शान्तिहोमकम्[३] ।।७।।
गव्येन प्रोक्षयेत्तत्स्थपीठानामपि शुद्धये ।
त्यजेन्मार्त्तिकभाण्डानि क्षालयेद्दारुजं जलैः ।।८।।
अन्तःसालाया बाह्ये स्यात्स्नपनेन [४]दिशाहुतिः[५] ।
पाकस्थानादिदेशेषु मरणादेश्च संभवे ।।९।।
पूर्ववच्छुद्धिमापाद्य पर्यग्निकरणं नयेत् ।
दिशाहोमं ततः कुर्यान्मूर्तिहोममथाचरेत् ।।१०।।
प्राकारद्वयबाह्ये तु शान्तिहोमं तु कारयेत् ।
धाम्नो द्वादशदण्डान्ते वास्तौ मर्त्या मृता यदि ।।११।।
परित्यज्य ततः कुर्यान्नित्यनैमित्तिकादिकम् ।
कृतं चेद्ग्रामनाशः स्यात्तदर्थं स्नपनं चरेत् ।।१२।।**

[इत्यजिताख्ये महातन्त्रे [क्रियापादे] प्रायाश्चित्तविधिः]

---

[१]अयं पटलः 'क, ख' मातृकयोर्दृश्यते ।
[२]अत्र कारयित्वेति शेषः ।
[३]अत्र कृत्वेति शेषः ।
[४]दिशाहुतिरित्यनेन पदेन दिशाहोमो लक्ष्यते ।
[५]अत्र कर्तव्येति शेषः ।

श्लोकार्धानुक्रमणिका

	पटलः श्लोकश्च
अ	
अंकाराः कारकौ चापि	२०.१०४
अंकारे पुष्पतोयं स्याद्	२९.१६९
अंशकेष्वथ भुक्तिश्च	३६.३८८
अंशकोऽयं भवेच्चोरो	३६.३७८
अंशाभ्यां तु प्रतिं कुर्यात्	१४.५८
अंशेन कम्पमंशाभ्यां	११.९
अंशेन पद्ममूर्ध्वं स्यात्	११.६
अंशेन वृत्तग्रीवा च	१४.३५
अंसयोश्च ततः कुर्यात्	१९.१०२
अःकारं मेढ्रदेशे तु	४०.११८
अ आ इ ई उ ऊ चैव	१.१६
अकलङ्कान्सुपक्वांश्च	१८.१३९
अकलङ्को यथा पूर्णः	२०.६८
अकारं च उकारं च	९५.४
अकारं मूर्ध्नि चाकारं	४०.११५
अकारं मूर्ध्नि विन्यस्य	२०.१०१
अकारव्यूहमध्ये तु	२९.११५
अकारादिक्षकारान्तम्	९३.४८
अकारादिविसर्गान्तं	१.२१
अकारावरणे प्रोक्ता	२९.१२१
अकालपलितो यस्तु	८४.९
अकालमृत्युमथनम्	३१.१
अकालमृत्युशमनं	२९.१
अकालमृत्युशमनं	३०.१
अक्षतैस्तिललाजैश्च	८६.६
अक्षमालां स्रुवं पार्श्वे	३६.२६५
अक्षरं चेत्तथा बेरं	७६.१७
अक्षरं चेत्पुनर्दण्डं	७६.२१
अक्ष्यङ्गुलविहीनं तु	९७.३१
अखण्डं दक्षिणाग्रं च	९८.२८३
अखण्डं पत्रजातीनां	२१.१२०
अखण्डितैर्बिल्वपत्रैः	९०.२८
अग्नये त्वथ सोमाय	२१.९८

	पटलः श्लोकश्च
अग्निं च विष्टरं चैव	९८.२६०
अग्निं रुद्रं हुताशं च	३३.३१
अग्निः पूषा च वितथो	८.१८
अग्निकार्यमथो वक्ष्ये	२१.१
अग्निकार्यविधिप्रोक्तं	२७.१८८
अग्निकार्ये कृते कुर्यात्	२५.११
अग्निकार्येषु संस्पृष्टे	७४.५५
अग्निकार्योक्तमार्गेण	४६.३१
अग्निकार्योक्तमार्गेण	४७.२२
अग्निकार्योक्तमार्गेण	४८.४४
अग्निकार्योक्तमार्गेण	९३.४०
अग्निकुण्डेषु सर्वेषु	७४.२४
अग्निदग्धे तु कान्तारे	१९.८४
अग्निदो गरदश्चैव	८४.१०
अग्निधाम्नस्ततो मन्त्री	२०.२३६
अग्निनाशनयोर्मध्ये	७१.२४
अग्निनेत्रं घृतेनैव	४१.१८
अग्निनेत्राम्बरैस्तत्र	३८.१५
अग्निबीजमनुस्मृत्य	४१.१७
अग्निबीजेन तस्याधो	७१.८८
अग्निभूतः स चैवेति	५०.३
अग्निमण्डलमध्यस्थ	२०.४९
अग्निमध्ये तु तं ध्यात्वा	८३.१३
अग्निमध्ये तु तं ध्यात्वा	८३.५६
अग्निमध्ये समावाह्य	८३.७७
अग्निमन्त्रं तु विन्यस्य	५०.२४
अग्निमन्त्रेण संयुक्तं	९३.२२
अग्निमाधाय विधिवत्	३६.१९०
अग्निमाधाय सर्वत्र	१५.३१
अग्निवर्णं तु संताप्य	७१.५०
अग्निश्च कव्यवाहाद्यः	१०३.६०
अग्निसंधानविषये	१०३.५६
अग्नेः सोमस्य चाप्यंशं	२१.९७
अग्नेरभिमुखं पूर्वं	२१.९५
अग्नौ दहेत्तन्मन्त्रेण	७३.२९

	पटलः श्लोकश्च
अग्नौ सुव्यक्तपात्रं च	८६.११
अग्नौ हुतेन देवस्थाः	१०३.९६
अग्न्यंशं कुमुदं वृत्तं	१६.१९
अग्न्याधानादिकं सर्वम्	४०.८३
अग्रतो मण्टपं कुर्यात्	१२.२८
अग्रभागेऽथवा कुर्यात्	२२.९३
अग्रमग्रेण संयोज्य	२१.८७
अग्रादारभ्य कुर्वीत	६७.४६
अग्रादारभ्य विन्यस्य	५४.८२
अग्रादारभ्य संपूज्य	२०.२१९
अग्रे क्रमेण संस्थाप्य	१८.२२८
अग्रे गजाधरोष्ठांशं	१३.१९
अग्रे चास्यं तथा न्यस्य	४९.८०
अग्रे जलंधरं क्रुद्धं	३६.२७६
अग्रे तु पञ्चगव्यं स्यात्	८६.३५
अग्रे तु स्थण्डिले तस्याः	४०.१०८
अग्रेऽन्येषु च कुम्भेषु	६१.४४
अग्रे भूमिं समारभ्य	५३.४७
अग्रेऽरुणं तथा स्थाप्य	५४.९६
अग्रे वृषालयं कुर्यात्	३९.७
अग्रे व्योमङ्गुलं नाहम्	१५.९
अग्रे हविर्भुजं चापि	३६.२६७
अघमर्षणमेवं स्यात्	१९.५९
अघोरं चाथ कौबेरं	१.७५
अघोरचक्रमूर्ध्नी च	१००.१
अघोरनिश्वासमेव	१.७९
अघोरास्त्रं जपेदेकः	५४.५६
अघोरेण चरुं चैव	३१.१६
अघोरे बहुरूपं च	२०.१६९
अङ्कादङ्कगतैः सूत्रैः	२१.४४
अङ्कारोपणमध्यस्य	३६.२१८
अङ्कुरं पूर्ववत्प्रोक्तं	८३.३२
अङ्कुरस्य विधौ दृष्ट्वा	७६.८
अङ्कुराणां विनाशेऽपि	७६.११
अङ्कुराणि च वक्राणि	७.२३
अङ्कुराण्यर्पयेद्धीमान्	८५.२६
अङ्कुरानर्पयित्वाथ	२७.३३
अङ्कुरानर्पयित्वादौ	२७.२५
अङ्कुरानर्पयेद्बीजैः	१८.३३
अङ्कुरार्थं मृदं गृह्य	२७.१४१
अङ्कुरार्पणकार्यं च	८५.२६
अङ्कुरार्पणपूर्वं च	२८.१०
अङ्कुरार्पणपूर्वं च	९२.७
अङ्कुरार्पणपूर्वं तु	९३.१५
अङ्कुरार्पणपूर्वश्च	२७.३४
अङ्कुरार्पणपूर्वाश्च	२७.२७
अङ्कुरार्पणपूर्वे तु	२७.३३
अङ्कोलनिम्बवानीर	२२.५१
अङ्गं प्रधानशूलं स्यात्	७६.४५
अङ्गदोषेण युक्ताश्चेत्	८४.३४
अङ्गदोषो न दोषः स्यात्	८४.३६
अङ्गन्यासं ततः कुर्यात्	२०.८०
अङ्गन्यासकरन्यासं	५०.३८
अङ्गन्यासादिकं सर्वं	५६.३५
अङ्गप्रदक्षिणं कुर्वन्	६७.११
अङ्गप्रदक्षिणं यत्तत्	६७.४
अङ्गभाव इति प्रोक्तः	९८.२६८
अङ्गहीनश्च दीर्घश्च	८४.९
अङ्गाङ्गिभावभेदेन	९८.१९०
अङ्गाङ्गिभावसंयोगात्	९८.२६८
अङ्गानां कल्पितानां तु	१६.४७
अङ्गानि करशाखासु	४९.३६
अङ्गानि च तदङ्गेषु	४६.४४
अङ्गानि चाङ्गेष्वाधाय	५०.७०
अङ्गानि हृदयादीनि	४०.११३
अङ्गानि हृदयादीनि	५०.१२
अङ्गानि हृदयादीनि	५४.३९
अङ्गान्यङ्गेषु विन्यस्य	५३.४१
अङ्गारनखभस्मानि	९८.३२
अङ्गुलं चाष्टभिस्तैस्तु	१२.५
अङ्गुलं देहलब्धं तु	३६.२०
अङ्गुलं मात्रमंशश्च	३६.३८
अङ्गुलं स्यात्तदुष्णीषं	३६.१६६
अङ्गुलत्रितयं प्रोक्तं	९८.१३

	पटलः श्लोकश्च
अङ्गुलत्रितयह्रासा	२७.४८
अङ्गुलाङ्गुलहानिः स्यात्	२७.८२
अङ्गुलाङ्गुलहान्या तु	२७.२१४
अङ्गुलानां शतैस्तैस्तैः	३६.१४०
अङ्गुलीवलनं कृत्वा	२६.१९
अङ्गुलेन भवेद्धाम्नां	१४.८
अङ्गुलैकादिपादान्तं	३६.२१
अङ्गुल्यग्रैस्ततः सर्वैः	१९.५४
अङ्गुल्यग्रैस्त्रिभिश्चापि	५१.१७
अङ्गुष्ठं च चतुर्मात्रं	३६.८३
अङ्गुष्ठं तु द्विपर्वं स्यात्	३६.९२
अङ्गुष्ठं तु द्विपर्वं स्यात्	३६.१३६
अङ्गुष्ठं वामहस्तस्य	२६.२७
अङ्गुष्ठपरिणाहेन	२१.८२
अङ्गुष्ठमात्रकायोऽपि	८४.५३
अङ्गुष्ठमूलपर्वस्थं	२६.२१
अङ्गुष्ठवर्जिताभिः स्यात्	२६.६३
अङ्गुष्ठाग्रेण तर्जन्याः	२६.५८
अङ्गुष्ठाग्रेण मूर्ध्नीशं	२०.८२
अङ्गुष्ठाग्रौ च संलग्नौ	२६.११
अङ्गुष्ठादिकनिष्ठान्तम्	३६.१२०
अङ्गुष्ठादिकनिष्ठान्तम्	४९.३७
अङ्गुष्ठादिकनिष्ठान्ते	४७.४०
अङ्गुष्ठादिनखानां तु	३६.१३४
अङ्गुष्ठाद्यङ्गुलीनां तु	३६.१०७
अङ्गुष्ठानामिकाभ्यां तु	१९.५२
अङ्गुष्ठानामिकाभ्यां तु	२१.९३
अङ्गुष्ठानामिकायोगाद्	२०.८३
अङ्गुष्ठाभ्यां कनिष्ठाग्रात्	२६.३७
अङ्गुष्ठेन तु सव्येन	२६.१८
अङ्गुष्ठोदरमायोज्य	२६.६४
अङ्गुष्ठौ गर्भगौ कृत्वा	२६.१५
अङ्गुष्ठौ मध्यगौ कृत्वा	२६.३६
अङ्गेषु तत्तदङ्गानि	५४.४०
अङ्गेषु तेषु विन्यस्य	५१.५१
अङ्गेष्वङ्गानि चाप्यस्य	४७.४३
अङ्गेष्वङ्गानि विन्यस्य	५४.८३

	पटलः श्लोकश्च
अङ्गैः षड्भिर्वृषेन्द्रस्य	६६.१४
अङ्गैरङ्गानि चाभ्यर्च्य	४०.७८
अङ्गैरपि तथा षड्भिः	४२.१७
अङ्गैर्मूलादिभिर्मन्त्रैः	५७.२०
अङ्गैश्चाद्यैर्नवैकेन	४६.४९
अङ्गोपाङ्गप्रत्यङ्गं च	७६.४४
अचलं च चलं चापि	३६.१८२
अचलं मृण्मयं प्रोक्तं	३६.१८२
अचलं यत्तु तल्लिङ्गं	४.२२
अचलस्थापनं ह्येवं	४८.६८
अचलस्य प्रतिष्ठायां	६०.५०
अचलस्यापि शैलस्य	४०.१२६
अचलां स्थाप्य तस्यां	७३.३९
अचले मृण्मये बेरे	४०.१३०
अचलेष्वेव कर्तव्यो	४०.१२८
अचले स्थापितस्यैव	४६.४७
अजवृषमहिषादीन्	७.२६
अजहरिहरभागं	४.३४
अजितं नाम यत्तन्त्रं	१.११
अज्ञानेनान्धतमसा	१.३४
अञ्जनं रोचनां चैव	२९.२०५
अञ्जनं हरितालं च	१७.२४
अञ्जलिस्तद् द्वयं प्रोक्तं	२२.९७
अणिमाद्यष्टसिद्धिं च	६३.५२
अणुरूपेण तत्रैव	१२.३
अणुशक्तिः पटः प्रोक्तः	९७.७
अण्डजं मुण्डजं चर्म	९३.३३
अतः कुम्भे तथा बिम्बे	१०२.२०
अतः परं प्रवक्ष्यामि	८.१
अतः परं प्रवक्ष्यामि	२९.१
अतः परं प्रवक्ष्यामि	६५.१
अतः परं प्रवक्ष्यामि	८६.१
अतः परं प्रवक्ष्यामि	८७.१
अतः परं प्रवक्ष्यामि	९१.१
अतः परं प्रवक्ष्यामि	१०१.९३
अतः परमिदं वक्ष्ये	४.१
अतः परमिदं वक्ष्ये	५.१

	पटलः श्लोकश्च
अतः परमिदं वक्ष्ये	१२.१
अत ऊर्ध्वं च कर्माणि	६५.१३
अत ऊर्ध्वं न कर्तव्यं	६५.५
अतिक्रान्ताट्टहासाख्ये	१.९४
अतिभारेषु स्तम्भेषु	१४.४२
अतिरक्तकेशनेत्र	१००.४
अतिरक्ता बहुरूपा	२१.११३
अतिरक्तेन सूक्ष्मेण	५४.३५
अतिवृष्ट्यामनावृष्टौ	८८.४
अतोऽर्चनक्रमो ह्येषां	२५.१३
अत्यन्तानन्दसंयुक्तः	६३.४८
अत्याशी व्याधकर्मा च	८४.१२
अत्र लिङ्गे महादेव	१८.२६४
अत्रिं क्रतुं वसिष्ठं च	१९.६७
अथ किं बहुनोक्तेन	८४.४७
अथ किं बहुनोक्तेन	८४.५६
अथ चैकं बलिं दत्त्वा	२७.१३६
अथ चैषां तु लिङ्गानां	४.३९
अथ तत्कर्णिकामध्ये	२९.१९५
अथ देशं प्रवक्ष्यामि	६.१
अथ नित्यार्चनं वक्ष्ये	२०.१
अथ नित्योत्सवं वक्ष्ये	२५.१
अथ निर्बीजिका दीक्षा	८०.१२
अथ मध्याह्नसंध्यायां	२०.२४७
अथ मध्येऽवटे शालीन्	१८.१९५
अथ यागेशकुम्भं च	८३.१११
अथ रौद्रं प्रवक्ष्यामि	३६.१७८
अथ वक्ष्यामि ते सम्यग्	१७.१
अथ वक्ष्येऽर्चनाङ्गानां	२२.१
अथ वक्ष्ये विमानस्य	६१.१
अथ वक्ष्ये विशेषेण	४३.१
अथ वक्ष्ये विशेषेण	अनु० १.१
अथ वक्ष्ये सुरश्रेष्ठ	७०.१
अथवा गन्धतोयेन	२९.३०१
अथवाङ्गुलमानेन	१८.१७६
अथवा तत्प्रमाणे तु	१२.२८
अथवा तत्समुत्सेधे	११.७

	पटलः श्लोकश्च
अथवा तद्दिने वापि	१०३.९५
अथवा तद्दिनेशानां	२७.२२६
अथवा तद्भवेत्तत्र	३७.२५
अथवा तस्य विस्तारात्	३८.३८
अथवाताननुद्धृत्य	२७.३१२
अथवा तेषु पात्रेषु	२३.१५
अथवा तौ पृथक्संस्थौ	३६.२४२
अथवा त्रिषु देशेषु	३७.२४
अथवा दक्षिणे हस्ते	३६.३२१
अथवा द्रव्यवर्जं तु	२३.१९
अथवा द्वादशं हस्तं	९८.२८
अथवा द्विभुजं कुर्यात्	३६.२८१
अथवा द्विभुजं कुर्याद्	३६.३२०
अथवा द्व्यंशके तस्मिन्	१६.८
अथवा द्व्यङ्गुलं प्रोक्तं	९८.२९३
अथवा धामगर्भं तु	१२.२७
अथवा ध्वजदण्डेन	२७.१११
अथवा ध्वजमूले तु	२७.१०७
अथवानयनं प्रोक्तं	२७.७०
अथवा नवतालं स्यात्	३८.४१
अथवान्यप्रकारेण	१४.१०
अथवान्यप्रकारेण	१४.५६
अथवान्यप्रकारेण	१८.७०
अथवान्यप्रकारेण	२२.७४
अथवान्यप्रकारेण	३१.२२
अथवान्यप्रकारेण	३६.२९७
अथवान्यप्रकारेण	३९.४९
अथवान्यप्रकारेण	७८.१
अथवान्यप्रकारेण	८३.९२
अथवान्यप्रकारेण	९८.१०९
अथवान्यप्रकारेण	९८.२७६
अथवा पञ्चपक्षे तु	७३.२०
अथवा पञ्चविंशांशे	४.३१
अथवा पादुके रम्ये	२०.२५३
अथवाप्युच्छ्रये पङ्क्ति	१२.३८
अथवा मध्यमे त्यक्त्वा	३७.१६
अथवा मध्यहारे च	९८.५

	पटलः श्लोकश्च
अथवा मूर्तिमन्त्रेण	८३.५९
अथवा मूर्ध्नि कुर्वीत	२२.६८
अथवा मूलमन्त्रेण	८३.६०
अथवा मृण्मयं वापि	८६.३६
अथवा मृण्मयैर्वापि	८८.३९
अथवा मृत्तिकामेनाम्	२७.१४७
अथ वामोरुविन्यस्तम्	३६.३००
अथवा रजनीचूर्णं	२७.२९०
अथवा रम्यदेशे तु	९८.११
अथवा वारमेकं वा	९०.३३
अथवा विधिवद्धीमान्	९७.६२
अथवा वीथिमध्ये तु	२७.२२८
अथवा व्योमसूत्रेण	८८.२१
अथवा सिंहहंसं च	९८.३१६
अथवा स्तम्भमानेन	३७.९
अथवा हस्तविस्तारे	७.९
अथ संबोधयेद्दामं	७९.३
अथाग्नेश्च विधिं वक्ष्ये	७१.३९
अथाङ्कुरविधिं वक्ष्ये	३५.१
अथातः संप्रवक्ष्यामि	९५.१
अथातः संप्रवक्ष्यामि	९८.१
अथातः संप्रवक्ष्यामि	९८.३९
अथातः संप्रवक्ष्यामि	९८.१२५
अथातः संप्रवक्ष्यामि	९८.१६२
अथातः संप्रवक्ष्यामि	९८.३०९
अथातः संप्रवक्ष्यामि	१०२.१
अथातः संप्रवक्ष्यामि	१०३.१
अथातस्ते गुरुश्रेष्ठ	१०१.१
अथान्यपरिवाराणां	५७.१
अथाष्टचत्वारिंशद्भिः	२९.२६१
अथाहोरात्रकं वापि	६७.३८
अथेदं स्थापनं वक्ष्ये	५१.१
अथेन्द्राग्नी यमं चैव	२०.२२०
अथोऽतः क्रमतः सर्वान्	७३.१०
अथोत्सवविधिं वक्ष्ये	२७.१
अथोद्भवं च विजयं	१.७५
अथो नवप्रकाराणां	२९.५२

	पटलः श्लोकश्च
अथोमादीनाणेशांश्च	१८.२५४
अदीक्षितश्चाङ्गहीनः	१०३.२३
अदृश्यं च तथा दृश्यं	२.५
अदृष्टार्थी बहुज्ञानः	८४.२७
अद्भुतादिषु सर्वेषु	२४.१३
अद्भुतानामथो वक्ष्ये	७२.१
अद्रोही सर्वभूतेषु	८४.२२
अधःपट्टे कूर्ममूर्तिं	९८.१६६
अधःस्थितां तु संगृह्य	१९.२७
अधः स्थित्वाथवा दीपान्	७०.३८
अधमं कोणवारेषु	२२.२१
अधमं गुणहस्तं स्यात्	३८.३७
अधमं चाष्टहस्तं स्यात्	२७.४३
अधमं तद्भवेद्धोमे	२२.१०३
अधमं त्रिभिरुद्दिष्टम्	२२.२८
अधमं त्वाढकं प्रोक्तं	८८.४१
अधमं द्विगुणं मध्यं	३९.१७
अधमं द्व्यंशहीनं स्यात्	१२.४०
अधमं पञ्चहस्तं तु	२७.१५२
अधमं पञ्चहस्तं तु	४०.९
अधमं पञ्चहस्तैश्च	२९.१३
अधमं पुनरावर्ते	१००.९८
अधमं प्रोच्यते याग	अनु० २.५
अधमं माषमात्रं स्याद्	२९.५०
अधमं रौप्ययोनि स्यात्	४.५६
अधमं वत्सरान्तं स्यात्	९४.६२
अधमं वा घृतस्नानं	३३.५४
अधमं षोडशाङ्गुल्यं	८९.१५
अधमत्रयलिङ्गानां	१८.४१
अधमत्रितयं पश्चात्	२७.२२
अधमत्रितयस्याथ	२७.१५८
अधमत्रितये षड्भिः	२७.१९६
अधमद्वितयेनापि	२०.११
अधमस्याधमं चापि	१६.२
अधमाच्चाधमं प्रोक्तं	९८.२८
अधमाच्चाधमः प्रोक्तो	९८.१०
अधमादधमं चापि	६९.१५

	पटलः श्लोकश्च
अधमाधमं भारेण	२२.२
अधमाधमपूजा च	२०.१८
अधमाधममप्युक्तं	अनु० २.८
अधमाधममित्युक्तं	अनु० २.६
अधमाधममुक्तं स्यात्	२७.४९
अधमाधममेवं तु	२५.११
अधमाधममेवोक्तं	६७.७
अधमाधममेवोक्तं	९८.१४४
अधमाधमा श्रविष्ठा च	१०१.१५
अधमानां विमानानाम्	१२.३४
अधमा पञ्चनिष्का स्यात्	४५.३४
अधमे दशताले तु	३६.१३९
अधरोष्ठं रक्तवर्णं	३६.७३
अधरोष्ठस्य विस्तारं	३६.७२
अधर्ममात्रसंशुद्धौ	८०.१६
अधर्मादिचतुर्णां तु	५७.२२
अधश्चैकं परित्यज्य	१८.७७
अधश्चैकं परित्यज्य	१८.८०
अधश्चोर्ध्वं परित्यज्य	१९.८०
अधश्चोर्ध्वच्छदे पद्म	७७.१२
अधस्तादूरुविस्तारं	३६.१०१
अधस्ताद् द्व्यङ्गुलं प्रोक्तं	९८.२२९
अधस्थमेखलायास्तु	९८.२५९
अधिकाराङ्ककावेतौ	९५.११
अधिकाराङ्कौ प्रोक्तौ	१०२.६
अधिकाराङ्गमूर्तेस्तु	१०२.१९
अधिकारोऽनुशैवानां	६३.२३
अधिके तूत्तमा सा वा	७.७
अधिदेवान्यजेत्पश्चात्	४०.८१
अधिदेवास्त्विति प्रोक्ता	४०.८२
अधिपानां च सर्वेषां	५९.२५
अधिमासः स विज्ञेयः	१०१.५३
अधिवासक्रियामेवं	५४.५६
अधिवासनकर्मैवं	४०.९४
अधिवासनकाले तु	७३.२२
अधिवासविधिश्चाथ	१०.१९
अधिवासादिकं तासां	५९.४४

	पटलः श्लोकश्च
अधिवासादिकर्माणि	४१.६४
अधिवासाय कुर्वीत	६४.३
अधिवासे तयोः कुम्भौ	५४.९२
अधिवास्य जले पश्चात्	१८.९९
अधिवास्य प्रभाते तु	४०.१२६
अधिवास्य यथापूर्वं	५७.७
अधिष्ठानं विना शक्तिः	९८.३१५
अधिष्ठानत्रिभागे तु	२८.६६
अधिष्ठानप्रमाणेन	१०.७
अधिष्ठानमथो वक्ष्ये	१३.१
अधिष्ठानसमं बाह्ये	११.४
अधिष्ठानस्य सौम्ये वा	९८.३१२
अधोनपाद्यथा दृश्यं	३६.२०८
अधोभागं परित्यज्य	४.२६
अधोभागे तु कुर्वीत	२२.८६
अधोभागे मुखं तस्या	५.२८
अधोमध्योर्ध्वभागं तु	४.२३
अधोमुखं ततो देवं	५४.६६
अधोमुखांस्तु कलशान्	८८.२५
अधोमुखाभ्यां पाणिभ्याम्	२६.६०
अधोवर्म यवं विद्याद्	३६.६४
अध्यर्धं मूलपद्मं स्याद्	१४.८८
अध्यर्धमानपादेन	१४.३३
अध्यर्धाधरपट्टी स्यात्	१४.८८
अध्यर्धेन महापट्टीम्	१६.२९
अध्येतृभिश्चतुर्भिश्च	२७.१८७
अध्वातीतो लयाङ्गं स्यात्	१०२.७
अनन्तं भोगमाक्रान्तं	१.९३
अनन्तं सूत्रके न्यस्त्वा	८५.३२
अनन्तमतिरिक्तं च	२९.१२३
अनन्तरा नन्दयवा	३६.१०६
अनन्तादि शिखण्ड्यन्तं	८८.५९
अनन्तेशं च सूक्ष्मं च	२०.२१८
अनन्तो वासुकिश्चैव	३९.२९
अनयोश्चात्र कुर्वीत	७३.३५
अनयोस्तु विना कालं	१०१.९९
अनलं व्योमनाम्नस्तु	१.५०

	पटलः श्लोकश्च		पटलः श्लोकश्च
अनलं व्योमसंज्ञाच्च	१.५९	अन्तःप्रविष्टे देवे तु	२५.३६
अनलमक्षसूत्रं च	३६.२७४	अन्तःसालस्थदेवानां	अनु० ५.७
अनलास्यमलक्ष्यं च	२९.२५८	अन्तःसालस्य बाह्ये स्यात्	अनु० ५.९
अनाचार्यं वरयेच्चेद्	१०३.२८	अन्तःस्थेष्वष्टकुण्डेषु	१८.१२२
अनाचार्यकुले जातान्	८४.३४	अन्तरालं तु तेषां च	७१.४१
अनादिः शिव एव स्यात्	६३.१२	अन्तरालस्य मानं स्यात्	३७.३९
अनादित्वं कथं तस्य	६३.११	अन्तरालेऽथवा कुर्यात्	१४.८२
अनादिशैवभेदेन	६३.८	अन्तरालेषु चान्येषु	६.२७
अनामिकां च कृत्वाथ	४१.१६	अन्तरिक्षोद्भवाः सर्वे	७२.३
अनामिकापृष्ठलग्नं	२६.२२	अन्तरीतकं विज्ञेयं	६५.२
अनामिकामूलपर्वे	२६.५५	अन्तरीतप्रतिष्ठायां	अनु० २.७
अनावर्ते तथावर्ते	९८.१४८	अन्तर्बलिं क्रमाच्चैव	१०३.९३
अनुक्तं चेद्भवेत्किंचित्	९७.६३	अन्तर्बहिश्च तद्धाम्नो	७०.३३
अनुक्तानां तु सर्वेषां	५७.३८	अन्तर्बिसिनिकं कुण्डं	९८.२१७
अनुगृह्य प्रसीदेति	१८.२७२	अन्तर्बिसिनिकं कुण्डं	९८.३४१
अनुग्रहाय लोकानां	३०.१८	अन्तर्मण्डलकं पूर्वम्	३८.४
अनुज्ञातो मया वर्गं	५३.५	अन्तर्मण्डलकं यत्तत्	३८.५
अनुज्ञानन्तरं पश्चात्	१०३.४८	अन्तर्मण्डलकं हित्वा	३८.५१
अनुनासिकविसर्गौ	५.५०	अन्तर्मण्डलके क्षिप्तो	अनु० ४.१९
अनुभूय कृतां वृत्तिं	२०.७	अन्तर्मण्डलके द्वारम्	३८.२९
अनुयातो गुरुः कर्त्रा	१८.२२७	अन्तर्मण्डलके पूर्वं	३९.२
अनुशैवो बाहुजः स्याद्	६३.९	अन्तर्मण्डलके वापि	३८.३६
अनुष्ठानविशेषेण	६३.२७	अन्तर्मण्डलगं मानम्	३८.११
अनुसंज्ञिकशैवास्तु	६३.२७	अन्तर्मण्डलमध्ये तु	३९.१६
अनुसृत्य तु तद्गच्छेत्	१९.११४	अन्तर्मण्डलमानं वा	३८.१४
अनेकशिवरात्रौ तु	६३.४९	अन्तर्मण्डलसालादौ	७६.७२
अनेन मन्त्रवर्येण	२०.१७३	अन्तर्यागं ततः कुर्यात्	२०.११०
अनेन मन्त्रवर्येण	६४.१७	अन्तर्यागं ततः कृत्वा	७७.६
अनेन हस्तमानं च	१२.६	अन्तर्यागाधिकारोऽत्र	२.३०
अन्तःकोणं प्रकर्तव्यं	९८.२२१	अन्तर्यागो हि तत्पूजा	२.२८
अन्तः प्रदक्षिणं कुर्यात्	२५.२९	अन्तर्हारं तु दण्डेन	३८.६
अन्तः प्रविश्य गर्भस्थ	५९.३०	अन्तर्हारकृते प्रोक्तं	६७.१६
अन्तः प्रविश्य देवाग्रे	६२.५	अन्तर्हारगतं कुर्यात्	३९.३४
अन्तः प्रविश्य देवाग्रे	७५.५१	अन्तर्हाराग्रतः कुर्याद्	३९.२
अन्तः प्रविश्य देव्यग्रे	५९.३४	अन्तर्हारेऽपि तच्छ्रेष्ठं	३८.३५
अन्तः प्रविश्य पुण्याहं	७५.४८	अन्तर्हारे महेशस्य	९६.१७
अन्तः प्रविश्य वेद्यग्रे	५३.३९	अन्तस्तम्भचतुष्के तु	२७.१६६

	पटलः श्लोकश्च		पटलः श्लोकश्च
अन्तस्तम्भचतुष्के तु	४०.४७	अन्यथा कुरुते मोहात्	९८.३४२
अन्तस्सालान्तरे चेद्धि	अनु० ५.७	अन्यथा कुरुते मोहात्	१०३.२६
अन्तिकं च तथा दूरं	२.७	अन्यथा कुरुते मोहात्	१०३.१००
अन्तिमस्तु शिवस्य स्यात्	२७.२३४	अन्यथा कुरुते मोहाद्	९५.८
अन्ते शास्तारं संपूज्य	८१.१९	अन्यथा कुरुते मोहाद्	९८.२७०
अन्त्यमेव हि शूद्रस्य	४.३९	अन्यथा चेदशुद्धःस्यात्	७१.७३
अन्त्यान्त्यलिङ्गान्नवलिङ्गक्लृप्तिं	४.८	अन्यथापि च कर्तव्या	७५.२
अन्त्यान्त्यलिङ्गान्नवलिङ्गक्लृप्तिः	४.१०	अन्यथा यदि मोहेन	अनु० २.१५
अन्त्येष्टौ केवला प्रोक्ता	अनु० २.१४	अन्यथा शिवतुल्योऽपि	९८.३३
अन्धं काणं च वर्ज्यं	१८.१९	अन्यदाभरणं प्रातः	२०.१३३
अन्धश्च निष्फलं यत्र	१०१.८९	अन्यपादं शिरोदेशे	३६.१३६
अन्धश्च बधिरः पङ्गुः	१०१.८७	अन्यपुण्यदिनान्ते च	८५.९
अन्नं च दापयेश्चैव	१०३.६८	अन्यांशमन्तराले च	९८.१७३
अन्नमक्षप्रमाणं स्यात्	२१.११९	अन्यानि द्रव्यपात्राणि	२३.१४
अन्नलिङ्गयुतं वापि	२७.१३३	अन्यान्गणेश्वरांश्चापि	३६.३५७
अन्नशक्तिसमायुक्तं	९७.३०	अन्यान् गन्धोदकैः पूर्णान्	२९.२०१
अन्नशेषैः किं क्रियताम्	१०३.८०	अन्यासां सोमसूर्यौ च	४८.१९
अन्नाच्छतगुणं श्रेष्ठं	२२.१४२	अन्ये च बहवो मुख्याः	८४.५५
अन्नाभिषेके मन्त्रान्नं	८७.२०	अन्येन देशिकेनैव	८२.६
अन्नेन शालिसिद्धेन	२७.२१२	अन्येषां विषजन्तूनां	९८.३२
अन्यं कट्याश्रितं हस्तं	३६.२८२	अन्येषां स्वस्वनाम्नैव	२७.२०८
